र्वपत्नी पूर्वभार्या सती पतिव्रता ॥ “सती साध्वी पतिव्रता” इत्यमरः ॥ सती नाम देवी पितुर्दक्षस्य ॥ कर्तरि षष्ठी ॥ अवमानेन स्वभर्त्रवज्ञया प्रयुक्ता प्रेरिता योगेन योगमार्गेण विसृष्टदेहा त्यक्तदेहा सती । जन्मने पुनरुद्भवाय तां शैलवधूं मेनकां प्रपेदे ॥ अत्र पुरा किल सती देवी दक्षाध्वरे तत्कृतां स्वभर्त्रवज्ञामसहमाना पितरं प्रष्टुं चोपेक्ष्य मत्कर्तव्यकार्यं त्वज्जामातैव करिष्यतीति निर्धार्य देवकार्याणि साधयितुं च योगाग्निना स्वशरीरं ददाहेति पुराणवृत्तकथानुसंधेया ॥

सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन संपत् ॥ २२ ॥

सेति ॥ भव्या कल्याणी सा सती भूधराणामधिपेन हिमवता समाधिमत्यां नियमवत्यां तस्यां मेनकायां सम्यक्प्रयोगात्साध्वाचरणाद्धेतोरपरिक्षतायामभ्रष्टायां नीतावुत्साहगुणेनोत्साहशक्त्या ॥ कर्त्रा ॥ संपदिवोदपाद्युत्पादिता ॥ उत्पद्यतेर्ण्यन्तात्कर्मणि लुङ् ॥ “चिण्भावकर्मणोः” इति चिण्प्रत्ययः । “चिणो लुक्” इति तस्य लुक् ॥

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजंगमानां सुखाय तज्जन्मदिनं बभूव ॥ २३ ॥

प्रसन्नेति ॥ प्रसन्ना निर्मला दिशो यस्मिंस्तत्प्रसन्नदिक् । पांसुविविक्ता रजोरहिता वाता यस्मिंस्तत्तथोक्तम् । शङ्खस्य स्वनात्स्वनस्य वानन्तरं पुष्पवृष्टिर्यस्मिंस्तत्तथोक्तं तस्याः पार्वत्या जन्मदिनम् । स्थितिशीलाः स्थावराः शैलवृक्षादयः ॥ “स्थेशभासपिसकसो वरच्” इति वरच्प्रत्ययः ॥ जंगम्यन्ते भृशं गच्छन्तीति जंगमा देवतिर्यङ्मनुष्यादयः । स्थावराश्च जंगमाश्च तेषां द्वयानामपि शरीरिणां सुखायानन्दाय बभूव ॥

तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥ २४ ॥

तयेति ॥ स्फुरत्प्रभामण्डलया तया दुहित्रा सवित्री जनयित्री ॥ “स्वरतिसूति-सूयतिधूञूदितो वा” इतीडागमः ॥ विदूरस्याद्रेः सान्तभूमिर्विदूरभूमिः ॥ “अविदूरे विदूरस्य गिरेरत्युच्चरोधसः । काकनादीसमीपान्ते मणीनामाकरो भवेत्” इति रुद्रः ॥ नवमेघशब्दादुद्भिन्नया रत्नशलाकया रत्नाङ्कुरेणेव सुतरां चकासे रराज ॥

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषाञ्ज्योत्स्नान्तराणीव कलान्तराणि २५

दिन इति ॥ लब्ध उदयो यया सा लब्धोदया । उत्पन्नेत्यर्थः । अभ्युदितेत्यन्यत्र । दिने दिने प्रतिदिनम् ॥ "नित्यवीप्सयोः" इति वीप्सायां द्विरुक्तिः ॥ परिवर्धमाना । उभयत्र समानमेतत् । सा बाला । चन्द्रमस इयं चान्द्रमसी लेखेव लावण्यमयान्कान्तिविशेषमचुरान् ॥ "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" इति भूपालः ॥ विशेषानवयवान् ॥ "विशेषोऽवयवे व्यक्तौ" इत्युत्पलमालायाम् ॥ ज्योत्स्नायामन्तरमन्तर्धानं येषां तानि ज्योत्स्नान्तराणि ज्योत्स्नयान्तर्हितानि । तन्मयानीति यावत् । अन्याः कलाः कलान्तराणीव ॥ सुप्सुपेति समासः ॥ "स्यानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम्" इति शाश्वतः ॥ पुपोषोपचितवती ॥ इयं वाक्योपमेत्याह दण्डी । तल्लक्षणं तु—"वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते । एकानेकेवशब्दत्वात्सा तु वाक्योपमा द्विधा" ॥

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम २६

तामिति ॥ बन्धुप्रियां तां बालां बन्धुजनः पित्रादिः । अभिजनादागतेनाभिजनेन । पित्रादिपूर्वसंबन्धोपाधिकेनेत्यर्थः ॥ "अभिजनाः पूर्वबान्धवाः" इति काशिका ॥ नाम्ना । पर्वतस्यापत्यं स्त्री पार्वती ॥ "तस्यापत्यम्" इत्यण्प्रत्ययः ॥ इति जुहावाहूतवान् ॥ ह्वयतेर्लिटि रूपम् ॥ पर्वतजन्यत्वोपाधिना पार्वतीति नाम्ना प्रसिद्धिरिति भावः । पश्चादभिजननामप्रवृत्त्यनन्तरं मात्रा जनन्या ॥ उ इति संबोधने ॥ "उ इति वितर्कसंबोधनपादपूरणेषु" इति गणव्याख्याने ॥ माशब्दो निषेधे ॥ उ हे वत्से मा मा कुर्वित्येवंरूपेण । तपसस्तपश्चर्यायाः ॥ "वारणार्थानामीप्सितः" इत्यपादानत्वात्पञ्चमी ॥ निषिद्धा निवारिता सती सुमुखी सा बालोमेत्याख्यां नामधेयमुमाख्यां जगाम ॥

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ॥२७॥

महीभृत इति ॥ पुत्राश्च दुहितरश्च पुत्राः ॥ "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" इत्येकशेषः ॥ तेऽस्य सन्तीति पुत्रवान् ॥ भूमार्थे मतुप् ॥ तस्य पुत्रवतोऽपि बह्वपत्य-

१ तपसे. २ सधा; संज्ञा.

पापीसर्थः । महीभृतो हिमाद्रेर्दृष्टिश्चक्षुस्तस्मिन्नपत्ये तोके । "अपत्यं तोकं तयोः समे" इत्यमरः ॥ तस्यां पार्वत्यामित्यर्थः । तृप्तिं न जगाम । तथा हि । अनन्तपुष्पस्य नानाविधकुसुमस्यापि मधोर्वसन्तस्य संबन्धिनी द्विरेफमाला भृङ्गपङ्क्तिश्चूतस्य विकारे चूते चूतकुसुमे ॥ "अवयवे च प्राण्योषधिवृक्षेभ्यः" इति विकारार्थोत्पन्नस्याणप्रत्ययस्य लुक्प्रकरणे "पुष्पमूलेषु बहुलम्" इति पठनाल्लुक् ॥ सविशेषः सातिशयः सङ्गो यस्याः सा तथोक्ता । अत्यन्तासक्तेत्यर्थः ॥

प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥२८॥

प्रभेति ॥ प्रभामहत्या प्रकाशाधिकया शिखया ज्वालया दीप इव ॥ शिखादीपयोरवयवावयविभावाद्भेदेन व्यपदेशः ॥ त्रयो मार्गा यस्यास्तया त्रिमार्गया मन्दाकिन्या । तृतीया द्यौर्लोक इति त्रिदिवः स्वर्गः ॥ वृत्तिविषये त्रिशब्दस्य त्रिभागवत्पूरणार्थत्वम् । पृषोदरादित्वाद्दिव्शब्दादकारागमः । पुंस्त्वं लोकात् । दीव्यतेर्घञर्थे कविधानं दीव्यन्त्यत्र जना इति दिव इति क्षीरस्वामी ॥ तस्य मार्ग इव । संस्कारो व्याकरणजन्या शुद्धिस्तद्वत्या गिरा वाचा । "भद्रैषां लक्ष्मीर्निहिताधि वाचि" इति श्रुतेरिति भावः ॥ मनस ईषा मनीषा सास्यास्तीति मनीषी विद्वानिव ॥ शकन्ध्वादित्वात्साधुः ॥ तया पार्वत्या स हिमवान्पूतः शोधितश्च विभूषितश्च ॥ अत्र शिखागिरोरविशिष्टयोरुपमानानर्हत्वान्न विशेषणाधिक्यदोषः ॥ इयं मालोपमा ॥

मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ॥ २९ ॥

मन्दाकिनीति ॥ सा पार्वती बाल्ये वयसि क्रीडानां रसः स्वादः । रुचिरिति यावत् । तं क्रीडारसम् ॥ "रसो गन्धे रसः स्वादे" इति विश्वः ॥ निर्विशतीव भुञ्जानेव ॥ "निर्वेशो भृतिभोगयोः" इति विश्वः ॥ "आच्छीनद्योर्नुम्" इति विकल्पान्नुम्भावः ॥ सखीनां मध्यगता सती मन्दाकिन्याः सैकतेषु पुलिनेषु वेदिकाभिः कन्दुकैः ॥ क्रियया निर्वृत्तैः कृत्रिमैः ॥ "ड्वितः क्त्रिः" इति क्त्रिप्रत्ययः । "क्त्रेर्मम्नित्यम्" इति मपागमश्च ॥ पुत्रकैः पाञ्चालिकाभिः ॥ "पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता" इत्यमरः ॥ "संज्ञायां कन्" इति कन्प्रत्ययः ॥ मुहुः पुन पुना रेमे ॥

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥ ३० ॥

TI

KUMÂRASAMBHAVA

OF

KÂLIDÂSA

WITH

The Commentary (the Sanjîvinî) of Mallinâtha (1-8 Sargas and of Sîtârâma (8-17 Sargas).

EDITED

with various readings

BY

NÂRÂYANA BHATTA PARVANÎKARA

AND

KÂSHÎNÂTHA PÂNDURANGA PARABA.

Second Revised Edition.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE NIRNAYA-SÂGARA PRESS.

तामिति ॥ स्थिरः स्थेयानुपदेशः प्राग्भवीयो यस्यास्तादृशीम् । मेधाविनीमित्यर्थः । तां पार्वतीमुपदेशकाले प्राक्तनजन्मविद्याः । पूर्वजन्माभ्यस्तविद्या इत्यर्थः शरदि गङ्गां हंसमाला इव नक्तं रात्रौ महौषधिं तृणविशेषमात्मभासः स्वदीप्तय इव प्रपेदिरे ॥ उपमानसामर्थ्यादुपदेशमन्तरेणैवेति गम्यते ॥

असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे॥३१॥

असंभृतमिति ॥ अथ सा पार्वती । अङ्गयष्टेरसंभृतमयत्नसिद्धं मण्डनं प्रसाधनमनासवाख्यमासवाख्यारहितं मदस्य करणं साधनं कामस्य पुष्पव्यतिरिक्तमस्त्रमस्त्रभूतं बाल्याच्छैशवात्परमनन्तरभावि वयो यौवनं प्रपेदे प्राप । यौवनेनैव हि युवतयः प्रसाध्यन्ते माद्यन्ते काम्यन्ते चेति भावः ॥ अत्र द्वितीयपाद आसवरूपकारणाभावेऽपि तत्कार्यमदोक्तेर्विभावनालंकारः । तदुक्तम्—"कारणाभावे कार्योत्पत्तिर्विभावना" इति ॥ प्रथमतृतीययोस्त्वारोप्यमाणयोर्मण्डनमदनास्त्रत्वयोः प्रकृतोपयोगात्परिणामालंकारः । तल्लक्षणं तूक्तम् ॥

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥ ३२ ॥

उन्मीलितमिति ॥ नवयौवनेन प्रथमयौवनेन विभक्तमभिव्यञ्जितम् । पीनजघनादिसंस्थानमित्यर्थः । तस्याः पार्वत्या वपुस्तूलिकया कूर्चिकया । शलाकयेत्यर्थः ॥ "तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः" इति विश्वः ॥ उन्मीलितं रञ्जनद्रव्येणोद्भासितं समुत्कीर्णम् । रूपमिति यावत् । चित्रमालेख्यमिव । सूर्यांशुभिर्भिन्नं विकासितमरविन्दं पद्ममिव । चतस्रोऽस्रयो यस्य तच्चतुरस्रमन्यूनानतिरिक्तं यथा तथा शोभत इति चतुरस्रशोभि ॥ ताच्छील्ये णिनिः ॥ बभूव । चित्रारविन्दयोस्तूलिकातरणिकिरणसंबन्ध इव स्वतःसिद्धस्यैवाङ्गसौष्ठवस्य यौवनप्रादुर्भावोऽभिव्यञ्जको बभूवेत्यर्थः ॥

देवतानां रूपं पादाङ्गुष्ठप्रभृति वर्ण्यते मानुषाणां केशादारभ्येति प्राचिकाः । संप्रति सप्तदशभिः श्लोकैः पार्वत्याः पादादिकेशान्तवर्णनमारभते—

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ३३

अभ्युन्नतेति ॥ अभ्युन्नतयोरङ्गुष्ठनखयोः प्रभाभिर्निमित्तेन निक्षेपणात्प्रक्षेप-

१ स्तु. २ अनुत्तम.

न्यासाद्धेतोः। रागमन्तर्गतं लौहित्यम्॥"रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु" इति शाश्वतः॥ उद्गिरन्तौ वमन्तौ। बहिर्निःसारयन्ताविव स्थिताविसर्थः॥ अत्रोद्गिरतेर्गौणार्थत्वान्न ग्राम्यतादोषः। प्रत्युत गुण एव। यथाह दण्डी—"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते" इति॥ तस्याश्चरणौ तच्चरणौ। पृथिव्यामव्यवस्थां व्यवस्थारहिताम्। संचारिणीमिसर्थः। स्थलारविन्दश्रियमाजहतुः॥ स्थलविशेषणान्नियतलौहित्यलाभः। अत्र सामुद्रिकाः—"यस्या रक्ततलौ पादावुन्नताग्रौ तलस्पृशौ। निगूढगुल्फौ निहतौ सा स्यान्नृपतिसंमता" इति॥ अत्रोपमानधर्मस्यारविन्दश्रियश्चरणयोरुपमेययोरसंभवादरविन्दश्रियमिव श्रियमिति प्रतिबिम्बीकरणाक्षेपान्निदर्शनालंकारः। सा च संबन्धेऽसंबन्धलक्षणातिशयोक्त्यनुप्राणिताव्यवस्थामित्यनेन स्थलारविन्दस्य स्थैर्यसंबन्धेऽप्यसंबन्धाभिधानात्। निदर्शनालक्षणं तु—"असंभवद्धर्मयोगादुपमानोपमेययोः। प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना" इति॥

सा राजहंसैरिव संनताङ्गी गतेषु लीलाञ्चितविक्रमेषु
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरसिञ्जितानि ॥ ३४ ॥

सेति॥ प्रत्युपदेशलुब्धैः। "गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थी नोपपद्यते" इति न्यायादिति भावः। तदेव व्यनक्ति—नूपुरसिञ्जितान्यादित्सुभिरादातुमिच्छुभिः। मञ्जीरसिञ्जितमञ्जुकूजितोपदेशमिच्छद्भिरित्यर्थः। राजहंसैः संनताङ्गी। कुचभारादिति भावः। सा पार्वती लीलाभिर्विलासैरञ्चिताः पूजिता विक्रमाः पादन्यासा येषु तेषु॥ "अञ्चेः पूजायाम्" इतीडागमः॥ "लीला विलासक्रिययोः" इत्यमरः॥ गतेषु विषयेषु व्यनीयतेव विनीता किमु। अन्यथा कथमस्या हंसगमनमित्युत्प्रेक्षा॥

वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये।
शेषाङ्गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ३५

वृत्तेति॥ वृत्ते वर्तुले पूर्वमनुगतेऽनुपूर्वे। गोपुच्छाकार इत्यर्थः। वृत्ते च तेऽनुपूर्वे च वृत्तानुपूर्वे नातिदीर्घे च॥ महाविभाषया न समासः। नञो विशेषणत्वे समासप्रयोगादेव ज्ञेयम्। शुभे मङ्गले। तस्या इमे तदीये जङ्घे प्रसृते॥ "जङ्घा तु प्रसृता" इत्यमरः॥ सृष्टवतो निर्मितवतो विधातुः स्रष्टुः शेषाङ्गनिर्माणविधौ। जङ्घान्यनिरिक्तावयवनिर्माणार्थमित्यर्थः। उत्पाद्य पुनः संपाद्य लावण्ये कान्तिविशेष-

१ कनकाणां. २ विभ्रमेषु. ३ यत्नः.

विषये। लावण्यलक्षणं तूक्तम्। यत्न आसेव बभूवेत्युत्प्रेक्षा ॥ उपादानमन्तरेण कार्यस्य दुष्करत्वात्तदङ्गानां च लावण्योपादानकलापपूर्वसंपादितस्य च जङ्घार्थमेव कार्त्स्न्येन विनियोगात्पुनर्लावण्यसंपादने यत्नः स्यादेवेत्येतादृक्सौन्दर्यं तज्जङ्घे इति भावः ॥ आसेति बभूवार्थे। "तिङन्तप्रतिरूपकमव्ययम्" इत्याह शाकटायनः॥ वल्लभस्तु—"न तिङन्तप्रतिरूपकमव्ययम् "अस्तेर्भूः" इति भ्वादेशनियमात्तादृशतिङन्तस्यैवाभावात् । किंतु कवीनामयं प्रमादिकः प्रयोगः" इत्याह । वामनस्तु—"अस गतिदीप्त्यादानेष्विति धातोर्लिटि रूपमिदम्" इत्याह । अस इत्यनुदात्तेदीप्त्यर्थे । आस दिदीपे । प्रदीप्त इत्यर्थः ॥

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः ।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ३६

नागेन्द्रेति ॥ नागेन्द्राणामैरावतादीनां हस्ताः कराः त्वचि चर्मणि कर्कशत्वात्कदलीविशेषा रामरम्भादय एकान्तशैत्यान्नियतशैत्याद्धेतोः । लोके परिणाहि वैपुल्ययुक्तम् ॥ "परिणाहो विशालता" इत्यमरः ॥ रूपं लब्ध्वापि । अपिशब्दात्करिकदलीमात्रस्य तादृक्परिणाहो नास्तीति भावः । तस्या ऊर्वोस्तदूर्वोरुपमानबाह्या जाता उपमानक्रियानर्हा बभूवुः । तदूर्वोर्न कार्कश्यं नाप्येकान्तशैत्यमस्तीति भावः ॥

एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यद्गिरिशेन पश्चादनन्यनारीकमनीयमङ्कम् ॥ ३७॥

एतावतेति ॥ अनिन्दिताया अनवद्यायाः पार्वत्याः काञ्चीगुणस्थानं नितम्बबिम्बं यदेतावता ननु एतावतैव ॥ "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः ॥ शोभत इति शोभि ॥ आवश्यके णिनिः । ततस्समासः ॥ अनुमेयं शोभित्वं शोभा यस्य तदनुमेयशोभि ॥ "समस्यमानं गतार्थत्वात् अप्रयुक्तः" इत्याह वामनः ॥ पश्चादारूढैः स्पृष्टेऽपि पश्चात् । तपश्चर्यानन्तरमित्यर्थः । गिरौ शेत इति गिरिशः शिवः ॥ "गिरौ डश्छन्दसि" इति डप्रत्ययः ॥ भाषायामपि कविभिर्दृश्यते । यद्वा गिरिः कैलासोऽस्यास्ति गिरिशः ॥ लोमादिपामादिशप्रत्ययः ॥ तेन गिरिशेन । अन्यासां नारीणां कमनीयः कामयितुं शक्यो न भवतीत्यनन्यनारीकमनीयमङ्कं नितम्बारोपितमभिरोपितमिति यत् । एतावता लिङ्गेनेति पूर्वेणान्वयः ॥ गोदोहनं भ्वादिकर्मणि क्तः ॥ "हरः पोऽन्यतरस्याम्" इति ह्रस्वाभावः पक्षे । अन्यैर्नारीभिः कमनीयं न भवतीत्यर्थः । प्रधाने कर्मणि क्तः ॥ गिरिशानितम्बत्वं हि शोभितत्वम्

सौन्दर्यं गिरिशाङ्कारूढत्वाद्व्यतिरेकेण नार्यन्तरनितम्बबिम्बवत् । विपक्षे हेतु-
नुक्तिरेव बाधिका । दाक्षायणीनितम्बबिम्बस्य तु पक्षसपक्षयोरन्यतरभावानतिवृ-
त्तेर्निष्कलङ्कमनुमानमित्यलमस्थानसंरम्भेण ॥

तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवलोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः ॥३८॥

तस्या इति ॥ नीवीं वस्त्रग्रन्थिम् ॥ "स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि
च" इत्यमरः ॥ अतिक्रम्यातीत्य नतं निम्नं नाभिरन्ध्रं प्रविष्टा प्रविशन्ती तन्वी
सूक्ष्मा तस्याः पार्वत्या नवरोमराजिः । सितेतरस्यासितस्य । इन्द्रनीलस्येत्यर्थः ।
तस्याः पार्वत्या मेखला तन्मेखला । तस्या इत्यनुवृत्तौ पुनस्तच्छब्दोपादानं वा-
क्यान्तरत्वात्सोढव्यम् । यद्वा तस्या नीव्या मेखला तन्मेखला तत्र तदवस्थानात् ।
तस्या मध्यमणेरर्चिः प्रभेव रराज ॥ "ज्वालाभासोर्नपुंस्यर्चिः" इत्यमरः ॥

मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम् ॥३९॥

मध्येनेति ॥ "वेदिः परिष्कृता भूमिः" इत्यमरः ॥ वेदिविलग्नमध्या वेदिव-
त्कृशमध्या । तनुमध्येति यावत् । सा बाला पार्वती । मध्येन मध्यभागेन चारु
सुन्दरं वलित्रयं कामस्यारोहणार्थं नवयौवनेन प्रयुक्तं रचितं सोपानमिव बभा-
रेत्युत्प्रेक्षा ॥

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ४०

अन्योन्येति ॥ अन्योन्यं परस्परम् ॥ "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये"
इति द्विरुक्तिः ॥ "समासवच्च बहुलम्" इति बहुलवचनादसमासपक्षेऽपि पूर्व-
पदस्थस्य सुपः सुर्वक्तव्यः ॥ उत्पीडयदुपरुन्धत्पाण्डु गौरमुत्पलाक्ष्याः स्तनद्वयं
तथा तेन प्रकारेण प्रवृद्धम् ॥ कर्तरि क्तः ॥ श्याममुखस्य कृष्णचूचुकस्येति स्वरूपव-
र्णनं तस्य स्तनद्वयस्य मध्ये यथा येन प्रकारेण मृणालसूत्रान्तरं बिसतन्तुमात्रावका-
शोऽप्यलभ्यं लब्धुमशक्यम् ॥ "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये"

१ नीला. २ राजी. ३ नवयौवनस्य कामेन. ४ चारु. ५ विवृद्धम्.

३८-३९ श्लोकयोर्मध्येऽयं श्लोको दृश्यते—

गम्भीरनेत्राभिहृदसंनिधाने रराज नीला नवलोमराजिः ।

इत्यमरः ॥ अत्र संबन्धेऽसंबन्धरूपातिशयोक्त्यलंकारः । कुचयोः पीवरत्वातिशयार्थमवकाशासंबन्धेऽप्यसंबन्धाभिधानादिति ॥

लोके सुकुमारत्वमेव कुसुमास्त्रस्य साधकत्वमिति स्थिते सत्याह—

शिरीषपुष्पाधिकसौकुमार्यौ बाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य यौ कण्ठपाशौ मकरध्वजेन ॥४१॥

शिरीषेति ॥ तस्या इमौ तदीयौ बाहू शिरीषपुष्पादधिकं सौकुमार्यं मार्दवं ययोस्तयोक्ताविति मे वितर्क ऊहः । कुतः । यौ बाहू पराजितेनापि पूर्वं निर्जितेनापि मकरध्वजेन कामेन हरस्य कण्ठपाशौ कण्ठबन्धनरज्ज्वौ कृतौ । कण्ठालिङ्गनं प्रापितावित्यर्थः । तदसाध्यसाधनात्तत आधिक्यमिति भावः ॥ अत्र बाह्वोरारोपितकण्ठपाशत्वस्य प्रकृतवैरनिर्यातनोपयोगात्परिणामालंकारः ॥

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ॥४२॥

कण्ठस्येति ॥ स्तनाभ्यां बन्धुरस्योन्नतस्य तस्याः पार्वत्याः कण्ठस्य गलस्य निस्तलस्य वर्तुलस्य मुक्ताकलापस्य मुक्ताभूषणस्य च ॥ "वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम्" । "कलापो भूषणे बर्हे तूणीरे संहतावपि" इति चामरः ॥ अन्योन्यशोभाजननाद्भूषणभूष्यभावोऽलंकारालंकार्यभावः साधारणः समानो बभूव । उभावप्यन्योन्यस्य भूष्यौ भूषणे च बभूवतुरित्यर्थः ॥ अत्र कण्ठमुक्ताकलापयोः शोभाक्रियाद्वारेणान्योन्यभूषाजनकत्वादन्योन्यालंकारः । तदुक्तम्—"परस्परं क्रियाजननमन्योन्यम्" इति ॥

इदानीं पार्वतीवदनं चन्द्रकमलसदृशमित्येतदेव वचोभङ्ग्याह—

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥४३॥

चन्द्रमिति ॥ लोला चपला । परिभ्रमणशीलेत्यर्थः । लक्ष्मीः कान्त्यभिमानिनी देवता चन्द्रं गता प्राप्ता सती पद्मगुणान्सौगन्ध्यादीन्न भुङ्क्ते नानुभवति । पद्माश्रिता सती चन्द्रमस इमां चान्द्रमसीमभिख्यां शोभाम् ॥ "अभिख्या नामशोभयोः" इत्यमरः ॥ अमृतवदानान्दनीं न भुङ्क्ते । उमामुखं प्रतिपद्य तु द्वे चन्द्रपद्मे

४१-४२ श्लोकयोर्मध्येऽयं श्लोको दृश्यते—

[illegible]

[illegible]

संश्रयः कारणं यस्यास्तां शिरःस्थां श्रीमिमानः दुघ्याप । ...गुणसंसर्गात् ... भावः ॥ अत्रोपमानभूतचन्द्रापेक्षयोपमेयस्योमाननस्याधिक्यवर्णनात् व्यतिरेकालंकारः । तदुक्तम्—" भेदप्राधान्येनोपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः " इति ॥

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥४४॥

पुष्पमिति ॥ पुष्पं पुण्डरीकादिकं प्रवाले पल्लवे उपहितं निहितं स्याद्यदि ॥ " प्रवालो वल्लकीदण्डे विद्रुमे पल्लवेऽपि च " इति विश्वः ॥ मुक्ताफलं वा स्फुटे निर्मले विद्रुमे तिष्ठतीति स्फुटविद्रुमस्थं स्याद्यदि । ततस्तर्हि विशदस्य शुभ्रस्य ताम्रे अरुणे ओष्ठे पर्यस्ता प्रसृता रुक्कान्तिर्यस्य तथोक्तस्य तस्याः पार्वत्याः स्मितस्यानुकुर्यात् । स्मितमनुकुर्यादित्यर्थः । अत्र " मापाणामश्नीयात् " इतिवत्संबन्धमात्रविवक्षया षष्ठी । अत्र पुष्पप्रवालयोर्मुक्ताविद्रुमयोश्चासंबन्धेऽपि संबन्धोक्त्यातिशयोक्तिः । " सा च संभावना " इत्यलंकारसर्वस्वकारः । विशेषतस्तु पुष्पमुक्ताफलयोरुपमानयोः प्रकृतोत्कर्षार्थमुपमेयताकल्पनात्प्रतीपालंकारः । तदुक्तम्—" उपमानस्याक्षेप उपमेयताकल्पनं वा प्रतीपः " इति लक्षणात् । स च पूर्वोक्तातिशयोक्त्यनुप्राणित इति ॥

स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना ॥४५॥

स्वरेणेति ॥ अभिजातवाचि मधुरभाषिण्यां तस्यां पार्वत्याममृतस्रुताऽमृतस्राविणेव ॥ क्विप् ॥ स्वरेण नादेन प्रजल्पितायामलपन्त्याम् ॥ कर्तरि क्तः ॥ अन्यैः काकादिभिः पुष्टान्यपुष्टा कोकिलापि ॥ मुख्यया वृत्त्या जातिवचनत्वाभावाद् ङीवभावः ॥ ताड्यमाना वाद्यमाना विषमबद्धा तन्त्रीर्वितन्त्रीरिव ॥ "अवितृस्तृतन्त्रिभ्य ईः" इति तन्त्रीधातोरौणादिक ईप्रत्ययः । ङीवभावाच्च "हल्ङ्याब्भ्यः—" इति सुलोपः । तदुक्तम्—" अवीलक्ष्मीतरीतन्त्रीह्रीधीश्रीणामुणादितः । स्त्रीलि-

---

१ ताम्रोष्ठ. २ अन्यपुष्टाः. ३ शब्दाः.

४५–४६ श्लोकयोर्मध्ये इमौ श्लोकौ दृश्येते—

... ... मेतरां रराज ।
... पुष्पवन्तौ ॥ (१ नितरां बभास. २ शाला. ३ सेवासमेतौ.)

ताटङ्कपत्रे विरराज तस्याः ... ... णद्वयस्थम् ।
मत्वा भवित्री मदनारिपत्नीं सेवासमेताविव पुष्पवन्तौ ॥ (१ युग्मम्. २ पुष्पदन्तौ.)

ङ्गानाममीषां तु न सुलोपः कदाचन" इति । एते ङीबन्ता न भवन्तीत्यर्थः ॥ श्रोतुर्जनस्य प्रतिकूलशब्दा कर्णकठोरनादा भवतीति शेषः ॥

प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ॥४६॥

प्रवातेति ॥ प्रवाते प्रभूतवातस्थले यन्नीलोत्पलं ततो निर्विशेषं निर्भेदम् । तत्सदृशमित्यर्थः । अधीरविप्रेक्षितं चकितविलोकितमायताक्ष्या विशालनेत्रया तया पार्वत्या मृगाङ्गनाभ्यो हरिणीभ्यो गृहीतमभ्यस्तं नु । अथवा मृगाङ्गनाभिस्ततस्तस्याः पार्वत्याः ॥ पञ्चम्यास्तसिल् ॥ गृहीतं नु ॥ अत्र विवक्षितस्य परस्परग्रहणस्योत्प्रेक्षणादुत्प्रेक्षेति केचित् । तदुपजीविसंदेहालंकार इत्यन्ये । उभयोः संकर इत्यपरे ॥

तस्याः शलाकाञ्जननिर्मितेव कान्तिर्भ्रुवोरायतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच ॥४७॥

तस्या इति ॥ आयतलेखयोर्दीर्घरेखयोस्तस्याः पार्वत्या भ्रुवोः संबन्धिनी शलाकयाञ्जनेन निर्मितेव स्थिता या कान्तिर्लीलाचतुरां विलाससुभगां तां कान्तिं वीक्ष्यानङ्गः स्वचापसौन्दर्येण यो मदस्तं मुमोच ॥ इह सौन्दर्यातिशयोक्तिः ॥

लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्यः ॥ ४८ ॥

लज्जेति ॥ तिरश्चां तिर्यग्जातीनां चेतसि लज्जा स्याद्यदि । संशयाभावोऽसंशयम् । संदेहो नास्तीत्यर्थः । पर्वतराजपुत्र्याः ॥ "शार्ङ्गरवाद्यञो ङीन्" इति ङीन् ॥ तं प्रसिद्धं केशपाशं केशकलापम् ॥ "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः ॥ प्रसमीक्ष्य दृष्ट्वा चमर्यो मृगीविशेषा बालाः प्रिया यासामिति विग्रहे बालप्रियास्तासां भावो बालप्रियत्वम् । प्रियबालत्वमित्यर्थः ॥ आहिताग्न्यादिपाठाद्वा परनिपातः । "त्वतलोर्गुणवचनस्य" इति पुंवद्भावः ॥ शिथिलं कुर्युः । निर्लज्जत्वाच्च शिथिलयन्तीत्यर्थः ॥ अतएवात्र निर्लज्जत्वकरणे हेतोराद्यपादे वाक्यार्थत्वेनोक्त्या काव्यलिङ्गाख्यालंकारः । तदुक्तम्—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति ॥

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ॥४९॥

---

१ [illegible]

सर्वोपमेति ॥ किंबहुना सा पार्वती विश्वसृजा विधात्रैकत्र तिष्ठतीत्येकस्थं तस्य सौन्दर्यस्य । सर्ववस्तुगतस्येत्यर्थः दिदृक्षयेव प्रयत्नाद्यथाप्रदेशं क्रमाद्विनिवेशितेन स्थापितेन सर्वेषामुपमाद्रव्याणां चन्द्रारविन्दाद्युपमानवस्तूनां समुच्चयेन समाहारेण निर्मिता ॥ दिदृक्षयेवेति फलोत्प्रेक्षा दर्शनार्थित्वाद्विश्वसृज इति ॥

तां नारदः कामचरः कदाचित्कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्धहरां हरस्य ॥ ५० ॥

तामिति ॥ कामेनेच्छया चरतीति कामचरो नारदः कदाचित्पितुर्हिमवतः समीपे कन्यां तां पार्वतीं प्रेक्ष्य किल प्रेम्णा न त्वन्यथा हरस्य शिवस्यार्धं हरतीत्यर्धहरा ॥ "हरतेरनुद्यमनेऽच्" इत्यच्प्रत्ययः ॥ शरीरस्यार्धहरां शरीरार्धहराम् ॥ कुलधुरंधरादिवदवयवद्वारा समुदायविशेषकत्वात्समासः । अन्यथा त्वर्धस्य समप्रविभागवचनत्वादर्धशरीरेति स्यात् ॥ एकवधूमसपत्नीकां भार्याम् ॥ "पूर्वकाल-" इत्यादिना समासः ॥ भवित्रीं भाविनीं समादिदेश । हरस्यार्धाङ्गहारिण्येकपत्नी भविष्यतीत्यादिष्टवानित्यर्थः ॥

गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः ।
ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम्॥५१॥

गुरुरिति ॥ गुरुः पिता ॥ "गुरू गीष्पतिपित्राद्यौ" इत्यमरः ॥ अतो नारदवचनाद्धेतोरस्याः पार्वत्याः प्रगल्भे वयस्यपि यौवने सत्यपि निवृत्तोऽन्यस्मिन्वरे जामातर्यभिलाषो यस्य स तथोक्तः सन् ॥ "वरो ना रूपजामात्रोः" इति वैजयन्ती ॥ तस्थौ । वरान्तरं नान्विष्टवानित्यर्थः ॥ ननु कुतोऽसौ निर्बन्ध इत्यत आह—ऋत इति ॥ तथाहि मन्त्रैः पूतं संस्कृतं हूयत इति हव्यमाज्यादिकं कृशानोः पावकादृते कृशानुं विना ॥ "अन्यारादितर-" इत्यादिना पञ्चमी ॥ अपराणि तेजांसि सुवर्णादीनि नार्हन्ति । न भजन्तीत्यर्थः । ईश्वरादन्यस्य तद्योग्यस्याभावादुपेक्षेति भावः ॥

तर्हि तमेवाहूय दीयतामित्याशङ्क्याह—

अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ॥५२॥

अयाचितारमिति ॥ अद्रिर्हिमवानयाचितारमयाचमानं देवदेवं महादेवं सुतां पार्वतीं ग्राहयितुं स्वयमाहूय परिग्राहयितुं न शशाक नोत्सेहे । तथाहि साधुः सज्ज-

नः ॥ "साधुर्वार्धुपिके चारौ सज्जने चाभिधेयवत्" इति विश्वः ॥ अभ्यर्थनाभङ्ग-
भयेन पार्श्वविफलयमीत्येऽप्यर्थे विषये माध्यस्थ्यमौदासीन्यमवलम्ब्यते ॥

न च तथैव स्थितः । किं तूपायान्तरं चिन्तितवानिति वक्तुं प्रस्तौति—

यदैव पूर्वे जनने शरीरं सा दक्षरोपात्सुदती ससर्ज ।
तदाप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ॥५३॥

यदेति ॥ शोभना दन्ता यस्याः सा सुदती ॥ "वयसि दन्तस्य दतृ" इति
दत्रादेशः ॥ "उगितश्च" इति ङीप् ॥ सा पार्वती पूर्वे जनने पूर्वस्मिञ्जन्मनि ॥
"पूर्वादिभ्यो नवभ्यो वा" इति स्मिन्नादेशविकल्पः ॥ "पूर्वं ज्वलने" इति
पाठे पूर्वं दाक्षायणीत्वे ज्वलने योगाग्नौ ॥ यदा यस्मिन्काले दक्षरोपाच्छरीरं देहं
ससर्ज तत्याज । तदाप्रभृत्येव तदाद्येव यथा तथा पशूनां पतिः शिवो विमुक्तसङ्ग-
स्त्यक्तविषयासङ्गः सन् । अपरिग्रहोऽपत्नीकोऽभूत् । रूपान्तरं न परिजग्राहेत्यर्थः ॥
"पत्नीपरिजनादानमूलशापाः परिग्रहाः" इत्यमरः ॥

स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रवाहोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किंचित्क्वणत्किंनरमध्युवास ॥५४॥

स इति ॥ कृत्तिवासाश्चर्माम्बरः ॥ "अजिनं चर्म कृत्तिः स्त्री" इत्यमरः ॥
यतात्मा नियतचित्तः सः पशुप[...] गङ्गाप्रवाहेणोक्षिताः सिक्ता देव-
दारवो यस्मिंस्तथोक्तम् । मृ[...]स्तूरीगन्धवत् । कस्तूरीमृगसंचारा-
दिति भावः ॥ "[...]थ.कोलकम्" इत्यमरः ॥ क्वणन्तो
गायन्तः किंनरा यस्मि[...]स्थं सानुमध्युवास
कुत्रचिदस्य एवा[...]त्वम् ॥ "प्रस्थो
ऽस्त्री सानुमा[...]

गणा[...] [...]तोर्दधानाः ।

मन[...] [...]५५

[...]भूर्जत्व
यन्त [...]ञ्चिच्छ
वि [...] ॥ गिरि
भूर्ज
अनु

"स्त्रीभ्यो ढक्" इति भवार्थे ढक् ॥ "शिलाजतु च शैलेयम्" इति यादवः ॥ तेन नद्धेषु व्याप्तेषु शिलातलेषु निषेदुः । उपविविशुरित्यर्थः ॥

तुषारसंघातशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान् ।
दृष्टः कथंचिद्गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद ॥ ५६ ॥

तुषारेति ॥ तुषारसंघाता हिमघनास्त एव शिलास्ताः खुराग्रैः समुल्लिखन्विदारयन्दर्पेण कलो मधुरध्वनिर्यस्य स दर्पकलो विविग्नैर्भीतैर्गवयैर्गोसदृशमृगविशेषैः कथंचित्कृच्छ्रेण दृष्टः । ककुदमस्यास्तीति ककुद्मान्वृषभोऽसोढः सिंहानां ध्वनिर्येन स सिंहध्वनिमसहमानः सन् । उन्ननादोच्चैर्ननाद । जगर्जेत्यर्थः । स्वभावोक्तिरलंकारः । तदुक्तम्—"स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति ॥

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः ।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार ॥५७॥

तत्रेति ॥ तपसः फलानामिन्द्रत्वादीनां स्वयं विधाता जनयिता । दातेत्यर्थः । अष्टौ मूर्तयो यस्य सोऽष्टमूर्तिरीश्वरः ॥ "भूतार्कचन्द्रयज्वानो मूर्तयोऽष्टौ प्रकीर्तिताः" इति ॥ तत्र प्रस्थे स्वं स्वकीयमेव मूर्त्यन्तरं मूर्तिभेदं समिद्भिः समिद्धं दीपितमग्निमाधाय प्रतिष्ठाप्य केनापि कामेन कयापि फलकामनया तपश्चचार चक्रे ॥ "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायात्कामेनेत्युक्तम् । तस्यावाप्तसमस्तकामत्वात्केनापीत्युक्तम् ॥

अनर्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम् ॥५८॥

अनर्घ्येति ॥ अद्रीणां नाथोऽद्रिनाथो हिमवान् । अर्घं मूल्यमर्हतीत्यर्घ्यः ॥ "मूल्ये पूजाविधावर्घः" इत्यमरः ॥ "दण्डादिभ्यो यः" इति यप्रत्ययः ॥ अर्घ्यो न भवतीत्यनर्घ्यस्तमनर्घ्यम् । अमूल्यमित्यर्थः । स्वर्ग ओकः स्थानं येषां तेषां स्वर्गौकसां देवानामर्चितम् । देवैः पूज्यमानमित्यर्थः ॥ "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तः ॥ "क्तस्य च वर्तमाने" इति षष्ठी ॥ तमीश्वरमर्घ्येण पूजार्थोदकेन ॥ "पादार्घाभ्यां च" इति यत्प्रत्ययः ॥ "षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि" इत्यमरः ॥ अर्चयित्वा पूजयित्वास्येश्वरस्याराधनाय सखीभ्यां जयाविजयाभ्यां समेतां प्रयतां नियतां तनूजां सुतां समादिदेशाज्ञापयामास ॥

प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥५९॥

---

१ अयम्. २ सनृद्धं.

प्रत्यर्थीति ॥ गिरिशः शिवः समाधेः प्रत्यर्थिभूतां प्रतिपक्षभूतामपि ॥ सु-प्सुपेति समासः ॥ श्रोतुमिच्छन्तीं शुश्रूषमाणां सेवमानाम् । सेवका हि सेव्ये दत्तकर्णा भवन्ति ॥ इच्छार्थे सन्प्रत्ययः ॥ "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदम् ॥ तां पार्वतीमनुमेनेऽङ्गीचकार । न प्रतिषिद्धवानित्यभिप्रायः । न चैतावता धीरस्य कश्चिद्विकार इत्याशयः ॥ धीरत्वमेवार्थान्तरन्यासेनाह—विकारेति ॥ विकारस्य प्रकृतेरन्यथाभावस्य हेतौ स्त्रीसंनिधानादिकारणे सति विद्यमानेऽपि येषां चेतांसि न विक्रियन्ते न विकृतिं नीयन्ते त एव धीराः ॥ 'विक्रियन्ते' इति कर्मणि लट् ॥

शुश्रूषाप्रकारमेवाह—

> अवचितबलिपुष्पा वेदिसंमार्गदक्षा
> नियमविधिजलानां बर्हिषां चोपनेत्री ।
> गिरिशमुपचचार प्रत्यहं सा सुकेशी
> नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ॥ ६० ॥

अवचितेति ॥ सुकेशी शोभनमूर्धजा ॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप् ॥ सा पार्वत्यवचितानि लूनानि बलिपुष्पाणि पूजाकुसुमानि यया सा वेदेर्नियमवेदिकायाः संमार्गे संमार्जने दक्षा नियमविधेर्नित्यकर्मानुष्ठानस्य यानि जलानि तेषां बर्हिषां कुशानां चोपनेत्र्यानेत्री सती तस्य गिरिशस्य शिरसि चन्द्रस्य पादै रश्मिभिः ॥ "पादा रश्म्यङ्घ्रितुर्यांशाः" इत्यमरः ॥ नियमितपरिखेदा निवर्तितपरिश्रमा सत्यहन्यहनि प्रत्यहम् ॥ "अव्ययं विभक्तिसमीपसमृद्धि-" इत्यादिना नियतार्थेऽव्ययीभावः ॥ "नपुंसकादन्यतरस्याम्" इत्यच्प्रत्ययः ॥ गिरिशमुपचचार शुश्रूषांचक्रे ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये उमोत्पत्तिर्नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

तस्मिन्निति ॥ तस्मिन्काले पार्वतीशुश्रूषाकाले तारकेण तारकनाम्ना वज्रणखपुत्रेण केनचिदसुरेण विप्रकृता उपद्रुता दिवमोकः स्थानं येषां ते दिवौकसो देवाः ॥ "दिवं स्वर्गेऽन्तरिक्षे च" इति विश्वः ॥ द्यौरोक इति पक्षे पृषोदरादित्वात्साधुः ॥ तुरं त्वरितं साहयत्यभिभवतीति तुराषाट् ॥ साहयतेश्चौरादिकात्क्विप् । "नहिवृतिवृषि–" इत्यादिना पूर्वपदस्य दीर्घः । प्रकृतिग्रहणे प्रातिपदिकस्यापि ग्रहणात् । मुग्धबोधकारस्तु तुराशब्दष्टावन्त इत्याचष्टे ॥ तं तुरासाहं देवेन्द्रम् ॥ अजादिषु साङ्रूपसाभावात् "सहेः साडः सः" इति षत्वं न भवति ॥ पुरोधाय पुरस्कृत्य । स्वयंभुवो ब्रह्मण इदं स्वायंभुवम् ॥ संज्ञापूर्वकविधेरनित्यत्वात् "ओर्गुणः" इति गुणो न ॥ धाम स्थानं ययुः । ब्रह्मलोकं जग्मुरित्यर्थः ॥

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥

तेषामिति ॥ परिम्लाना परिक्षीणा मुखश्रीर्मुखकान्तिर्येषां तथोक्तानां तेषां [देव]ानां ब्रह्मा सुप्तपद्मानां मुकुलितारविन्दानां सरसां प्रातर्दीधितिमान्सूर्य इवा[विर]भूत् । प्रकाशोऽभूदित्यर्थः ॥ "प्रकाशे प्रादुराविः स्यात्" इत्यमरः ॥ सूर्यो[पमा]नेन तेषां म्लानिहरणत्वं सूचितम् ॥ अत्रोपमालंकारः । तल्लक्षणं तु—"[स्व]तःसिद्धेन भिन्नेन संमतेन च धर्मतः । साम्यमन्येन वर्ण्यस्य वाच्यं चेदे[कदा उ]पमा" इति ॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ३ ॥

अथेति ॥ अथाविर्भावानन्तरं सर्वे ते देवाः सर्वतः समन्ततो मुखानि यस्य तं [सर्व]तोमुखम् । चतुर्मुखमित्यर्थः । वाचां विद्यानामीशं सर्वस्य जगतो धातारं स्रष्टारं [ब्रह्]माणं प्रणिपत्य नमस्कृत्य । अर्थादनपेताभिरर्थ्याभिः । अर्थयुक्ताभिरित्यर्थः ॥ ["]धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः ॥ वाग्भिरुपतस्थिरे । तुष्टुवुरित्यर्थः ॥ [दे]वपूजासंगतिकरणमित्रकरणपथिष्विति वक्तव्यम्" इत्यात्मनेपदम् ॥

स्तुतिप्रकारमाह "नमः" इत्यादिभिर्द्वादशभिः श्लोकैः—

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ ४ ॥

नम इति ॥ हे भगवन्निन्त्यध्याहार्य व्याख्येयम् । सृष्टेः प्राक् ॥ "अन्यारात्–"

इत्यादिनाभूत्तरपदयोगे पञ्चमी ॥ केवलात्मन एकरूपाय ॥ "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतेः ॥ "निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः" इत्यमरः ॥ पश्चात्सृष्टिप्रवृत्तिकाले । विभज्यतेऽनेनेति विभागः । गुणानां सत्त्वादीनां त्रयमेव विभागो यस्य तस्मै ॥ "गुणाः सत्त्वं रजस्तमः" इत्यमरः ॥ भेदमुपाधिम् । स्रष्टृत्वादिकमित्यर्थः । उपेयुषे प्राप्तवते ॥ "उपेयिवाननाश्वाननूचानश्च" इति निपातः ॥ अतएव त्रिमूर्तये ब्रह्मविष्णुरुद्ररूपिणे तुभ्यं नमः ॥ "नमःस्वस्ति–" इत्यादिना चतुर्थी ॥ उक्तं च—"नमो रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च । तमोरूपाय संहारे त्रिरूपाय स्वयंभुवे" इति ॥

यदमोघमपामन्तरुप्तं बीजमज त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥ ५ ॥

यदिति ॥ न जायत इत्यजः । हे अज । अपां जलानामन्तस्त्वया यदमोघमवन्ध्यं बीजं वीर्यमुप्तं निक्षिप्तम् ॥ "मुक्तम्" इति पाठे विसृष्टमित्यर्थः ॥ "शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च" इत्यमरः ॥ अतस्ते बीजाच्चराचरं स्थावरजंगमात्मकम् ॥ समाहारे द्वन्द्वैकवद्भावः ॥ विश्वं जगत् । उत्पन्नमिति शेषः । तस्य विश्वस्य । प्रभवत्यस्मादिति प्रभवः कारणं गीयसे ॥ "अदश्चराचरं विश्वं प्रभवस्तस्य गीयते" इति पाठे अद इदं चराचरं विश्वं तस्य बीजस्य प्रभवो गीयते । लोक इति शेषः ॥ अत्र मनुः—"अप एव ससर्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति ॥

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥

तिसृभिरिति ॥ एकः सृष्टेः प्रागेकलस्त्वं तिसृभिरवस्थाभिस्त्रिगुणमयीभिर्हरिहरब्रह्मस्वरूपाभिर्महिमानं निजशक्तिमुदीरयन्विजृम्भयन्प्रलयस्थितिसर्गाणामन्तस्थित्युत्पत्तीनां कारणतां गतः । इदं "पश्चाद्भेदमुपेयुषे" (२।४) इत्यस्य विवरणमतो न गतार्थत्वदोषः ॥

भूतसृष्टिकर्तृत्वमुक्त्वा मिथुनसृष्ट्यर्थं मूर्तिमतो ब्रह्मणो भेदमाह—

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥

स्त्रीपुंसाविति ॥ स्त्री च पुमांश्च स्त्रीपुंसौ ॥ "अचतुर–" इत्यादिनाच्प्रत्ययान्तो निपातः ॥ सिसृक्षया स्रष्टुमिच्छया भिन्नमूर्तेर्विभक्तशरीरस्य ते तवात्मनो

देहस्य भागावर्धभागौ ॥ "भागधा जीवे पुमो देहे ..." इति विश्वः ॥ ताविव भागौ यद्योर्निगमानं तत्त्वानिमानः । ... इति ... । निर्गृहीतेत्यर्थः । माता च पिता च पितरौ ॥ "पिता मात्रा" इत्येकशेषः ॥ द्वयोः । एर्धैरिति शेषः ॥ अत्र मनुः—"द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् । अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः" इति ॥

स्वकालपरिमाणेन[1] व्यस्तरात्रिंदिवस्य ते ।
यौ[2] तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥

स्वकालेति ॥ स्वकालस्य परिमाणेन "चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" इत्युक्तरूपेण व्यस्तं विभक्तं रात्रिंदिवं रात्र्यहनी यस्य तस्य ॥ यद्यपि "अचतुर-" आदिसूत्रेण रात्रौ च दिवा च रात्रिंदिवमिति सप्तम्यर्थे वृत्तौ द्वन्द्व इत्युक्तं तथापि "दोषामन्यमहः" "दिवामन्या रात्रिः" इत्यादौ कर्मवद्भावापि प्रातिपदिकार्थवृत्तित्वं कथंचित्प्रयोगबलादाश्रयणीयम् ॥ ते तव यौ तु स्वप्नावबोधौ तावेव भूतानां प्रलयोदयौ संहारसृष्टी । यदाहुः—"यदा स देवो जागर्ति तदैव चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" इति ॥ एतच्च दैनंदिनसृष्टिप्रलयाभिप्रायकं महाप्रलयस्य ब्रह्मणो वर्षशतान्ते भावित्वात् ॥

जगद्योनिरयोनिस्त्वं जगदन्तो[3] निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो[4] निरीश्वरः ॥ ९ ॥

जगदिति ॥ हे भगवन् । त्वं जगद्योनिर्जगत्कारणं स्वयमयोनिरनादित्वादकारणकस्त्वम् । अन्तयतीत्यन्तः ॥ पचाद्यच् ॥ जगतोऽन्तर्जगत्संहर्ता स्वयं निरन्तको नित्यत्वादन्तरहितः । त्वं जगतामादिर्जगदादिः । सृष्टेः प्रागपि सत्त्वित्यर्थः । अतएव स्वयमनादिरादिरहितः । त्वं जगतामीशो नियन्ता स्वयं निरीश्वरः । अनियम्य इत्यर्थः ॥ "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतिरेवात्र प्रमाणम् ॥ अत्रायोनिरित्यादौ नञ्तत्पुरुषाश्रयणे विरोधः । बहुव्रीहिणा तु तत्परिहार इति विरोधाभासालंकारः । यथाहुः—"विरोधाभासत्वे विरोधः" इति ॥

तव तु न प्रपञ्चस्येव जन्यतिरोधानज्ञानेषु परापेक्षेत्याह—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥ १० ॥

---

१ परिणामेन. २ यौ स्वप्नबोधौ तावेव; स्वप्नावबोधौ भूतानां तावेव. ३ अनन्तो जगदन्तकः; जगदन्तोऽप्यनन्तकः. ४ जगदीशोऽप्यनीश्वरः.

आत्मानमिति ॥ हे भगवन् । त्वमात्मानं लोकानुग्रहार्थं ब्रह्मरूपेणोत्पिपादयिषितं स्वस्वरूपमात्मनैव वेत्सि जानासि । सर्वापि क्रिया कर्तव्यार्थज्ञानपूर्विकेति भावः । तथात्मानमात्मनैव । आत्मन्येवेत्यत्रापि संबध्यते । स्वस्मिन्नेव सृजसि । अधिष्ठानमपि स्वयमेवेत्यर्थः ॥ "स्वे महिम्नि प्रतिष्ठितम्" इति श्रुतेः ॥ कृतिना समर्थेन । इदं सर्वत्र संबध्यते । आत्मना स्वेनैवात्मन्येव प्रलीयसे स्वस्मिन्नेव प्रलीनो भवसि ॥ लीयतेर्दैवादिकात्कर्तरि लट् । "प्रकृत्यादिभ्य उपसंख्यानम्" इति वार्तिकात्सर्वत्रात्मनेति तृतीया । न हि ते प्रपञ्चस्येव ज्ञानोत्पत्तिलयेषु परापेक्षेति फलितार्थः ॥

द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥ ११ ॥

द्रव इति ॥ त्वमित्यनुषज्यते । हे भगवन् । त्वं द्रवः सरित्समुद्रादिवद्रसात्मकोऽसि । संघातेन निबिडसंयोगेन कठिनो महीधरादिवत् । स्थूल इन्द्रियग्रहणयोग्यो घटादिवत् । सूक्ष्मोऽतीन्द्रियः परमाण्वादिवत् । लघुरुत्पतनयोग्यस्तूलादिवत् । गुरुर्हेमाद्रिवदचलनीयः । व्यक्तः कार्यरूपोऽसि । व्यक्तेतरः कारणरूपश्चासि । एवं विभूतिष्वणिमादिषु ते तव । प्रकामस्य भावः प्राकाम्यं यथाकामत्वम् ॥

उद्धातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥ १२ ॥

उद्धात इति ॥ हे भगवन् । यासां गिरां वाचामुद्धात उपक्रमः प्रणव ओंकारात्मकः ॥ "ओंकारप्रणवौ समौ" इति । "स्यादभ्यादानमुद्धात आरम्भः" इत्यमरः ॥ इदमुपसंहारस्याप्युपलक्षणम् ॥ "ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वतः । दहत्येनः कृतं पूर्वं परस्ताच्च विशेषतः" इति निरुक्तपरिशिष्टे यास्कः ॥ नीयन्त एभिरर्थविशेषा इति न्यायाः स्वराः । उक्तं च—"स्वरविशेषादर्थप्रतिपत्तिः" । "यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति ॥ यासां गिरां त्रिभिर्न्यायैरुदात्तानुदात्तस्वरितैः स्वरैरुदीरणमुच्चारणम् । यासां कर्म । प्रतिपाद्यमित्यर्थः । यज्ञो ज्योतिष्टोमादिः । न तु चैत्यवन्दनादिरिति भावः । फलं स्वर्गः । कर्मद्वारेति शेषः । कर्मस्वर्गौ प्रत्यवायापवर्गयोरप्युपलक्षणे । त्वं तासां गिराम् । वेदानामित्यर्थः । प्रभवत्यस्मादिति प्रभवः कारणम् । प्रणेता स्मर्ता वा मतभेदेन ॥

---

१ पुरस्कृतः. २ प्रभवः.

सांख्यमतेन स्तुवन्ति—

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥ १३॥

त्वामिति॥ हे भगवन्। त्वां पुरुषस्यार्थौ भोगापवर्गरूपस्तदर्थं प्रवर्तत इति पुरुषार्थप्रवर्तिनीं तां प्रकृतिं त्रैगुण्यात्मकं मूलकारणम्॥ "प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे" इति यादवः॥ आमनन्ति कथयन्ति॥ "म्ना अभ्यासे" इति धातोर्लट्। "पाघ्राध्मास्थाम्ना—" इत्यादिना मनादेशः॥ प्रकृतिपुरुषभेदाग्रहणात्प्रकृतिपुरुषाभेदव्यपदेशः। त्वामेव तां प्रकृतिं साक्षित्वेन पश्यतीति तद्दर्शिनमुदासीनं कूटस्थं पुरुषं विदुर्विदन्ति॥ "विदो लटो वा" इति झेर्जुसादेशः॥ "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतिरत्र प्रमाणम्॥

त्वं पितॄणामपि पिता देवानामपि देवता।
परतोऽपि परश्चासि विधाता वेधसामपि॥ १४॥

त्वमिति॥ हे भगवन्। त्वं पितॄणामग्निष्वात्तादीनामपि पिता। तेषामपि तर्पणीय इत्यर्थः। देवानामिन्द्रादीनामपि देवता। तेषामपि यजनीय इत्यर्थः। परतोऽपि परश्चासि। सर्वोत्तरोऽसीत्यर्थः॥ "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसश्च परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः" इति सर्वोत्तरत्वाभिधानात्॥ वेधसां दक्षादीनामपि विधाता स्रष्टासि॥

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम्॥ १५॥

त्वमेवेति॥ शश्वत्सिद्धः शाश्वतः॥ शैषिकोऽण्प्रत्ययः। यद्यपि "कालाट्ठञ्" इति ठञपवादः। अतएव सूत्रकारस्यापि प्रयोगः—"येषां च विरोधः शाश्वतिकः" इति। तथापि प्रयोगवशात्साधुरिति वामन इति॥ शाश्वतः प्रयुक्तः शाश्वतस्त्वमेव। हूयत इति हव्यं हविराज्यादिकम्। जुहोतीति होता यजमानश्चासि। भोज्यमभ्यवहार्यमन्नम्॥ "भोज्यं भक्ष्ये" इति निपातनात्कुत्वाभावः। भोक्ताग्न्यादश्चासि। वेद्यं साक्षात्कार्यं वस्तु वेदिता साक्षात्कर्ता चासि। ध्याता स्मर्ता च यत्परं वस्तु ध्येयं तच्चासि। साक्षात्कारसाधनभूतमत्ययविशेषप्रवाहो ध्यानम्॥

१ वेद्यं वेदयिता; वेद्यश्च वेदिता.

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयंगमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १६ ॥

इतीति ॥ वेधा ब्रह्मेति तेभ्यो देवेभ्यः ॥ "आख्यातोपयोगे" इत्यपादानत्वात्पञ्चमी ॥ यथार्थाः सत्या अतएव हृदयं गच्छन्तीति हृदयंगमा मनोहराः ॥ खच्प्रकरणे "गमेः सुप्युपसंख्यानम्" इति खच्प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः ॥ स्तुतीः स्तोत्राणि श्रुत्वा प्रसादाभिमुखोऽनुग्रहप्रवणः सन् । दिवौकसो देवान्प्रत्युवाच ॥

अथ कविराह—

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १७ ॥

पुराणस्येति ॥ द्रव्यगुणक्रियाजातिभेदेन चत्वारोऽवयवा यस्या इति चतुष्टयी चतुर्विधा ॥ "संख्याया अवयवे तयप्" इति तयप् । "टिड्ढाणञ्द्वयसज्-" इत्यादिना ङीप् ॥ शब्दानां प्रवृत्तिर्वैखरीप्रमुखा वाग्वृत्तिः । उक्तं च— "वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी" इति । पुराणस्य पुरातनस्य ॥ पृषोदरादित्वात्साधुः ॥ कवेः कवयितुस्तस्य ब्रह्मणश्चतुर्भिर्मुखैः समीरिता सती ॥ "तद्धितार्थ-" इत्यादिनोत्तरपदसमासः ॥ समाहारे चतुर्मुखीति स्यात् ॥ चरितार्थान्वर्थासीत् । चतुर्मुखोच्चारणाच्चातुर्विध्यं सफलमासीदित्यर्थः ॥

भगवानाह—

स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य वः ।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥ १८ ॥

स्वागतमिति ॥ हे प्राज्यविक्रमाः प्रभूतपराक्रमा देवाः ॥ "प्राज्यं भूरि प्रभूतं च" इति यादवः ॥ स्वान्स्वकीयानधीकारान्नियोगान् ॥ "उपसर्गस्य घञ्य-" इति वा दीर्घः ॥ प्रभावैः सामर्थ्यैरवलम्ब्याश्रित्य । यथाधिकारं स्थित्वापीत्यर्थः । युगपत्समकालं प्राप्तेभ्यः । युगपदागमनान्महत्कार्यमनुमीयत इति भावः । युगबाहुभ्यः । दीर्घबाहुभ्य इत्यर्थः । आजानुबाहुत्वं महापुरुषलक्षणम् । वो युष्मभ्यम् ॥ "बहुवचनस्य वस्नसौ" इति वसादेशः । "कर्मणा यमभिप्रैति-" इ-

---

१ रघु. २ ६८.

स्यत्र कर्मपदेन क्रियाग्रहणात्संप्रदानत्वम् ॥ स्वागतं शोभमानमागमनम् । काकुरत्रानुसंधेया ॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ १९ ॥

किमिति ॥ "वत्साः" इत्युत्तरश्लोकीयं (४।२८) संबोधनमत्राप्यनुषञ्जनीयम् । हे वत्साः पुत्रकाः । हिमेन नीहारेण क्लिष्टप्रकाशानि मन्दप्रभाणि ज्योतींषि नक्षत्राणीव ॥ "दीप्तितारान्हुताशेषु ज्योतिः" इति शाश्वतः ॥ वो युष्माकं मुखानि पुरा यथा पूर्वमिवात्मीयां द्युतिं न बिभ्रति । इदं किम् । किं निबन्धनमित्यर्थः ॥ किमिदमित्यनेन वाक्यार्थः परामृश्यते ॥

उक्तमेव प्रपञ्चयति सप्तभिः श्लोकैः—

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥ २० ॥

प्रशमादिति ॥ अर्चिषां तेजसां प्रशमान्निर्वाणादनुद्गीर्णसुरायुधम् । अनुदितचित्रप्रभमित्यर्थः। एतद्वृत्रस्य हन्तुरिन्द्रस्य कुलिशं वज्रम् । कुण्ठिता अश्रयो यस्य तत्कुण्ठिताश्रि कुण्ठितकोटीव लक्ष्यते दृश्यते ॥

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥

किं चेति ॥ किं चायमरिदुर्वारो रिपुदुष्प्रधर्षः प्रचेतसो वरुणस्य ॥ "प्रचेता वरुणः पाशी" इत्यमरः ॥ पाणौ पाशो रज्जुरायुधविशेषः । मन्त्रेण गारुडेन हतवीर्यस्य प्रतिबद्धशक्तेः फणिनः सर्पस्य दैन्यं शोच्यत्वमाश्रितः ॥ अत्र फणिनिष्ठदैन्यस्य पाशेऽसंभवाद्दैन्यमिव दैन्यमिति कल्पनादसंभवद्वस्तुसंबन्धो निदर्शनालंकारः ॥

कुबेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥ २२ ॥

कुबेरस्येति ॥ अपविद्धा त्यक्ता गदा येन सोऽपविद्धगदः । अतएव भग्नशाखो द्रुम इव स्थितः कुबेरस्य बाहुर्मनःशल्यम् । दुःखहेतुत्वान्मनसः शल्यप्रायमित्यर्थः ।

१ द्युमाम्; द्यनि. २ प्रभावाणि. ३ अनुद्धर्ण; अनुत्पूर्ण. ४ कुण्ठितश्री. ५ अपि.

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥

लब्धेति ॥ प्रथमं पूर्वं लब्धप्रतिष्ठा लब्धस्थितयः । लब्धावकाशा इत्यन्यत्र । यूयं बलवत्तरैः पौरुषातिरेकात्प्रबलतरैः । निरवकाशैरित्यपरत्र । परैः शत्रुभिरुत्सर्गाः सामान्यशास्त्राणि "मा हिंस्यात्" इत्येवमादीनि । अपोद्यन्त एभिरित्यपवादैः "गामालभेत" इत्यादिभिर्विशेषशास्त्रैरिव किं कृतव्यावृत्तयः कृतप्रतिष्ठाभङ्गाः । कृतविषयसंकोचरूपबाधा इत्यन्यत्र ॥ "विषयसंकोच एव बाधः" इत्याचार्याः । निषेधशास्त्रस्य वैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थापनाद्विषयसंकोच इत्यलमतिगहनावगाहनेन ॥

तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ २८ ॥

तदिति ॥ तत्तस्मात्कारणात् । हे वत्साः पुत्रकाः ॥ "वत्सस्तर्णकपुत्राद्योर्वर्षे वत्सं तु वक्षसि" इति विश्वः ॥ स्वयं पितामहत्वाद्वत्सा इत्यामन्त्रयते । संभूयागताः समागता इतो मत्तः किं प्रार्थयध्वम् । किमिच्छतेत्यर्थः । ब्रूत । लोकरक्षणे यूयमेव कर्तार इत्याह—मयि लोकानां सृष्टी रक्षा युष्मास्ववस्थिता । अतस्तदर्थमपि नास्ति मदपेक्षेत्यर्थः ॥

ततो मन्दानिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥

तत इति ॥ ततो भगवत्प्रश्नानन्तरं वासव इन्द्रो गुरुं बृहस्पतिम् ॥ "गुरू गीष्पतिपित्राद्यौ" इत्यमरः ॥ मन्दानिलोद्धूतो यः कमलाकरः स इव शोभत इति तेन तथोक्तेन नेत्राणां सहस्रेण नोदयामास प्रेरयामास । सहस्रग्रहणमाश्चर्यार्थम् । अनिमेषाणामपि प्रयत्नवशादक्षिस्पन्दो न विरुध्यते ॥

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥

स इति ॥ हरेरिन्द्रस्य ॥ "इन्द्रो दुश्च्यवनो हरिः" इति हलायुधः ॥ सहस्रान्नयनेभ्योऽधिकं सहस्रनयनाधिकम् । तदगोचरदर्शित्वादिति भावः । द्वे नेत्रे यस्य

१ न खलु स्थ बलोत्तरैः. २ प्रार्थयध्वे. ३ भूतानाम्. ४ चोदयामास; प्रेरयामास. ५ वृत्रहा.
६ द्विनेत्र. ७ [illegible]

तद्दिनेत्रम् । प्रसिद्धाच्चक्षुषोऽयं विशेष इत्यर्थः । चक्षुश्चक्षुर्भूतः ॥ चक्षुष्ट्वारोपस्य प्रकृतोपयोगात्परिणामालंकारः ॥ स वाचस्पतिः ॥ कस्कादित्वादलुक्सत्वे । "षष्ठ्याः पतिपुत्र–" इत्यादिना सत्वमिति स्वामी तत्र छन्दोविषयत्वात् ॥ प्राञ्जलिः सन् । अब्जासनं ब्रह्माणमिदमुवाच ॥

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३१ ॥

एवमिति ॥ हे भगवन् षड्गुणैश्वर्यसंपन्न । यदात्थ "कृतव्यापृत्तयः परैः" (२ । २७) इति यद्ब्रवीषि ॥ "ब्रुवः पञ्चानाम्–" इत्यादिनाहादेशः । "वर्तमानसामीप्ये वर्तमानवद्वा" इति वर्तमानप्रयोगः ॥ वामनस्तु भ्रान्तोऽयं प्रयोग इत्याह । आहेति भूते णलन्तभ्रमवादिति । आहेत्युपलक्षणम् ॥ तदेवं सत्यम् । नोऽस्माकं पदमधिकारः परैः शत्रुभिरामृष्टमाक्षिप्तम् । हे प्रभो प्रत्येकं प्रतिपुरुषं विनियुक्तात्मा प्रवेशितस्वरूपः । सर्वान्तर्यामीत्यर्थः । कथं न ज्ञास्यसि न वेत्सि ॥ वर्तमानेऽपि वचनभङ्ग्या भविष्यन्निर्देशः प्रसिद्धः ॥ "अपह्नवे ज्ञः" । "अकर्मकाच्च" इत्यात्मनेपदविकल्पः ॥

उक्तमेव प्रपञ्चयति—

भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥

भवदिति ॥ भवतस्त्वत्तो लब्धेन वरेणोदीर्ण उद्धतः । तारक इत्याख्या नामधेयं यस्य स तारकाख्यः । महानसुरो महासुरः ॥ "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति तत्पुरुषः ॥ धूमकेतुरुत्पातविशेष इव लोकानामुपप्लवायोपद्रवायोत्थित उत्पन्नः ॥

पुरे तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥

पुर इति ॥ अस्य तारकस्य पुरे रविः सूर्यस्तावन्तं तावन्मात्रमेवातपं तनोति । यावन्मात्रेण यावतैव । यावती मात्रा परिमाणमस्य यावन्मात्रं तेन वा । अल्पपरिमाणेनेत्यर्थः ॥ "मात्रा परिच्छदे । अल्पे च परिमाणे सा मात्रं कार्त्स्न्येऽवधारणे"

१ दृशा. [illegible]

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥

लब्धेति ॥ प्रथमं पूर्वं लब्धप्रतिष्ठा लब्धस्थितयः । लब्धावकाशा इत्यन्यत्र । यूयं बलवत्तरैः पौरुषातिरेकात्प्रबलतरैः । निरवकाशैरित्यपरत्र । परैः शत्रुभिरुत्सर्गाः सामान्यशास्त्राणि "मा हिंस्यात्" इत्येवमादीनि । अपोद्यन्त एभिरित्यपवादैः "गामालभेत" इत्यादिभिर्विशेषशास्त्रैरिव किं कृतव्यावृत्तयः कृतप्रतिष्ठाभङ्गाः । कृतविषयसंकोचरूपबाधा इत्यन्यत्र ॥ "विषयसंकोच एव बाधः" इत्याचार्याः । निषेधशास्त्रस्य वैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थापनाद्विषयसंकोच इत्यलमतिगहनावगाहनेन ॥

तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ २८ ॥

तदिति ॥ तत्तस्मात्कारणात् । हे वत्साः पुत्रकाः ॥ "वत्सस्त्वर्भकपुत्रायोर्वर्षे वत्सं तु वक्षसि" इति विश्वः ॥ स्वयं पितामहत्वाद्वत्सा इत्यामन्त्रयते । संभूयागताः समागता इतो मत्तः किं प्रार्थयध्वम् । किमिच्छतेत्यर्थः । ब्रूत । लोकरक्षणे यूयमेव कर्तार इत्याह—मयि लोकानां सृष्टी रक्षा युष्मास्ववस्थिता । अतस्तदर्थमपि नास्ति मदपेक्षेत्यर्थः ॥

ततो मन्दानिलोद्धूतकमलाकरशोभिना ।
गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥

तत इति ॥ ततो भगवत्प्रश्नानन्तरं वासव इन्द्रो गुरुं बृहस्पतिम् ॥ "गुरू गीष्पतिपित्राद्यौ" इत्यमरः ॥ मन्दानिलोद्धूतो यः कमलाकरः स इव शोभत इति तेन तथोक्तेन नेत्राणां सहस्रेण नोदयामास प्रेरयामास । सहस्रग्रहणमास्थातिशयार्थम् । अनिमेषाणामपि प्रयत्नवशादक्षिस्पन्दो न विरुध्यते ॥

स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥

स इति ॥ हरेरिन्द्रस्य ॥ "इन्द्रो दुश्च्यवनो हरिः" इति हलायुधः ॥ सहस्रान्नयनेभ्योऽधिकं सहस्रनयनाधिकम् । तदगोचरदर्शित्वादिति भावः । द्वे नेत्रे यस्य

१ न खलु स्थ बलोत्तरैः. २ प्रार्थयध्वे. ३ भूतानाम्. ४ चोदयामास; प्रेरयामास. ५ वृत्रहा. ६ द्विनेत्रः. ७ दशचक्षुःशताधिकम्.

इत्यमरः ॥ दीर्घिकासु क्रीडावापीषु कमलानामुन्मेषो विकाशः साध्यते निष्पाद्यते । कठोरकिरणोऽपि मन्दोष्णः सन्नेव तद्भीत्या पुरे प्रकाशत इत्यभिप्रायः ॥

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते ।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥

सर्वाभिरिति ॥ चन्द्रस्तं तारकं सर्वदा । कृष्णपक्षेऽपीत्यर्थः । सर्वाभिः कलाभिर्निषेवते ॥ "कला तु षोडशो भागः" इत्यमरः ॥ केवलां हरचूडामणीकृतां शिवशिरोमणीकृतां लेखां नादत्ते न गृह्णाति ॥

व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥ ३५ ॥

व्यावृत्तेति ॥ वायुः । स्तेनस्य भावः कर्म वा स्तेयं चौर्यम् ॥ "स्तेनाद्यन्नलोपश्च" इति यत्प्रत्ययो नलोपश्च ॥ कुसुमानां स्तेयं तस्मात्स्तेयाभियोगाद्दण्डाद्वा साध्वसं भयं तस्माद्धेतोरुद्याने व्यावृत्तगतिः । निवृत्तोद्यानसंचारः सन्नित्यर्थः ॥ सापेक्षत्वेऽपि गमकत्वात्समासः ॥ तत्पार्श्वे तत्समीपे । तालस्य वृन्तैरुद्ध्यते । तालस्येव वृन्तमस्येति वा तालवृन्तं तस्यानिलाद्व्यजनसंचारपवनादधिकं यथा तथा न वाति ॥ "व्यजनं तालवृन्तकम्" इत्यमरः ॥

पर्यायसेवामुत्सृज्य पुष्पसंभारतत्पराः ।
उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥

पर्यायेति ॥ ऋतवः षड्वसन्तादयः पर्यायसेवां क्रमसेवामुत्सृज्य पुष्पाणां संभारे संग्रहे तत्पराः । आसक्ताः सन्त इत्यर्थः ॥ "तत्परे प्रसितासक्तौ" इत्यमरः ॥ उद्यानपालैरुद्यानाधिकृतैः सामान्यं साधारणं यथा भवति तथा तं तारकमुपासते सेवन्ते । शीतोष्णादिदोषप्रकाशनं तु दूरापास्तमित्यर्थः ॥

तस्योपायनयोग्यानि रत्नानि सरितां पतिः ।
कथमप्यम्भसामन्तरा निष्पत्तेः प्रतीक्षते ॥ ३७ ॥

तस्येति ॥ सरितां पतिः समुद्रस्तस्य तारकस्योपायनानां प्राभृतानां योग्यानि ॥ "प्राभृतं तु प्रदेशनम् । उपायनम्" इत्यमरः ॥ रत्नान्यम्भसामन्तरा निष्पत्तेः परिपाकपर्यन्तम् ॥ विकल्पादसमासः ॥ कथमपि महता यत्नेन प्रतीक्षते । कदा वा परिपक्ष्येरन्नित्येकाग्रेण पालयतीत्यर्थः ॥

उच्चैरिति ॥ किंचेति चार्थः। तेन तारकेणोच्चैरुभत उच्चैःश्रवा नाम । हयो रत्नमिव हयरत्नमश्वश्रेष्ठः॥ "रत्नं श्रेष्ठे मणावपि" इति विश्वः॥ अस्य शुभ्रत्वादुत्प्रेक्षते—देहवद्दं बद्धदेहम्। मूर्तिमदित्यर्थः॥ आहिताग्न्यादित्वान्निष्ठायाः परनिपातः॥ चिरकालार्जितमिन्द्रस्य यश इवाहार्यपहृतम्॥

तर्हि सामाद्युपायास्तत्र कथं न प्रयुक्ता इत्यत्राह—

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सांनिपातिके॥ ४८॥

तस्मिन्निति॥ क्रूरे घातुके॥ "नृशंसो घातुकः क्रूरः" इत्यमरः॥ तस्मिन्क्रूरे नोऽस्माकं सर्वे उपायाः संनिपातदोषत्रयस्य प्रकोपजे सांनिपातिके विकारे ज्वरादौ॥ "संनिपाताच्च" इति वक्तव्याट्ठक्॥ वीर्यवन्ति सारवन्त्यौषधानीव प्रतिहतक्रिया विफलप्रयोगा भवन्ति॥

तदेव प्रतिहतक्रियत्वमाह—

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्॥ ४९॥

जयशेति॥ किंचेति चार्थः। नूनमनेन हरिचक्रेण वयं जेष्याम इति यत्र हरिचक्रेऽस्माकं जयाशा विजयाशंसा। आसीदिति शेषः। प्रतिघातेन प्रतिहत्योत्थितार्चिषोद्धततेजसा तेन हरिचक्रेण विष्णोः सुदर्शनेनास्य तारकस्य कण्ठे निष्कमुरोभूषणमर्पितमित्युत्प्रेक्षा। स्वयमेव निष्कमिव स्थितमित्यर्थः। तारकशिरश्छेदाय हरिणा चक्रं त्यक्तं तदपि नष्टशक्ति जातमिति भावः॥ "साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री" इत्यमरः॥

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः॥ ५०॥

तदीयेति॥ अद्य संप्रति निर्जित ऐरावतो यैस्ते तथोक्ताः। तस्य तारकस्येमे तदीया गजाः पुष्करावर्तकाद्य नामादयो येषां तेषु तोयदेषु मेघेषु तटाघातं वप्रक्रीडामभ्यस्यन्ति॥

तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः॥ ५१॥

१ निष्क. २ भर्तः. ३ तटाघात.

उत्पाटच मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः ।
आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु ॥ ४३ ॥

उत्पाट्येति ॥ तेन तारकेण हरितां सूर्याश्वानाम् ॥ "हरिस्सूर्ये च सूर्याश्वे व-र्णे च हरिते दिशि" इति विश्वः ॥ खुरैः शफैः क्षुण्णानि चूर्णितानि । एतेन तेषा-मत्यौन्नत्यं सूचितम् । मेरुशृङ्गाण्युत्पाट्य स्वेषु वेश्मसु । वेश्मस्विति बहुवचनेना-स्य भुवनत्रयनिवासः सूचितः । आक्रीडन्त एष्विति आक्रीडाः । ते च ते पर्वताः कल्पिताः कृताः ॥

मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् ।
हेमाम्भोरुहसस्यानां तद्वाप्यो धाम सांप्रतम् ॥ ४४ ॥

मन्दाकिन्या इति ॥ सांप्रतं संप्रति मन्दाकिन्या भागीरथ्या दिग्वारणानां दिग्गजानां मदैराविलं कलुषं पयो जलमेव । शिष्यत इति शेषं शिष्टम् ॥ कर्मण्य-ण्प्रत्ययः ॥ "शिष्टवन्यत्रोपयुज्यते" इति नपुंसकत्वम् ॥ तर्हि कनककमलानि क्व गतानीत्याह—हेमेति । हेमाम्भोरुहाण्येव सस्यानि तेषां तु तस्य वाप्यस्तद्वाप्य एव धाम स्थानम् । सर्वाण्यप्युत्पाट्य स्वदीर्घिकास्वेव प्रतिरोपितवानित्यर्थः ॥

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात्पथि ॥ ४५ ॥

भुवनेति ॥ तस्य तारकस्यापातात्समापत्तेर्भयाद्विमानानां पथि खिलीभूते-ऽप्रहतीभूते सति ॥ "द्वे खिलाप्रहते समे" इत्यमरः ॥ स्वर्गिभिर्देवैर्भुवनानामा-लोकने प्रीतीर्नानुभूयते ॥

यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥ ४६ ॥

यज्वभिरिति ॥ यज्वभिर्विधिवदिष्टवद्भिः ॥ "यज्वा तु विधिनेष्टवान्" इ-त्यमरः ॥ "सुयजोर्ङ्वनिप्" इति ङ्वनिप्प्रत्ययः ॥ विततेष्वध्वरेषु यज्ञेषु संभृतं दत्तं हव्यं हविर्मायी मायावी ॥ व्रीह्यादित्वादिनिप्रत्ययः ॥ स तारको नोऽस्माकं मि-षतां पश्यताम् । पश्यत्सु सत्स्वित्यर्थः ॥ "षष्ठी चानादरे" इति षष्ठी ॥ जातवेदा वह्निरेव मुखं तस्माज्जातवेदोमुखादाच्छिनत्ति । आक्षिप्य गृह्णातीत्यर्थः ॥

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।
देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ४७ ॥

---

१ विवशान्.

वृत्त इति ॥ इतो मत्त एव मासश्रीलब्धोदयः स दैत्यस्तारकासुर इतो मत्त एव क्षयं नाशं नार्हति । तथाहि । अन्यो वृक्षस्तावदास्ताम् । विषस्य वृक्षो विषवृक्षोऽपि संवर्ध्य कुतश्चित्कारणात्सम्यग्वर्धयित्वा स्वयं छेत्तुमसांप्रतमनर्हः ॥ असांप्रतमित्यनेन निपातेनाभिहितत्वाद्वृक्ष इति द्वितीयान्तो न भवत्यनभिहिते कर्मणि द्वितीयाभिधानात् । यथाह वामनः—"निपातेनाप्यभिहिते कर्मणि न विभक्तिः परिगणनस्य प्रायिकत्वात्" इति ॥

वृतं तेनेदमेव प्राक्मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥ ५६ ॥

वृतमिति ॥ प्राक्पूर्वं तेनासुरेणेदमेव देवैरवध्यत्वमेव वृतं प्रार्थितम् । मया चास्मै तारकाय प्रतिश्रुतं प्रतिज्ञातम् ॥ "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता" इति संप्रदानत्वाच्चतुर्थी ॥ कर्तव्यं चैतदित्याह—लोकान्दग्धुमलं शक्तम् ॥ "पर्याप्तिवचनेष्वलमर्थेषु" इति तुमुन्प्रत्ययः ॥ तस्य तपस्तत्तपो वरेण वरदानेन शमितं हि मयेति शेषः ॥

संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥ ५७ ॥

संयुग इति ॥ संयुगे युद्ध उद्यन्तं व्याप्रियमाणम् । संयुगे साधुं सांयुगीनम् । "प्रतिजनादिभ्यः खञ्" इति खञ्प्रत्ययः ॥ तं तारकं निषिक्तस्य क्वचित्क्षेत्रे क्षरितस्य ॥ "नीलः कण्ठे लोहितश्च केशेष्विति नीललोहित इति पुराणम्" इति स्वामी ॥ तस्य नीललोहितस्य धूर्जटे रेतसः शुक्रस्यांशादृतेंऽशं विनान्यः कः प्रसहेताभिभवेत् ॥ "प्रसहनमभिभवे" इति वृत्तिकारः ॥

कथमसावीदृक्शक्तिरित्याह—

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम् ।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना ॥ ५८ ॥

स इति ॥ स देवो नीललोहितस्तमसः पारे परतो व्यवस्थितं तमोगुणातीतं परं ज्योतिः परमात्मा हि । अतएव मया परिच्छिन्नप्रभावर्धिरियत्तया परिच्छिन्नमाहात्म्यो न भवति तथा विष्णुना च न । अतस्तदंशस्यापि दुर्निवारत्वं नास्तीत्यर्थः ॥

---

१ वृत.२ प्राङ्मया; मयि. ३ स्तम्भितम्. ४ उद्यन्तम्; युद्धकृत्. ५ व्यवस्थितम्.

तदिति ॥ तत्तस्मात्कारणात् । हे विभो स्वामिन् । मोक्तुं भवं त्यक्तुमिच्छवो मुमुक्षवो विरक्ता भवस्य संसारस्य शान्तये निवृत्तये कर्मैव बन्धस्तं छिनत्तीति कर्मबन्धच्छित्तं धर्ममिव । आत्मज्ञानहेतुभूतमिति शेषः । "तमेव विदित्वातिमृत्युमेति" इति ज्ञानादेव मुक्तिः ॥ तस्य तारकस्य शान्तये नाशाय । सेनां नयतीति सेनानीश्चमूपतिः ॥ "सत्सूद्विष–" इत्यादिना क्विप् ॥ तं सेनान्यं कंचित्स्रष्टुमिच्छामः । वयमिति शेषः ॥

सेनानीसृष्टेः फलमाह—

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम् ॥ ५२ ॥

गोप्तारमिति ॥ सुरसैन्यानां देवतासेनानां गोप्तारं रक्षितारं यं सेनान्यं पुरस्कृत्य पुरोधाय ॥ "पुरोऽव्ययम्" इति गतित्वात् "नमस्पुरसोर्गत्योः" इति सकारः ॥ गां पृथ्वीं त्रायन्त इति गोत्राः पर्वतास्तान्भिनत्तीति गोत्रभिदिन्द्रो जयश्रियं वन्दीमिव बन्दीकृतां स्त्रियमिव शत्रुभ्यः सकाशात्प्रत्यानेष्यति प्रत्याहरिष्यति । तं स्रष्टुमिति पूर्वेण संबन्धः ॥

वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः ।
गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥ ५३ ॥

वचसीति ॥ तस्मिन्बार्हस्पत्ये वचस्यवसिते परिसमाप्ते सत्यात्मभूर्ब्रह्मा गिरं वाचं ससर्ज जगादेत्यर्थः । सा गीः सौभाग्येन मनोहरत्वेन ॥ "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः ॥ गर्जिताद्गर्जितस्य चानन्तरं प्रवृत्तां वृष्टिं जिगाय जितवती । गर्जितपरत्वाद्वृष्टेरिव वाग्विज्ञापनफलत्वाद्गिरः सुभगत्वमिति भावः ॥

संपत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम् ।
न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥ ५४ ॥

संपत्स्यत इति ॥ अयं वो युष्माकं कामो मनोरथः सेनानीरूपः संपत्स्यते सेत्स्यति । कश्चिदल्पोऽपि कालः प्रतीक्ष्यताम् । तु किंतु तस्य सेनान्यः सिद्धौ विषय आत्मना स्वयं सर्गः सृष्टिरेव व्यापारस्तं न यास्यामि । नाहं स्रक्ष्यामीत्यर्थः ।

अत्र कारणमाह—

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥ ५५ ॥

---

१ अ. ७ पा. ३ सू. १९.

वृत इति ॥ इतो मत्त एव प्राप्तश्रीर्लब्धोदयः स दैत्यस्तारकासुर इतो मत्त एव क्षयं नाशं नार्हति । तथाहि । अन्यो वृक्षस्तावदास्ताम् । विषस्य वृक्षो विषवृक्षोऽपि संवर्ध्य कुतश्चित्कारणात्सम्यग्वर्धयित्वा स्वयं छेत्तुमसांप्रतमनर्हः ॥ असांप्रतमित्यनेन निपातेनाभिहितत्वाद्वृक्ष इति द्वितीयान्तो न भवत्यनभिहिते कर्मणि द्वितीयाभिधानात् । यथाह वामनः—“निपातेनाप्यभिहिते कर्मणि न विभक्तिः परिगणनस्य प्रायिकत्वात्” इति ॥

वृतं तेनेदमेव प्राङ्मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥ ५६ ॥

वृतमिति ॥ प्राक्पूर्वं तेनासुरेणेदमेव दैवैरवध्यत्वमेव वृतं प्रार्थितम् । मया चास्मै तारकाय प्रतिश्रुतं प्रतिज्ञातम् ॥ “प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता” इति संप्रदानत्वाच्चतुर्थी ॥ कर्तव्यं चैतदित्याह—लोकान्दग्धुमलं शक्तम् ॥ “पर्याप्तिवचनेष्वलमर्थेषु” इति तुमुन्प्रत्ययः ॥ तस्य तपस्तत्तपो वरेण वरदानेन शमितं हि । मयेति शेषः ॥

संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥ ५७ ॥

संयुग इति ॥ संयुगे युद्ध उद्यन्तं व्याभियमाणम् । संयुगे साधुं सांयुगीनम् ॥ “प्रतिजनादिभ्यः खञ्” इति खञ्प्रत्ययः ॥ तं तारकं निषिक्तस्य क्वचित्क्षेत्रे क्षरितस्य ॥ “नीलः कण्ठे लोहितश्च केशेष्विति नीललोहित इति पुराणम्” इति स्वामी ॥ तस्य नीललोहितस्य धूर्जटे रेतसः शुक्रस्यांशादृतेंऽशं विनान्यः कः प्रसहेताभिभवेत् ॥ “प्रसहनमभिभवे” इति वृत्तिकारः ॥

कथमसावीदृक्शक्तिरित्याह—

स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम् ।
परिच्छिन्नप्रभावर्धिर्न मया न च विष्णुना ॥ ५८ ॥

स इति ॥ स देवो नीललोहितस्तमसः पारे परतो व्यवस्थितं तमोगुणातीतं परं ज्योतिः परमात्मा हि । अतएव मया परिच्छिन्नप्रभावर्धिरवगतमाहात्म्यातिशयो न भवति तथा विष्णुना च न । अतस्तस्यांशाप्यं नास्तीत्यर्थः ॥

---

१ वृतः. २ अस्त्रू; स्वामी. ३ भर्त्सनम्. ४ उद्यन्तम्; युध्यन्तम्. ५ [illegible]

संप्रति तदंशोत्पत्त्यात्युपायं दर्शयति—

उमारूपेण ते यूयं संयमस्तिमितं मनः ।
शंभोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥ ५९ ॥

उमेति ॥ ते कार्यार्थिनो यूयं संयमस्तिमितं समाधिनिश्चलं शंभोर्मन उमारूपेणोमासौन्दर्येण ॥ "रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि" इति विश्वः ॥ अयस्कान्तेन मणिविशेषेण ॥ "कस्कादिषु च" इति सकारः ॥ लोहवदयोधातुमिव ॥ "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययो मृग्यः ॥ आक्रष्टुमाहर्तुं यतध्वमुद्युक्ता भवत ॥

न च गत्यन्तरमस्तीत्याह—

उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ॥ ६० ॥

उभे इति ॥ उभयोः शंभोर्मम चाहितं निषिक्तं बीजं तेजो वोढुं सोढुं सा वोमा शंभोरष्टमूर्तेस्तस्येयं तदीया जलमयी मूर्तिर्वा मम । उभे एव क्षमे । न तृतीयेत्यर्थः ॥ वाशब्दो द्वन्द्वार्थे न त्वन्यार्थे । एतदेवोदाहृत्येत्थमेन व्याख्यातं गणव्याख्याने ॥ अत्र दीपकालंकारः प्राकरणिकयोरुमामहेश्वरयोरप्राकरणिकयोर्ब्रह्मजलमूर्त्योश्चौपम्यस्य गम्यत्वात् । यथाह भोजराजः—"प्रस्तुतानामप्रस्तुतानां चौपम्यस्य गम्यत्वे दीपकम्" इति । न चेयं तुल्ययोगिता तस्याः केवलप्रस्तुतविषयत्वेन केवलाप्रस्तुतविषयत्वेन चोत्थानादिति ॥

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥ ६१ ॥

तस्येति ॥ तस्य शितिकण्ठस्याष्टमूर्तेरात्मा । पुत्र इत्यर्थः ॥ "आत्मा वै पुत्रनामासि" इति श्रुतेः ॥ वो युष्माकं सेनापतेर्भावः सैनापत्यम् ॥ "पत्यन्तपुरोहितादिभ्यो यक्" इति यक्प्रत्ययः ॥ उपेत्य प्राप्य वीर्यविभूतिभिः शौर्यसंपत्तिभिः सुरबन्दीनां वेणीर्मोक्ष्यते विस्रंसयिष्यति । तारकासुरं हनिष्यतीति भावः ॥

इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे ।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः ॥ ६२ ॥

---

१ सोढुम् . २ सेनापत्यम् . ३ वेणीबन्धानदूषितान् . ४ मर्ति.

इतीति ॥ विश्वस्य योनिः कारणम् ॥ "योनिः स्त्रीणां भगस्थाने कारणे ताम्रिके पणे" इति वैजयन्ती ॥ विबुधान्सुरानिति व्याहृत्याभिधाय तिरोदधेऽन्तर्हितवान् । ते देवा अपि मनसाहितं कर्तव्यं येषां ते तथोक्ताः सन्तो दिवं स्वर्गं ययुः प्रापुः ॥

तत्र निश्चित्य कंदर्पमगमत्पाकशासनः ।
मनसा कार्यसंसिद्धै त्वराद्विगुणरंहसा ॥ ६३ ॥

तत्रेति ॥ पाको नाम कश्चिदसुरस्तस्य शासन इन्द्रस्तत्र हरचित्ताकर्षणकृत्ये कंदर्पं निश्चित्य । साधकत्वेनेति शेषः । कार्यसंसिद्धौ त्वरयौत्सुक्येन । द्वौ गुणौ यस्य तद्विगुणं द्विरावृत्तं रंहो वेगो यस्य तेन तथोक्तेन ॥ "गुणस्तु वृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु" इति वैजयन्ती ॥ मनसागमत् । सस्मारेत्यर्थः ॥ गमेर्लुङ् । लृदित्वाच्च्लेरङादेशः ॥

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥ ६४ ॥

अथेति ॥ अथ स्मरणानन्तरम् । स स्मृत इत्यर्थः ॥ पुष्पं धनुर्यस्य स पुष्पधन्वा कामः ॥ "वा संज्ञायाम्" इत्यनङ् ॥ "ललितं त्रिषु सुन्दरम्" इत्यमरः ॥ ललितायाः सुन्दर्या योषितो भ्रुवौ लते इव चारुणी शृङ्गे कोटी यस्य तत्तथोक्तं चापम् । रतिः स्मरप्रिया ॥ "रतिः स्मरप्रिया" इत्यमरः ॥ तस्या वलयपदानि कङ्कणस्थानान्यङ्कश्चिह्नं यस्य स तथोक्ते कण्ठ आसज्य लगयित्वा ॥ चापकण्ठविशेषणाभ्यां शृङ्गारिकनिधेस्त्रिभुवनैकवीरस्य शृङ्गारवीरोपकरणेषु तुल्यरसत्वं व्यज्यते ॥ सहचरस्य सख्युर्मधोर्वसन्तस्य हस्ते न्यस्तं चूताङ्कुरमेवास्त्रं यस्य स तथोक्तः प्राञ्जलिः कृताञ्जलिः सन् । शतमखमिन्द्रमुपतस्थे संगतवान् ॥ संगतिकरणार्थादात्मनेपदम् ॥ अत्र स्वभावोक्तिः—"स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति ॥ मालिनीवृत्तमेतत्—"ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये ब्रह्मसाक्षात्कारो नाम द्वितीयः सर्गः ।

---

१ कर्मसंसिद्धि; कार्यसमिद्धये; कार्यसंसिद्धि. २ सुललित. ३ शार्ङ्गम्. ४ पुष्पकेतुः.

तृतीयः सर्गः ।

तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात ।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥

तस्मिन्निति ॥ मघोन इन्द्रस्याक्ष्णां सहस्रं त्रिरावृत्ता दश परिमाणमेषामिति त्रिदशान्देवान् ॥ "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये" इति बहुव्रीहिः । "बहुव्रीहौ संख्येये–" इति डच्प्रत्ययः । उक्तार्थत्वात्सुचो निवृत्तिः ॥ विहाय सक्ता तस्मिन्कामे युगपत्पपात । सहस्रेणाक्षिभिरद्राक्षीदित्यादरातिशयोक्तिः ॥ ननु सुचिरपरिचितानेकसुरपरित्यागेन भगवतो महेन्द्रस्य कथमकाण्डे तस्मिन्नेकस्मिन्पक्षपात इत्याशङ्क्यार्थान्तरं न्यस्यति—प्रायो भूम्ना प्रभूणामाश्रितेषु सेवकेषु विषये गौरवमादरः प्रयोजनापेक्षितया कार्यार्थित्वेन हेतुना चलं चञ्चलम् । फलतन्त्राः प्रभवो न तु गुणतन्त्रा इति भावः ॥

स वासवेनासनसंनिकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम् ॥ २ ॥

स इति ॥ स कामो वासवेनेन्द्रेणासनस्य सिंहासनस्य संनिकृष्टं संनिहितमासनसंनिकृष्टं यथा तथा ॥ शेषषष्ठ्यायं समासः कृद्योगलक्षणया तु न "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति षष्ठीनिषेधात् ॥ इतो निषीदेहोपविशेति विसृष्टभूमिर्दत्तावकाशः सन् । भर्तुः स्वामिनः प्रसादमनुग्रहं मूर्ध्ना प्रतिनन्द्य संभाव्य मिथो रहसि ॥ "मिथोऽन्योन्यं रहस्यपि" इत्यमरः ॥ एनमिन्द्रमेवं वक्ष्यमाणप्रकारेण वक्तुं प्राक्रमतोपक्रान्तवान् ॥ "प्रोपाभ्यां समर्थाभ्याम्" इत्यात्मनेपदम् ॥

आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत्ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते ॥ ३ ॥

आज्ञापयेति ॥ हे पुंसां ज्ञातविशेष ज्ञातसार । ज्ञातपुंविशेषेत्यर्थः । गमकत्वात्समासः ॥ आज्ञापय । तदिति शेषः ॥ उत्तरवाक्ये यच्छब्दप्रयोगात् पूर्ववाक्ये तच्छब्दप्रयोगोनिर्बन्धः ॥ किं लोकेषु ते कर्तव्यमस्ति । संस्मरणेन प्रवृत्तमुत्पन्नं ते तवा...

धितं वृद्धिं गमितमिच्छामि। संस्मरणकृतमनुग्रहं केनचिन्नियोगेन वर्धय कस्मिंश्चित्क-र्मणि नियुङ्क्ष्वेत्यर्थः। अन्यथा मे नास्ति परितोष इति भावः॥ तुमुन्नन्तपाठे नि-त्यर्थे यत्नः कार्यः॥

न च मे किंचिदसाध्यमस्तीत्याह—

केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।

यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती ॥ ४ ॥

केनेति ॥ पदकाङ्क्षिणा स्थानाकाङ्क्षिणा केन पुंसा नितान्तदीर्घैरतिप्रभूतैस्त-पोभिस्ते तवाभ्यसूयेर्ष्या जनिता। तं ब्रूहीति शेषः। किमर्थम्। यावदसौ भव-त्याहितसायकस्य संहितबाणस्यास्य मत्कार्मुकस्य निदेशे वर्तत इति निदेशवर्ती आज्ञावशो भवति। अविलम्बेनैव भविष्यतीत्यर्थः॥ "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट्॥

संप्रति चतुर्वर्गे मोक्षमधिकृत्याह—

असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः।

बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥ ५ ॥

असंमत इति ॥ तवासंमतः कः पुरुषः [illegible]। अप्रिय इति यावत्। पुनर्भवे ये क्लेशा जन्मजरामरणादयस्तेभ्यो भयान्मुक्तिमार्गं प्रपन्नश्च वद। ततः सोऽ-स्मदारेचिताभिर्वक्रतो [illegible] चतुरैः सुन्दरीणां कटाक्षैश्चिरं ति-ष्ठतु ॥ आरेचितलक्षणं तु—" [illegible]। [illegible]

[illegible]

[illegible]

तवेति ॥ किं बहुना तव प्रसादादनुग्रहात्कुसुमायुधोऽप्यतिदुर्बलास्त्रोऽप्यहमेकं मधुं वसन्तमेव सहायं लब्ध्वा पिनाकः पाणौ यस्य सः पिनाकपाणिः ॥ "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ" ॥ तस्य हरस्यापि । हरः पिनाकी चेत्यतिदाग इति भावः । धैर्यच्युतिं धैर्यहानिं कुर्याम् । कर्तुं शक्नुयामित्यर्थः ॥ "शकि लिङ् च" इति शक्यार्थे लिङ् ॥ अन्ये धन्विनो धनुर्भृतो मम के । न केऽपीत्यर्थः ॥ किंशब्दः कुत्सायाम् । "कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते" इति शाश्वतः ॥

अथोरुदेशादवतार्य पादमाक्रान्तिसंभावितपादपीठम् ।
संकल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥ ११ ॥

अथेति ॥ अथ स्मरवाक्यश्रवणानन्तरमाखण्डलः सहस्राक्ष ऊरुदेशात्पादमाक्रान्त्याक्रमणेन संभावितं पादपीठं यस्मिंस्तथा तथावतार्य संकल्पितार्थे हरचित्ताकर्षणरूपे विषये विवृतात्मशक्तिम् "कुर्यां हरस्यापि–" (३ । १०) इत्यादिना प्रकटीकृतस्वसामर्थ्यं कामं स्मरमिदं वक्ष्यमाणं बभाषे ॥

सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥ १२ ॥

सर्वमिति ॥ हे सखे । सखे इति संबोधनं गौरवार्थम् । सर्वमेतत्त्वय्युपपन्नं सिद्धम् । मम कुलिशं वज्रं भवांश्चोभे अस्त्रे । तत्र वज्रं तपोवीर्येण तपोबलेन महत्सु प्रबलेषु कुण्ठं प्रतिबद्धमप्रसरम् । त्वमस्त्रं सर्वतोगामि च साधकं च । सापत्स्वप्यकुण्ठमित्यर्थः ॥

अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥ १३ ॥

अवैमीति ॥ हे सखे ते सारं बलमवैमि वेद्मि । अतः खल्वनपरात्मसमं मतुल्यं त्वां गुरुणि महति कार्ये "तस्मै हिमाद्रेः–" (३ । १६) इति वक्ष्यमाणे नियोक्ष्ये ॥ "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति वार्तिकादात्मनेपदनियमः ॥ तथाहि । सारपरीक्षापूर्वक एव सर्वत्र नियोग इत्याह—कृष्णेन विष्णुना । धरतीति धरः ॥ पचाद्यच् ॥ भुवो धरो भूधरस्तस्य भावस्तत्तां भूधरताम् । भूधरणशक्तिमित्यर्थः । अवेक्ष्य ज्ञात्वा शेषः सर्पराजो देहोद्वहनाय स्वदेहमुद्वोढुम् ॥ "क्रियार्थोपपदस्य–" इत्यादिना चतुर्थी ॥ व्यादिश्यते नियुज्यते । शेषशायी हि भगवान् ॥

1 आक्रान्त. 2 सर्वान्तरार्थे.

नियोगाङ्गीकारं सिद्धवत्कर्तुमाह—

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥ १४ ॥

आशंसतेति ॥ वृषाङ्के हरे बाणगतिं बाणप्रसरमाशंसता कथयता। "कुर्यां हरस्यापि पिनाकपाणेः" (३।१०) इत्यादिनेति शेषः। त्वया नोऽस्माकं कार्यं प्रतिपन्नकल्पमङ्गीकृतप्रायम् ॥ "ईषदसमाप्तौ–" इत्यादिना कल्पप्प्रत्ययः ॥ कथमेतदत आह—इदानीमुच्चैरुन्नता द्विषो येषां तेषामुच्चैर्द्विषां यज्ञांशभुजां देवानाम्। एतेन द्विषल्लुप्तयज्ञभागत्वं सूच्यते। ईप्सितमाप्तुमिष्टमेतदेव हरे बाणप्रयोगरूपमेव निबोध। हरायत्तं बुध्यस्वेत्यर्थः ॥ "बुध बोधने" इति धातोर्लोट् ॥ अत्र "आशंसता प्रार्थयमानेन" इति नाथव्याख्यानमनाथव्याख्यानम्। आङ्पूर्वयोः शास्तिशंसत्योरिच्छार्थत्वे आत्मनेपदनियमात्। याच्ञार्थत्वस्याप्रामाणिकत्वात्। "कुर्यां हरस्यापि–" (३।१०) इत्यत्रानयोरभावादयोगाच्चेति ॥

किं तत्कार्यं कथं वा तस्य हरायत्तत्वं कुतो वा मदपेक्षेत्यत्राह—

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा १५

अमी इति ॥ हि यस्मादमी देवा जयाय शत्रुजयार्थं भवस्य हरस्य वीर्यप्रभवं तेजःसंभूतं सेनान्यं सेनापतिमुशन्ति कामयन्ते ॥ "वश कान्तौ" इति धातोर्लट् ॥ ब्रह्मणां सद्योजातादिमन्त्राणामङ्गानां हृदयादिमन्त्राणां भूः स्थानं ब्रह्माङ्गभूः। कृतमन्त्रन्यास इत्यर्थः। ब्रह्मणि निजतत्त्वे ॥ "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा" इत्युभयत्राप्यमरः ॥ योजितात्मा नियमितचित्तः। मन्त्रन्य[illegible]

भूमिः क्षेत्रं सा पार्वत्येवेत्यात्मभुवा ब्रह्मणोपदिष्टम् । "उभे एव क्षमे वोढुम्" (२।६०) इत्यादिनोक्तमित्यर्थः ॥

सापीदानीं संनिकृष्टैव तस्येत्याह—

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥ १७ ॥

गुरोरिति ॥ नगेन्द्रकन्या पार्वती च गुरोः पितुर्नियोगादाज्ञावशादधित्यकायां हिमाद्रेरूर्ध्वभूमौ ॥ "भूमिरूर्ध्वमधित्यका" इत्यमरः ॥ "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इति त्यकन्प्रत्ययः ॥ तपस्यन्तं तपश्चरन्तम् ॥ "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ्प्रत्ययः । ततः शतृप्रत्ययः ॥ स्थाणुं रुद्रम् अन्वास्ते । उपास्त इत्यर्थः । इतीदं मयाप्सरसां मुखेभ्यः श्रुतम् ॥ न चैतदनागमप्रमित्याह— स वर्गः सोऽप्सरसां गणो मत्प्रणिधिर्मम गूढचरः ॥ "प्रणिधिः प्रार्थने चरे" इति यादवः ॥

तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ १८ ॥

तदिति ॥ तत्तस्मात्सिद्ध्यै कार्यसिद्ध्यर्थं गच्छ । देवकार्यं कुरु ॥ आशीर्लोट् ॥ अयमर्थः प्रयोजनमर्थान्तरभाव्यः कारणान्तरसाध्य एव । तच्च कारणान्तरं पार्वतीसंनिधानमिति भावः ॥ "अर्थः प्रकारे विषये धनकारणवस्तुषु । अभिधेये च शब्दानां वृत्तौ चापि प्रयोजने" इति विश्वः ॥ तथापि बीजस्योऽङ्कुरो बीजाङ्कुर उदयादुत्पत्तेः प्रागम्भ इव त्वामुत्तमं प्रत्ययं चरमं कारणमपेक्षते ॥ "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः ॥ तस्मादीप्सितार्थे नः [illegible]ऽनन्यसाध्योऽयमर्थ इति भावः ॥

तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥ १९ ॥

तस्मिन्निति ॥ सुराणां विजयाभ्युपाये जयसाधनभूते [illegible] तवैव नाम ॥ [illegible] ॥ [illegible] ॥ [illegible] कर्म पुंसां यशसे हि ॥ [illegible] ॥

प्रोत्साहनार्थं स्तौति—

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवीर्यः॥२०॥

सुरा इति॥ एते सुराः समभ्यर्थयितारो याचितारः। कार्यं प्रयोजनं त्रयाणां विष्टपानामपि संबन्धि। सर्वलोककार्यमित्यर्थः। कर्म ते तव चापेन। न तन्त्रेणेति भावः। अतिहिंस्रमतिघातुकं च न। अहो बत इति संबोधने॥ "अहो बतानुकम्पायां खेदे संबोधनेऽपि च" इति विश्वः॥ अथवा अहो आश्चर्ये। बतेत्यामन्त्रणे खेदेऽपि च" इति। "बतामन्त्रणसंतोषखेदानुकम्पाविस्मये" इति विश्वः॥ स्पृहणीयवीर्योऽस्याश्चर्यपराक्रमोऽसि॥ "आश्चर्यं स्पृहणीयं च" इति नानार्थकोशः॥

मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य॥२१॥

मधुरिति॥ हे मन्मथ। असौ मधुश्च वसन्तोऽपि ते साहचर्यात्सहचरत्वादेवानुक्तोऽप्यप्रेरितोऽपि सहायः सहकार्येव। तथाहि। समीरणो वायुर्हुताशनस्याग्नेर्नोदयिता प्रेरको भवेति केन व्यादिश्यते॥ अत्र मधुसमीरणयोरुक्तिमन्तरेण सहायताकरणं सामान्यधर्मः। स च वाक्यद्वये वस्तुप्रतिवस्तुभावेन पृथङ्निर्दिष्ट इति प्रतिवस्तूपमालंकारोऽयम्। तदुक्तम्—"यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि। गम्यौपम्याश्रिता सा स्यात्प्रतिवस्तूपमा मता" इति॥

तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः॥२२॥

तथेति॥ तथास्त्विति भर्तुः स्वामिनः शेषामिव प्रसाददत्तां मालामिव॥ "प्र-
... शेषेति कीर्तिता" इति विश्वः। "माल्याक्षतादिदाने स्त्री

साशङ्कं संकटमापतितमिति सभयमनुप्रयातः सन् । तथाङ्गस्य त्वयेनापि प्रार्थिता कार्यसिद्धिर्येन स तथोक्तः । शीर्त्वा मृत्वापि सर्वथा देवकार्यं साधयिष्यामीति कृतनिश्चयः सन्नित्यर्थः । हैमवतं हिमवति भवं स्थाणो रुद्रस्याश्रमं जगाम ॥

तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती ।
संकल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥ २४ ॥

तस्मिन्निति ॥ तस्मिन्वने स्थाण्वाश्रमे संयमिनां समाधिमतां मुनीनां तपसः समाधेरेकाग्रतायाः प्रतिकूलं वर्तत इति प्रतिकूलवर्ती विरोधी मधुर्वसन्तः संकल्पयोनेर्मनोभवस्याभिमानभूतम् । गर्वहेतुभूतमित्यर्थः ॥ कार्यकारणयोरभेदोपचारः ॥ आत्मानं निजस्वरूपमाधाय संनिधाय जजृम्भे प्रादुर्बभूव । वसन्तधर्मान्प्रवर्तयामासेत्यर्थः ॥

वसन्तधर्मानाह—

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज ॥२५॥

कुबेरेति ॥ उष्णरश्मौ सूर्ये साहसिके च नायके समयं दक्षिणायनकालं संगमकालं च विलङ्घ्याकाण्डे व्यतिक्रम्य कुबेरगुप्तां धनपतिपालितां कुत्सितशरीरेण केनचिद्रक्षितां च दिशमुदीचीं स्त्रीलिङ्गाश्रितां कांचिन्नायिकां च गन्तुं चलितुं संगन्तुं च प्रवृत्ते सति दक्षिणा दिग्दाक्षिण्यवती नायिका च मुखेनाग्रभागेन वक्त्रेण च । वहतीति वहः ॥ पचाद्यच् ॥ गन्धस्य वहं गन्धवहमनिलं व्यलीकेन दुःखेन निश्वासस्तं व्यलीकनिश्वासमिव ॥ "दुःखे वैलक्ष्ये व्यलीकमप्रियाकार्यवस्तुनोः" इति वैजयन्ती ॥ उत्ससर्ज प्रवर्तयामास । स्वभर्तरि सपत्नीरुद्धनेन पराङ्गनासंगतिं प्रवृत्ते सति स्त्रियो दाक्षिण्यादकिंचिद्वदा दुःखान्निश्वसन्तीति भावः । उत्तरायणे सति मलयानिलाः प्रवृत्ता इति वाक्यार्थः ॥ अत्रोत्प्रेक्षालंकारः । न च समासोक्तिरेवेयमुत्प्रेक्षानुप्रविष्टेति शङ्कितव्यं केवलविशेषणसामर्थ्यादेवाप्रस्तुतप्रतीतौ सोऽभिष्टते । अत्र तु दक्षिणेति विशेष्यसामर्थ्यादपि नायिका प्रतीयते । न च श्लेष एव प्रकृताप्रकृतविषय उभयश्लेषे श्लिष्टविशेष्यानङ्गीकारात् । तस्मात्स्वशब्दशक्तिमूलोऽयं ध्वनिः । स च व्यलीकनिश्वासरूपचेतनधर्मसंभावनार्थं दक्षिणस्या दिशो नायिकया सहाभेदमापादयन्नभेदलक्षणातिशयोक्त्युपजीविनी निश्वासमिवेति वाच्योत्प्रेक्षां निर्वहतीति वाच्यसिद्ध्यङ्गभूत इत्युपरम्यताम् ॥

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण ॥ २६॥

---

१ दुःखम्.

अस्रूतेति ॥ अशोको वृक्षविशेषः सद्यः स्कन्धात्मकाण्डात्प्रभृत्येव । स्कन्धादारभ्येत्यर्थः ॥ भाष्यकारवचनात्प्रभृतियोगे पञ्चमीति कैयटः । भाष्यं च " मूलात्प्रभृत्यग्राद्वृक्षांस्तक्ष्णुवन्ति " इति " कार्तिक्याः प्रभृत्याग्रहायणी मासः " इत्यादि ॥ सपल्लवानि कुसुमान्यसूत । उभयमप्यजीजनदित्यर्थः । आसिञ्जितो नूपुरो यस्य तेन ॥ सिञ्जधातोरकर्मकात् "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः॥ सुन्दरीणां पादेन संपर्क ताडनं नापैक्षत । " सनूपुररवेण स्त्रीचरणेनाभिताडनम् । दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत् " इति । तथाहि—"पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः । आलोकितः कुरबकः कुरुते विकाशमालोडितस्तिलक उत्कलिको विभाति " ॥

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुर्द्विरेफान्नामाक्षराणीव मनोभवस्य ॥ २७ ॥

सद्य इति ॥ मधुर्वसन्त एवेषुकारः प्रवालोद्गमाः पल्लवाङ्कुरा एव चारूणि पत्राणि पक्षा यस्य तस्मिन् ॥ " पत्रं वाहनपक्षयोः " इत्यमरः ॥ नवं चूतं चूतकुसुमं तदेव बाणस्तस्मिन्नवचूतबाणे समाप्तिं नीते सति सद्यो मनोभवस्य धन्विनो नामाक्षराणीव द्विरेफान्भ्रमरान्निवेशयामास निदधौ ॥ अत्र प्रवालपत्र इत्याद्येकदेशविवर्तिरूपकं मधोरिषुकारत्वं रूपं यन्नामाक्षराणीवेत्युत्प्रेक्षायां निमित्तमित्येकदेशविवर्तिरूपकोत्थापितेयमुत्प्रेक्षा ॥

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः॥२८॥

वर्णेति ॥ कर्णिकारं कर्णिकारकुसुमम् ॥ " अवयवे च प्राण्योषधिवृक्षेभ्यः " इत्युत्पन्नस्य तद्धितस्य " पुष्पफलमूलेषु बहुलम् " इति लुक् । एवमन्यत्रापि द्रष्टव्यम् ॥ वर्णप्रकर्षे वर्णोत्कर्षे सत्यपि निर्गन्धतया हेतुना चेतो दुनोति स्म पर्यतापयत् ॥ " लट् स्मे " इति भूतार्थे लट् ॥ तथाहि । प्रायेण विश्वसृजो विधातुः गुणानां सामग्र्यविधौ साकल्यसंपादनविषये पराङ्मुखी । सर्वत्रापि वस्तुनि [illegible]

बालेन्द्विति ॥ अविकाशभावान्निर्विकाशत्वात्मुकुलभावाद्धेतोर्बालेन्दुरिव वक्राण्यतिलोहितान्यतिरक्तानि पलाशानि किंशुकपुष्पाणि ॥ "पलाशे किंशुकः पर्णः" इत्यमरः ॥ वसन्तेन पुंसा समागतानां संगतानां वनस्थलीनां स्त्रीणां सद्यः सद्योदत्तानि । पुराणेष्वतिलौहित्याभावादिति भावः । नखक्षतानीव बभुः ॥ अत्र वसन्तस्य वनस्थलीनां च विशेषणसाधारण्यान्नायकव्यवहारप्रतीतेः समासोक्तिस्तावदस्ति । "नखक्षतानीव" इति जातिस्वरूपोत्प्रेक्षा वक्रत्वलौहित्यगुणनिमित्ता जागर्ति । सा च नायकव्यवहाराश्रितसमासोक्तिगर्भिण्येवोचिष्ठत इत्युभयतेरिककालतेव । विशेषणसामर्थ्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिष्यत इति हि लक्षणम् ॥

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलंचकार ॥३०॥

लग्नेति ॥ मधुश्रीर्वसन्तलक्ष्मीर्लग्नद्विरेफा एवाञ्जनभक्तयः कज्जलरचनास्ताभिश्चित्रं चित्रवर्णं तिलकं पुष्पविशेषमेव तिलकं विशेषकम् । मुखं प्रारम्भस्तस्मिन्नेव मुखे वक्त्रे प्रकाश्य प्रकटय्य बालारुणकोमलेन बालार्कसुन्दरेण रागेणारुणिम्ना तेनैव लाक्षारागेण चूतप्रवाल एवोष्ठस्तं चूतप्रवालोष्ठमलंचकार प्रसाधयामास ॥ अत्र रूपकालंकारः ॥

मृगाः पियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः ॥ ३१ ॥

मृगा इति ॥ पियालद्रुमा राजादनवृक्षाः ॥ "राजादनं पियालः स्यात्" इत्यमरः ॥ तेषां मञ्जरीणां रजःकणैर्विघ्निताः संजातविघ्ना दृष्टीनां पाताः प्रसारा येषां ते तथोक्ता मदोद्धता मृगाः प्रत्यनिलमनिलस्याभिमुखं मर्मरा मर्मरशब्दवन्तः पत्रमोक्षा जीर्णपर्णपाता यासु ता वनस्थलीर्विचेरुर्वनप्रदेशेषु चरन्ति स्म ॥ "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" इति वचनात् सकर्मकत्वम् ॥

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥ ३२ ॥

चूताङ्कुरेति ॥ चूताङ्कुराणामास्वादेन कषायकण्ठो रक्तकण्ठः ॥ "सुरभौ कषाये रक्ते कषायः" इति केशवः ॥ एतावत्कोकिलः पुंस्कोकिलः ॥ पुंग्रहणं प्रागल्भ्यद्योतनार्थम् ॥ मधुरं चुकूजेति यत्तत्कूजनमेव मनस्विनीनां मानिनीनां मानविघाते दक्षं स्मरस्य वचनं मानं त्यजतेत्याज्ञावचनं जातम् । कोकिलकूजितश्रवणानन्तरं स्मराज्ञया इव मानं जहुरित्यर्थः ॥

१ विरेफ. २ निपत्.

हिमव्यपायाद्विशदाधराणामापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥ ३३ ॥

हिमेति ॥ हिमस्य व्यपायादपगमाद्विशदा नीरुजा अधरा ओष्ठा यासां तासामापाण्डरीभूतमुखच्छवीनाम्। कुङ्कुमपरिहारादिति भावः। किंपुरुषाङ्गनानां पत्रविशेषकेषु पत्ररचनासु स्वेदोद्गमः पदं चक्रे। घर्मोदयात्स्वेदोदयोऽभूदित्यर्थः। विशदाधरत्वं मधूच्छिष्टराहित्यादिति भावः। हेमन्तेषु नार्यो बिम्बोष्ठेषु मधूच्छिष्टं शीतभयाद्दधतीति प्रसिद्धम् ॥

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम्।
प्रयत्नसंस्तम्भितविक्रियाणां कथंचिदीशा मनसां बभूवुः॥३४॥

तपस्विन इति ॥ स्थाणोर्वनमोको येषां ते तपस्विनस्तत्रत्या मुनयः। समानकाल आद्यन्तावस्या आकालिकीम्। अकालभवत्वादुत्पत्त्यनन्तरविनाशिनीमित्यर्थः ॥ "आकालिकडाद्यन्तवचने" इति समानकालादिकट्प्रत्ययः प्रकृतेराकाल आदेशश्च निपातितः। "टिड्ढाणञ्–" इत्यादिना ङीप्। केचिदकालाद्देशाध्यात्मादित्वाट्ठञर्थं ठगित्याहुः ॥ तामाकालिकीं मधुप्रवृत्तिं वीक्ष्य प्रयत्नेन संस्तम्भितविक्रियाणां निरुद्धविकाराणां मनसां कथंचिदीशा नियन्तारो बभूवुः ॥

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः॥ ३५ ॥

तमिति ॥ आरोपितमधिज्यं कृतं पुष्पचापं येन तस्मिन्रतिर्द्वितीया यस्य तस्मिन्नतिसहाये मदने तं देशं स्थाण्वाश्रमं प्रपन्ने प्राप्ते सति द्वन्द्वानि स्थावराणि जंगमानि च मिथुनानि काष्ठोत्कर्षः॥ "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः ॥ तां गतो यः स्नेह इष्टसाधननिबन्धनः प्रेमापरनामा ममताभिमानः॥ "प्रेमा ना प्रियता हार्दं प्रेम स्नेहः" इत्यमरः ॥ स एव रसस्तेनानुविद्धं संपृक्तं भावं रत्याख्यं शृङ्गारभावं क्रियया कार्यभूतया चेष्टया विवव्रुः प्रकटीचक्रुः। शृङ्गारचेष्टाः प्रावर्तन्तेत्यर्थः ॥

ताश्चेष्टा आह 'मधु' इत्यादिभिश्चतुर्भिः—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥३

मध्विति ॥ द्वौ रेफौ वर्णविशेषौ यस्य स द्विरेफो भ्रमरः॥ उपचद्विरेफ उच्यते। यथाह कैयटः—"शब्दधर्मेणाप्यर्थस्य व्यपदेशो

१ आपाण्डुरीभूत. २ संस्पर्श.

भ्रमरशब्दस्य द्विरेफत्वाद्विरेफो भ्रमरः ॥ कुसुममेवैकं साधारणं पात्रं तस्मिन्मधु मकरन्दम् ॥ "मधु मद्ये पुष्परसे" इति विश्वः ॥ स्वां प्रियां भृङ्गीमनुवर्तमानोऽनुसरन्पपौ । तत्पीतशेषं पपावित्यर्थः । कृष्णश्चासौ सारः शबलश्च कृष्णसारः कृष्णमृगः ॥ "वर्णो वर्णेन" इति समासः ॥ स्पर्शेन स्पर्शसुखेन निमीलिताक्षीं मृगीं शृङ्गेणाकण्डूयत कंडूयितवान् ॥ "कण्ड्वादिभ्यो यक्" इति यक् । ततः कर्तरि लङ् ॥

दद्रौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः ।
अर्धोपभुक्तेन विसेन जायां संभावयामास रथाङ्गनामा ॥३७॥

ददाविति ॥ रसादतिरागात्करेणुः करिणी ॥ "करेणुरिभ्यां स्त्री नेभे" इत्यमरः ॥ पङ्काज्जायत इति पङ्कजं तस्य रेणुः पङ्कजरेणुस्तस्य गन्धोऽस्यास्तीति पङ्कजरेणुगन्धि गण्डूषजलं मुखान्तर्धृतजलं गजाय ददौ । रथाङ्गनामा चक्रवाकोऽर्धं यथा तथोपभुक्तेनार्धजग्धेन विसेन जायां संभावयामास । स्वजग्धशेषं ददावित्यर्थः ॥

गीतान्तरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे ॥ ३८ ॥

गीतान्तरेष्विति ॥ किंपुरुषः किंनरः श्रमवारिलेशैः स्वेदोदबिन्दुभिः किंचिदीषत्समुच्छ्वासिता विश्लेषिताः पत्रलेखा यस्य तत् । पुष्पाणामासवो मद्यं पुष्पासवः । पुष्पोद्भवमद्यमित्यर्थः । वसन्ते मधुकस्य संभवात् । पुष्पवासितमिति केचित् । तेनाघूर्णिताभ्यामाक्रान्ताभ्यां नेत्राभ्यां शोभत इति तथोक्तं प्रियामुखं गीतान्तरेषु गीतमध्येषु चुचुम्बे चुचुम्ब ॥

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ ३९ ॥

पर्याप्तेति ॥ पर्याप्ताः समग्राः पुष्पस्तबका एव स्तना यासां ताभ्यः ॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति विकल्पान्न ङीप् ॥ स्फुरन्तः प्रवालाः पल्लवा एवौष्ठास्तैर्मनोहराभ्यो लता एव वध्वस्ताभ्यः सकाशात्तरवोऽपि ॥ लिङ्गादेव पुंस्त्वं गम्यते ॥ विनम्राः शाखा एव भुजास्तैर्बन्धनान्यवापुः । आलिङ्गनानि प्रापुरित्यर्थः । स्थावराणामपि मदनविकारोऽभूत्किमुतान्येषामिति भावः । एतच्च तरूणामपि चेतनत्वादुक्तम् । यथाह मनुः—"अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः" इति ॥ अत्र रूपकालंकारः ॥

---

१ स्तवक. २ दुदुः.

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ४०

श्रुतेति ॥ अस्मिन्क्षणे वसन्ताविर्भावकाले भगवान्हरः श्रुताप्सरोगीतिरपि । दिव्याङ्गनागानमाकर्णयन्नपीत्यर्थः । प्रसंख्यानपरं आत्मानुसंधानपरो बभूव । तथाहि । आत्मनश्चित्तस्येश्वराणां नियन्तॄणाम् । वशिनामित्यर्थः । विहन्यन्त एभिरिति विघ्नाः प्रत्यूहाः ॥ घञर्थे कप्रत्ययः ॥ जातु कदाचिदपि समाधिभेदे समाधिभञ्जने प्रभवः समर्था न भवन्ति ॥

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ४१

लतेति ॥ अथ लतागृहद्वारं गतो वामे प्रकोष्ठेऽर्पितहेमवेत्रो धारितहेमदण्डो नन्दी नन्दिकेश्वरः ॥ "नन्दी भृङ्गिरितस्तण्डुनन्दिनौ नन्दिकेश्वरे" इति कोशः । मुखेऽर्पितायाः सरोषविस्मयस्तिमितावलोकं निहिताया एकस्या अङ्गुलेस्तर्जन्याः संज्ञया सूचनयैव । "संज्ञा स्याचेतना नाम हस्ताद्यैरर्थसूचना" इत्यमरः ॥ गणान्प्रमथांश्चापलाय चापलं कर्तुं मा भवतेति ॥ "क्रियार्थोपपदस्य–" इत्यादिना चतुर्थी ॥ व्यनैषीच्छिक्षितवान् ॥

न केवलं गणा एव विनीताः किंतु जरायुजादिचतुर्विधं प्राणिजातमपीत्याह—

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ ४२॥

निष्कम्पेति ॥ निष्कम्पवृक्षम् । इदमुद्भिज्जोपलक्षणम् । निभृतद्विरेफं निश्चलभृङ्गम् । स्वेदजोपलक्षणमेतत् । मूकाण्डजं निःशब्दपक्षिसरीसृपादिकम् । एतेनाण्डजनातिरुक्ता । शान्तमृगप्रचारम् । जरायुजोपलक्षणमेतत् । सर्वमेव काननं तच्छासनान्नन्दीश्वराज्ञया चित्रार्पितारम्भं चित्रलिखितारम्भमिवावतस्थे ॥ "मृगाद्या जरायुजाः । स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः । उद्भिदस्तरुगुल्माद्याः" इत्यमरः ॥

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥ ४३ ॥

दृष्टिप्रपातमिति ॥ कामः प्रयाणे यात्रायां पुरोगतः शुक्रो यस्मिन्देशे सं पुरःशुक्रं देशमिव ॥ "शुक्रं [illegible] [illegible]" [illegible] ॥ [illegible] तस्य दृष्टिप्रपातं [illegible]
[illegible] इति [illegible] ॥ [illegible]

पार्श्वदेशेषु संसक्ता अन्योन्यसंसृष्टा नमेरूणां सुरपुंनागानां शाखा यस्य तत्। तिरोधानयोग्यमिति भावः। भूतपतेः शिवस्य ध्यानास्पदं समाधिस्थानम्॥ "आस्पदं प्रतिष्ठायाम्" इति निपातः॥ विवेश॥

सदेवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श॥ ४४॥

स इति॥ आसन्नशरीरपात आसन्नमृत्युः स कामः शार्दूलचर्मणा व्यवधानवत्याम्। व्याघ्रचर्मास्तृतायामित्यर्थः। "मोक्षश्रीर्व्याघ्रचर्मणि" इति प्राशस्त्यादिति भावः। देवदारुद्रुमवेदिकायामासीनमुपविष्टं संयमिनं समाधिनिष्ठं त्रियम्बकं त्रिनेत्रं ददर्श॥ केचित्साहसिकाः 'त्रिलोचनम्' इति पेठुः॥ त्र्यम्बकमित्युक्ते पादपूरणव्यत्यासात्त्रियम्बकमिति पादपूरणार्थोऽयमियङादेशश्छान्दसो महाकविप्रयोगादभियुक्तैरङ्गीकृतः॥

तमेव देवं पञ्चभिः श्लोकैर्वर्णयति—

पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम्।
उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये॥ ४५॥

पर्यङ्केति॥ पर्यङ्कबन्धेन वीरासनेन स्थिरपूर्वकायं निश्चलोत्तरार्धमृजुरायतश्च ऊर्ध्वायतस्तं संनमितावुभावंसौ यस्य तं तथोक्तम्॥ वृत्तिविषये उभशब्दस्थाने उभयशब्दप्रयोग इत्युक्तं कैयटेन॥ उत्तान ऊर्ध्वतलो यः पाणिद्वयस्य संनिवेशः संस्थानं तस्मादङ्कमध्ये प्रफुल्लं राजीवं पङ्कजं यस्य तमिव स्थितम्॥ वीरासने वसिष्ठः—"एकं पादमथैकस्मिन्विन्यस्योरौ तु संस्थितम्। इतरस्मिंस्तथैवोरुं वीरासनमुदाहृतम्" इति। तथा योगसारे—"उत्तानिते करतले करमुत्तानितं परम्। आदायाङ्कगतं कृत्वा ध्यायेद्यस्तस्य सोऽन्तरम्" इति॥

भुजंगमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम्।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम्॥ ४६॥

भुजंगमेति॥ भुजंगमेनोन्नद्ध उद्बद्धस्य यद्वा जटाकलापो येन तं तथोक्तम्। कर्णावसक्तम्। कर्णावलम्बीत्यर्थः। अतएव द्विगुणं द्विरावृत्तमक्षसूत्रमक्षमाला यस्य तं कण्ठप्रभाणां सङ्गेन मिश्रणेन विशेषनीलामतिनीलां ग्रन्थिमतीं बन्धनयुतां कृष्णत्वचं कृष्णमृगाजिनं दधानम्॥

१ त्रिलोचनम्. २ उद्धद्ध; आबद्ध. ३ कर्णावसक्त. ४ कृष्णत्वचम्.

अंगीकुर्वाणाम्। कर्मणि प्रभवतीति कार्मुकं धनुः॥ "कर्मण उकञ्" इत्युकञ्प्रत्ययः।
मम द्वितीयां मौर्वीमिव स्थिताम् ॥ अत्र हि न्यस्ता मौर्व्युत्तरत्र हरं निर्जे-
ष्यामीत्युक्तम् इति भावः ॥ नितम्बात्स्रस्तां चलितां केसरदाम बकुलमाला-
काञ्चीं तां पुनःपुनरवलम्बमाना हस्तेन धारयन्ती ॥

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम्।
प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ ५६

सुगन्धीति ॥ सुगन्धिभिर्निश्वासैर्विवृद्धतृष्णम्। बिम्बतुल्योऽधरो बिम्बाधरः ॥ "वृत्तौ मध्यमपदलोपः स्यात्" इति वामनः॥ तस्यासन्नचरं संनिकृष्टचरं द्विरेफं
भृङ्गं प्रतिक्षणं संभ्रमेण लोलदृष्टिश्चलाक्षी सती लीलारविन्देन निवारयन्ती॥

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम्।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे॥

तामिति ॥ सर्वावयवेष्वनवद्यामगर्ह्याम् ॥ "अवद्यपण्य-" इति निपातः।
रतेः कामकलत्रस्यापि ह्रीपदं लज्जानिमित्तमादधानाम्। न्यूननामावहन्तीमित्यर्थः।
तां पार्वतीं वीक्ष्य पुष्पचापः कामो जितेन्द्रिये। दुर्जयेऽपीत्यर्थः। शूलिनि वि-
षये स्वकार्यसिद्धिं पुनराशशंसे चकमे॥ पूर्वं "साध्वससन्नहस्तः" (३।५१
इत्यनेना कार्यसिद्धेरुन्मूलितत्वाभिधानादिह पुनरित्युक्तम् ॥

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ॥ ५१ ॥

स्मरेति ॥ स्मरः कामस्तथाभूतं पूर्वोक्तरूपं मनसाप्यधृष्यमयुग्मनेत्रं त्रिपमा-क्षमदूरात्पश्यन् । साध्वसेन सन्नहस्तो विश्लथपाणिः सन् । स्वहस्तात्स्रस्तं शरं चापमपि चापं च नालक्षयन्न विवेद । भीतो मुह्यतीति भावः ॥

निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ॥ ५२ ॥

निर्वाणेति ॥ अथ निर्वाणेन नाशेन भूयिष्ठं निर्वाणभूयिष्ठम् । नष्टप्रायमि-त्यर्थः । अस्य स्मरस्य वीर्यं बलं वपुर्गुणेन सौन्दर्येण संधुक्षयन्तीव पुनरुज्जीवय-न्तीव स्थिता वनदेवताभ्यां सखीभूताभ्यामनुप्रयातानुगता स्थावरराजकन्या पार्वत्यदृश्यत दृष्टा ॥

तामेवाह चतुर्भिः—

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥ ५३ ॥

अशोकेति ॥ अशोकपुष्पेण निर्भर्त्सितास्तिरस्कृताः पद्मरागा येन तत्तथो-क्तम् । आकृष्टहेमद्युतीन्याहृतसुवर्णाभरणवर्णानि कर्णिकाराणि यस्मिंस्तथोक्त-म् । मुक्ताकलापीकृतानि सिन्धुवाराणि निर्गुण्डीकुसुमानि यस्मिंस्तत् ॥ "सि-न्धुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि" इत्यमरः ॥ वसन्तपुष्पाण्येवाभरणं वहन्ती ।

आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव ॥ ५४ ॥

आवर्जितेति ॥ ॥ स्तनाभ्यां किंचिदावर्जितेषन्नम्रेव । तरुणार्कस्य राग इव रागो यस्य तत् । [illegible] ॥ [illegible] पर्याप्तपुष्पस्तबकावनम्रा संचारिणी [illegible] [illegible] लतेव ॥

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ॥ ५५ ॥

स्रस्तामिति ॥ [illegible]

[illegible]

क्षेपीकृताम् । कर्मणि प्रभवतीति कार्मुकं धनुः ॥ "कर्मण उकञ्" इत्युकञ्प्रत्ययः ॥ तस्य द्वितीयां मौर्वीमिव स्थिताम् ॥ अत्र हि न्यस्ता मौर्व्युत्तरत्र दूरंतरनिर्यातनायोपयुज्यत इति भावः ॥ नितम्बात्स्रस्तां चलितां केसरदाम बकुलमाला रंतकाञ्ची तां पुनःपुनरवलम्बमाना हस्तेन धारयन्ती ॥

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ ५६ ॥

सुगन्धीति ॥ सुगन्धिभिर्निश्वासैर्विवृद्धतृष्णम् । बिम्बतुल्योऽधरो बिम्बाधरः ॥ "वृत्तौ मध्यपदलोपः स्यात्" इति वामनः ॥ तस्यासन्नचरं संनिकृष्टचरं द्विरेफं भृङ्गं प्रतिक्षणं संभ्रमेण लोलदृष्टिश्चलाक्षी सती लीलारविन्देन निवारयन्ती ॥

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥ ५७

तामिति ॥ सर्वावयवेष्वनवद्यामगर्ह्याम् ॥ "अवद्यपण्य–" इति निपातः ॥ रतेः कामकलत्रस्यापि ह्रीपदं लज्जानिमित्तमादधानाम् । न्यूनतामावहन्तीमित्यर्थः । तां पार्वतीं वीक्ष्य पुष्पचापः कामो जितेन्द्रिये । दुर्जयेऽपीत्यर्थः । शूलिनि शिवे विषये स्वकार्यसिद्धिं पुनराशशंसे चकमे ॥ पूर्वं "साध्वससन्नहस्तः" (३।५१) इत्यादिना कार्यसिद्धेरुन्मूलितत्वाभिधानादिह पुनरित्युक्तम् ॥

भविष्यतः पत्युरुमा च शंभोः समाससाद प्रतिहारभूमिम् ।
योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥ ५८ ॥

भविष्यत इति ॥ उमा च भविष्यतः पत्युः शंभोः प्रतिहारभूमिं द्वारदेशं समाससाद ॥ "स्त्री द्वार्द्वारं प्रतीहारे" इत्यमरः ॥ स शंभुश्चान्तः परमात्मेति संज्ञा यस्य तत्परं मुख्यम् ॥ "परं दूरान्यमुख्येषु" इति यादवः ॥ ज्योतिर्दृष्ट्वा साक्षात्कृत्य योगाद्ध्यानात् ॥ "योगः संनहनोपायध्यानसंगतियुक्तिषु" इत्यमरः ॥ उपारराम उपरतः ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥

ततो भुजंगाधिपतेः फणाग्रैरधः कथंचिद्धृतभूमिभागः ।
शनैःकृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद ॥ ५९ ॥

तत इति ॥ ततो भुजंगाधिपतेः शेषस्य फणाग्रैरधो भूमेरधः कथंचिदतियत्नेन धृतो भूमिभागः स्वोपवेशनभूभागो यस्य [illegible] स्या भगवतो गुरुत्वादिति भावः । शनैः [illegible]

१ [illegible]. २ स्वकर्मसिद्धिम्. ३ आशशंस. ४ उपासितुं सा च पिनाकपाणिम्. ५

संचारो येन स कृतप्राणविमुक्तिरीशो निविडं दृढं पर्यङ्कबन्धं वीरासनं विभेद शिथिलीचकार ॥

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ ६० ॥

तस्मा इति ॥ अथ नन्दी तस्मै भगवते ॥ क्रियाग्रहणाच्चतुर्थी ॥ प्रणिपत्य नमस्कृत्य शुश्रूषया सेवया निमित्तेनोपेताम् । सेवार्थमागतामित्यर्थः । शैलसुतां शशंस निवेदयामास । भर्तुः स्वामिनो भ्रूक्षेपमात्रेण भ्रूसंज्ञयैवानुमतप्रवेशामङ्गीकृतप्रवेशामेनां शैलसुतां प्रवेशयामास च ॥

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः॥ ६१ ॥

तस्या इति ॥ तस्याः पार्वत्याः सखीभ्यां पूर्वोक्ताभ्यां स्वहस्तेन लून उपचितः पल्लवभङ्गभिन्नः किसलयशकलमिश्रः शिशिरात्ययस्य वसन्तस्य संबन्धी पुष्पोच्चयः पुष्पप्रकरः ॥ "हस्तादाने चेरस्तेये" इति घञ्विधेयत्वात्कवीनामयं प्रामादिकः प्रयोग इति वल्लभः ॥ त्र्यम्बकपादमूले प्रणिपातपूर्वं नमस्कारपूर्वकं व्यकीर्यत विक्षिप्तः ॥

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ६२ ॥

उमेति ॥ उमापि नीलालकानां मध्ये शोभत इति तथोक्तम् । अलकान्यस्तमित्यर्थः । नवकर्णिकारं विस्रंसयन्ती कर्णाच्च्युतः पल्लवो यस्य तेन मूर्ध्ना वृषभध्वजाय प्रणामं चकार ॥ क्रियाग्रहणात्संप्रदानत्वम् ॥

अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ६३

अनन्येति ॥ सा कृतप्रणामा देवी भवेन हरेण । अन्यां न भजतीति तमनन्यभाजम् ॥ "भजो ण्विः" इति ण्विप्रत्ययः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः ॥ पतिमाप्नुहीति तथ्यं सत्यमेवाभिहितोक्ता । उत्तरत्र तथैव संवादिनि भावः ॥ अभिदधातेर्द्विकर्मकस्य दुहादित्वादप्रधाने कर्मणि क्तः ॥ तथाहि । ईश्वरव्याहृतयो महापुरुषोक्तयः कदाचिदपि लोके भुवने ॥ "लोकस्तु भुवने जने" इत्यमरः ॥ विपरीतं विसंवादिनमर्थमभिधेयं न पुष्णन्ति । न बोधयन्तीत्यर्थः ॥

---

१ मनुंना.

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ ६४ ॥

काम इति ॥ कामस्तु बाणावसरं प्रतीक्ष्योमासंनिधानादयमेव बाणप्रयोगसमय इति ज्ञात्वा पतङ्गेन तुल्यं पतङ्गवच्छलभवत् ॥ "समौ पतङ्गशलभौ" इत्यमरः ॥ "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः ॥ वह्निमुखं विविक्षुः प्रवेष्टुमिच्छुः ॥ विशतेः सनन्तादुप्रत्ययः ॥ उमायाः समक्षमक्ष्णः समीपमुमासमक्षम् ॥ "अव्ययीभावे शरत्प्रभृतिभ्यः" इति समासान्तोऽच्प्रत्ययः ॥ हरे बद्धलक्ष्यः सन् । शरासनस्य ज्यां मौर्वीं मुहुराममर्श परामृष्टवान् ॥

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥ ६५

अथेति ॥ अथ गौरी । तपोऽस्यास्तीति तपस्वी ॥ "अस्मायामेधास्रजो विनिः" इति विनिप्रत्ययः ॥ तस्मै तपस्विने गिरिशाय ताम्ररुचा रक्तवर्णेन करेण भानुमतोंऽशुमतो मयूखैर्विशोषितां मन्दाकिन्याः पुष्कराणि पद्मानि तेषां बीजानि तेषां मालां जपमालिकामुपनिन्ये समर्पितवती ॥

प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च ।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ॥ ६६ ॥

प्रतिग्रहीतुमिति ॥ त्रिलोचनश्च प्रणयिप्रियत्वादर्थिप्रियत्वात्तामक्षमालां प्रतिग्रहीतुं स्वीकर्तुमुपचक्रमे । पुष्पं धनुर्यस्य स पुष्पधन्वा कामश्च ॥ "वा संज्ञायाम्" इत्यनङादेशः ॥ संमोह्यतेऽनेनेति संमोहनं नाम । नामेति प्रसिद्धौ । अमोघं बाणं सायकं धनुषि समधत्त संहितवान् ॥

हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ ६७ ॥

हर इति ॥ हरस्तु हरोऽपि चन्द्रोदयारम्भेऽम्बुराशिरिव किंचिदीषत्परिलुप्तधैर्यः । न तु प्राकृतजनवदत्यन्तलुप्तधैर्य इति भावः । बिम्बफलतुल्योऽधरोष्ठो यस्य तस्मिन्नुमामुखे विलोचनानि व्यापारयामास । त्रिभिरपि लोचनैः साभिलाषमद्राक्षीदित्यर्थः ॥ एतेन भगवतो रतिभावोदय उक्तः ॥

विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥ ६

१ परिवृत्त.

विवृण्वतीति ॥ शैलसुतापि स्फुरद्बालकदम्बकल्पैर्विकसत्कोमलनीपसदृशैः । पुलकितैरित्यर्थः ॥ "ईषदसमाप्तौ—" इत्यादिना कल्पप्प्रत्ययः ॥ अङ्गैर्भावं रत्याख्यं विवृण्वती प्रकाशयन्ती चारुतरेण पर्यस्तविलोचनेन व्रीडाविभ्रान्तनेत्रेण मुखेनासाचि साचि संपद्यमाना साचीकृता तिर्यक्कृता ॥ "तिर्यगर्थे साचि तिरः" इत्यमरः ॥ तस्थौ । ह्रिया मुखं साचीकृत्य स्थितेत्यर्थः । न केवलं हरस्यैव देव्या अप्युदितो रतिभाव इति भावः ॥

अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद्बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ ६९ ॥

अथेति ॥ अथायुग्मानि नेत्राणि यस्य सोऽयुग्मनेत्रस्त्रिनेत्रो वशित्वाज्जितेन्द्रियत्वादिन्द्रियक्षोभं पूर्वोक्तमिन्द्रियविकारं पुनर्बलवद्दृढं निगृह्य निवार्य स्वचेतोविकृतेः स्वचित्तविकारस्य हेतुं कारणं दिदृक्षुर्द्रष्टुमिच्छुर्दिशामुपान्तेषु दृष्टिं ससर्ज प्रसारयामास ॥

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ७० ॥

स इति ॥ स भगवान्दक्षिणापाङ्गे निविष्टा स्थिता मुष्टिर्यस्य तं नतांसमाकुञ्चितः सव्यपादो यस्य तम् । आलीढाख्यस्थानके स्थितमित्यर्थः । चक्रीकृतचारुचापं मण्डलीकृतसौम्यकोदण्डं प्रहर्तुमभ्युद्यतमात्मयोनिं मनोभवं ददर्श ॥ आलीढलक्षणमाह यादवः—"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती । समानौ स्यात्समपदमालीढं पदमग्रतः । दक्षिणं वाममाकुञ्च्य प्रत्यालीढं विपर्ययः" इति ॥

तपःपरामर्शविरुद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ७१

तप इति ॥ तपःपरामर्शेन तपस आस्कन्दनेन विरुद्धमन्योः प्रवृद्धकोपस्य भ्रूभङ्गेण दुष्प्रेक्ष्यं दुर्दर्शं मुखं यस्य तस्य हरस्य तृतीयादक्ष्णः स्फुरन्नुद्दीप्यमान उदर्चिरुद्गतज्वालः कृशानुरग्निः सहसातर्कितमेव ॥ "अतर्किते तु सहसा" इत्यमरः ॥ निष्पपात किल निर्जगाम खलु ॥

क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ ७२ ॥

क्रोधमिति ॥ हे प्रभो स्वामिन् । क्रोधं संहर संहर निवर्तय निवर्तय ॥ "यावत्

द्वे भवत इति वक्तव्यम्" इति वार्तिकेन द्वित्वम् । "संरम्भेण इति भारतम्" इति काशिका ॥ इत्येवं मरुतां देवानां गिरो वाचः खे व्योम्नि यावच्चरन्ति प्रव-र्तन्ते तावत्तस्मिन्नेव समये नेत्राज्जन्म यस्य स भवनेत्रजन्मा ॥ "अवर्गो वह्नि-र्गीर्दर्पकपरणो [illegible]" इति यादवः ॥ स वह्निर्मदनं भस्मावशेषो यस्य तं भस्मावशेषं चकार । ददाहेत्यर्थः ॥

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ ७३ ॥

तीव्रेति ॥ तीव्राभिषङ्गप्रभवेणातिदुःसहाभिभवसंभवेन ॥ "अभिषङ्गस्त्वभि-भवे सङ्ग आक्रोशनेऽपि च" इति वैजयन्ती ॥ इन्द्रियाणां चक्षुरादीनां वृत्तिं व्या-पारं संस्तम्भयता प्रतिबध्नता मोहेन मूर्च्छया ॥ कर्त्रा ॥ रतिर्मदनभार्या मुहूर्तम-ज्ञातं भर्तृव्यसनं भर्तृनाशो यया सा तथोक्ता सती कृतोपकारेव बभूव । सहसा दुःखोपनिपातात्प्रमुमूर्च्छेत्यर्थः । मोहेन दुःखसंवेदनाभावात्तस्योपकारकत्वोक्तिः ॥

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसंनिकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥ ७४ ॥

तमिति ॥ तपस्वी तपोनिष्ठो भूतपतिः शिवस्तपसो विघ्नमन्तरायभूतं तं का-ममाशु वज्रोऽशनिर्वनस्पतिं वृक्षमिवावभज्य भङ्क्त्वा स्त्रीसंनिकर्षं स्त्रीसंनिधानं परिहर्तुमिच्छन् । तस्यानर्थहेतुत्वादिति भावः । सभूतः सगणः सन्नन्तर्दधे ॥

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथंचित् ॥ ७५ ॥

शैलात्मजेति ॥ शैलात्मजा पार्वत्यप्युच्छिरस उन्नतशिरसो महतः पितुरभि-लाषं हरो वरोऽस्त्विति मनोरथं ललितं सुन्दरमात्मनो वपुश्च व्यर्थं निष्फलं सम-र्थ्य विचार्य सख्योः समक्षं पुर इति च हेतुनाधिकं जातलज्जा । समानजनसमक्ष-मवमानस्यातिदुःसहत्वादिति भावः । शून्या निरुत्साहा सती कथंचित्कृच्छ्रेण भवनस्याभिमुखी जगाम ॥

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।

सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ॥ ७६ ॥

सपदीति ॥ सपद्यद्रिर्हिमवान्रुद्रस्य संरम्भात्कोपाद्भीता ॥ "संरम्भः संभ्रमे कोपे" इति विश्वः ॥ मुकुलिताक्षीं निमीलितनेत्राम् ॥ "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इति षच्प्रत्ययः । "षिद्गौरादिभ्यश्च" इति ङीष् ॥ अनुकम्पितुमर्हामनुकम्प्याम् ॥ "ऋहलोर्ण्यत्" इति ण्यत्प्रत्ययः ॥ दुहितरं दोर्भ्यामादाय दन्तयोर्लग्नां पद्मिनीं नलिनीं बिभ्रत्सुरगज इव वेगेन रयेण दीर्घीकृताङ्ग आयतीकृतशरीरः सन् । पन्थानं प्रतिगता मार्गानुसारिणी गतिर्यस्य स प्रतिपथगतिरासीत् । पन्थानमनुसृत्य जगामेत्यर्थः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये मदनदहनो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

मूर्च्छिता रतिरित्युक्तम् । संप्रति तद्वृत्तान्तमेवाह—

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥ १ ॥

अथेति ॥ अथानन्तरं मोहो मूर्च्छा परमयनमाश्रयो यस्याः सा मोहपरायणा मोहैकशरणा सती ॥ "परायणमभीष्टे स्यात्तत्परे परमाश्रये" इति यादवः ॥ विवशा मूर्च्छाधिष्ठिता कामवधू रतिः । असह्या दुःसहा वेदना यस्मिंस्तदसह्यवेदनम् । विधवाया गतभर्तृकाया भावो वैधव्यम् । नवं च तद्वैधव्यं चेति नववैधव्यम् । नवग्रहणं दुःसहत्वद्योतनार्थम् । प्रतिपादयिष्यतानुभावयिष्यता ॥ [illegible] ॥ विधिना दैवेन ॥ "विधिर्विधाने दैवे च" इत्यमरः ॥ विबोधिता । वैरस्यानुभवोऽयं विधिनेति भावः ॥ अस्मिन्सर्गे वियोगिनी वृत्तम्—"विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी" इति लक्षणात् ॥

अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ॥ २ ॥

---

१ दर्श[illegible]. २ [illegible].

अथेति ॥ सा रतिः मलयान्ते मूर्च्छावसाने ॥ "प्रलयो नष्टचेष्टता" इत्यमरः ॥ उन्मिषिते उन्मीलिते विलोचने । अवधानं परं प्रधानं ययोस्तेऽवधानपरे दिदृक्षयावहिते चकार ॥ द्रष्टव्याभावात्तु न विवेदेत्याह—नेति । प्रियं काममतृप्तयोस्तृप्तिं न गतयोः । नित्यदिदृक्षमाणयोरित्यर्थः । तयोर्लोचनयोर्दर्शनक्रियापेक्षया ॥ संबन्धे षष्ठी ॥ अत्यन्तविलुप्तं दर्शनं स्वलोचनयोः करणयोर्यस्य कर्मभूतस्य तमत्यन्तविलुप्तदर्शनं सन्तं न विवेद न ज्ञातवती । प्रियनाशापरिज्ञानादिदृक्षांचक्रे इति तात्पर्यार्थः ॥

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥ ३ ॥

अयीति ॥ अयीति प्रश्ने ॥ "अयि प्रश्नानुनययोः" इति विश्वः ॥ अयि जीवितनाथ जीवसि प्राणिषि कच्चिदित्यभिधायोत्थितया तया रत्या पुरोऽग्रे क्षितौ पुरुषस्याकृतिरिवाकृतिर्यस्य तत्पुरुषाकृति केवलमेकं हरकोपानलभस्म ददृशे दृष्टम् । न तु पुरुष इति भावः ॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥ ४ ॥

अथेति ॥ अथ भस्मदर्शनानन्तरं पुनरेव विह्वला विक्लवा वसुधालिङ्गनधूसरस्तनी वसुधालिङ्गनेन क्षितिलुण्ठनेन धूसरौ धूसरवर्णौ स्तनौ कुचौ यस्याः सा तथोक्ता ॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप् ॥ विकीर्णमूर्धजा विकीर्णा विक्षिप्ता मूर्धजाः केशा यस्याः सा तथोक्ता सा रतिः स्थलीं वनभूमिम् । तत्रत्यान्प्राणिन इत्यर्थः ॥ "जानपदकुण्डगोणस्थल–" इत्यादिना ङीप् ॥ समदुःखां सतुल्यशोकां कुर्वतीव विललाप परिदेवितवती ॥ "विलापः परिदेवनम्" इत्यमरः ॥

उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया ।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥ ५ ॥

उपेति ॥ तव यत्करणं गात्रम् ॥ "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः ॥ कान्तिमत्तया सौन्दर्येण हेतुना विलासिनां विलसनशीलानाम् ॥ "वौ कषलस–" इत्यादिना घिनुण्प्रत्ययः ॥ उपमीयते येन तदुपमानमभूत् । तत्करणमिदमीदृशीं दशामवस्थां गतम् । भस्मीभूतमित्यर्थः । तथापि न विदीर्ये न विदीर्णा भवामि ॥ कर्तरि लट् ॥ तथाहि । स्त्रियः कठिनाः खलु । कठिनत्वा-

१ धूसराकृतिः

द्विदीर्यमाणत्वमित्यर्थः ॥ कारणात्कार्यसमर्थनरूपोऽर्थान्तरन्यासः—"धीरसंचारिणी दृष्टिर्गतिर्गौरवभाषिता । स्मितपूर्वं तथालापो विलास इति कीर्तितः" ॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ।

नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ॥ ६ ॥

क्वेति ॥ हे प्रिय क्षतसेतुबन्धनो भग्नसेतुबन्धो जलसंघातो जलौघो नलिनीमिव । जलैकायत्तजीवितामिति शेषः । त्वदधीनजीवितां त्वदायत्तप्राणां मां क्व नु विनिकीर्य कुत्र वा निक्षिप्य क्षणभिन्नसौहृदः क्षणसक्तसौहार्दः सन् । विद्रुतः पलायितोऽसि ॥ सेतुसौहृदयोः स्थितिहेतुत्वेन साम्यम् । सुहृदो भावः सौहृदम् ॥ युवादित्वादण्प्रत्ययः । "हृदयस्य हृल्लेखयदण्लासेषु" इति हृदादेशः । अणि हृद्भावाच्च "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः । हृद्भावस्याणिविधाने तूभयपदवृद्धिः स्यात् । यथा सुहृदो भावः सौहार्दमिति । तदेवाह वामनः—"सौहृदर्दौर्हृदशब्दावणि हृद्भावात्" इति ॥

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।

किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥ ७ ॥

कृतेति ॥ हे प्रिय त्वं मे मम विप्रियमप्रियं कृतवान्नासि । मया च ते तव प्रतिकूलमप्रियं न कृतम् । अकारणं निष्कारणमेव । परस्परापकाररूपकारणाभावेऽपीत्यर्थः ॥ क्रियाविशेषणमेतत् ॥ विलपन्त्यै । त्वद्दर्शनार्थिन्या अपीति भावः । रतये किं कथं दर्शनं न दीयते ॥ क्रियाग्रहणाच्चतुर्थी ॥

विप्रियमाशङ्कते—

स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ।

च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ॥ ८ ॥

स्मरसीति ॥ हे स्मर । गोत्रस्खलितेषु नामव्यत्यासेषु ॥ "गोत्रं नाम्नि च कुले" इति विश्वः ॥ मेखलागुणैर्बन्धनं स्मरस्युत स्मरसि वा ॥ "विकल्पे किं किमुत च" इत्यमरः ॥ च्युतकेशरैर्भ्रष्टकिञ्जल्कैर्दूषिते ईक्षणे येषु तान्यवतंसोत्पलताडनानि । सधूलिक्षेपताडनानीत्यर्थः । स्मरसि वा । अस्मात्स्मरणाद्दर्मदर्शनमिति भावः ॥

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ।

उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥ ९ ॥

हृदय इति ॥ हृदये वससीति मत्प्रियवचनानुवादः । इत्येवंरूपं मत्प्रियं यदवोच उक्तवानसि ॥ वृचो लुङि "वच उम्" इत्युमागमः ॥ तत्कैतवमपि कपटमिति मन्ये । इदं वचनमुपचारपदं परस्य रञ्जनार्थं पदमर्थप्रधानं न उपचारमात्र पदं स्यात् । कैतवस्यार्थोऽपि यावत् । न चेत्त्वमनङ्गोऽशरीरः । कथं रतिर-क्षताविनष्टा । आश्रयनाशेऽप्याश्रितस्यानिवृत्तिरिति विरोधादिति भावः ॥

न च मे कश्चिद्विचारः किंतु लोकः शोच्यत इत्याह—

परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।

विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥१०॥

परलोकेति ॥ परलोकं प्रति नवप्रवासिनोऽचिरप्रोषितस्य । अनेनानुगमन-कालानतिपातः सूच्यते । तव पदवीं मार्गं प्रतिपत्स्ये । त्वामनुगमिष्यामीत्यर्थः । अतो मे नास्ति विचार इति भावः । किंतु विधिना दैवेनैष जनो लोको वञ्चितः प्रतारितः । देहिनां सुखं त्वदधीनं त्वय्यधीनं खलु ॥ अधिशब्दस्य शौण्डादिक-त्वात् "सप्तमी शौण्डैः" इति समासः । "अध्युत्तरपदात्" इति खप्रत्ययः । एवमन्यत्रापि ॥ सुखप्रदाभावे कुतः सुखमिति भावः ॥

तदेवाह—

रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः ।

वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥११॥

रजनीति ॥ हे प्रिय । रजनीतिमिरेणावगुण्ठित आवृते पुरमार्गे घनशब्दविक्लवा गर्जितभीताः प्रियाः कामिनां वसतिं प्रापयितुं त्वदृते त्वां विना ॥ "अन्यारा-दितरर्ते-" इत्यादिना पञ्चमी ॥ क ईश्वरः शक्तः । न कश्चिदित्यर्थः । न हि कामान्धानां भीतिरस्तीति भावः ॥

नयनान्यरुणानि घूर्णयन्वचनानि स्खलयन्पदे पदे ।

असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥ १२ ॥

नयनानीति ॥ अरुणानि नयनानि घूर्णयन्भ्रमयन् । तथा पदे पदे प्रतिप-दम् ॥ वीप्सायां द्विरुक्तिः ॥ वचनानि स्खलयन्विपर्यासयन्प्रमदानां वारुणीमदो मद्यमदोऽधुना त्वय्यसति विडम्बनानुकृतिमात्रम् । मदनाभावे मदस्य निष्फलत्वा-दिति भावः । तथा च शिशुपालवधे—"तां मदो दयितसंगमभूषः"(१०।३३)इति ॥

अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।

बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति ॥ १३ ॥

अवगम्येति ॥ हे अनङ्ग अशरीर । प्रियबन्धोः प्रियसखस्य तव वपुः शरीरं कथीकृतमकथा कथा संपद्यमानं कृतं शब्दमात्रावशिष्टमवगम्य ज्ञात्वा निष्फलोदयः । उद्दीप्याभावादुद्दीपनवैफल्यमिति भावः । निशाकरश्चन्द्रो बहुले कृष्णपक्षे गतेऽपि तनुतां कार्श्यं दुःखं यथा तथा कृच्छ्रान्मोक्ष्यति । वृथा वृद्धिरिति दुःखायिष्यत इत्यर्थः ॥

हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः ।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥ १४ ॥

हरितेति ॥ हरितं चारुणं च ॥ "वर्णो वर्णेन" इति तत्पुरुषः ॥ हरितारुणं चारु बन्धनं वृन्तं पुटश्च यस्य स तथोक्तः । कलेन मधुरेण पुंस्कोकिलशब्देन पुरुषकोकिलनादेन सूचितोऽनुमापितश्च । चूतचर्वणकार्यत्वात्कलशब्दस्येति भावः । नवचूतप्रसवो नवचूतकुसुमं संप्रति कस्य बाणतां शरत्वं गमिष्यति वद । अन्यस्य पुष्पबाणस्याभावादिति भावः ॥

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥ १५ ॥

अलीति ॥ त्वयानेकशो बहुशो धनुषः कार्मुकस्य गुणकृत्ये मौर्वीकार्ये गुणवत्कर्मणि च नियोजिताधिकृतेयमलिपङ्क्तिः करुणस्वनैर्दीनस्वनैर्विरुतैः कूजितैर्गुरुशोकां दुर्भरदुःखाम् ॥ "गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे" इति शब्दार्णवः ॥ मामनुरोदितीव ॥ उपसर्गात्सकर्मकत्वम् ॥ "रुदादिभ्यः सार्वधातुके" इतीडागमः ॥

प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥ १६ ॥

प्रतिपद्येति ॥ तावत्पुनरपि मनोहरं वपुः शरीरं प्रतिपद्य प्राप्योत्थितः सन् । मधुरालापेषु प्रियोक्तिषु निसर्गपण्डितां स्वभावप्रगल्भां कोकिलां रतिदूतिपदेषु सुरतदूतीस्थानेष्वादिशाज्ञापय । प्रगल्भानामेव दौत्याधिकार इति भावः ॥ दीर्घान्तस्यापि दूतीशब्दस्य छन्दोभङ्गभयाद्ध्रस्वः । "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इति केचित् । "ङ्यापोः संज्ञाछन्दसोर्बहुलम्" इति बहुलग्रहणाद्ध्रस्व इति वल्लभः ॥

शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च ।
सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे ॥१७॥

---

१ मतेः. २ दरुणा.

शिरसेति ॥ हे स्मर । शिरसा प्रणिपत्य याचितानि सवेपथूनि सकम्पानि "द्वितोऽथुच्" इत्यथुच्प्रत्ययः ॥ सात्त्विकान्तरोपलक्षणमेतत् ॥ "स्तम्भप्रलय रोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः" इति ॥ उपगूढान्यालिङ्गनानि च । नपुंसके भावे क्तः ॥ तान्यनुभूतप्रकाराणि र एकान्ते सुरतानि च संस्मृत्य मे शान्तिर्नास्ति ॥ अत्र समानकर्तृकत्वं दुर्घटं समा नक्रियापेक्षास्तीति केचित् ॥

रचितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥ १८ ॥

रचितमिति ॥ हे रतिपण्डित रतिकुशल । त्वया ममाङ्गेष्ववयवेषु स्वयं रचितम् ऋतुरस्य प्राप्त आर्तवं वासन्तम् ॥ "ऋतोरण्" इत्यण्प्रत्ययः ॥ कुसुमप्रसाधनं पुष्पाभरणमिदं ध्रियतेऽवतिष्ठते ॥ "धृञ् अवस्थाने" इति धातोस्तौदादिकात्कर्तरि लट् ॥ तव तत्प्रसाधकं चारु सुन्दरं वपुस्तु न दृश्यते ॥

विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः ।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥ १९ ॥

विबुधैरिति ॥ दारुणैः क्रूरैः । प्राणान्तिके कर्मणि नियोगादिति भावः । विबुधैर्देवैः । अनभिज्ञत्वं च ध्वन्यते । यस्य मच्चरणस्य परिकर्मणि प्रसाधने ॥ "परिकर्म प्रसाधनम्" इत्यमरः ॥ असमाप्ते सति स्मृतोऽसि तमिमं दक्षिणेतरं वामं मे चरणं निर्मितरागं रचितलाक्षारागं कुर्वन्नागच्छ ॥

अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि ॥२०॥

अहमिति ॥ अहं पतङ्गवर्त्मना शलभमार्गेण । अग्निप्रवेशेनेत्यर्थः ॥ "पतङ्गः शलभे शालौ मार्तण्डेऽर्के शरे खगे" इति वैजयन्ती ॥ एत्यागत्य पुनस्तेऽङ्काश्रयण्युत्सङ्गवर्तिनी भवामि संपन्नैव भविष्यामि ॥ "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥ हे प्रिय । दिवि स्वर्गे चतुरैः सुरकामिनीजनैरप्सरोगणैर्यावन्न विलोभ्यसे विलोभयिष्यसे ॥ "यावत्पुरानिपातयोर्लट्" इति लट् ॥

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि ॥ २१ ॥

१ [illegible] २ [illegible]

मदनेनेति ॥ हे रमण । त्वामनुयामि यद्यप्यनुगमिष्याम्येव ॥ "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट्॥ "यद्यपीत्यवधारणे" इति केशवः ॥ किंतु रतिर्मदनेन विनाकृता । वियोजिता सतीत्यर्थः ॥ सुप्सुपेति समासः॥ क्षणमात्रं जीविता किलेतीदं वचनीयं निन्दा मे मम व्यवस्थितं स्थिरमभूत् ॥

क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च ॥ २२ ॥

क्रियतामिति ॥ परलोकेऽन्तरितस्य व्यवहितस्य । मृतस्येत्यर्थः । ते तव मयान्त्यमण्डनं कथं केन प्रकारेण क्रियताम् ॥ क्रियतामित्यत्र कामचारे लोट् बोध्यः ॥ हुतदग्धस्य ते यथेच्छमण्डनमपि न संभवतीत्यर्थः । कुतः । अङ्गेन च जीवितेन च समं सहैवातर्कितामविचारितां गतिं गतोऽसि । इह मृतशरीरमपि नास्ति कस्य मण्डनमिति भावः ॥

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत्॥२३॥

ऋजुतामिति ॥ शरमृजुतामार्जवं नयत उत्सङ्गे निषण्णमङ्कगतं धनुर्यस्य तस्य ॥ "धनुषश्च" इत्यनङादेशः ॥ ते तव मधुना वसन्तेन सह ॥ "मधुर्दैत्ये वसन्ते च चैत्रे च" इति विश्वः ॥ सस्मितां कथामालापं तथा यन्नयनोपान्तविलोकितमपाङ्गवीक्षणम् । तं इत्यनुषङ्गः । तच्च स्मरामि ॥

क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् २४

क्वेति ॥ हृदयं गच्छतीति हृदयंगमो हृद्यः ॥ खच्प्रत्यये "गमेः सुप्युपसंख्यानम्" इति खच्प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः ॥ ते तव सखा कुसुमैरायोजितमारोपितं कार्मुकं येन [illegible] मधुर्वसन्तः क्व नु क्व वा । गत इति शेषः । अथवा सोऽप्युग्ररुषा [illegible] पिनाकिनेश्वरेण सुहृदा मदनेन गतां प्राप्तां गतिम् । भस्मीभावमित्यर्थः । न गमितः कच्चिन्न गमितः किम् ॥ "[illegible]नुनये [illegible]" इत्यमरः ॥

शरैरिवाहतः सन् ॥ "विपाक्ते दिग्धलिप्तकौ" इत्यमरः ॥ मधुर्वसन्त आतुरामापन्नां रतिमभ्युपपत्तुमनुग्रहीतुम् । आश्वासयितुमित्यर्थः ॥ "अभ्युपपत्तिरनुग्रहः" इत्यमरः ॥ आत्मानं पुरोऽदर्शयत् । आविरभूदित्यर्थः ॥

तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥ २६ ॥

तमिति ॥ सा रतिस्तं मधुमवेक्ष्य दृष्ट्वा भृशं रुरोद । स्तनौ संबाध्य स्तनसंबाधम् ॥ "परिक्लिश्यमाने च" इति णमुल् ॥ उरो जघान ताडितवती च । तथाहि । स्वजनस्याग्रतो दुःखं विवृतमपसारितं द्वारं कपाटं यस्य तदिवोपजायत आविर्भवति । उच्छृङ्खलं भवतीत इत्युत्प्रेक्षाभिप्रायः ॥

इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त किं स्थितम् ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥ २७ ॥

इतीति ॥ दुःखमस्याः संजातं दुःखिता । संजातदुःखेत्यर्थः ॥ तारकादित्वादितच् ॥ सा रतिरेनं वसन्तमित्युवाच च ॥ चकारः पूर्वोक्तसमुच्चयार्थः ॥ हे वसन्त पश्य सुहृदस्तत्सखस्य किं स्थितं किमुपस्थितं तदिदं कपोतकर्बुरं पारावतशबलं कणशश्चूर्णीभूतम् ॥ अल्पार्थाच्छस्प्रत्ययः ॥ भस्म पवनैर्विकीर्यते विक्षिप्यते । पश्य भस्मीभूतस्ते सुहृदित्यर्थः ॥

अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥२८॥

अयीति ॥ अयि स्मर । संप्रति दर्शनं देहि । एष माधवो वसन्तः पर्युत्सुकस्त्वद्दर्शनोत्कण्ठितः । त्वामप्यनादृतवतोऽस्य को माधव इत्याशङ्क्याह—नृणां पुरुषाणां दयितासु प्रेमानवस्थितमस्थिरम् । चलमित्यर्थः । सुहृज्जने प्रेम तु न चलं खलु ॥

ईदृशाः सुहृदः कति न सन्तीत्याशङ्क्य न कोऽपीत्याह—

अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव ।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ॥ २९ ॥

अमुनेति ॥ ननु मदन । पार्श्ववर्तिना सहचरेणामुना वसन्तेन ससुरासुरं सुरासुरसहितं जगद्बिसतन्तुगुणस्य मृणालसूत्रमौर्वीकस्य पेलवानि कोमलानि पुष्पाण्येव पत्रिणो बाणा यस्य तस्य तव धनुष आज्ञां कारितम् । जगदाज्ञां कारितमित्यर्थः ॥ "हृक्रोरन्यतरस्याम्" इति जगतः कर्मत्वम् ॥

---

१ दुह. २ मह. ३ मद्दीर्यते. ४ कपोतपाण्डुरम्. ५ कोमल; पिशुन.

गत एव न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥ ३० ॥

गत इति ॥ स ते सखानिलाहतो वायुताडितो दीप इव गत एव न निवर्तते । अहमस्य दीपायमानस्य दशा वर्तिरिव । तिष्ठामीति शेषः ॥ "दशा वर्ताववस्थायां वस्त्रान्ते स्युर्दशा अपि" इति विश्वः ॥ कुतः । अविषह्यव्यसनेन सोढुमशक्यदुःखप्रकर्षेण धूमितां संजातधूमां मां पश्य । धूमवत्त्वान्नष्टदीपदशासाम्यं धूमश्च व्यसनमेवेत्यर्थः ॥

विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता ।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥ ३१ ॥

विधिनेति ॥ ननु वसन्त कामवधे मदनवधे मां विमुञ्चता वर्जयता । अमारयतेत्यर्थः । विधिना दैवेन । विशसति हिनस्तीति विशसो घातुकः ॥ पचाद्यच् ॥ विशसस्य कर्म वैशसम् ॥ युवादित्वादण्प्रत्ययः ॥ अर्धवैशसमर्धवधः कृतम् ॥ "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः ॥ पत्युः स्वस्य चाश्रयाश्रयिभूतयोरेकपदार्थत्वाभिप्रायेणार्धोक्तिः । तथा चैकदेशवधे देशान्तरस्यापि वधानियमनात्सामर्थ्यापि विधिरन्नध्येव हनिष्यतीति तात्पर्यम् । एतदेवोपपादयति—अनपायिन्यनपायित्वेन विश्वस्ते संश्रयद्रुमे आश्रयवृक्षे गजभग्ने सति वल्लरी लता पतनाय । भवतीति शेषः । पतितुमेव नालमित्यर्थः । "तुमर्थाच्च भाववचनात्" इति चतुर्थी ॥

संप्रत्यनन्तरकर्तव्यं प्रार्थयते—

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ॥ ३२ ॥

तदिति ॥ तत्तस्मात्कारणादुक्तप्रकारेण । अन्यथापि मरणस्यावश्यंभावादित्यर्थः । अनन्तरं भवतेदं वक्ष्यमाणं बन्धुजनप्रयोजनं बन्धुकृत्यं क्रियताम् ॥ प्रार्थनायां लोट् ॥ तदेवोपादर्शयति—ननु वसन्त । विधुरां विवशां मां ज्वलनातिसर्जनादग्निदानात्पत्युरन्तिकं प्रापय । अग्निप्रवेशनं कारयेत्यर्थः ॥

कर्तव्यत्यागमर्षः स्त्रीणामित्याह—

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥ ३३ ॥

शशिनेति ॥ कौमुदी चन्द्रिका शशिना सह याति । अस्तमेति स्वयं

१ महतनपुनरागतम्. २ भवति हि. ३ संश्रय द्रुमे. ४ ननु. ५ विचेतनैः.

ाश्यतीत्यर्थः ॥ तडित्सौदामिनी मेघेन सह प्रलीयते प्रणश्यति ॥ कर्तरि लट् ॥
ामदाः स्त्रियः पतिवर्त्म गच्छन्तीति पतिवर्त्मगाः पतिमार्गानुगामिन्य इत्येतद्विचे-
ानैरल्पचेतनैः । अविवेकिभिरपीत्यर्थः ॥ नाथस्तु "पृथग्जनैः" इति पपाठ ॥ प्रति-
ाभं ज्ञाविचेतम् ॥ "अलवणा यवागूः" "अनुदरा कन्या" इतिवदल्पत्वाभि-
ायेण तनैरपीति निर्देशः ॥ पतिवर्त्मगा इत्यत्र स्मृतिः—"आर्तार्ते मुदिते हृष्टा
ोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता" इति ॥

अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥ ३४ ॥

अमुनेति ॥ अमुना पुरोवर्तिना सुभगेन शोभनेन प्रियगात्रभस्मनैव । एव-
कारो मण्डनान्तरनिवृत्त्यर्थः । कषायितस्तनी रञ्जितस्तनी ॥ "रागे क्वाथे कषा-
योऽस्त्री निर्यासे सौरभे रसे" इति वैजयन्ती ॥ नवपल्लवसंस्तरे यथा नवपल्लवत-
ल्प इव विभावसौ वह्नौ तनुं शरीरं रचयिष्यामि । निधास्यामीत्यर्थः ॥

कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः ।
कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम् ॥ ३५ ॥

कुसुमेति ॥ हे सौम्य साधो त्वमावयो रतिपञ्चबाणयोर्बहुशो बहुवारं कुसुमा-
स्तरणे पुष्पशयने सहायतां गतः । संप्रति प्रणिपाताञ्जलिना याचितः । अञ्जलि-
पूर्वकं प्रार्थितः सन्नित्यर्थः । आशु मे चितां काष्ठचयं कुरु कुरुष्व । यथेह तथा-
मुत्रोपकर्तव्यं मित्रेणेत्यर्थः ॥

तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ॥ ३६ ॥

तदन्विति ॥ चिताकरणमनन्तरं मय्यर्पितं मदर्पितं ज्वलनमग्निं दक्षिण-
ानिलवीजनैर्मन्दमारुतसंचारणैस्त्वरयेः । त्वरितं ज्वलयेरित्यर्थः ॥ त्वराहेतुमाह—ते
तव विदितं खलु ॥ "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तः । क्तस्य च वर्तमाने षष्ठी ॥ यथा येन प्रकारेण स्मरो मां विना क्षणमपि नोत्सहते न दृप्यति । तथा
त्वया ज्ञातमेवेत्यर्थः ॥

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः ॥ ३७ ॥

इतीति ॥ अपि चैवमेवं विधाय कृत्वा नावावाभ्यामेक एव सलिलस्याञ्ज-
लिर्दीयताम् । तदञ्जलिं स ते बान्धवः मया सह परत्र परलोके अविभज्य पास्यति ।

ऽविभज्य पास्यति ॥

परलोकविधौ च माधव स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा ॥ ३८ ॥

परलोकेति ॥ किंच । हे माधव वसन्त । परलोकविधौ पिण्डोदकादिकर्मणि स्मरमुद्दिश्य विलोलाः पल्लवा यासु ताः सहकारमञ्जरीश्चूतवल्लरीर्निवपेर्देहि । हि यस्मात्कारणात्ते सखा स्मरः प्रियाश्चूतप्रसवा यस्य स तथोक्तः ॥

इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत् ॥ ३९ ॥

इतीति ॥ इति देहस्य विमुक्तये शरीरस्य विसर्गाय स्थिताम् । कृतनिश्चयामिति यावत् । रतिमाकाशभवा सरस्वत्यशरीरा वाग्ध्रदशोषविक्लवां ह्रदस्य जलाशयस्य शोषेण विक्लवां शफरीं प्रोष्ठीम् ॥ "प्रोष्ठी तु शफरी द्वयोः" इत्यमरः ॥ प्रथमा वृष्टिर्वर्षमिवान्वकम्पयदनुकम्पितवती । सदयमुवाचेत्यर्थः ॥ "कृपा दयानुकम्पा स्यात्" इत्यमरः ॥

कुसुमायुधपत्नि दुर्लभस्तव भर्ता न चिराद्भविष्यति ।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि ॥ ४० ॥

कुसुमेति ॥ हे कुसुमायुधपत्नि रते । तव भर्ता चिराच्चिरं दुर्लभो न भविष्यति । किंत्वचिरमेव सुलभो भविष्यतीत्यर्थः । किंच शृणु । तत्कर्मेति शेषः । येन कर्मणा स ते भर्ता हरलोचनस्यार्चिर्ज्वाला ॥ "ज्वालाभासो न पुंस्यर्चिः" इत्यमरः ॥ तस्मिञ्शलभत्वं पतङ्गत्वं गतः ॥ "समौ पतङ्गशलभौ" इत्यमरः ॥

तदेव कर्मोपाचष्टे—

अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः ।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ॥ ४१ ॥

अभिलाषेति ॥ उदीरितेन्द्रियः प्रेरितेन्द्रियः । स्मरेणेति शेषः । प्रजापतिर्ब्रह्मा स्वसुतायां सरस्वत्यामभिलाषमनुरागमकरोत् । अथ तेन प्रजापतिना विक्रियामिन्द्रियविकारं निगृह्य निरुध्याभिशप्तः सन् । एतद्दाहात्मकं शापफलमन्वभूत् ॥

शापावधिरपि मन्वतोक्त इत्याह श्लोकद्वयेन—

परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ॥ ४२ ॥

१ विहगान्. २ अन्वकम्पत. ३ हरलोचनार्चिषम्. ४ न संयोजयिष्यति.

इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम् ।
अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः ॥ ४३ ॥

परिणेष्यतीति । इतीति च ॥ धर्मेण धर्माख्यप्रजापतिना याचितः प्रार्थित स भगवान्ब्रह्मा । तपसा कारणेन तस्यां पार्वत्यां प्रवणीकृतोऽभिमुखीकृतो हरः शिवो यदा पार्वतीं परिणेष्यत्युद्वक्ष्यति तदोपलब्धसुखः प्राप्तानन्दः सन् । स्मरं कामं स्वेन वपुषा नियोजयिष्यति संगमयिष्यति । इत्येवं स्मरशापस्यावधिदामवमानदायिनीं सरस्वतीं वाचं चाह । एवं शापावधिमप्युक्तवानित्यर्थः । ननु तथा क्रुद्धस्य कथमीदृशी शान्तिरत आह—वशिनो जितेन्द्रियाश्चाम्बुधराश्चाशनेरमृतस्य चेत्युभयोर्योनयः प्रभवाः । वशिपक्षेऽशन्यमृतशब्दौ कोपप्रसादपरौ । अन्यत्र वैद्युताम्बुदकपरौ ॥ युग्मकम् ॥

तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः ।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ॥ ४४ ॥

तदिति ॥ हे शोभने तत्तस्मात्कारणाद्भवितव्यो भविष्यन्प्रियसंगमो यस्य तत्तथोक्तमिदं वपुः परिरक्ष । तथाहि । रविपीतजला नदी तपात्यये प्रावृषि ॥ "प्रावृट् तपात्यये" इति हलायुधः ॥ पुनरोघेन प्रवाहेण युज्यते संगच्छते हि ॥

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-
माश्वासयत्सुचरितार्थपदैर्वचोभिः ॥ ४५ ॥

अथेति ॥ अथानन्तरं व्यसनेन दुःखेन कृशा मदनवधू रतिरुपप्लवान्तं विपद्वधिं किरणपरिक्षयेण धूसरा मलिना दिवातनस्य दिनभवस्य ॥ "सायंचिरम्-" इत्यादिना ट्युप्रत्ययः ॥ शशिनश्चन्द्रस्य लेखा प्रदोषं रात्रिमिव परिपालयांबभूव प्रतीक्षांचक्रे ॥ पुष्पिताग्रावृत्तम्— "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये रतिविलापो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥१॥

तथेति ॥ पर्वतस्यापत्यं स्त्री पार्वती तथा तेन प्रकारेणाक्ष्णोः समीपे समक्षं पुरतः ॥ "अव्ययं विभक्तिसमीपसमृद्धि-" इत्यादिनाव्ययीभावः ॥ मनोभवं मन्मथं दहता भस्मीकुर्वता पिनाकिनेश्वरेण भग्नः खण्डितो मनोरथोऽभिलाषो यस्याः सा तथोक्ता सती हृदयेन मनसा रूपं सौन्दर्यं निनिन्द । प्रिये रूपं यद्धरमनोहरणाय नालमिति गर्हितवतीत्यर्थः ॥ युक्तं चैतदित्याह—तथाहि । चारुता सौन्दर्यं प्रियेषु पतिषु विषये सौभाग्यं प्रियवाल्लभ्यं फलं यस्याः सा तथोक्ता । सौन्दर्यस्य तदेव फलं यद्भर्तृसौभाग्यं लभ्यते । नो चेन्निष्फलं स्यादिति भावः ॥ वंशस्थं वृत्तम्—" जतौ तु वंशस्थमुदीरितं जरौ " इति लक्षणात् ॥

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥२॥

इयेषेति ॥ सा पार्वती समाधिमेकाग्रतामास्थायावलम्ब्य तपोभिरात्मन-
नियमैः कायक्लेशात्मकैः स्वस्यावन्ध्यरूपतां सफलसौन्दर्यं कर्तुमियेष इच्छति स्म ।
तथा हि द्वयं कर्तुमुपपद्यते । अन्यथा तपोऽन्तरेण द्वयं वा कथमवा-

प्यते । किं तद्द्वयम् । तथाभूता विधा प्रकारो यस्य तत्तथाविधं प्रेम स्नेहः । येनार्धाङ्गहरा हरस्य भवेदिति भावः । तादृशः पतिश्च । यो मृत्युंजय इति भावः । द्वयमेव खलु स्त्रीणामपेक्षितं यद्भर्तृवाल्लभ्यं जीवद्भर्तृकत्वं चेति । तच्च तपश्चर्यैकसाध्यमिति निश्चिकायेत्यर्थः । अत्र मनुः—"यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् । तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्" इति ॥

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥

निशम्येति ॥ मेना मेनका च गिरीशप्रतिसक्तमानसां हरासक्तचित्तां तपसे तपश्चरणाय कृतोद्यमां कृतोद्योगां सुतां निशम्य श्रुत्वैनां पार्वतीं वक्षसा परिरभ्यालिङ्ग्य महतो मुनिव्रतात्तपसो निवारयन्त्युवाच ॥ मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात् "वारणार्थानामीप्सितः" इति नापादानत्वं तथापि कृतोद्यमामिति मानसप्रवेशोक्तत्वात् "ध्रुवमपायेऽपादानम्" इत्यपादानत्वमेव स्यात् । यथाह भाष्यकारः—"यच्च मिथ्या संभाव्य निवर्तते तच्च "ध्रुवमपायेऽपादानम्" इति प्रसिद्धम्" ॥

सामान्यनिषेधमुक्त्वा विशेषनिषेधमाह—

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥

मनीषिता इति ॥ हे वत्से । मनस ईषिता इष्टा मनीषिताः ॥ शकन्ध्वादित्वात्साधुः ॥ देवताः शच्यादयो गृहेषु सन्ति । त्वं ता आराधयेति शेषः । तपः क्व । तवेदं तावकम् ॥ "युष्मदस्मदोरन्यतरस्यां खञ्च" इत्यण्प्रत्ययः । "तवकममकावेकवचने" इति तवकादेशः ॥ वपुश्च क्व । तथाहि । पेलवं मृदुलं शिरीषपुष्पं भ्रमरस्य भृङ्गस्य पदं पदस्थितिं सहेत । पतत्त्रिणः पुनः पक्षिणस्तु पदं न सहेत । अतिसौकुमार्याद्दिव्योपभोगयोग्यं ते वपुर्न दारुणतपःक्षममित्यर्थः ॥ अत्र दृष्टान्तालंकारः ॥

इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥

इतीति ॥ इत्येवमनुशासत्युपदिशन्ती मेना ध्रुवेच्छां स्थिरव्यवसायां सुतां पार्वतीमुद्यमादुद्योगात्तपोलक्षणान्नियन्तुं निवारयितुं न शशाक समर्था नाभूत् ।

तथाहि । ईप्सितार्थे इष्टार्थे स्थिरनिश्चयं मनो निम्नाभिमुखं पयश्च कः प्रतीपयेत्प्रतिकूलयेत् । प्रतिनिवर्तयेदित्यर्थः । निम्नप्रवणं पय इवेष्टार्थाभिनिविष्टं मनो दुर्वारमिति भावः ॥ अत्र दीपकानुप्राणितोऽर्थान्तरन्यासालंकारः ॥

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥ ६ ॥

कदाचिदिति ॥ अथ कदाचिन्मनस्विनी स्थिरचित्ता सा पार्वती मनोरथज्ञमभिलाषाभिज्ञं पितरं हिमवन्तमासन्नमत्यासन्नसखी सैव मुखमुपायः ॥ "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति विश्वः ॥ तेन । फलोदयः फलोत्पत्तिरन्तोऽवधिर्यस्य तस्मै तपःसमाधये तपोनियमार्थमात्मनः स्वस्यारण्यनिवासं वनवासमयाचत ॥ "दुह्याच्–" इत्यादिना द्विकर्मकत्वम् ॥

अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥

अथेति ॥ अथ गौर्यनुरूपेण योग्येनाभिनिवेशेनाग्रहेण तुष्यतीति तथोक्तेन गरीयसा पूज्यतमेन गुरुणा पित्रा कृताभ्यनुज्ञा तपः कुर्विति कृतानुमतिः सती पश्चात्तपःसिद्ध्युत्तरकाले प्रजासु जनेषु तदाख्यया तस्या गौर्याः संज्ञया प्रथितम् । गौरीशिखरमिति प्रसिद्धमित्यर्थः । शिखण्डिमत् । न तु हिंस्रप्राणिप्रचुरमिति भावः । शिखरं शृङ्गं जगाम ययौ ॥

विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥

विमुच्येति ॥ अहार्यनिश्चयानिवार्यनिश्चया सा गौरी विलोलाभिश्चलाभिर्यष्टिभिः सरैः प्रविलुप्तं प्रमृष्टं चन्दनं स्तनान्तरगतं येन तं तथोक्तं हारं मुक्तावलीं विमुच्य विहाय बालारुणबभ्रु बालार्कपिङ्गलं पयोधरयोः स्तनयोरुत्सेधेनोच्छ्रायेण विशीर्णा विघटिता संहतिरवयवसंश्लेषो यस्य तत्तथोक्तं वल्कलं वल्कलमिव स्तनोत्तरीयभूतं बबन्ध । धारयामासेत्यर्थः ॥

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥

यथेति ॥ तस्या देव्या आननं वदनं प्रसिद्धैर्भूषितैः ॥ "प्रसिद्धौ ख्यातभूषितौ" इत्यमरः ॥ रोहन्तीति रुहाः ॥ "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्य-

प्यते । किं तद्द्वयम् । तथाभूता विधा प्रकारो यस्य तत्तथाविधं प्रेम स्नेहः । येनार्धाङ्गहरा हरस्य भवेदिति भावः । तादृशः पतिश्च । यो मृत्युंजय इति भावः । द्वयमेव खलु स्त्रीणामपेक्षितं यद्भर्तृवाल्लभ्यं जीवद्भर्तृकत्वं चेति । तच्च तपश्चर्यैकसाध्यमिति निश्चिकायेत्यर्थः । अत्र मनुः—"यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् । तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्" इति ॥

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥

निशम्येति ॥ मेना मेनका च गिरीशप्रतिसक्तमानसां हरासक्तचित्तां तपसे तपश्चरणाय कृतोद्यमां कृतोद्योगां सुतां निशम्य श्रुत्वैनां पार्वतीं वक्षसा परिरभ्यालिङ्ग्य महतो मुनिव्रतात्तपसो निवारयन्त्युवाच ॥ मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात् "वारणार्थानामीप्सितः" इति नापादानत्वं तथापि कृतोद्यमामिति मानसप्रवेशोक्तत्वात् "ध्रुवमपायेऽपादानम्" इत्यपादानत्वमेव स्यात् । यथाह भाष्यकारः—"यच्च मिथ्या संभाव्य निवर्तते तत्र "ध्रुवमपायेऽपादानम्" इति प्रसिद्धम्" ॥

सामान्यनिषेधमुक्त्वा विशेषनिषेधमाह—

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥

मनीषिता इति ॥ हे वत्से । मनस ईषिता इष्टा मनीषिताः ॥ शकन्ध्वादित्वात्साधुः ॥ देवताः शच्यादयो गृहेषु सन्ति । त्वं ता आराधयेति शेषः । तपः क्व । तवेदं तावकम् ॥ "युष्मदस्मदोरन्यतरस्यां खञ् च" इत्यण्प्रत्ययः । "तवकममकावेकवचने" इति तवकादेशः ॥ वपुश्च क्व । तथाहि । पेलवं मृदुलं शिरीषपुष्पं भ्रमरस्य क्षुद्रस्य पदं पदस्थितिं सहेत । पतत्रिणः पुनः पक्षिणस्तु पदं न सहेत । अतिसुकुमारं दिव्योपभोगयोग्यं ते वपुर्न दारुणतपःक्षममित्यर्थः ॥ अत्र

पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥

पुनरिति ॥ नियमस्थया व्रतस्थया तया देव्या द्वयेऽपि द्वयं पुनर्ग्रहीतुं पुनरानेतुं निक्षेपोऽर्पितमिव निक्षेपत्वेनार्पितं किमु ॥ क्वचित् " द्वयीषु " इति प्रामादिकः पाठः ॥ कुत्र द्वये किं द्वयमर्पितमित्याह—तन्वीषु लतासु विलास एव चेष्टितं विलासचेष्टितं हरिणाङ्गनासु विलोलदृष्टं चञ्चलावलोकितं च । व्रतस्थायां तस्यां तयोरदर्शनाल्लतादिषु दर्शनाच्चार्पितमिवेत्युत्प्रेक्षा न तु वस्तुतोऽर्पणमस्तीति भावः ॥

अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अतन्द्रितेति ॥ सा देवी स्वयमेवातन्द्रितासंजाततन्द्रा सती ॥ तारकादित्वादितच्प्रत्ययः ॥ वृक्षकान्स्वल्पवृक्षान् ॥ " अल्पे " इत्यल्पार्थे कप्रत्ययः ॥ घटावेव स्तनौ तयोः प्रस्रवणैः प्रसृतपयोभिर्व्यवर्धयत् । गुहः कुमारोऽपि प्रथमाप्तजन्मनां प्रथमलब्धजन्मनाम् । अग्रजातानामित्यर्थः । येषां वृक्षकाणां संबन्धि पुत्रवात्सल्यं सुतप्रेम नापाकरिष्यति । उत्तरत्र कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्तिष्यत इत्यर्थः ॥

अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥ १५ ॥

अरण्येति ॥ अरण्यबीजानां नीवारादीनामञ्जलयस्तेषां दानेन लालिता हरिणाश्च तस्यां देव्यां तथा विश्वासमुर्विस्रम्भं जग्मुः ॥ "समौ विस्रम्भविश्वासौ" इत्यमरः ॥ यथा कुतूहलादौत्सुक्यात्तदीयैर्हरिणसंबन्धिभिर्नयनैर्नेत्रैः ॥ करणैः ॥ सखीये लोचने सखीनां पुरः पुरतः । अनेन तेषां संबन्धमहत्त्वमुक्तम् । अमिमीत । अभिपरिमाणतारतम्यज्ञानाय मानं चकारेत्यर्थः । केचित्तु सा पार्वती नदीयैर्नेत्रैः कुतूहलात्पुरोऽग्रे वर्तमानानां सखीनां लोचने अमिमीत व्रतस्थत्वादात्मन इत्याहुः ॥ " माङ् माने " इत्यस्माद्धातोर्लङ् ॥ इयमेव स्वस्तु विश्वासस्य परा काष्ठा यद्दर्शिपीडनेऽपि न क्षुभ्यन्तीति भावः ॥

तपःप्रभावमाह—

कृताभिषेकां, हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

१ द्वयीषु. २ [illegible] ३ [illegible]

यः ॥ शिरसि न्यस्तैः शिरोरुहैर्मूर्धजैर्यथा मधुरं प्रियमभूत् ॥ "स्वादुप्रियौ तु मधुरौ" इत्यमरः ॥ जटाभिरप्येवं मधुरमभूत् । तथाहि । पद्मजं पद्मं षट्पदश्रेणिभिर्भ्रमरपङ्क्तिभिरेव न किंतु सह शैवलासङ्गेन सशैवलासङ्गमपि ॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ प्रकाशते । शैवलेनापि शोभत एवेत्यर्थः ॥

प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदम् ॥ १० ॥

प्रतीति ॥ सा देवी प्रतिक्षणं क्षणे क्षणे कृतरोमविक्रियां पारुष्यात्कृतरोमाञ्चां त्रिगुणां त्रिरावृत्तां यां मौञ्जीं मुञ्जमयीं मेखलां व्रताय तपसे बभार । तदेव पूर्वं प्रथमं यस्य तत्पूर्वं यथा तथा निबद्धया तया मौञ्ज्यास्या देव्या रसनागुणस्यास्पदं स्थानं जघनम् । सह रागेण सरागं सलोहितमकारि कृतम् । सौकुमार्यातिशयादिति भावः ॥

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥ ११ ॥

विसृष्टेति ॥ तया देव्या विसृष्टरागात्त्यक्तलाक्षारसरञ्जनादधरादधरोष्ठान्निवर्तितः । "निसृष्टरागात्" इति पाठे नितरां सक्तलाक्षारागात् ॥ रागत्यागेन निष्प्रयोजनत्वादिति भावः । तथा स्तनाङ्गरागेणारुणितादरुणीकृतात् । पतनसमये तस्य स्तनयोरुपरोधादिति भावः । कन्दुकाच्च निवर्तितः । कुशाङ्कुराणामादानेन लवनेन परिक्षता व्रणिता अङ्गुल्यो यस्य स तथोक्तः करः पाणिरक्षसूत्रप्रणय्यक्षमालासहचरः कृतः ॥

महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥ १२ ॥

महार्हेति ॥ महानर्हो मूल्यं यस्याः सा महार्हा श्रेष्ठा या शय्या तस्यां परिवर्तनेन लुण्ठनेन च्युतैर्भ्रष्टैः स्वकेशपुष्पैरपि या देवी दूयते स्म क्लिश्यति स्म । पुष्पाधिकसौकुमार्यादिति भावः । सा देवी बाहुलतामुपधत्त उपधानीकरोतीति बाहुलतोपधायिनी सती केवले संस्तरणरहिते स्थण्डिले भूमावेवाशेत शयितवती । तथा निषेदुष्युपविष्टा च ॥ "क्वसुश्च" इति क्वसुः । "उगितश्च" इति ङीप् ॥

... व्यवहारो न जातपरीत्यर्थः ॥

पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥ १३॥

पुनरिति ॥ नियमस्थया व्रतस्थया तया देव्या द्वयेऽपि द्वयं पुनर्ग्रहीतुं पुनरानेतुं निक्षेपोऽर्पितमिव निक्षेपत्वेनार्पितं किमु ॥ क्वचित् "द्वयीषु" इति प्रामादिकः पाठः ॥ कुत्र द्वये किं द्वयमर्पितमित्याह—तन्वीषु लतासु विलास एव चेष्टितं विलासचेष्टितं हरिणाङ्गनासु विलोलदृष्टं चञ्चलावलोकितं च । व्रतस्थायां तस्यां तयोरदर्शनाल्लतादिषु दर्शनाच्चार्पितमिवेत्युत्प्रेक्षा न तु वस्तुतोऽर्पणमस्तीति भावः ॥

अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति॥ १४॥

अतन्द्रितेति ॥ सा देवी स्वयमेवातन्द्रितासंजाततन्द्रा सती ॥ तारकादित्वादितच्प्रत्ययः ॥ वृक्षकान्स्वल्पवृक्षान् ॥ "अल्पे" इत्यल्पार्थे कप्रत्ययः ॥ घटावेव स्तनौ तयोः प्रस्रवणैः प्रसृतपयोभिर्व्यवर्धयत् । गुहः कुमारोऽपि प्रथमाप्तजन्मनां प्रथमलब्धजन्मनाम् । अग्रजातानामित्यर्थः । येषां वृक्षकाणां संबन्धि पुत्रवात्सल्यं सुतप्रेम नापाकरिष्यति । उत्तरत्र कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्तिष्यत इत्यर्थः ॥

अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥ १५ ॥

अरण्येति ॥ अरण्यबीजानां नीवारादीनामञ्जलयस्तेषां दानेन लालिता हरिणाश्च तस्यां देव्यां तथा विशश्वसुर्विस्रम्भं जग्मुः ॥ "समौ विस्रम्भविश्वासौ" इत्यमरः ॥ यथा कुतूहलात्कौतुकात्तदीयैर्हरिणसंबन्धिभिर्नयनैर्नेत्रैः ॥ करणैः ॥ स्वकीये लोचने सखीनां पुरः पुरतः । अनेन तेषां संबन्धमहत्त्वमुक्तम् । अमिमीत । आयामपरिमाणतारतम्यज्ञानाय मानं चकारेत्यर्थः । केचित्तु सा पार्वती तदीयैर्नेत्रैः कुतूहलात्पुरोऽग्रे वर्तमानानां सखीनां लोचने अमिमीत व्रतस्थत्वाच्चामन इत्याहुः ॥ "माङ् माने" इत्यस्माद्धातोर्लङ् ॥ इयमेव खलु विश्वासस्य परा काष्ठा यदभिपीडनेऽपि न क्षुभ्यन्तीति भावः ॥

तपःप्रभावमाह—

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

१ द्वयोः. २ निश्चलः. ३ दृष्टुः.

कृतेति ॥ कृताभिषेकां कृतस्नानां हुतजातवेदसं हुताग्निकाम् । कृतहोमामित्यर्थः । त्वचा वल्कलेनोत्तरासङ्गवतीमुत्तरीयवतीं त्वगुत्तरासङ्गवतीम् । अधीतमस्या अस्तीत्यधीतिनीं स्तुतिपाठादि कुर्वतीम् ॥ "इष्टादिभ्यश्च" इतीनिप्रत्ययः ॥ तां देवीं दिदृक्षवो द्रष्टुमिच्छवोऽर्षयो मुनयोऽभ्युपागमन्समुपागताः ॥ न चात्र कनिष्ठसेवादोष इत्याह—धर्मवृद्धेषु वयो न समीक्ष्यते न प्रमाणीक्रियते । सति धर्मज्यैष्ठ्ये वयोज्यैष्ठ्यं न प्रयोजकमित्यर्थः । तथा च मनुः—"न तेन वृद्धो भवति येनास्य पलितं शिरः । यो वा युवाप्यधीयानस्तं देवाः स्थविरं विदुः" इति ॥

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

विरोधीति ॥ विरोधिभिः सत्त्वैर्गोव्याघ्रादिभिरुज्झितपूर्वमत्सरं त्यक्तपूर्ववैरम् । हिंसारहितमित्यर्थः । द्रुमैरभीष्टप्रसवेनेष्टफलेनार्चिताः पूजिता अतिथयो यस्मिंस्तत्तथोक्तम् । नवानामुटजानां पर्णशालानामभ्यन्तरेषु संभृताः संचिता अनला अग्नयो यस्मिंस्तत्तथोक्तं तच्च तपोवनम् । पावयतीति पावनं बभूव । अहिंसातिथिसत्काराग्निपरिचर्याभिर्जगत्पावनं बभूवेत्यर्थः ॥

यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।
तदानपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥ १८ ॥

यदेति ॥ सा देवी यदा यस्मिन्काले तावता तावत्प्रमाणेन पूर्वतपःसमाधिना पूर्वेणानुष्ठीयमानप्रकारेण तपोनियमेन काङ्क्षितं फलं लभ्यं लब्धुं शक्यं नामंस्त । अशक्यममंस्तेत्यर्थः । तदा तत्काले । अविलम्बेनेत्यर्थः । स्वशरीरस्य मार्दवं मृदुत्वं सौकुमार्यमनपेक्ष्याविगणय्य महद्दुश्चरं तपश्चरितुं साधयितुं प्रचक्रम उपचक्रमे ॥

क्रमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥१९॥

क्रममिति ॥ या देवी कन्दुकलीलया कन्दुकक्रीडयापि क्लमं ययौ ग्लानिं प्राप तया देव्या मुनीनां चरितं तीव्रं तपो व्यगाह्यत प्रविष्टम् । अत्रोत्प्रेक्षते—ध्रुवमस्या वपुः काञ्चनपद्मेन सुवर्णकमलेन निर्मितं घटितम् । अतएव प्रकृत्या पद्मस्वभावेन मृदु च सुकुमारमपि काञ्चनस्वभावेन ससारं च कठिनमेव । तथा च तदुपादानत्वाद्देव्या वपुषः सुकुमारस्यापि तीव्रतपःक्षमत्वमित्युत्प्रेक्षार्थः ॥

१ सर्वसमाधिसाधनम्. २ दि.

१ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
त्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

शुचाविति ॥ शुचौ ग्रीष्मे शुचिस्मिता विशदमन्दहासा सुमध्यमा पार्वती ज्वलतां दीप्तिमतां चतुर्णां हविर्भुजामग्नीनां मध्यगता सती । नेत्रे प्रतिहन्तीति तां नेत्रप्रतिघातिनीं प्रभां सावित्रं तेजो विजित्य । न विद्यतेऽन्यत्र दृष्टिर्यस्याः साऽनन्यदृष्टिः सती सवितारं सूर्यमैक्षत ददर्श । "ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः" इति स्मरणात् ॥ पञ्चाग्निमध्ये तपश्चचारेत्यर्थः । तत्र सवितैव पञ्चमोऽग्निः—"अग्निः सविता सवितैवाग्निः" इति श्रौतालिङ्गात् ॥

तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
१अपाङ्गयोः केवलमस्य दीर्घयोः शनैःशनैः श्यामिकया कृतं पदम् ॥ २१ ॥

तथेति ॥ सवितुः सूर्यस्य गभस्तिभिः किरणैस्तथा पूर्वोक्तप्रकारेणातितप्तं संतप्तं तस्या इदं तदीयं मुखं कमलश्रियं कमलस्य शोभां दधौ प्राप । यथा रवितापात्कमलं न म्लायति प्रत्युत विकसति तथा तदीयं मुखमासीदिति भावः । किंत्वस्य मुखस्य दीर्घयोरपाङ्गयोः केवलं नेत्रान्तयोरेव शनैःशनैर्मन्दंमन्दं श्यामिकया कालिम्ना पदं स्थानं कृतम् । तयोः सौकुमार्यादित्यर्थः ॥

अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥

अयाचितेति ॥ अयाचितोपस्थितमप्रार्थितोपनतं केवलमम्बूदकं रसात्मकस्यामृतमयस्योडूनां नक्षत्राणां पतिश्चन्द्रस्तस्य रश्मयश्च तस्याः पार्वत्याः पारणाविधिरभ्यवहारकर्म बभूव । तावन्मात्रसाधनकोऽभूदित्यर्थः ॥ साध्यसाधनयोरभेदेन व्यपदेशः साधनान्तरव्यावृत्त्यर्थः ॥ किलेति प्रसिद्धौ । वृक्षाणां या वृत्तिर्जीवनोपायस्तद्व्यतिरिक्तं साधनमुपायो यस्य स तथोक्तः पारणाविधिर्न बभूव । वृक्षोऽप्ययाचितोपस्थितेन मेघोदकेनेन्दुकिरणैश्च जीवतीति प्रसिद्धम् । अस्मिन्नपि तावन्मात्रमवलम्बनेनेत्यर्थः ॥

निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन सा ।
तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥ २३

निकामेति ॥ विविधेन । पञ्चविधेनेत्यर्थः । नभश्चरेण खेचरेण । आदित्यरूपेणेत्यर्थः । इन्धनसंभृतेन काष्ठसंपादितेन वह्निना निकाममत्यन्तं तप्ता पार्वती न-

---

१ अर्धोत्थितनन्; तथापि गतम्. २ वृक्षवृत्ति. ३ साधनम्. ४ च.

पात्यये ग्रीष्मान्ते । प्रावृषीत्यर्थः । नवैर्वारिभिरुक्षिता सिक्ता सती भुवा पञ्चाग्नि सया सहोर्ध्वगमूर्ध्वममृतमुष्माणं बाष्पममुञ्चत् ॥ "ग्रीष्मोष्मबाष्पमुष्माणम्" इति यादवः ॥

स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥२४॥

स्थिता इति ॥ उदकस्य बिन्दव उदबिन्दवः ॥ "मन्थौदन–" इत्यादिनोदकशब्दस्योदादेशः ॥ प्रथम उदबिन्दवः ॥ प्रथमविशेषणाद्बिन्दूनां विरलत्वं बहुवचनान्नातिविरलत्वं च गम्यते । तथा च चिरत्वनाभ्यन्तरगमनयोर्निर्वाहः ॥ तस्याः पार्वत्याः पक्ष्मसु नेत्रलोमसु क्षणं स्थिताः स्थितिं गताः । स्थिता इत्यनेन पक्ष्मणां सान्द्रत्वं क्षणमिति स्नैग्ध्यं च गम्यते । अनन्तरं ताडितो व्यथितोऽधर ओष्ठो यैस्ते तथोक्ताः । एतेनाधरस्य मार्दवं गम्यते । ततः पयोधरयोः स्तनयोरुत्सेध उपरिभागे निपातेन पतनेन चूर्णिता जर्जरिताः । कुचकाठिन्यादिति भावः । तदनु वलीषूदररेखासु स्खलिताः । निम्नोन्नतत्वादिति भावः ॥ इत्थं चिरेण न तु शीघ्रम् । प्रतिबन्धबाहुल्यादिति भावः । नाभिं प्रपेदिरे प्रविष्टा न तु निर्जग्मुः । एतेन नाभेर्गाम्भीर्यं गम्यते ॥ अत्र प्रतिपदमर्थवत्त्वात्परिकरालंकारः ॥

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥२५॥

शिलाशयामिति ॥ निरन्तरासु नीरन्ध्रास्वन्तरे मध्ये वातो यासां तादृश्यो या वृष्टयस्तास्वन्तरवातवृष्टिषु । न निकेते गृहे वसतीत्यनिकेतवासिनीम् । अनावृतदेशवासिनीमित्यर्थः । शिलायां शेत इति शिलाशयां शिलातलशायिनीम् ॥ "अधिकरणे शेतेः" इत्यच्प्रत्ययः ॥ तां पार्वतीं साक्षाद्द्रष्टा साक्षी ॥ "साक्षाद्द्रष्टरि संज्ञायाम्" इतीनिप्रत्ययः ॥ तस्य कर्म साक्ष्यं महातपसः साक्ष्ये स्थिताः क्षपास्तडिन्मयैर्विद्युद्रूपैरुन्मिषितैरवलोकनैर्व्यलोकयन्निव । इवेन साक्षिणां विलोकनमेवोत्प्रेक्ष्यते । साक्ष्यं तु "आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम्" इति वचनात्क्षपाणां साक्ष्यमित्यनुसंधेयम् ॥

एवं वर्षासु विहितं तपःप्रकारमुक्त्वा संप्रति हेमन्ते तपःप्रकारमाह—

निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ॥२६॥

१ [illegible]

निनायेति ॥ सा पार्वती । उत्किरन्ति क्षिपन्तीत्युत्किराः ॥ " इगुपधज्ञा–" सादिना कः ॥ अत्यन्तं हिमानामुत्किरा अनिला यासु ताः सहस्ररात्रीः पौषरात्रीः ॥ " पौषे तैषसहस्यौ द्वौ " इत्यमरः ॥ उदके वास उदवासः ॥ " पेषंवावाहनधिषु च " इत्युदादेशः ॥ उदवासे तत्परा आसक्ता तथा परस्परमाक्रन्दिन्यन्योन्यमाक्रोशिनि पुरोऽग्रे वियुक्ते विरहिणि । वियोगं प्राप्त इति यावत् । चक्रवाकी च चक्रवाकश्च चक्रवाकौ तयोश्चक्रवाकयोर्मिथुने द्वन्द्वे कृपावती सती निनाय । दुःखिषु कृपालुत्वं महतां स्वभाव इति चक्रवाकमिथुने कृपा न तु कामितयेति व्याख्यानवकाशः ॥ "अप्सु वासस्तु हेमन्ते क्रमशो वर्धयेत्तपः" इति मनुः ॥

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसंपदां सरोजसंधानमिवाकरोदपाम् ॥ २७ ॥

मुखेनेति ॥ सा पार्वती निशि रात्रौ पद्मस्येव सुगन्धिना सुरभिणा ॥ " गन्धस्येत्–" इत्यादिनेकारः । प्रवेपमानः कम्पमानोऽधर ओष्ठ एव पत्रं दलं तेन शोभत इति तथोक्तेन मुखेन तुषारवृष्ट्या तुहिनवर्षेण क्षता नाशिताः पद्मसंपदो यासां तासामपां सरोजसंधानं पद्मसंघट्टनमकरोदिव । इत्युत्प्रेक्षालंकारः । पद्मान्तरं तुहिनेनोपहन्यते तन्मुखपद्मं तु न तथेति व्यतिरेकालंकारो व्यज्यत इत्युभयोः संकरः ॥

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ॥२८॥

स्वयमिति ॥ स्वयं विशीर्णानि स्वतश्च्युतानि द्रुमपर्णान्येव वृत्तिर्जीवनं यस्य तस्य भावस्तत्ता तपसः परा काष्ठा परमुत्कर्षो हि ॥ "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः ॥ तया देव्या पुनः तत्पर्णवर्तनमप्यपाकीर्णमपाकृतम् । अतः पर्णापाकरणाद्धेतोः । प्रियं वदतीति प्रियंवदा ॥ " प्रियवशे वदः खच् " इति खच्प्रत्ययः ॥ " अरुर्द्विषदजन्तस्य मुम् " इति मुमागमः ॥ तां पार्वतीं पुराविदः पुराणज्ञास्तपश्चरणसमयेऽविद्यमानं पर्णभक्षणं यस्याः सापर्णेति वदन्ति ॥ नामान्तरलाभप्रपार्थप्रकारः ॥ अत्र "अपर्णाम्" इत्यपपाठ इतिशब्दाभिहिते द्वितीयानुपपत्तेः । यथाह वामनः—"निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्" इति ॥ स्वयं प्रियंवदाः देवेषामपि नियवादमाननानि भवन्तीति भावः ॥

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः [illegible]पार्जितं तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

[illegible]

[illegible]

रमेवमुक्तप्रकारतोयाग्निमध्यवासव्रतमादिर्येषां तैर्व्रतैरहश्च निशा चाहर्निशम् ॥ समाहारे द्वन्द्वैकवद्भावः । अत्यन्तसंयोगे द्वितीया ॥ ग्लपयन्ती कर्शयन्ती सा पार्वती कठिनैः । क्लेशसहैरित्यर्थः । शरीरैरुपार्जितं संपादितं तपस्विनामृषीणां तपो दूरमत्यन्तमधश्चकार तिरश्चकार । अतिशिश्य इत्यर्थः । तपस्विभिरप्येवं तपः कर्तुं न शक्यत इति तात्पर्यार्थः ॥

अथाजिनापाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

अथेति ॥ अथानन्तरमजिनं कृष्णमृगत्वक् । आपाढः प्रयोजनमस्येत्यापाढः पालाशदण्डः ॥ "पालाशो दण्ड आपाढः" इत्यमरः ॥ "विशाखापाढादण्मन्थदण्डयोः" इत्यण्प्रत्ययः ॥ तयोर्धरस्तथोक्तः प्रगल्भवाक्प्रौढवचनो ब्रह्ममयेन वैदिकेन तेजसा । ब्रह्मवर्चसेनेत्यर्थः ॥ ज्वलन्निव स्थितः ॥ इवशब्दो निर्धारणार्थः ॥ कश्चिदनिर्दिष्टो जटिलो जटावान् । ब्रह्मचारीति शेषः ॥ पिच्छादित्वादिलच्प्रत्ययः ॥ शरीरबद्धो बद्धशरीरः । शरीरवानित्यर्थः ॥ "वाहिताग्न्यादिषु" पाठात्साधुः ॥ प्रथमाश्रमो यथा ब्रह्मचर्याश्रम इव ॥ यथाशब्द इवार्थे ॥ तपोवनम् । देव्या इति शेषः । विवेश प्रविष्टवान् ॥

तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ३१

तमिति ॥ अतिथिषु साध्व्यातिथेयी ॥ "पथ्यतिथि–" इत्यादिना ढञ्प्रत्ययः । "टिड्ढाणञ्–" इत्यादिना ङीप् ॥ पार्वती तं ब्रह्मचारिणं बहुमानपूर्वया बहुमानः पूर्वो यस्यास्तया । गौरवपूर्वयेत्यर्थः । सपर्ययार्चया ॥ "सपर्यार्चार्हणाः समाः" इत्यमरः ॥ प्रत्युदियाय प्रत्युज्जगाम ॥ कथं समानेऽपि तस्यास्तादृशी प्रतिपत्तिरत आह—साम्ये सत्यपि निविष्टचेतसां स्थिरचित्तानां वपुर्विशेषेषु व्यक्तिविशेषेष्वतिशयितं गौरवं यासु ता अतिगौरवा अतिगौरवसहिताः क्रियाश्चेष्टा भवन्ति । प्रवर्तन्त इत्यर्थः । साधवो न साम्याभिनिवेशिन इति भावः ॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥

---

१ प्रतिगृह्य.

• २९–३० श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते—
मुदः [illegible] तदः [illegible] ।
[illegible] ॥ १ (मल्लीनाथ. २ टीका.)

विधीति ॥ स ब्रह्मचारी विधिना प्रयुक्तामनुष्ठितां सत्क्रियां पूजां परिगृह्य स्वीकृत्य क्षणं परिश्रमं विश्रामं च विनीय नाम। नामेत्यपरमार्थे। अथोमामृजुनैव विलासरहितेनैव चक्षुषा पश्यन्ननुज्झितक्रमोऽत्यक्तोचितपरिपाटीकः सन्। वक्तुं प्रचक्रमे प्रारेभे ॥

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥३३॥

अपीति ॥ अत्रापिशब्दः प्रश्ने। क्रियार्थं होमादिकर्मानुष्ठानार्थम्। समिधश्च कुशाश्च समित्कुशम् ॥ "जातिरप्राणिनाम्" इति द्वन्द्वैकवद्भावः ॥ सुलभमपि सुलभं कच्चित्। जलानि ते तव स्नानविधिक्षमाणि स्नानक्रियायोग्यान्यपि कच्चित्। किंच स्वशक्त्या निजसामर्थ्यानुसारेण तपसि प्रवर्तसेऽपि। देहमपीडयित्वा तपश्चरसि कच्चिदित्यर्थः। युक्तं च नामैतत्। खलु यस्माच्छरीरमाद्यं धर्मसाधनम्। धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते तेषु च वपुरेव मुख्यं साधनं सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते। अतएव "सततमात्मानमेव गोपयीत" इति श्रुतिः ॥

अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥३४॥

अपीति ॥ त्वयावर्जितेन सिक्तेन वारिणा संभृतं जनितमासां वीरुधां लतानां प्रवालं पल्लवमनुबन्ध्यप्यनुस्यूतं किम्। यत्प्रवालं चिरोज्झितश्चिरकालत्यक्तो लाक्षारागो येन तत्तथापि पाटलम्। स्वभावरक्तमित्यर्थः। तेन चिरोज्झितालक्तकपाटलेन ते तव दन्तवाससाधरेण ॥ "ओष्ठाधरौ तु रदनच्छदौ दशनवाससी" इत्यमरः ॥ तुलां साम्यमारोहति। गच्छतीत्यर्थः ॥ अत्र तुलाशब्दस्य सादृश्यवाचित्वाद्योगेऽपि "तुल्यार्थैरतुलोपमाभ्याम्–" इति न तृतीयाप्रतिषेधस्तत्र सूत्रे सदृशवाचिन एव ग्रहणादिति ॥

अपि प्रसन्नं [illegible] ते मनः करस्थदर्भप्रणयापहारिषु।
य [illegible] रैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥३५॥

[illegible] ीति ते तपोक्तेषु। सापराधे-
[illegible] इति पाठे दर्भाणां प्रणयेन प्रार्थ-
[illegible] त्यपि न क्षुभितं किम्। सापराधे-

५ अपि. ६ मादन्यम्.

ष्वपि न कोपितव्यं तपस्विभिरिति भावः । हे उत्पलाक्षि । ये हरिणाः प्रचलैश्चलै-
र्विलोचनैर्नेत्रैस्तवाक्षिसादृश्यं प्रयुञ्जत इवाभिनयन्तीव । प्रसक्तान्युगनेत्राणि तव
नयनैः साम्यमुपयान्तीति भावः ॥ "उत्पलाक्षिप्रचलैः" इति पाठान्तरे उत्पलवत्प्र-
चलैः । भावानयने द्रव्यानयनमिति न्यायेन क्षिप्यमाणोऽप्यक्षिशब्दोऽस्त्यर्थः ॥

यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥३६॥

यदिति ॥ हे पार्वति । रूपं सौम्याकृतिः पापवृत्तये पापचरणाय न भवतीति यदुच्यते । लोकैरिति शेषः । तद्वचो न व्यभिचरति न स्खलतीत्यव्यभिचारि सत्यम् । "यत्राकृतिस्तत्र गुणाः" "न सुरूपाः पापसमाचारा भवन्ति" इत्यादयो लोकवादा न विसंवादमासादयन्तीत्यर्थः । किमिति ज्ञायते—तथाहि । हे उदारदर्शने आयताक्षि । सुरूपे इत्यर्थः । अथवोन्नतज्ञाने । विवेकवतीत्यर्थः । ते तव शीलं सद्वृत्तम् ॥ "शीलं स्वभावे सद्वृत्ते" इत्यमरः ॥ तपस्विनामप्युपदिश्यतेऽनेनेत्युपदेशः प्रवर्तकं प्रमाणं तत्तामुपदेशतां गतं प्राप्तम् । मुनयोऽपि त्वां वीक्ष्य स्ववृत्ते प्रवर्तन्त इति भावः ॥

विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥ ३७ ॥

विकीर्णेति ॥ एष महीधरो हिमवान् । सप्त च त ऋषयश्च सप्तर्षयः ॥ "दिक्संख्ये संज्ञायाम्" इति समासः ॥ विकीर्णैः पर्यस्तैः सप्तर्षीणां संबन्धिभिर्बलिभिः पुष्पोपहारैः प्रहसन्ति ये तथोक्तैर्दिवोऽन्तरिक्षाच्च्युतैर्गाङ्गैः सलिलैस्तथा न पावितः । अनाविलैरकलुषैस्त्वदीयैश्चरितैर्यथा सान्वयः सपुत्रपौत्रः पावितः पवित्रीकृतः ॥

अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि ।
त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते ॥३८॥

अनेनेति ॥ हे भाविनि प्रशस्ताभिप्राये । अनेन कारणेन धर्मः सविशेषं सातिशयमद्य मे । त्रयाणां धर्मकामार्थानां वर्गस्त्रिवर्गः ॥ "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः ॥ तत्र सारः श्रेष्ठः प्रतिभाति । यद्यस्मात्कारणान्मनसो निर्विषयावर्थकामौ यस्यास्तया त्वयैको धर्म एव प्रतिगृह्य स्वीकृत्य सेव्यते । परित्यक्तार्थकामौ विहाय धर्म एवावलम्बितः । अतः सर्वेषां नः स श्रेयानिति प्रतिपद्यत इत्यर्थः ॥

१ प्रवाहिभिः. २ भाविनि.

संप्रति मनोरथं जिज्ञासुः प्रस्तौति—

प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतां संनतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥३९॥

प्रयुक्तेति ॥ आत्मना त्वया प्रयुक्तः कृतः सत्कारविशेषः पूजातिशयो यस्य तं मां परमन्यं संप्रतिपत्तुमवगन्तुं नार्हसि । हे संनतगात्रि संनताङ्गि ॥ "अङ्गगात्रकण्ठेभ्यः" इति वक्तव्यात् ङीप् ॥ यतः कारणान्मनस ईषिभिर्मनीषिभिर्विद्वद्भिः ॥ शकन्ध्वादित्वात्साधुः ॥ सतां संगतं सख्यं सप्तभिः पदैरवाप्यत इति साप्तपदीनं सप्तपदोच्चारणसाध्यमुच्यते । तथावयोस्त्वत्कृतसत्कारप्रयोगादेव सिद्धमित्यर्थः ॥ "साप्तपदीनं सख्यम्" इति निपातनात्साधु ॥

अतोऽत्र किंचिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

अत इति ॥ हे तपोधने अतः सख्याद्धेतोरत्र प्रस्तावे बहुक्षमां बहूक्तिसहाम् । यद्वा क्षमावतीम् । भवतीं त्वां द्विजातिभावाद्ब्राह्मणत्वादुपपन्नचापलः सुलभधार्ष्ट्योऽयं जनः । स्वयमित्यर्थः । किंचित्प्रष्टुं मनो यस्य स किंचित्प्रष्टुमनाः प्रष्टुकामः ॥ "तुम्काममनसोरपि" इति मकारलोपः ॥ रहसि भवं रहस्यं गोप्यं न चेत्प्रतिवक्तुमर्हति ॥

प्रष्टव्यमाह—

कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात्किमतः परं वद ॥४१ ॥

कुल इति ॥ प्रथमस्य वेधसो हिरण्यगर्भस्य कुलेऽन्ववाये प्रसूतिरुत्पत्तिः । "यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः" इति ब्रह्मपुराणवचनात् । वपुः शरीरं त्रयाणां लोकानां सौन्दर्यमिवोदितमेकत्र समाहृतम् । ऐश्वर्यसुखं संपत्सुखममृग्यमन्वेषणीयं न भवति । किंतु सिद्धमेवेत्यर्थः । वयो नवम् । यौवनमित्यर्थः । अतः परमतोऽन्यदपि तपःफलं स्याद्वद । अस्ति चेदिति शेषः । न किंचिदस्तीत्यर्थः ॥

भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि त्वयि ॥४२ ॥

भवतीति ॥ दुःसहान्सोढुमशक्यादनिष्टाद्दर्शनादिदेशतोऽपि मनस्विनीनां धीरस्त्रीणामीदृशी तपश्चरणलक्षणा प्रतिपत्तिः प्रवृत्तिः ॥ "प्रतिपत्तिस्तु गौरवे । प्राप्तौ

१ दर्श. २ कट. ३ [illegible]. ४ [illegible].

मद्दत्तौ प्रागल्भ्ये" इति केशवः ॥ भवति नाम ॥ नामेति संभावनायाम् ॥ विचारमार्गे प्रहितेन चेतसा चित्तेन तदनिष्टं च । हे कृशोदरि । त्वयि न दृश्यते । विचार्यमाणे तदपि नास्त्यसंभावितत्वादित्यर्थः ॥

अनिष्टाभावमेव प्रपञ्चयति—

अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥ ४३ ॥

अलभ्येति ॥ हे सुभ्रु । इयं त्वदीयाकृतिर्मूर्तिरलभ्यो लब्धुमनर्हः शोकेन भर्त्रादिप्रमानजेन दुःखेनाभिभवस्तिरस्कारो यस्याः सा तथोक्ता । दृश्यत इति शेषः । असंभावितश्चायमर्थ इत्याह—पितुर्गृहे विमाननावमानः कुतः । न संभाव्यत एवेत्यर्थः ॥ "सुभ्रुः कुतस्तातगृहेऽवमाननम्" इति पाठान्तरकरणं तु साध्वसमेवोक्तोपपत्तिसंभवात् । अन्यत्रापि "सुभ्रु त्वं कुपितेत्यपास्तमशनं सक्ता कथा योषिताम्" इत्यादिप्रयोगदर्शनाद्वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाच्चेत्यलं गोष्ठीभिः ॥ न चाप्यन्यस्माद्भीरित्याह—पराभिमर्शः परधर्षणं तु तव नास्ति । पन्नगरत्नसूचये फणिशिरोमणिशलाकाम् । ग्रहीतुमित्यर्थः ॥ "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥ करं हस्तं कः प्रसारयेत् । "सुभ्रु" इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् "नेयङुवङ्स्थानावस्त्री" इति नदीसंज्ञाप्रतिषेधात् अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वं नास्ति । तेन ह्रस्वः प्रामादिक इति केचित् । अन्ये तु "अप्राणिजातेश्चारज्ज्वादीनाम्" इत्यत्र "अलाबूः" "कर्कन्धूः" इत्युकारान्तादप्यूङ्प्रत्ययमुदाजहार भाष्यकार एतस्मादेव ज्ञापकात्क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः । अतएवाह वामनः—"ऊकारादप्यूङ्प्रकृतेः" इति ॥

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥

किमिति ॥ हे गौरि । किमिति केन हेतुना यौवने त्वयाभरणान्यपास्य विहाय । वृद्धस्य भावो वार्धकम् ॥ मनोज्ञादित्वाद्वुञ्प्रत्ययः ॥ "वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि" इति विश्वः ॥ तत्र शोभत इति वार्धकशोभि वल्कलं धृतम् । प्रदोषे रजनीमुखे स्फुटाः प्रकटाश्चन्द्रस्तारकाश्च यस्याः सा स्फुटचन्द्रतारका विभावरी रात्रिररुणाय सूर्यसूताय कल्पते यद्यरुणं गन्तुं कल्पते किम् । वद ब्रूहि ॥ "क्रियार्थोपपदस्य-" इत्यादिना चतुर्थी ॥ दीप्यमानशशाङ्कतारके प्रदोषे यद्यरुणं नहेति ततो विभूषणापहारेण तव वल्कलधारणं संघटत इति भावः ॥

तपःप्रयोजनं निराकर्तुमाह—

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५

दिवमिति ॥ दिवं स्वर्गं प्रार्थयसे कामयसे यदि तर्हि श्रमस्तपश्चरणप्रयासो वृथा निष्फलः । यदि स्वर्गार्थं तप्यसे ततः श्रमं मा कार्षीः । कुतः । तव पितुर्हिमवतः प्रदेशा देवभूमयः स्वर्गपदार्थाः । तत्रसा इत्यर्थः । अथोपयन्तारं वरं प्रार्थयसे तर्हि समाधिना तपसालम् । न कर्तव्यमित्यर्थः ॥ निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया ॥ तथाहि । रत्नम् ॥ कर्तृ ॥ नान्विष्यति न मृगयते । ग्रहीतारमिति शेषः । किंतु तद्रत्नं मृग्यते । ग्रहीतृभिरिति शेषः । न हि वरार्थं त्वया तपसि वर्तितव्यं किंतु तेनैव त्वदर्थमिति भावः ॥

वरवाचकाक्षरश्रवणानन्तरमेव देव्या उष्णोच्छ्वासमालक्ष्य प्रश्नेषु च प्रत्युत्तरमनुपलभ्य स्वयमेवाशङ्क्याह—

निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६

निवेदितमिति ॥ सोष्मणा निश्वसितेन निश्वासवायुना निवेदितम् । चिन्तानुभावेनोष्णोच्छ्वासेन ते वरार्थित्वं सूचितमित्यर्थः । तर्हि किं प्रश्नव्यसनेनेत्याह—मनस्तु तथापि मे संशयमेव गाहते प्राप्नोति । कुतः । ते तव ॥ "कृत्यानां कर्तरि वा" इति षष्ठी ॥ प्रार्थयितव्यः प्रार्थयितुमर्ह एव न दृश्यते । प्रार्थितदुर्लभः प्रार्थितो यो दुर्लभः स कथं भविष्यति । नास्त्येवेत्यर्थः ॥

अथ पतिप्रार्थनामेव सिद्धवत्कृत्वाह—

अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७

अहो इति ॥ अहो चित्रम् । तवेप्सितस्त्वयाभीष्टो युवा कोऽपि स्थिरः कठिनः । पतित इति शेषः । कुतः । यो युवा चिराय चिरकालेन कर्णोत्पलशून्यतां गते मदीये कपोलदेशे गण्डस्थले श्लथाः शिथिलबन्धना अत एव लम्बिन्यस्ताः प्रलम्बिनीः कलमाः शालिविशेषास्तेषामग्राणि तद्वत्पिङ्गला जटा उपेक्षते । यस्मादीदृशीं दृष्ट्वा न व्यथते स नूनं वज्रहृदय इत्यर्थः ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ॥ ४८ ॥

---

१ [illegible]

सखीति ॥ तस्याः पार्वत्या इयं तदीया सखी वयस्या तम् । "वर्णः प्रशस्तः" इति क्षीरस्वामी । सोऽस्यास्तीति वर्णिनं ब्रह्मचारिणम् ॥ "वर्णाद्ब्रह्मचारिणि" इतीनिप्रत्ययः ॥ उवाच ब्रूते स्म । किमिति । हे साधो विद्वन् । तव कुतूहलं चेत् । श्रोतुमस्तीति शेषः । तर्हि निबोधावगच्छ । आकर्णयेत्यर्थः ॥ "बुध अवगमने" इति धातोर्भौवादिकाल्लोट् ॥ श्रोतव्यं किं तदाह—यस्मै लाभायेदं यदर्थम् ॥ अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति वक्तव्यम्" इति वार्तिकनियमात्क्रियाविशेषणम् ॥ एतया पार्वत्याम्भोजं पद्ममुष्णवारणमातपत्रमिव वपुः शरीरं तपःसाधनं कृतम् । तपःप्रवृत्तिकारणमुच्यते श्रूयतामित्यर्थः ॥

"दृङ्मनःसङ्गसंकल्पो जागरः कृशतारतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति । तत्रास्याः काश्चिद्दशाः क्रममनादृत्यैव योजयति "इयम्" इत्यादिभिः षड्भिः श्लोकैः—

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्पिनाकपाणिं पतिमाप्तुमिच्छति॥५३॥

इयमिति ॥ मानिनीन्द्राणीप्रभृतीरतिशय्य वर्तितव्यमित्यभिमानवतीयं पार्वत्यधिश्रियोऽधिकैश्वर्यान्महेन्द्रप्रभृतीनिन्द्रादींश्चतसृणां दिशामीशानिन्द्रवरुणयमकुबेरान् ॥ "तद्धितार्थ—" इत्यादिनोत्तरपदसमासः ॥ अवमत्यावधूय मदनस्य निग्रहान्निबर्हणाद्धेतोः । अकामुकत्वादित्यर्थः । रूपेण सौन्दर्येण हार्यो वशीकरणीयो न भवतीत्यरूपहार्यं पिनाकः पाणौ यस्य तं पिनाकपाणिं हरम् ॥ "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति साधु ॥ पतिं भर्तारमाप्तुमिच्छति ॥ एतेन संकल्पावस्था सूचिता ॥

असह्यहुंकारनिवर्तितः पुरा पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणोद्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥५४॥

असह्येति ॥ पुरा पूर्वमसह्येन सोढुमशक्येन हुंकारेण रौद्रेण निवर्तितः । अत एव पुरारिं हरमप्राप्तमुखोऽप्राप्तफलो विशीर्णमूर्तेर्नष्टशरीरस्यापि पुष्पधन्वनः कामस्य शिलीमुखो बाण इमां पार्वतीं हृदि व्यायतः । सुदूरावगाढ इति यावत् । व्यायतपातः प्रहारो यस्मिन्कर्मणि तद्यथा तथाक्षिणोत्क्षतवान् । दग्धदेहस्यापि मार्गणो लग्नः । "मृदुः सर्वत्र बाध्यते" इति भावः ॥ अनेन "विवृण्वती शैलसुतापि भावम्" (३ । ६८) इत्यत्रोक्तं चक्षुःप्रीतिमनःसङ्गावस्थाद्वयमनन्तरावस्थोपयोगितयानूद्य कार्यावस्था सूचिता ॥

---

१ स्मरारिम् . २ अक्ष्णोत् .

**तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि॥५५**

तदेति ॥ तदेति छेदः । तदा प्रभृति । तत आरभ्येत्यर्थः ॥ सप्तम्यर्थस्यापि दाप्रत्ययस्य पञ्चम्यर्थे लक्षणा प्रभृतियोगे पञ्चमीनियमात् ॥ पितुर्गृहे उन्मदनो- त्कटमन्मथा ललाटस्थालंकारो ललाटिका तिलकः ॥ "कर्णललाटात्कनलंकारे" इति कन्प्रत्ययः ॥ तस्याश्चन्दनेन धूसरा धूसरवर्णा अलकाश्चूर्णकुन्तला यस्याः सा तथोक्ता बाला पार्वती जातु कदाचिदपि तुषारसंघातास्तुषारघनास्त एव शिलास्तासां तलेषूपरिभागेष्वपि निर्वृतिं सुखं न लभते स्म ॥ एतेनारत्यपरसंज्ञा विषयविद्वेषावस्था द्वादशावस्थापक्षे संज्वरश्च व्यज्यते ॥

**उपात्तवर्णे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किंनरराजकन्यका वनान्तसंगीतसखीररोदयत् ॥ ५६ ॥**

उपात्तेति ॥ पिनाकिनः शंभोश्चरिते त्रिपुरविजयादिचेष्टिते उपात्तवर्णे प्रा- रब्धगीतक्रमे ॥ "गीतक्रमे स्तुतौ वेदे वर्णशब्दः प्रयुज्यते" इति हलायुधः ॥ सबाष्पे गद्गदे कण्ठे स्खलितैर्विशीर्णैः पदैः सुप्तिङन्तरूपैः ॥ करणैः ॥ वनान्ते संगीतेन निमित्तेन सखीर्वयस्याः किंनरराजकन्यका अनेकशो बहुशोऽरोदयदश्रु- मोक्षमकारयत् । हरचरितगानजनितमदनवेदनामेनां वीक्ष्य किंनर्योऽपि रुरुदुरिति भावः ॥ अत्र वर्णस्खलनलक्षणकार्योक्त्या पुनःपुनस्तत्कारणीभूतमूर्च्छावस्थाप्रादु- र्भावो व्यज्यतेऽन्यथा सखीरोदनानुपपत्तेरिति । द्वादशावस्थापक्षे तु प्रलापावस्था च व्यज्यते । "प्रलापो गुणकीर्तनम्" इत्यालंकारिकाः ॥

**त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना॥५७॥**

त्रिभागेति ॥ किंचेति चार्थः । शिष्यत इति शेषः ॥ कर्मणि घञ् ॥ त्रिभ्यो भागेभ्यः शेषास्ववशिष्टासु । यद्वा रात्रेस्त्रियामत्वेन प्रसिद्धत्वात्तृतीयो भागस्त्रिभागः ॥ संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वमिष्यते । यथा "शतांशः" "सहस्रांशः" इति ॥ त्रिभागः शेषो यासां तासु निशासु क्षणं क्षणमात्रं नेत्रे निमील्य मीलयि- त्वा सहसा सद्यः । हे नीलकण्ठ । क्व व्रजसि कुत्र गच्छसीत्यलक्ष्या निर्विषया वाग्व- चनं यस्याः सा तथोक्ता तथासत्ये मिथ्याभूते कण्ठेऽर्पितं बाहुबन्धनं यस्याः सा तथा सती व्यबुध्यत विबुद्धवती ॥ एतेन जागरोन्मादौ सूचितौ ॥

स्वप्नसादृश्यप्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो विरहिणां विनोदाः । तत्र स्वप्नसंदर्शनमुक्त्वा प्रतिकृतिदर्शनमाह—

यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

यदेति ॥ यदा । यत इत्यर्थः ॥ यदेति हेताविति गणव्याख्यानेऽस्योदाहृतत्वात् ॥ त्वं बुधैर्मनीषिभिः सर्वगतः सर्वव्यापीत्युच्यसे । तत इत्यध्याहारः । भावे रत्याख्ये तिष्ठतीति भावस्थम् । त्वय्यनुरागिणमित्यर्थः । इमं जनम् । इममित्यात्मनिर्देशः । कथं न वेत्सि न जानासीति मुग्धया मूढया । अकिंचित्करश्चित्रगतोपालम्भ इत्यजानानयेत्यर्थः । तया स्वहस्तेनोल्लिखितश्चित्रे लिखितश्चन्द्रशेखरो रहस्येकान्ते । सखीमात्रसमक्षमित्यर्थः । उपालभ्यत । साधिक्षेपमुक्तश्च ॥ उक्तसमुच्चयार्थश्चकारः ॥ यद्यपि रहसीत्युक्तं तथापि सखीसमक्षकरणाल्लज्जात्यागो व्यज्यत एव ॥

यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

यदेति ॥ जगत्पतेस्तस्येश्वरस्याधिगमे प्राप्तावन्यं विधिमुपायं विचिन्वती मृगयमाणा यदा नापश्यत्तदेयं पार्वती गुरोः पितुरनुज्ञयास्माभिः सह तपसे तपश्चरितुं तपोवनं प्रपन्ना प्राप्ता ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः ॥ ६० ॥

द्रुमेष्विति ॥ सख्या पार्वत्या स्वयं कृतं जन्म येषां तेषु । स्वयं रोपितेष्वित्यर्थः । तपसः साक्षिषु साक्षाद्द्रष्टृष्वेषु द्रुमेष्वपि फलं दृष्टं लब्धम् । जनितमित्यर्थः । अस्याः पार्वत्याः शशिमौलिसंश्रयश्चन्द्रशेखरविषयो मनोरथस्तु प्ररोहाभिमुखोऽङ्कुरोन्मुखोऽपि न दृश्यते ॥ "प्ररोहस्त्वङ्कुरोऽङ्कुरः" इति वैजयन्ती ॥ स्वयं रोपितद्रुमफलकालेऽप्यस्या मनोरथस्य नाङ्कुरोदयोऽप्यस्ति । फलाशा तु दूरापास्तेत्यर्थः ॥

न वेद्मि स प्रार्थितदुर्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥

नेति ॥ प्रार्थितः सन्दुर्लभः प्रार्थितदुर्लभः स देवस्तपःकृशां तपसा कृशां सीतामतएव सखीभिरस्रोत्तरमश्रुप्रधानं यथा भवति तथेक्षितामिमां नः सखीं वृषेन्द्र-

---

१ दृष्ट. २ विचिन्वती. ३ इदम्. ४ न. ५ अभ्युपैष्यति.

स्यावग्रहेणानावृष्टया क्षतां पीडिताम् ॥ " वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ " इत्यमरः ॥ अवग्रहः । वर्षप्रतिबन्ध इत्यर्थः । सीतां कृष्टभुवम् ॥ " सीता लाङ्गलपद्धतिः " इत्यमरः ॥ वृषा वासव इव ॥ " वासवो वृत्रहा वृषा " इत्यमरः ॥ कदाभ्युपपत्स्यते कदानुग्रहीष्यति न वेद्मि ॥ अत्र वाक्यार्थः कर्म ॥ तदवग्रहक्षतामित्यत्रावग्रहक्षतामित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेस्तदिति भिन्नं पदं वेद्मीत्यस्य कर्मेति युक्तमुत्पश्यामः ॥

अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥

अगूढेति ॥ इङ्गितज्ञया पार्वतीहृदयाभिज्ञया ॥ " इङ्गितं हृद्गतो भावः " इति सज्जनः ॥ तया गौरीसख्येत्येवमगूढसद्भावं प्रकाशितसदभिप्रायं यथा तथा निवेदितो ज्ञापितो निष्ठा मरणमवधिर्यस्य स नैष्ठिको यावज्जीवब्रह्मचारी । सुन्दरो विलासी । नैष्ठिकश्चासौ सुन्दरश्चेति तथोक्तः ॥ द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः । किंतु नैष्ठिकत्वविशेषणेन कामित्वविरोधः । अथवा देवस्यालौकिकमहिमत्वादुभयं तात्त्विकमिति न विरोधः ॥ अव्यञ्जितं हर्षलक्षणं मुखरागादि हर्षलिङ्गं यस्य तथाभूतः सन् । अयि गौरि ॥ अयीति कोमलामन्त्रणे ॥ इदं त्वत्सखीभाषितमेवम् । सत्यं किमित्यर्थः । परिहासः केलिर्वा ॥ " द्रवकेलिपरीहासाः " इत्यमरः ॥ इत्येवमुमामपृच्छत्पृष्टवान् ॥

मण उत्सुकः। किमत्रायुक्तमित्यत्राह—इदं तपस्तदवाप्तेस्तस्योच्चैः पदस्यावाप्तेः प्राप्तेः साधनं किल ॥ किलेत्यलीके ॥ अतितुच्छत्वादसाधकमेवेत्यर्थः। तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां न मुञ्चतीत्याशयेनाह—मनोरथानां कामानामगतिरविषयो न विद्यते। न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः॥

अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे॥६५॥

अथेति ॥ अथ वर्णी ब्रह्मचारी ॥ "वर्णिनो ब्रह्मचारिणः" इत्यमरः ॥ आह। उवाचेत्यर्थः। "आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः" इत्याह वामनः ॥ किमित्याह—महेश्वरो महादेवो विदितः। मया ज्ञायत इत्यर्थः ॥ बुद्ध्यर्थत्वाद्वर्तमाने क्तप्रत्ययः। तद्योगात्षष्ठी च ॥ येन त्वं प्राग्भग्नमनोरथा कृतेति भावः। पुनरेव त्वं तमीश्वरमर्थयसे तदर्थिन्येव तत्कार्येव प्रवर्तसे। तत्प्रभावमननुभूयापीति भावः। अनुसरणे को दोषस्तत्राह—अमङ्गलाभ्यासेऽमङ्गलाचारे रतिर्यस्य तं तथोक्तमीश्वरं विचिन्त्य विचार्य तवानुवृत्तिमनुसरणं कर्तुं नोत्सहे। नानुमन्तुं शक्नोमीत्यर्थः ॥

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः।
करेण शंभोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम्॥६६॥

अवस्त्विति ॥ अवस्तुनि तुच्छवस्तुनि निर्बन्धोऽभिनिवेशः परं प्रधानं यस्यास्तस्याः संबुद्धिरवस्तुनिर्बन्धपरे पार्वति। आमुक्तमामञ्जितं विवाहे यत्कौतुकं हस्तसूत्रं तद्यस्य स तेऽयं करः॥ "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति यादवः ॥ वलयीकृताहिना भूषणीकृतसर्पेण शंभोर्महादेवस्य करेण करणभूतेन। तदेव प्रथमं तत्प्रथमम्। अपरिचितत्वादतिभयंकरमिति भावः। तच्च तदवलम्बनं ग्रहणं चेति कथं नु सहिष्यते। न कथंचिदपि सहिष्यत इत्यर्थः। अग्रतो यद्वापि तद्दूरेऽस्त्वनिष्टतां प्रथमं करग्रह एव दुःसह इति भावः॥

त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च॥६७॥

त्वमेवेति ॥ हे गौरि। त्वमेव स्वयमात्मना। तावदिति मानार्थे। यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः ॥ इदमेवोदाहृतं च गणव्याख्याने ॥ परिचिन्तय पर्यालोचय। किमिति। कलहंसलक्षणं कलहंसचिह्नम्॥ "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः ॥ यद्वा नवोढाया दुकूलं वधूदुकूलम्॥ "वधूः स्नुषा नवोढा स्त्री"

१ रतन. २ भूषेन.

स्यावग्रहेणानावृष्ट्या क्षतां पीडिताम् ॥ " वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ " इत्यमरः ॥ अवग्रहः । वर्षप्रतिबन्ध इत्यर्थः । सीतां कृष्टभुवम् ॥ " सीता लाङ्गलपद्धतिः " इत्यमरः ॥ वृषा वासव इव ॥ " वासवो वृत्रहा वृषा " इत्यमरः ॥ कदाभ्युपपत्स्यते कदानुग्रहीष्यति न वेद्मि ॥ अत्र वाक्यार्थः कर्म ॥ तदवग्रहक्षतामित्यत्रावग्रहक्षतामित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेस्तदिति भिन्नं पदं वेद्मीत्यस्य कर्मेति युक्तमुत्पश्यामः ॥

अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥

अगूढेति ॥ इङ्गितज्ञया पार्वतीहृदयाभिज्ञया ॥ " इङ्गितं हृद्गतो भावः " इति सज्जनः ॥ तया गौरीसख्येत्येवमगूढसद्भावं प्रकाशितसदभिप्रायं यथा तथा निवेदितो ज्ञापितो निष्ठा मरणमवधिर्यस्य स नैष्ठिको यावज्जीवब्रह्मचारी । सुन्दरो विलासी । नैष्ठिकश्चासौ सुन्दरश्चेति तथोक्तः ॥ द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः । किंतु नैष्ठिकत्वविशेषणेन कामित्वविरोधः । अथवा देवस्यालौकिकमहिमत्वादुभयं तात्त्विकमिति न विरोधः ॥ अव्यञ्जितं हर्षलक्षणं मुखरागादि हर्षलिङ्गं यस्य तथाभूतः सन् । अयि गौरि ॥ अयीति कोमलामन्त्रणे ॥ इदं त्वत्सखीभाषितमेवम् । सत्यं किमित्यर्थः । परिहासः केलिर्वा ॥ " द्रवकेलिपरीहासाः " इत्यमरः ॥ इत्येवमुमामपृच्छत्पृष्टवान् ॥

अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ॥ ६३ ॥

अथेति ॥ अथानन्तरमद्रेस्तनया पार्वती मुकुलीकृताङ्गुलौ संपुटीकृताङ्गुलौ । अग्रश्चासौ हस्तश्चेति समानाधिकरणसमासः । हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदादिति वामनः ॥ तस्मिन्नग्रहस्ते स्फटिकानामक्षमालिकां जपमालिकामर्पयन्त्यामुञ्चती कथंचिन्महता कष्टेन चिरव्यवस्थापितवाक्चिरेण स्वीकृतवाक् । एतेन लज्जोपरोधो व्यज्यते । मिताक्षरं परिमितवर्णं यथा तथाभाषत बभाषे ॥

किमुवाचेत्याह—

यथा श्रुतं वेदविदां वर त्वया जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ॥ ६४ ॥

यथेति ॥ हे वेदविदां वर वैदिकश्रेष्ठ । त्वया यथा श्रुतं सम्यक्श्रुतम् । श्रुतार्थमाह—अयं जनः । स्वयमित्यर्थः । उच्चैःपदस्य शिवलाभरूपोन्नतस्थानस्य लङ्घन आक-

मण उत्सुकः। किमत्रायुक्तमित्यत्राह—इदं तपस्तदवाप्तेस्तस्योच्चैः पदस्यावाप्तेः साधनं किल ॥ किलेत्यलीके ॥ अतितुच्छत्वादसाधकमेवेत्यर्थः । तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां न मुञ्चतीत्याशयेनाह—मनोरथानां कामानामगतिरविषयो न विद्यते । न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः ॥

अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे॥६५॥

अथेति ॥ अथ वर्णी ब्रह्मचारी ॥ "वर्णिनो ब्रह्मचारिणः" इत्यमरः ॥ आह । उवाचेत्यर्थः । "आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः" इत्याह वामनः ॥ किमित्याह—महेश्वरो महादेवो विदितः । मया ज्ञायत इत्यर्थः ॥ बुद्ध्यर्थत्वाद्वर्तमाने क्तप्रत्ययः । तद्योगात्षष्ठी च ॥ येन त्वं भग्नमनोरथा कृतेति भावः । पुनरेव त्वं तमीश्वरमर्थयसे तदर्थिन्येव तत्कामैव प्रवर्तसे । तत्प्रभावमनुभूयापीति भावः । अनुसरणे को दोषस्तत्राह—अमङ्गलाभ्यासेऽमङ्गलाचारे रतिर्यस्य तं तथोक्तमीश्वरं विचिन्त्य विचार्य तवानुवृत्तिमनुसरणं कर्तुं नोत्सहे । नानुमन्तुं शक्नोमीत्यर्थः ॥

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः ।
करेण शंभोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम्॥६६॥

अवस्त्विति ॥ अवस्तुनि तुच्छवस्तुनि निर्बन्धोऽभिनिवेशः परं प्रधानं यस्यास्तस्याः संबुद्धिरवस्तुनिर्बन्धपरे पार्वति । आमुक्तमाश्रितं विवाहे यत्कौतुकं हस्तसूत्रं तद्यस्य स तेऽयं करः ॥ "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः ॥ वलयीकृताहिना भूषणीकृतसर्पेण शंभोर्महादेवस्य करेण करणभूतेन । तदेव प्रथमं तत्प्रथमम् । अपरिचितत्वादतिभयंकरमिति भावः । तस्य तदवलम्बनं ग्रहणं चेति कथं नु सहिष्यते । न कथंचिदपि सहिष्यत इत्यर्थः । भयतो यत्रापि तद्दूरेऽस्तितष्ठतां प्रथमं करग्रह एव दुःसह इति भावः ॥

त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

त्वमेवेति ॥ हे गौरि । त्वमेव स्वयमात्मना । नान्यदिति मानार्थं । तावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः ॥ इदमेतोद्वाहनं च गणव्याख्याने ॥ परिचिन्तय पर्यालोचय । किमिति । कलहंसलक्षणं कलहंसचिह्नम् ॥ "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः ॥ वधूः "वधूः स्नुषा नवोढा स्त्री"

इति विश्वः ॥ तथा शोणितबिन्दून्वर्षतीति तथोक्तम् । आर्द्रमित्यर्थः । गजाजिनं च कृत्तिवासश्च । तत्पिनाकिन इत्याशयः । एते कदाचिज्जातु अपि योगं संगतिमर्हतो यद्यर्हतः किम् । एतत्त्वमेव चिन्तयेति पूर्वेणान्वयः । पाणिग्रहणकाले वधूवरयोर्वस्त्रान्तग्रन्थिः क्रियते । कृत्तिवाससा पाणिपीडने तु दुकूलधारिण्यास्तव कथं संघटिष्यत इति भावः ॥

चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ॥ ६८॥

चतुष्केति ॥ चतुष्के ॥ गृहविशेषे यः पुष्पप्रकरस्तत्रावकीर्णयोर्न्यस्तयोः । कुसुमास्तृतदिव्यभवनभूसंचारोचितयोरित्यर्थः । तव पादयोरलक्तकाङ्कानि लाक्षारञ्जितानि पदानि पादाकाराणि पादन्यासचिह्नानि ॥ "पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः" इति विश्वः ॥ विकीर्णा विक्षिप्ताः केशाः शवशिरोरुहा यासु तासु विकीर्णकेशासु ॥ "अतस्थं तत्र दृष्टं च" इति वचनात् "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति विकल्पान्न ङीप् ॥ परेतभूमिषु प्रेतभूमिषु । श्मशानेष्वित्यर्थः । परोऽपि शत्रुरपि को नामानुमन्यते । न कोऽपीत्यर्थः । नामेति कुत्सायाम् ॥ पिनाकपाणिपाणिग्रहणे तस्य परेतभूसंचारित्वेन गाढचर्यात्त्वयापि तत्र संचारोऽवश्यंभावीति भावः ॥

अयुक्तरूपं किमतःपरं वद त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन्हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति॥ ६९॥

अयुक्तेति ॥ त्रिनेत्रवक्षः । त्र्यम्बकालिङ्गनमित्यर्थः । तव तत्संबन्धितया सुलभमपि सुप्रापं च । भवतीति शेषः ॥ तवेति शेषे षष्ठी । "न लोकाव्यय-" इत्यादिना कृद्योगलक्षणषष्ठ्या निषेधात् ॥ अतःपरमस्मात्त्रिनेत्रवक्षोलाभादन्यदयुक्तरूपमत्यन्तायुक्तं किं वद । न किंचिदित्यर्थः । "प्रशंसायां रूपप्" इति रूपप्प्रत्ययः ॥ कुतः । यद्यस्मात्कारणाद्धरिचन्दनास्पदे हरिचन्दनस्यास्पदे स्थानभूतेऽस्मिन्स्तनद्वये चिताभस्म श्मशानभस्म तदेव रजश्चूर्णम् ॥ कर्तृ ॥ पदं करिष्यति पदं निधास्यति । भर्तुर्भस्माङ्गरागादिति भावः ॥

इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति॥७०॥

इयमिति ॥ इयं च ते तव पुरतः आदावेवान्या विडम्बना । परिहास ... यः । का सेत्याह — ऊढया परिणीतया ॥ कर्तरि कर्मणि क्तः ॥ वारणराज

स्वयाधिष्ठितमारूढं वृद्धमुक्षाणं वृद्धोक्षम् ॥ "अचतुर-" इत्यादिना निपातः ॥ विलोक्य महाजनः साधुजनः स्मेरमुखः स्मितमुखो भविष्यत्युपहसिष्यति यत् । इयमिति पूर्वेण संबन्धः ॥ स्मेरेति "नमिकम्पिस्म्यजस-" इत्यादिना रप्रत्ययः ॥

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी

द्वयमिति ॥ पिनाकिन ईश्वरस्य समागमप्रार्थनया प्राप्तिकामनया । क्रियमाणयेति शेषः । संप्रति द्वयं शोचनीयतां शोच्यत्वं गतम् । किं तदाह—सा प्रागेव हरशिरोगता ॥ अत्र सेति प्रसिद्धार्थत्वान्न यच्छब्दापेक्षा । तदुक्तं काव्यप्रकाशे—"प्रकान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपदानं नापेक्षते" इति ॥ कान्तिमती ॥ नित्ययोगे मतुप् ॥ कलावतश्चन्द्रस्य कला षोडशो भागश्चास्य लोकस्य नेत्रकौमुदी । नेत्रानन्दिनीत्यर्थः । त्वं च । कान्तिमतीत्वनेत्रकौमुदीत्वविशेषणयोरुभयत्राप्यन्वयः । प्रागेकैव शोच्या । संप्रति तु त्वमप्यपरेति द्वयं शोच्यमिति पिण्डितार्थः । शोच्यत्वं च निकृष्टाश्रयणादिति भावः ॥

"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः" इति लोकानामाभाषणम् । तत्र किंचिदपि नास्तीत्याह—

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥७२॥

वपुरिति ॥ वपुस्तावदस्य विरूपाणि विकृतरूपाण्यक्षीणि नेत्राणि यस्य तद्विरूपाक्षम् ॥ "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इति षच्प्रत्ययः ॥ वैरूप्यं च त्रिनेत्रत्वादिति क्षीरस्वामी ॥ अतो न सौन्दर्यवार्तापीत्यर्थः । अलक्ष्यमज्ञातं जन्म यस्य तस्य भावस्तत्ता । कुलमपि न ज्ञायत इत्यर्थः ॥ "अलक्षिता जनिः" इति पाठे जनिरुत्पत्तिरलक्षिता न ज्ञाता ॥ "जनिरुत्पत्तिरुद्भवः" इत्यमरः ॥ वसु वित्तं दिगम्बरत्वेनैव निवेदितम् । नास्तीति ज्ञापितमित्यर्थः । यदि वित्तं भवति तदा कथं दिगम्बरो भवति । अतो ज्ञेयं निर्धनोऽयमिति । किंबहुना हे बालमृगाक्षि पार्वति वरेषु वोढृषु ॥ "वरो जामातृवोढारौ" इति विश्वः ॥ यद्रूपवित्तादिकं मृग्यते कन्यातद्बन्धुभिरन्विष्यते तत्त्रिलोचने त्र्यम्बके व्यस्तम् । एकमपि समस्तं मा भूदिति भावः । अस्ति किम् । नास्त्येवेत्यर्थः ॥

---

१ [illegible]

निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया॥७३॥

निवर्तयेति॥ अस्मादसदीप्सितादनिष्टमनोरथान्मनो निवर्तय निवारय। स पूर्वोक्ता विधा प्रकारो यस्य तथोक्तः। अमङ्गलशील इत्यर्थः। क्व। महदन्तरमित्यर्थः। पुण्यलक्षणा प्रशस्तभाग्यचिह्ना त्वं च क्व। अतो न तवायमर्ह इत्यर्थः। तथाहि। साधुजनेन॥ "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः॥ श्मशानशूलस्य श्मशानभूमिनिखातस्य वध्यशङ्कोर्वैदिकी वेदोक्ता यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषस्तस्य सत्क्रिया प्रोक्षणाभ्युक्षणादिसंस्कारो यूपसत्क्रिया नापेक्ष्यते नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि नर्म्यं न पदम् इति तात्पर्यार्थः॥

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते॥७४॥

इतीति॥ इत्येवंप्रकारेण द्विजातौ द्विजे प्रतिकूलवादिनि सति प्रवेपमानेन चलतापरेणाधरोष्ठेन लक्ष्योऽनुमेयः कोपः कोपो यस्यास्तथोक्तया तया पार्वत्योपान्तलोहिते प्रान्तरक्ते विलोचने विकुञ्चिते कुटिलिते भ्रूलते यस्मिन्कर्मणि तथा। भ्रूभङ्गपूर्वकमित्यर्थः। तिर्यगाहिते निहिते। अनादरात्तिर्यगीक्ष्यतेत्यर्थः॥

उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्॥

विपदिति ॥ विपत्प्रतीकारपरेण । अनर्थपरिहारार्थिनेत्यर्थः ॥ "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः ॥ भूतिसमुत्सुकेनैश्वर्यकामेन वा मङ्गलं गन्धमाल्यादिकं निषेव्यते । शरणे रक्षणे साधुः शरण्यः ॥ "तत्र साधुः" इति यत्प्रत्ययः ॥ "शरणं गृहरक्षित्रोः" इत्यमरः ॥ जगतः शरण्यस्तस्य जगच्छरण्यस्य निराशिषो निरभिलाषस्य सतः शिवस्य ॥ "आशीरुरगदंष्ट्रायां प्रियवाक्याभिलापयोः" इति शाश्वतः ॥ आशया तृष्णयोपहता दूषितात्मदृष्टिरन्तःकरणप्रवृत्तिर्येषां तैरेभिर्मङ्गलैः किम् । वृथेत्यर्थः ॥ पूर्वं मङ्गलमित्येकवचनस्य जातिभिप्रायत्वादेभिरिति बहुवचनेन परामर्शो न विरुध्यते । इष्टावाप्त्यनिष्टपरिहारार्थिनो हि मङ्गलाचारनिर्बन्धः । तदुभयासंस्पृष्टस्य तु यथाकथंचिदास्ताम् । को दोष इत्यर्थः । एतेन "अमङ्गलाभ्यासरतिम्" (५ । ६५) इत्युक्तं प्रत्युक्तम् ॥

अकिंचनः सन्प्रभवः स संपदां त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः॥७७

अकिंचनेति ॥ स हरः । न विद्यते किंचन द्रव्यं यस्य सोऽकिंचनो दरिद्रः सन् । संपदां प्रभवत्यस्मादिति प्रभवः कारणम् । पितृसद्मगोचरः श्मशानाश्रयः सन् । त्रयाणां लोकानां नाथः ॥ "तद्धितार्थ–" इत्यादिनोत्तरपदसमासः ॥ स देवो भीमरूपो भयंकराकारः सन् । शिवः सौम्यरूप इत्युदीर्यत उच्यते । अतः पिनाकिनो हरस्य यथाभूतोऽर्थो यथार्थस्तस्य भावो याथार्थ्यं तत्त्वं तस्य विदो न सन्ति । लोकोत्तरमहिम्नो निर्लेपस्य यथा कथंचिदवस्थानं न दोषायेति भावः । एतेन "अवस्तुनिर्बन्धपरे" (५ । ६६) इति परिहृतं वेदितव्यम् ॥

देवस्य लौकिकमलौकिकं च प्रसाधनं नास्तीत्याशयेनाह—

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥

विभूषणेति ॥ विश्वं मूर्तिर्यस्येति विश्वमूर्तिस्तस्य विश्वमूर्तेः शिवस्य वपुः शरीरं भूषणैरुद्भासत इति भूषणोद्भासि स्यात् । पिनद्धभोगि पिनद्धभुजंगं वा स्यात् ॥ पिनद्धेति नहेरपिपूर्वात्कर्मणि क्तः । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यकारलोपः ॥ गजाजिनालम्बि स्यात् । अथवा दुकूलधारि स्यात् । कपालानि सन्त्यस्मिन्निति कपालि वा स्यात् । इन्दुशेखरं वा स्यात् । नावधार्यते न निर्धार्यते । सर्वं संभवतीत्यर्थः । एतेन "[illegible]" (५ । ६५) इति [illegible] प्रत्युक्तमिति वेदितव्यम् ॥

---

१ [illegible]

निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया॥७३॥

निवर्तयेति ॥ अस्मादसदीप्सितादनिष्टमनोरथान्मनो निवर्तय निवारय। सा पूर्वोक्ता विधा प्रकारो यस्य तथोक्तः। अमङ्गलशील इत्यर्थः। क्व। महदन्तरमित्यर्थः। पुण्यलक्षणा प्रशस्तभाग्यचिह्ना त्वं च क्व। अतो न तवायमर्ह इत्यर्थः। तथाहि। साधुजनेन॥ "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः॥ श्मशानशूलस्य श्मशानभूमिनिखातस्य वध्यशङ्कोर्वैदिकी वेदोक्ता यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषस्तस्य सत्क्रिया प्रोक्षणाभ्युक्षणादिसंस्कारो यूपसत्क्रिया नापेक्ष्यते नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटस इति तात्पर्यार्थः॥

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते॥७४॥

इतीति॥ इत्येवंप्रकारेण द्विजातौ द्विजे प्रतिकूलवादिनि सति प्रवेपमानेन चञ्चलेनाधरेणाधरोष्ठेन लक्ष्योऽनुमेयः कोपः क्रोधो यस्यास्तथोक्तया तया पार्वत्योपान्तलोहिते प्रान्तरक्ते विलोचने विकुञ्चिते कुटिलिते भ्रूलते ययोस्ते तथा। सभ्रूभङ्गमित्यर्थः। तिर्यक्साच्याहिते निहिते। अनादरात्तिर्यगीक्षितेत्यर्थः॥

उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्॥

उवाचेति॥ अथैनं ब्रह्मचारिणमुवाच च। किमिति। परमार्थतस्तत्त्वतो हरं न वेत्सि न जानासि नूनम्। कुतः। यतो मामेवमुक्तया रीत्यात्थ ब्रवीषि॥ "ब्रुवः पञ्चानामादितः—" इति रूपसिद्धिः॥ अज्ञानादेवायं शिवद्वेषस्तवेत्याशयेनाह—मन्दा मूढाः॥ "मूढाल्पापटुनिर्भाग्या मन्दाः" इत्यमरः॥ लोकसामान्यमितरजनसाधारणं न भवतीत्यलोकसामान्यमचिन्त्यहेतुकं दुर्बोधकारणं महात्मनां चरितं द्विषन्ति हेत्वपरिज्ञानाद्दूषयन्ति। विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहु मन्यन्त इत्यर्थः॥

संप्रति "अमङ्गलाभ्यासरतिम्" (५। ६५) इत्याद्युक्तं दूषणजातं "विपत्" इत्यादिभिः षड्भिः श्लोकैः परिहर्तुमारभते—

विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा।
जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः॥७६॥

१ अपेक्षते. २ द्वि. ३ भ्रूलतया.

अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥८२॥

अलमिति ॥ अथवा विवादेन कलहेनालम् । त्वया यथा येन प्रकारेण स ईश्वरः श्रुतोऽशेषं कार्त्स्न्येन तथाविधस्तावत्प्रकार एवास्तु । मम मनस्त्वत्रेश्वरे भावः शृङ्गार एकोऽद्वितीयो रस आस्वाद्यो यस्य तत्तथा स्थितम् । तथाहि । कामवृत्तिः स्वेच्छाव्यवहारी वचनीयमस्थानमज्ञापवादं नेक्षते न विचारयति । न हि स्वेच्छासंचारिणो लोकापवादाद्बिभ्यतीति भावः ॥

निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ॥

निवार्यतामिति ॥ हे आलि सखि ॥ "आलिः सखी वयस्या च" इत्यमरः ॥ स्फुरितोत्तराधरः स्फुरणभूयिष्ठोष्ठोऽयं वटुर्माणवकः पुनः किमपि विवक्षुर्वक्तुमिच्छुः ॥ ब्रुवः सनन्तादुप्रत्ययः ॥ निवार्यताम् ॥ तर्हि वक्तुमेव कथं न ददासीत्याह—तथाहि । यो महतः पूज्यानपभाषतेऽपवदति न केवलं स पापभाग्भवति । किंतु तस्मादपभाषमाणात्पुरुषाद्यः शृणोति सोऽपि पापभाक् । भवतीति शेषः ॥ अत्र स्मृतिः—"गुरोः यत्र परीवादो न श्रोतव्यः कथंचन । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः" इति ॥

संप्रति गन्तव्यपक्षमाश्रयते—

इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥८४

इत इति ॥ अथवेतोऽन्यत्र गमिष्यामीति वादिनी वदन्ती स्तनाभ्यां भिन्नवल्कला रयवशात्कुचसस्तचीरा बाला पार्वती चचाल । वृषराजकेतनो वृषभध्वजश्च स्वरूपमास्थाय निजरूपमाश्रित्य कृतस्मितः सन् । तां पार्वतीं समाललम्बे जग्राह ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥

१ श्रुतम्. २ महतां निशाम्य. ३ रय. ४ निक्षेप एव.

"अयुक्तरूपं किमतःपरं वद" (५।६९) इति श्लोकोक्तं प्रत्याह—

तदङ्गसंसर्गमवाप्य कल्पते ध्रुवं चिताभस्मरजो विशुद्धये ।
तथाहि नृत्याभिनयक्रियाच्युतं विलिप्यते मौलिभिरम्बरौकसाम् ॥

तदिति ॥ तस्य शिवस्याङ्गं तस्य संसर्गमवाप्यासाद्य चिताभस्मैव रजो विशुद्धये कल्पते । अलं पर्याप्नोतीत्यर्थः ॥ अलमर्थयोगात् "नमःस्वस्तिस्वाहा-" इत्यादिना चतुर्थी ॥ ध्रुवं शोधकत्वम् । प्रमाणसिद्धमित्यर्थः । प्रमाणमेवाह— तथाहि । प्रसिद्धमेवेत्यर्थः । नृत्ये ताण्डवे योऽभिनयोऽर्थव्यञ्जकचेष्टाविशेषः स एव क्रिया तया निमित्तेन च्युतं पतितम् । चिताभस्मरज इति शेषः ॥ अम्बरौकसां देवानां मौलिभिर्विलिप्यते ध्रियते । अशुद्धं चेत्कथमिन्द्रादिभिर्ध्रियेतेत्यर्थापत्तिरनुमानं वा प्रमाणमित्यर्थः ॥

यदुक्तम् "दिगम्बरत्वेन निवेदितं वसु" (५।७२) "इयं च तेऽन्या पुरतो विडम्बना" (५।७०) इत्यादि च तत्रोत्तरमाह—

असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोरुणाङ्गुली ॥८०॥

असंपद इति ॥ प्रभिन्नो मदस्रावी दिग्वारणो दिग्गजो वाहनं यस्य सः । ऐरावतेनेत्यर्थः । वृषा देवेन्द्रोऽसंपदो दरिद्रस्य वृषेण गच्छतो वृषभारूढस्य तस्येश्वरस्य पादौ मौलिना मुकुटेनोपगम्य । प्रणम्येत्यर्थः । विनिद्राणां विकसितानां मन्दाराणां कल्पतरुकुसुमानां रजोभिः परागैररुणा अङ्गुल्यो ययोस्तौ तथोक्तौ करोति । दिग्गजारोहिणामिन्द्रादीनामपि वन्द्यस्येन्दुमौलेः किं संपदा वृषारोहणे वा को दोष इत्यर्थः ॥

यदुक्तम् "अलक्ष्यजन्मता" (५।७२) इति तत्रोत्तरमाह—

विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥८१॥

विवक्षतेति ॥ च्युतात्मना नष्टस्वभावेनानेन दोषं दूषणं विवक्षता वक्तुमिच्छता त्वयैकं [illegible] "अलक्ष्यजन्मता" इत्येतदुक्तम् । तच्च [illegible] । साधु भाषितम् । कुतः । यमीश्वरमात्मभुवोऽपि ब्रह्मणोऽपि ॥ "ब्रह्मात्मभूः सुरज्येष्ठः" [illegible] ॥ कारणमामनन्त्याहुराम्नायाः । [illegible] इति शेषः ॥ [illegible] इत्यादिना [illegible] ॥ स ईश्वरः कथं लक्ष्यप्रभवो [illegible] इत्यर्थः ॥ [illegible]

अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥८२॥

अलमिति ॥ अथवा विवादेन कलहेनालम् । त्वया यथा येन प्रकारेण स ईश्वरः श्रुतोऽशेषं कार्त्स्न्येन तथाविधस्तावत्प्रकार एवास्तु । मम मनस्त्वत्रेश्वरे भावः शृङ्गार एकोऽद्वितीयो रस आस्वाद्यो यस्य तत्तथा स्थितम् । तथाहि । कामवृत्तिः स्वेच्छाव्यवहारी वचनीयमस्थानमङ्गापवादं नेक्षते न विचारयति । न हि स्वेच्छासंचारिणो लोकापवादाद्बिभ्यतीति भावः ॥

निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ॥८३॥

निवार्यतामिति ॥ हे आलि सखि ॥ "आलिः सखी वयस्या च" इत्यमरः ॥ स्फुरितोत्तराधरः स्फुरणभूयिष्ठोष्ठोऽयं वटुर्माणवकः पुनः किमपि विवक्षुर्वक्तुमिच्छुः ॥ ब्रुवः सनन्ताटुप्रत्ययः ॥ निवार्यताम् ॥ तर्हि वक्तुमेव कथं न ददासीत्याह—तथाहि । यो महतः पूज्यानपभाषणेऽपवदति न केवलं स पापभाग्भवति । किंतु तस्मादपभाषमाणात्पूज्यापवादः शृणोति सोऽपि पापभाक् । भवतीति शेषः ॥ अत्र स्मृतिः—"गुरोः यत्र परीवादो न श्रोतव्यः कथंचन । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः" इति ॥

संप्रति गन्तव्यपक्षमाश्रयते—

इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥८४॥

इत इति ॥ अथवेतोऽन्यत्र गमिष्यामीति वादिनी वदन्ती स्तनाभ्यां भिन्नवल्कला स्पन्दशात्कुचग्रस्तचीरा बाला पार्वती चचाल । वृषराजकेतनो वृषभध्वजश्च स्वरूपमास्थाय निजरूपमाश्रित्य कृतस्मितः सन् । तां पार्वतीं समाललम्बे जग्राह ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥

१ पुरः. २ स्तनभिन्ने. ३ दः. ४ सेहे तु.

तमिति ॥ तं देवं वीक्ष्य वेपथुमती कम्पवती सरसाङ्गयष्टिः स्विन्नगात्री । म-हादेवदर्शनेन देव्याः सात्त्विकभावोदय उक्तः । निक्षेपणायान्यत्र विन्यासायोद्धृतमुत्क्षिप्तं पदमङ्घ्रिमुद्वहन्ती शैलाधिराजतनया पार्वती मार्गेऽचलस्तस्य व्यतिकरेण समाहत्या । अवरोधनेनेति यावत् । आकुलिता संभ्रमिता सिन्धुर्नदीव ॥ "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः ॥ न ययौ न तस्थौ । लज्जयेति भावः ॥ वसन्ततिलकावृत्तमेतत् ॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

अद्येति ॥ चन्द्रमौलौ शिवे । हे अवनताङ्गि पार्वति । अद्य प्रभृति । अस्मादिनादारभ्येत्यर्थः ॥ प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते ॥ तव तपोभिः क्रीतः ॥ दासृ दाने । दासत आत्मानं ददातीति दासोऽस्मीति वादिनि वदति सति । सा देव्यह्नाय सपदि ॥ "द्राग्झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुतम्" इत्यमरः ॥ नियमजं तपोजन्यं क्लमं क्लेशमुत्ससर्ज । फलप्राप्त्या क्लेशं विसस्मारेत्यर्थः । तथाहि । क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते । पूर्ववदेवादुष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये तपःफलोदयो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥ १ ॥

अथेति ॥ अथ देवेश्वरानुप्रस्थानानन्तरं गौरी पार्वती विश्वात्मने सर्वात्मने । विश्वमूर्तये वा । विश्वात्मने शिवाय मिथो रहसि ॥ "मिथोऽन्योन्यं रहस्यपि" इत्यमरः ॥ सखीं संदिदेशानिष्यत ॥ क्रियाग्रहणयोगेऽपि सं

प्रदानत्वाच्चतुर्थी ॥ किमिति । भूभृतां नाथो हिमवान्मे मम दाता सन् । ममार्णीक्रियतामिति । दातृत्वेन ममार्णीक्रियतामित्यर्थः ॥ प्रार्थनायां लोट् ॥ पित्रा दीयमानायाः परिग्रहो मम महाननुग्रह इति भावः ॥

तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी ॥ २ ॥

तयेति ॥ तया सख्या । सखीमुखेनेत्यर्थः । व्याहृतसंदेशोक्तवाचिका प्रिये हरविषये निभृता निश्चला । परमासक्तेत्यर्थः । सा गौरी । मधौ वसन्ते निभृता स्थिरा परभृतया कोकिलयोन्मुखी मुखरा परभृतोन्मुखी । मुखशब्देनाभिभाषणव्यापारो लक्ष्यते । तथा च परभृतामुखेन व्याहरन्तीत्यर्थः ॥ परभृतेति क्रियाशब्दविवक्षायाम् "जातेरस्त्री-" इति ङीष्प्रत्ययो न भवति । तयेत्युपमेयस्य व्यस्तत्वादुपमानवाचि परभृताशब्दस्य समासः सोढव्यः । अथवा भृञ्भरणं संपदादित्वात्क्विप् । परैर्भृयस्यास्तया परभृतेति व्यासेन व्याख्येयम् । पदमञ्जरीकारस्तु परैर्भ्रियत इति कर्मणि क्विपमाह ॥ चूतयष्टिश्चूतलतेवाभ्यासेऽन्तिके यथा ॥ "सदेशाभ्याससविधसमर्यादसवेशवत् । उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्" इत्यमरः ॥

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान्सप्त सस्मार स्मरशासनः ॥ ३ ॥

स इति ॥ स प्रकृतः । शास्तीति शासनः ॥ बहुलग्रहणात्कर्तरि ल्युट् ॥ स्मरस्य शासन ईश्वरस्तथेति प्रतिज्ञाय । तथा करिष्यामीत्युक्त्वेत्यर्थः । उमां कथमपि कृच्छ्रेण विसृज्य । तत्र गाढानुरागत्वादिति भावः । ज्योतिर्मयान्तेजोरूपान्सप्तर्षीनङ्गिरःप्रभृतीन्सस्मार स्मृतवान् ॥

ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन्पुरः प्रभोः ॥ ४ ॥

त इति ॥ ते सप्त एव सप्त देवा ते तपोधनाः मुनयः प्रभामण्डलैस्तेजःपुञ्जैर्व्योमाकाशं द्योतयन्तः प्रकाशयन्तः । अरुन्धत्या सह वर्तन्त इति सारुन्धतीकाः सन्तः ॥ "नद्यृतश्च" इति कप् ॥ सपदि प्रभोरीश्वरस्य पुरः पुरोभागे प्रादुरासन्नाविर्बभूवुः ॥

तमिति ॥ तं देवं वीक्ष्य वेपथुमती कम्पवती सरसाङ्गयष्टिः स्विन्नगात्री । म-
हादेवदर्शनेन देव्याः सात्त्विकभावोदय उक्तः । निक्षेपणाय न्यत्र विन्यासार्थमु-
द्धृतं उत्क्षिप्तं पदं अङ्घ्रिमुद्वहन्ती शैलाधिराजतनया पार्वती मार्गेऽचलस्य व्यतिकरेण
समाहत्या । अवरोधनेनेति यावत् । आकुलिता संभ्रमिता सिन्धुर्नदीव ॥ "दे-
शे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः ॥ न ययौ न तस्थौ ।
लज्जयेति भावः ॥ वसन्ततिलकावृत्तमेतत् ॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

अद्येति ॥ चन्द्रमौलौ शिवे । हे अवनताङ्गि पार्वति । अद्य प्रभृति । अस्मा-
द्दिनादारभ्येत्यर्थः ॥ प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते ॥ तव
तपोभिः क्रीतः ॥ दासृ दाने । दासत आत्मानं ददातीति दासोऽस्मीति वादिनि
वदति सति । सा देव्यह्नाय सपदि ॥ "द्राग्झटित्यञ्जसाह्नाय द्राङ्क्षु सपदि द्रुत-
म्" इत्यमरः ॥ नियमजं तपोजन्यं क्लमं क्लेशमुत्ससर्ज । फलप्राप्त्या क्लेशं विस-
स्मारेत्यर्थः । तथाहि । क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते । पूर्ववदेवा-
क्लिष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये तपःफलोदयो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥ १ ॥

अथेति ॥ अथ देवदेवानुग्रहानन्तरं गौरी पार्वती विश्वमात्मा स्वरूपं यस्ये-
ति । विश्वस्यात्मेति वा । विश्वात्मने शिवाय मिथो रहसि ॥ "मिथोऽन्योन्यं
रहस्यपि" इत्यमरः ॥ सखीं संदिदेशातिससर्ज ॥ क्रियामात्रप्रयोगेऽपि सं-

मदानलाचतुर्थी ॥ किमिति । भूभृतां नाथो हिमवान्मे मम दाता सन् । प्रमाणीक्रियतामिति । दातृत्वेन प्रमाणीक्रियतामित्यर्थः ॥ प्रार्थनायां लोट् ॥ पित्रा दीयमानायाः परिग्रहो मम महाननुग्रह इति भावः ॥

तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी ॥ २ ॥

तयेति ॥ तया सख्या । सखीमुखेनेत्यर्थः । व्याहृतसंदेशोक्तवाचिका प्रिये हरविषये निभृता निश्चला । परमासक्तेत्यर्थः । सा गौरी । मधौ वसन्ते निभृता स्थिरा परभृतया कोकिलयोन्मुखी मुखरा परभृतोन्मुखी । मुखशब्देनाभिभाषणव्यापारो लक्ष्यते । तया च परभृतामुखेन व्याहरन्तीत्यर्थः ॥ परभृतेति क्रियाशब्दविवक्षायाम् "जातेरस्त्री–" इति ङीष्प्रत्ययो न भवति । तयेत्युपमेयस्य व्यस्तत्वादुपमानवाचि परभृताशब्दस्य समासः सोढव्यः । अथवा भृञ्ञरणं संपदादित्वात्क्विप् । परैर्भृयसास्तया परभृतेति व्यासेन व्याख्येयम् । पदमञ्जरीकारस्तु परैर्भ्रियत इति कर्मणि क्विपमाह ॥ चूतयष्टिश्चूतशाखेवाभ्यासेऽन्तिके बभौ ॥ "सदेशाभ्याससविधसमर्यादसवेशवत् । उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्" इत्यमरः ॥

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान्सप्त सस्मार स्मरशासनः ॥ ३ ॥

स इति ॥ स प्रकृतः । शास्तीति शासनः ॥ बहुलग्रहणात्कर्तरि ल्युट् ॥ स्मरस्य शासन ईश्वरस्तथेति प्रतिज्ञाय । तथा करिष्यामीत्युक्त्वेत्यर्थः । उमां कथमपि कृच्छ्रेण विसृज्य । तत्र गाढानुरागत्वादिति भावः । ज्योतिर्मयांस्तेजोरूपान्सप्तर्षीन्मरीचिप्रभृतीन्सस्मार स्मृतवान् ॥

ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन्पुरः प्रभोः ॥ ४ ॥

त इति ॥ ते तप एव धनं येषां ते तपोधनाः सप्तर्षयः प्रभामण्डलैस्तेजःपुञ्जैर्व्योमाकाशं द्योतयन्तः प्रकाशयन्तः । अरुन्धत्या सह वर्तन्त इति सारुन्धतीकाः सन्तः ॥ "नद्यृतश्च" इति कप् ॥ सपदि प्रभोरीश्वरस्य पुरः पुरोभागे प्रादुरासन्प्रत्यक्षा बभूवुः ॥

तमिति ॥ तं देवं वीक्ष्य वेपथुमती कम्पवती सरसाङ्गयष्टिः स्विन्नगात्री । महादेवदर्शनेन देव्याः सात्त्विकभावोदय उक्तः । निक्षेपणायान्यत्र विन्यासायोद्धृतमुत्क्षिप्तं पदमङ्घ्रिमुद्वहन्ती शैलाधिराजतनया पार्वती मार्गेऽचलस्तस्य व्यतिकरेण समाहत्या । अवरोधनेनेति यावत् । आकुलिता संभ्रमिता सिन्धुर्नदीव ॥ "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः ॥ न ययौ न तस्थौ । लज्जयेति भावः ॥ वसन्ततिलकावृत्तमेतत् ॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लमसुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

अद्येति ॥ चन्द्रमौलौ शिवे । हे अवनताङ्गि पार्वति । अद्य प्रभृति । अस्मादिनादारभ्येत्यर्थः ॥ प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते॥ तव तपोभिः क्रीतः ॥ दासृ दाने । दासत आत्मानं ददातीति दासोऽस्मीति वादिनि वदति सति । सा देव्यह्नाय सपदि ॥ "द्राग्झटित्यञ्जसाह्नाय द्राङ्क्षु सपदि द्रुतम्" इत्यमरः ॥ नियमजं तपोजन्यं क्लमं क्लेशमुत्ससर्ज । फलप्राप्त्या क्लेशं विसस्मारेत्यर्थः । तथाहि । क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते । पूर्ववदेवाक्लिष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये तपःफलोदयो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥ १ ॥

अथेति ॥ अथ देवदेवानुग्रहानन्तरं गौरी पार्वती विश्वयात्मा स्वरूपं यस्येति । विश्वस्यात्मेति वा । विश्वात्मने शिवाय मिथो रहसि ॥ "मिथोऽन्योन्यं रहस्यपि" इत्यमरः ॥ सखीं संदिदेशातिससर्ज ॥ क्रियामात्रप्रयोगेऽपि सं-

सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ॥ ९ ॥

सर्गेति ॥ विश्वयोनेर्ब्रह्मणोऽनन्तरं सर्गशेषस्य प्रणयनात् । ब्रह्मसृष्टावशिष्टसृष्टेः करणाद्धेतोरित्यर्थः । पुराविद्भिः पुराणवेदिभिर्व्यासादिभिः पुरातना धातार इति कीर्तिताः ॥ विश्वयोनेरिति संबन्धमात्रे षष्ठी तस्यानन्तरमिति भाष्ये दर्शनात् । अपादानत्वविवक्षायां तु पञ्चमी । अयमदःशब्दो यथाशब्दाद्वृत्तादनन्तरस्येति शाबरभाष्ये दर्शनात् । तथा "अथातो धर्मजिज्ञासा वेदाध्यायादनन्तरम्" इत्याचार्याः । कविश्च "पुराणपत्रापगमादनन्तरम्" इति । एवमन्यत्रापि द्रष्टव्यम् ॥

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ॥ १० ॥

प्राक्तनानामिति ॥ प्राक्तनानां जन्मान्तरभवानां विशुद्धानां निर्मलानां परिपाकं फलदानोन्मुखत्वमुपेयुषां गतानां तपसां फलान्युपभुञ्जाना अपि तपस्विनस्तपोनिष्ठाः । प्रारब्धभोगिनो निस्पृहाश्चेति भावः ॥ कुलकम् ॥

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ॥ ११ ॥

तेषामिति ॥ तेषामृषीणां मध्यगता साध्वी पतिव्रता । अतएव पत्युर्वसिष्ठस्य पादयोरर्पितेक्षणा निविष्टदृष्टिररुंधती साक्षात्प्रत्यक्षा तपःसिद्धिरिव । तेषामेवेति शेषः ॥ तेषां मध्यगतेति लिङ्गवचनादिसाम्यादियमुपमा ॥ बहु भूयिष्ठं बभासे भाति स्म ॥

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ॥ १२ ॥

तामिति ॥ ईश्वरो भगवांस्तामरुन्धतीं मुनींश्चागौरवभेदेन समानप्रतिपत्त्यापश्यद्दृष्टवान् । न चायमविवेक इत्याह—हि यस्मात्स्त्री पुमांश्चेत्येषानास्था स्त्रीपुंभेदो न विवक्षितः । किंतु सतां साधूनां वृत्तं चरित्रमेव महितं पूज्यम् ॥ "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति भावः ॥

तद्दर्शनादभूच्छंभोर्भूयान्दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम् ॥ १३ ॥

तदिति ॥ तद्दर्शनादरुन्धतीदर्शनाच्छंभोर्दारार्थं दारपरिग्रहार्थमादरो भूयान्ब-

१ मुच. २ मध्यन्.

इतः परं षड्भिः श्लोकैस्तानेव मुनीन्वर्णयति—

आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु ।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु ॥ ५ ॥

आप्लुता इति ॥ उत्किरन्ति विक्षिपन्तीत्युत्किराः ॥ "इगुपध—" इत्यादिना कप्रत्ययः ॥ तीरे ये मन्दाराः कल्पवृक्षास्तेषां कुसुमानामुत्किरा वीचयस्तरंगा येषां तेषु दिङ्नागानां दिग्गजानां मदगन्धो येष्वस्ति तथोक्तेषुव्योमगङ्गाप्रवाहेष्वाकाशगङ्गास्रोतःस्वाप्लुताः स्नाताः ॥

मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥ ६ ॥

मुक्तेति ॥ मुक्तानां मौक्तिकानां यज्ञोपवीतानि । मुक्तामयानीत्यर्थः । बिभ्रतो दधानाः । हेममयानि वल्कलानि येषां ते हैमवल्कलाः । रत्नमयान्यक्षसूत्राणि येषां ते रत्नाक्षसूत्राः । प्रव्रज्यां प्रव्रजनम् ॥ "व्रजयजोर्भावे क्यप्" इति क्यप् ॥ आश्रिताः कल्पवृक्षा इव स्थिताः ॥ अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते "जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः" (६ । ३४)इति सपत्नीकत्वाभिधानात् "सुतविन्यस्तपत्नीकस्तया वानुगतोऽपि सन्" इति वानप्रस्थस्योभयथा स्मरणात् ॥

अधःप्रस्थापिताश्वेन समावर्जितकेतुना ।
सहस्ररश्मिना साक्षात्सप्रणाममुदीक्षिताः ॥ ७ ॥

अध इति ॥ अधःप्रस्थापिताश्वेन । सूर्यमण्डलोपरिवर्तित्वात्सप्तर्षिमण्डलस्येति भावः । समावर्जितकेतुना तन्मण्डलाघातशङ्कया नामितध्वजेन सहस्ररश्मिना सूर्येण साक्षात्स्वयमेव सप्रणाममुदीक्षिताः । गमनाभ्यनुज्ञादानपर्यन्तमित्यर्थः । भगवतः सूर्यस्याप्युपास्या इति भावः ॥

आसक्तबाहुलतया सार्धमुद्धृतया भुवा ।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ॥ ८ ॥

आसक्तेति ॥ पुनः किंविधाः । प्रलयापदि कल्पान्तसंकट आसक्तबाहुलतया । दंष्ट्रायामिति शेषः । उद्धृतया । दंष्ट्रयेति शेषः । भुवा सार्धं धरण्या सह महावराहदंष्ट्रायां विश्रान्ताः । महाप्रलयेऽप्यविनाशिन इत्यर्थः ॥

१ कुसुमोत्कर. २ आकाशगङ्गास्रोतःसु. ३ हेम. ४ प्रश्रयं. ५ उद्धतया.

सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ॥ ९ ॥

सर्गेति ॥ विश्वयोनेर्ब्रह्मणोऽनन्तरं सर्गशेषस्य प्रणयनात् । ब्रह्मसृष्टावशिष्टसृष्टेः करणाद्धेतोरित्यर्थः । पुराविद्भिः पुराणवेदिभिर्व्यासादिभिः पुरातना धातार इति कीर्तिताः ॥ विश्वयोनेरिति संबन्धमात्रे षष्ठी तस्यानन्तरमिति भाष्ये दर्शनात् । अपादानत्वविवक्षायां तु पञ्चमी । अयमदःशब्दो यथाशब्दाद्वृत्तादनन्तरस्येति शाबरभाष्ये दर्शनात् । तथा "अथातो धर्मजिज्ञासा वेदाध्यायादनन्तरम्" इत्याचार्याः । कविश्च "पुराणपत्रापगमादनन्तरम्" इति । एवमन्यत्रापि द्रष्टव्यम् ॥

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ॥ १० ॥

प्राक्तनानामिति ॥ प्राक्तनानां जन्मान्तरभवानां विशुद्धानां निर्मलानां परिपाकं फलदानोन्मुखत्वमुपेयुषां गतानां तपसां फलान्युपभुञ्जाना अपि तपस्विनस्तपोनिष्ठाः । प्रारब्धभोगिनो निस्पृहार्थेति भावः ॥ कुलकम् ॥

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ॥ ११ ॥

तेषामिति ॥ तेषामृषीणां मध्यगता साध्वी पतिव्रता । अतएव पत्युर्वसिष्ठस्य पादयोरर्पितेक्षणा निविष्टदृष्टिररुंधती साक्षात्प्रत्यक्षा तपःसिद्धिरिव । तेषामेवेति शेषः ॥ तेषां मध्यगतेति लिङ्गवचनादिसाम्यादियमुपमा ॥ बहु भूयिष्ठं यथा बभासे भाति स्म ॥

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम् ॥ १२ ॥

तामिति ॥ ईश्वरो भगवांस्तामरुन्धतीं मुनींश्चागौरवभेदेन समानगौरवेणापश्यद्दृष्टवान् । न चायमविवेक इत्याह—हि यस्मादेषां स्त्री पुमानित्येषानास्था स्त्रीपुंभेदो न विवक्षितः । किंतु सतां साधूनां वृत्तं चारित्रमेव महितं पूज्यम् ॥ "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति भावः ॥

तद्दर्शनादभूच्छंभोर्भूयान्दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम् ॥ १३ ॥

तदिति ॥ तद्दर्शनादरुन्धतीदर्शनाच्छंभोर्दारार्थं दारपरिग्रहार्थमादरो भूयान्-

१ [illegible]. २ [illegible]

द्रुतरोऽभूत् । ननु दाराः कुत्रोपयुज्यन्त इत्यत्राह—धर्म्याणां धर्मादनपेतानाम् ॥ " धर्मपथ्यर्थन्यायादनपेते " इति यत्प्रत्ययः ॥ क्रियाणामिज्यादीनां गत्यः पतिव्रताः पत्न्यः सत्पत्न्यः ॥ " पत्युर्नो यज्ञसंयोगे " इति ङीप् । नकारश्च ॥ मूलकारणं खलु ॥

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥ १४ ॥

धर्मेणेति ॥ धर्मेण दारसंजिघृक्षालक्षणेनापि ॥ कर्त्रा ॥ शर्वे ईश्वरे पार्वतीं प्रति पदं कारिते सति ॥ " हृक्रोरन्यतरस्याम् " इति शर्वस्याणिकर्तुः कर्मत्वम् ॥ पूर्वापराधभीतस्य कामस्य मन उच्छ्वसितम् । पुनरुज्जीवनावकाशो भवतीति तस्याशामभूदित्यर्थः ॥

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥ १५ ॥

अथेति ॥ अथानूचानाः साङ्गवेदप्रवक्तारः ॥ " अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः " इत्यमरः ॥ " उपेयिवाननाश्वाननूचानश्च " इति निपातः ॥ प्रीत्या कण्टकिताः पुलकितास्त्वचो येषां ते तथोक्ताः । ते सर्वे मुनयो जगद्गुरुं मानयित्वा पूजयित्वेदं वक्ष्यमाणमूचुः ॥

यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥ १६ ॥

यदिति ॥ ब्रह्म वेदः ॥ " वेदस्तत्त्वं तपो ब्रह्म " इत्यमरः ॥ सम्यक्नियमपूर्वकमाम्नातमधीतमिति यत् । अग्नौ विधिना हुतमिति यत् । तपश्चान्द्रायणादिकं तप्तमिति च यत्तस्याध्ययनेज्यातपोरूपस्य आश्रमत्रयसाध्यस्य कृत्स्नस्यापि कर्मेत्यर्थः ॥ समुदायाभिप्रायकमेकवचनमन्यथाहृत्स्यान्वयप्रसङ्गात् । न च नपुंसकवद्भावोऽनपुंसकेनेति नियमात् ॥ फलं कार्यमद्य नोऽस्माकं विपक्वम् । सुनिष्पन्नमित्यर्थः ॥ कर्मणि क्तः ॥ " पचो वः " इति निष्ठातस्य वत्वम् ॥

तदेव फलमाह—

यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याविषयं मनोविषयमात्मनः ॥ १७ ॥

यदिति ॥ यद्यस्मात्कारणाज्जगतामध्यक्षेणाधिपेन त्वया वयं मनोरथस्याभिला-

१ प्रथमे. २ प्रणिपत्य. ३ अप्यपश्रम

यस्याविषयमगोचरमात्मनः स्वस्य मनोविषयं मनोदेशमारोपिताः प्रापिताः ॥ तस्माद्विपक्वं फलमिति पूर्वेण संबन्धः । सकलजगदन्वेष्टव्यस्य भगवतोऽपि वयमन्वेष्या भवाम इति परमोत्कृष्टा वयमिति भावः ॥

तदेवोपपादयति—

यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥ १८ ॥

यस्येति ॥ यस्य जनस्य चेतसि वर्तेथाः । येन स्मर्यस इत्यर्थः । स तावत्स एव कृतिनां कृतकृत्यानां वरः श्रेष्ठः । ब्रह्मणो वेदस्य ब्रह्मणो वा योनेः कारणस्य । यद्वा वेदप्रमाणकस्य । तव चेतसि यो वर्तते । त्वया स्मर्यत इत्यर्थः । किं पुनः । स कृतिनां वर इति किमु वक्तव्यमित्यर्थः ॥

सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव ॥ १९ ॥

सत्यमिति ॥ अर्कात्सूर्याच्च सोमाच्चन्द्राच्च परमुत्कृष्टं पदं स्थानमध्यास्महे तिष्ठामः । सत्यमिति शेषः । सत्यम् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् ॥ अद्य तु तव ॥ कर्तुः ॥ स्मरणमेवानुग्रहः प्रसादस्तस्माद्धेतोः । ताभ्यामर्केन्दुभ्यामुच्चैस्तरमत्युच्चं पदम् । अध्यास्महे इति संबन्धः ॥ उच्चैस्तरमिति द्रव्यप्रकर्षत्वान्नामु प्रत्ययः ॥

त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥ २० ॥

त्वदिति ॥ वयं त्वया संभावितं सत्कृतं त्वत्संभावितमात्मानमात्मस्वरूपं बहु अधिकं यथा तथा मन्यामहे । तथाहि । उत्तमादरः सत्पुरुषकर्तृकः सत्कारः स्वगुणेषु विषये प्रायेण भूम्ना प्रत्ययं विश्वासमाधत्ते जनयति । सर्वस्यापि महात्मनः [illegible] एव पूज्यतां [illegible]त्यर्थः ॥

या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥ २१ ॥

येति ॥ हे विरूपाक्ष । त्वदनुध्यानसंभवा त्वच्चिन्तनजन्या नोऽस्माकं या प्रीतिः सा प्रीतिस्तुभ्यं किमावेद्यते किमर्थं निवेद्यते । कुतः । देहिनां [illegible] अन्तरात्मासि । [illegible] ज्ञात एव [illegible] न पुनर्बोधनं [illegible] भावः ॥

१ किमावेद्यते. २ [illegible] ३ [illegible]

ष्ठुतरोऽभूत् । ननु दाराः कुत्रोपयुज्यन्त इत्यत आह—धर्म्याणां धर्मादनपेतानाम् ॥ "धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः ॥ क्रियाणामिज्यादीनां सत्यः पतिव्रताः पत्न्यः सत्पत्न्यः ॥ "पत्युर्नो यज्ञसंयोगे" इति ङीप् । नकारश्च ॥ मूलकारणं खलु ॥

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥ १४ ॥

धर्मेणेति ॥ धर्मेण दारसंजिघृक्षालक्षणेनापि ॥ कर्त्रा ॥ शर्वे ईश्वरे पार्वतीं प्रति पदं कारिते सति ॥ "हृक्रोरन्यतरस्याम्" इति शर्वस्याणिकर्तुः कर्मत्वम् ॥ पूर्वापराधभीतस्य कामस्य मन उच्छ्वसितम् । पुनरुज्जीवनावकाशो भवतीति समाश्वासमभूदित्यर्थः ॥

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥ १५ ॥

अथेति ॥ अथानूचानाः साङ्गवेदप्रवक्तारः ॥ "अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः" इत्यमरः ॥ "उपेयिवाननाश्वाननूचानश्च" इति निपातः ॥ प्रीत्या कण्टकिताः पुलकितास्त्वचो येषां ते तथोक्ताः । ते सर्वे मुनयो जगद्गुरुं हरं मानयित्वा पूजयित्वेदं वक्ष्यमाणमूचुः ॥

यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥ १६ ॥

यदिति ॥ ब्रह्म वेदः ॥ "वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः ॥ सम्यङ्नियमपूर्वकमाम्नातमधीतमिति यत् । अग्नौ विधिना हुतमिति यत् । तपश्चान्द्रायणादिकं तप्तमिति च यत्तस्याध्ययनेज्यातपोरूपस्य आश्रमत्रयसाध्यस्य कृत्स्नस्यापि कर्मण इत्यर्थः ॥ समुदायाभिप्रायकमेकवचनमन्यथात्रयस्यान्वयप्रसङ्गात् । न च नपुंसकैकवद्भावोऽनपुंसकेनेति नियमात् ॥ फलं कार्यमद्य नोऽस्माकं विपक्वम् । सुनिष्पन्नमित्यर्थः ॥ कर्मणि क्तः ॥ "पचो वः" इति निष्ठातस्य वत्वम् ॥

तदेव फलमाह—

यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याविषयं मनोविषयमात्मनः ॥ १७ ॥

यदिति ॥ यद्यस्मात्कारणाज्जगतामध्यक्षेणाधिपेन त्वया वयं मनोरथस्याभिला-

१ प्रथमे. २ मणिपत्य. ३ अप्यपथम्.

यस्याविषयमगोचरमात्मनः स्वस्य मनोविषयं मनोदेशमारोपिताः प्रापिताः ॥ तस्माद्विपकं फलमिति पूर्वेण संबन्धः । सकलजगदन्वेष्टव्यस्य भगवतोऽपि वयमन्वेष्या भवाम इति परमोत्कृष्टा वयमिति भावः ॥

तदेवोपपादयति—

यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥ १८ ॥

यस्येति ॥ यस्य जनस्य चेतसि वर्तेथाः । येन स्मर्यस इत्यर्थः । स तावत्स एव कृतिनां कृतकृत्यानां वरः श्रेष्ठः । ब्रह्मणो वेदस्य वेधसो वा योनेः कारणस्य । यद्वा वेदप्रमाणकस्य । तव चेतसि यो वर्तते । त्वया स्मर्यत इत्यर्थः । किं पुनः । स कृतिनां वर इति किमु वक्तव्यमित्यर्थः ॥

सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव ॥ १९ ॥

सत्यमिति ॥ अर्कात्सूर्याच्च सोमाच्चन्द्राच्च परमुच्चैः पदं स्थानमध्यास्महे तिष्ठामः । यद्यपीति शेषः । सत्यम् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् ॥ अद्य तु तव ॥ कर्तुः ॥ स्मरणमेवानुग्रहः प्रसादस्तस्माद्धेतोः । ताभ्यामर्केन्दुभ्यामुच्चैस्तरमत्युच्चं पदम् । अध्यास्महे इति संबन्धः ॥ उच्चैस्तरमिति द्रव्यप्रकर्षत्वान्नाम्प्रत्ययः ॥

त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥ २० ॥

त्वदिति ॥ वयं त्वया संभावितं सत्कृतं त्वत्संभावितमात्मानमात्मस्वरूपं बहु अधिकं यथा तथा मन्यामहे । तथाहि । उत्तमादरः सत्पुरुषकर्तृकः सत्कारः स्वगुणेषु विषये प्रायेण भूयसा प्रत्ययं विश्वासमाधत्ते जनयति । सर्वस्यापि महाजनपरिग्रह एव पूज्यताहेतुरित्यर्थः ॥

या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥ २१ ॥

येति ॥ हे विरूपाक्ष । त्वदनुध्यानसंभवा त्वत्कर्तृकस्मरणजन्या नोऽस्माकं या प्रीतिः सा प्रीतिस्तुभ्यं किमावेद्यते किमर्थं निवेद्यते । कुतः । देहिनां प्राणिनामन्तरात्मासि । सर्वसाक्षिणस्तवास्मदन्तर्गतमविदितं नास्तीति ज्ञात एव वृत्तान्तो न पुनर्बोधनं संभवतीति भावः ॥

१ स्मर्यसे. २ स्मर्यते. ३ [illegible].

द्भुतरोऽभूत् । ननु दाराः कुत्रोपयुज्यन्त इत्यत्राह—धर्म्याणां धर्मादनपेतानाम् ॥ " धर्मपथ्यर्थन्यायादनपेते " इति यत्प्रत्ययः ॥ क्रियाणामिज्यादीनां सत्यः पतिव्रताः पत्न्यः सत्पत्न्यः ॥ " पत्युर्नो यज्ञसंयोगे " इति ङीप् । नकारश्च ॥ मूलकारणं खलु ॥

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥ १४ ॥

धर्मेणेति ॥ धर्मेण दारसंजिघृक्षालक्षणेनापि ॥ कर्त्रा ॥ शर्वे ईश्वरे पार्वतीं प्रति पदं कारिते सति ॥ " हृक्रोरन्यतरस्याम् " इति शर्वस्याणिकर्तुः कर्मत्वम् ॥ पूर्वापराधभीतस्य कामस्य मन उच्छ्वसितम् । पुनरुज्जीवनावकाशो भवतीति समस्याशामभूदित्यर्थः ॥

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥ १५ ॥

अथेति ॥ अथानूचानाः साङ्गवेदप्रवक्तारः ॥ " अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः " इत्यमरः ॥ " उपेयिवाननाश्वाननूचानश्च " इति निपातः ॥ प्रीत्या कण्टकिताः पुलकितास्त्वचो येषां ते तथोक्ताः । ते सर्वे मुनयो जगद्गुरुं हरं मानयित्वा पूजयित्वेदं वक्ष्यमाणमूचुः ॥

यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥ १६ ॥

यदिति ॥ ब्रह्म वेदः ॥ " वेदस्तत्त्वं तपो ब्रह्म " इत्यमरः ॥ सम्यङ्नियमपूर्वकमाम्नातमधीतमिति यत् । अग्नौ विधिना हुतमिति यत् । तपश्चान्द्रायणादिकं तप्तमिति च यत्तस्याध्ययनेज्यातपोरूपस्य आश्रमत्रयसाध्यस्य कृत्स्नस्यापि कर्मण इत्यर्थः ॥ समुदायाभिप्रायकमेकवचनमन्यथाप्यस्यान्वयमसङ्गात् । न च नपुंसकैकवद्भावोऽनपुंसकेनेति नियमात् ॥ फलं कार्यमद्य नोऽस्माकं विपक्वम् । सुनिष्पन्नमित्यर्थः ॥ कर्मणि क्तः ॥ " पचो वः " इति निष्ठातस्य वत्वम् ॥

तदेव फलमाह—

यदध्यक्षेण जगतां वयमारोपितास्त्व[illegible]
मनोरथस्याविषयं मनो[illegible] [illegible]

यदिति ॥ यस्मात्कारणाज्जगतामध्यक्षे[illegible]

1 तपसे. 2 क[illegible]. 3

तद्योगात्षष्ठी ॥ प्रवृत्तिपारार्थ्ये प्रमाणमाह—अष्टाभिर्मूर्तिभिरित्थंभूत इमं प्रकारं परार्थप्रवृत्तिरूपं प्राप्तः ॥ "भू प्राप्तौ" इति धातोः कर्तरि क्तः ॥ सूचितो ज्ञापितोऽस्मि । मत्स्वमूर्तिचेष्टया स्वपारार्थ्यमनुमेयमित्यर्थः ॥

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः ।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ॥ २७ ॥

सोऽहमिति ॥ स परार्थवृत्तिरहं तृष्णातुरैश्चातकैर्वृष्टिं विद्युत्वान्मेघ इवारिविप्रकृतैः शत्रुपीडितैर्देवैः प्रसूतिं पुत्रोत्पादनं प्रति याचितः ॥ याचतेर्दुहादित्वादप्रधाने कर्मणि क्तः ॥

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ॥ २८ ॥

अत इति ॥ अतः सुरप्रार्थितत्वाद्धेतोरात्मजन्मने पुत्राय । पुत्रमुत्पादयितुमित्यर्थः ॥ "क्रियार्थोपपदस्य—" इत्यादिना चतुर्थी ॥ पार्वतीं यजमानो यष्टा ॥ "पूङ्यजोः शानन्" इति शानन्प्रत्ययः ॥ हविर्भोक्तुरग्नेरुत्पत्तयेऽरणिमग्निमन्थनदारुविशेषमिव ॥ "निर्मन्थ्यदारुणि त्वरणिर्द्वयोः" इत्यमरः ॥ आहर्तुं संग्रहीतुमिच्छामि ॥

तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः ।
विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः ॥ २९ ॥

तामिति ॥ अस्मदर्थेऽस्मत्प्रयोजने निमित्ते सति युष्माभिस्तां पार्वतीं हिमालयो हिमवान्याचितव्यः ॥ याचेर्दुहादित्वादप्रधाने कर्मणि तव्यप्रत्ययः ॥ आवश्यकं चैतदित्याह—सद्भिः सत्पुरुषैरनुष्ठिताः संघटिताः संबन्धा यौनादयो विक्रियायै वैकल्योत्पादनाय न कल्पन्ते न पर्याप्नुवन्ति । न समर्था इत्यर्थः ॥ अलमर्थयोगाच्चतुर्थी ॥

न चाहं लौल्यात्तामिच्छामि किंतु देवोपकाराय। यद्येवं निखिलदेवेषु विद्यमानेषु हिमगिरेः शिलाभूतस्य कन्यापरिणयेच्छा कथमित्युक्ते स एव मे श्लाघ्यः संबन्धोऽश्मवान्हिमवानित्याह—

उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसंबन्धं वित्त मामप्यवञ्चितम् ॥ ३० ॥

उन्नतेनेति ॥ उन्नतेन प्रांशुना प्रमिदेन च स्थितिमता प्रतिष्ठावता भुवो धुरं

---

१ हिमालयः.

साक्षाद्दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा।
प्रसीद कथयात्मानं न धियां पथि वर्तसे ॥ २२ ॥

साक्षादिति ॥ हे देव साक्षात्प्रत्यक्षेण दृष्टोऽसि। अञ्जसा पुनस्तत्त्वतस्तु त्वां वयं न विद्मः। दृश्यमानस्य रूपस्यातात्त्विकत्वादिति भावः। अतः प्रसीदानुग्रहाण। आत्मानं निजस्वरूपं कथय। न चाकथितं तत्सुबोधमित्याह—धियां बुद्धीनां पथि न वर्तसे। अतस्त्वयैव त्वद्रूपं कथनीयमित्यर्थः ॥

तात्त्विकं रूपं तावदास्तां न दृश्यमानमपि रूपं तत्त्वतो रूपयितुं शक्यमित्याह—

किं येन सृजसि व्यक्तमुत येन बिभर्षि तत्।
अथ विश्वस्य संहर्ता भागः कतम एष ते ॥ २३ ॥

किमिति ॥ हे देव। एष दृश्यमानस्ते भागो मूर्तिः किम्। येन भागेन व्यक्तं प्रपञ्चं सृजसि सः॥ यत्तदोर्नित्यसंबन्धात्सर्वत्र तच्छब्दोऽध्याहार्यः॥ उत येन भागेन तद्व्यक्तं बिभर्षि पालयसि स वा। अथ यो भागस्तस्य विश्वस्य संहर्ता स वा॥ किमादयः संदेहे ॥ कतमः। ब्रह्मविष्णुमहेश्वरेष्वयं कतमो भागस्तदुच्यतामित्यर्थः॥

ननु हर इत्येवं निश्चयात्कथमयं संशयस्तत्राह—

अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम् ॥ २४ ॥

अथवेति ॥ अथवा हे देव सुमहती। गुह्यतमत्वादतिदुर्लभेत्यर्थः। एषा प्रार्थना निजरूपनिरूपणप्रार्थना तिष्ठतु। किंतु चिन्तितेन चिन्तिता वोपस्थिताश्चिन्तितोपस्थितास्तान्नोऽस्मांस्तावच्छाध्याज्ञापय किं करवाम ॥ प्रार्थनायां लोट्॥ अलमप्रस्तुतेन प्रस्तुते तावन्नियुङ्क्ष्वेत्यर्थः ॥

अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः।
उपचिन्वन्प्रभां तन्वीं प्रत्याह परमेश्वरः ॥ २५ ॥

अथेति ॥ अथ परमेश्वरो मौलिगतस्येन्दोस्तन्वीमल्पाम्। कलामात्रत्वादिति भावः। प्रभां कान्तिं विशदैः शुभ्रैर्दशनांशुभिरुपचिन्वन्वर्धयन्प्रत्याह। प्रत्युवाचेत्यर्थः॥

विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः।
ननु मूर्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः ॥ २६ ॥

विदितमिति ॥ हे मुनयः काश्चिदपि मे प्रवृत्तयो व्यापाराः स्वार्था न भवन्ति यथा तथा वो युष्माकं विदितम् ॥ वाक्यार्थः कर्मभूतद्धर्मस्वाद्वर्तमाने क्तः।

१ नो विद्मः पुनः २ प्रसरथ.

ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमास्पदम् ॥ ३५ ॥

तत इति ॥ ततोऽनन्तरं मुनिमण्डलं मुनिसमूहः परममित्युक्त्वा ओमित्युक्त्वा । अनुमन्येत्यर्थः ॥ अव्ययमेतत् ॥ "ओमेवं परमं मतम्" इत्यमरः ॥ प्रतस्थे ॥ भगवानीश्वरोऽपि प्रथमोद्दिष्टं पूर्वसंकेतितमास्पदं स्थानं महाकोशीप्रपातं संप्राप्तः ॥

ते चाकाशमसिश्याममुत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा समरंहसः ॥ ३६ ॥

त इति ॥ मनसा समरंहसो मनस्तुल्यवेगास्ते परमर्षयश्च ॥ पूर्वश्लोकोक्तेश्वरसमुच्चयार्थश्चकारः ॥ असिवच्छ्यामं नीलमाकाशं खं प्रत्युत्पत्यौषधिप्रस्थं हिमवत्पुरमासेदुः । सद्यः प्रापुरित्यर्थः ॥

इतः परं दशभिः श्लोकैरोषधिप्रस्थमेव वर्णयति—

अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ॥ ३७ ॥

अलकामिति ॥ वसुसंपदां धनसमृद्धीनां वसतिं स्थानमलकां कुबेरनगरीमतिवाह्य । परिच्छिद्येति यावत् । उपनिवेशितमिव स्थितम् । तथा स्वर्गस्याभिष्यन्दोऽतिरेकः । अतिरिक्तजन इति यावत् । तस्य वमनं निःसारणं कृत्वोपनिवेशितमिव स्थितम् ॥ उभयत्रापि कौटिल्यः—"भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्" इति ॥ अलकामरावत्यतिशायिसमृद्धिकमित्यर्थः ॥

गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥ ३८ ॥

गङ्गेति ॥ गङ्गायाः स्रोतोभिः प्रवाहैः परिक्षिप्तं परिवेष्टितम् । नैरेव परिखमित्यर्थः । वप्रश्चयः । प्राकारचयसामीति यावत् ॥ "स्याच्चयो वप्रमस्त्रियाम्" इत्यमरः ॥ तस्यान्तर्मध्ये ज्वलिता: प्रकाशमाना ओषधयो यस्य तत्तथोक्तम् । ज्वलितौषधित्वाद्रात्रिषु संचारिणां दीपनिरपेक्षमित्यर्थः । बृहद्विपुलो मणिशिलानां मणिमयानां सालः प्राकारो यस्य तत्तथोक्तम् ॥ "प्राकारो वरणः सालः" इत्यमरः ॥ अतएव गुप्तावपि संवरणेऽपि मनोहरम् । अकृत्रिमदुर्गसंवरणमिति भावः ॥

जितसिंहभया नागा यत्राश्वा बिलयोनयः ।
यक्षाः किंपुरुषाः पौरा योषितो वनदेवताः ॥ ३९ ॥

---

१ मतानम्. २ आथनम्. ३ अद. ४ इव. ५ विनिवेशितम्. ६ सालशालि.

भारमुद्वहता। निर्वाहकेणेत्यर्थः। तेन हिमवता योजितः संघटितः संबन्धो यौनसं
यस्य तं मामप्यवञ्चितमव्यामोहितं वित्त जानीत॥ "विद ज्ञाने" इति धातोर्ले

तर्हि स किं वाच्य इत्याशङ्क्याह—

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते।
भवत्प्रणीतमाचारमामनन्ति हि साधवः॥ ३१॥

एवमिति॥ कन्यार्थं कन्याप्रदानाय स हिमवानेवं वाच्य इति वो युष्
नोपदिश्यते। कुतः। हि यस्मात्साधवो विद्वांसो भवद्भिः प्रणीतं स्मृतिरूपेण
बद्धमाचारमामनन्त्युपदिशन्ति। न हि स्वयमुपदेष्टारः परोपदेशमपेक्षन्त इत्य

आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति।
प्रायेणैवंविधे कार्ये पुरंध्रीणां प्रगल्भता॥ ३२॥

आर्येति॥ आर्या पूज्यारुन्धत्यपि तत्र विवाहकृत्ये व्यापारं साहाय्यं कर्तु
ति। तथाहि। प्रायेण प्राचुर्येणैवंविधे कार्ये विवाहादिकार्ये। दुर्घट इत्यर्थ
पुरंध्रीणां कुटुम्बिनीनाम्॥ "स्यात्तु कुटुम्बिनी पुरंध्रिः" इत्यमरः॥ प्रगल्
चातुर्यम्। स्त्रीप्रधानेषु कृत्येषु स्त्रीणामेव घटनापाटवमिति भावः॥

तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्।
महाकोशीप्रपातेऽस्मिन्संगमः पुनरेव नः॥ ३३॥

तदिति॥ तत्तस्मात्कारणादोषधिप्रस्थं नाम हिमवत्पुरं हिमवन्नगरं सि
कार्यसिद्ध्यर्थं प्रयात गच्छत। अस्मिन्पुरोवर्तिनि महाकोशी नाम तत्रत्या का
नदी तस्याः प्रपाते भृगावेव। सा नदी यत्र पतति तस्मिन्नित्यर्थः॥ "प्रपात
तटो भृगुः" इत्यमरः॥ नोऽस्माकं पुनः संगमः। अस्त्विति शेषः। भवत्सम
प्रतिपाल्यपरमिह निवत्स्यामीत्यर्थः॥

तस्मिन्संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः॥ ३४॥

तस्मिन्निति॥ संयमिनां योगिनामाद्ये तस्मिन्नीश्वरे परिणयोन्मुखे विवा
हसुके जाते सति प्रजापतेरिमे प्राजापत्याः। ब्रह्मपुत्रा इत्यर्थः। तपस्विनो मु
परिग्रहैः पत्नीभिर्व्रीडाम्। गार्हस्थ्यनिमित्तामित्यर्थः॥ "पत्नीपरिजनादानमूल
पाः परिग्रहाः" इत्यमरः॥ जहुस्तत्यजुः॥ जहातेर्लिट् रूपम्॥ न हि समानशी
ष्ठेन [illegible] भावः॥

---

१ [illegible] २ [illegible]

ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमास्पदम् ॥ ३५ ॥

तत इति ॥ ततोऽनन्तरं मुनिमण्डलं मुनिसमूहः परममित्युक्त्वा ओमित्युक्त्वा । अनुमन्येत्यर्थः ॥ अव्ययमेतत् ॥ "ओमेवं परमं मतम्" इत्यमरः ॥ प्रतस्थे । भगवानीश्वरोऽपि प्रथमोद्दिष्टं पूर्वसंकेतितमास्पदं स्थानं महाकोशीप्रपातं संप्राप्तः ॥

ते[३] चाकाशमसिश्यामसुत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा समरंहसः ॥ ३६ ॥

त इति ॥ मनसा समरंहसो मनस्तुल्यवेगास्ते परमर्षयश्च ॥ पूर्वश्लोकोक्तेश्वरसमुच्चयार्थश्चकारः ॥ असिवच्छ्यामं नीलमाकाशं खं प्रत्युत्पत्योषधिप्रस्थं हिमवत्पुरमासेदुः । सद्यः प्रापुरित्यर्थः ॥

इतः परं दशभिः श्लोकैरोषधिप्रस्थमेव वर्णयति—

अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ॥ ३७ ॥

अलकामिति ॥ वसुसंपदां धनसमृद्धीनां वसतिं स्थानमलकां कुबेरनगरीमतिवाह्य । परिच्छिद्येति यावत् । उपनिवेशितमिव स्थितम् । तथा स्वर्गस्याभिष्यन्दोऽतिरेकः । अतिरिक्तजन इति यावत् । तस्य वमनं निःसारणं कृत्वोपनिवेशितमिव स्थितम् ॥ उभयत्रापि कौटिल्यः—"भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत्" इति ॥ अलकामरावत्यतिशयितसमृद्धिकमित्यर्थः ॥

गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥ ३८ ॥

गङ्गेति ॥ गङ्गायाः स्रोतोभिः प्रवाहैः परिक्षिप्तं परिवेष्टितम् । तैरेव सपरिखमित्यर्थः । वप्रश्चयः । प्राकारचयमिति यावत् ॥ "स्याच्चयो वप्रमस्त्रियाम्" इत्यमरः ॥ तस्यान्तर्मध्ये ज्वलिताः प्रकाशमाना ओषधयो यस्य तत्तथोक्तम् । ज्वलितौषधिरवाद्रात्रिषु संचारिणां दीपनिरपेक्षमित्यर्थः । बृहद्भिर्विपुलैर्मणिशिलानां मणिमयानां सालः प्राकारो यस्य तत्तथोक्तम् ॥ "प्राकारो वरणः सालः" इत्यमरः ॥ अतएव गुप्तावपि संवरणेऽपि मनोहरम् । अकृत्रिमदुर्गसंवरणमिति भावः ॥

जितेति ॥ यत्र पुरे नागा गजा जितं सिंहेभ्यो भयं यैस्ते तथोक्ताः । सिंह धिकवला इत्यर्थः ॥ नाथस्तु "पदं तुषारस्रुतिधौतरक्तम्" (१ । ६) इत्येतद्विर धभयात् "वीतवीतभयाः" इति पपाठ । तथा न भेतव्यं तत्र वनगजानां सिंहह त्वाभिधानात् । अत्र सोपधिमस्थगजानां हिमवन्महिम्ना सिंहातिरेकसंभवेनाविर धादिति । "वीतवीतभयाः" इति पाठे वीतं विगतं वीतात्पादाङ्कुशकर्मभ्यां भ येषां ते तथोक्ताः । स्वभावविनीता इत्यर्थः ॥ "पादकर्म युतं प्रोक्तं यातमङ्कुश रणम् । उभयं वीतमाख्यातम्" इति यादवः ॥ अश्वा बिलयोनयो बिलसंभवा अन्यत्र तु न तथेति वैचित्र्यम् । उक्तं च—"अमृताद्वाप्यतो वह्नेर्वेदेभ्योऽण्ड गर्भतः । साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता" इति ॥ यक्षाः प्रसिद्धाः पुरुषाः किंनराश्च पौराः पुरजनाः । वनदेवता एव योषितः । नतु मानुष्य इत्यर्थ

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ॥ ४० ॥

शिखरेति ॥ यत्र पुरे शिखरेष्वासक्ता मेघा येषां तेषां वेश्मनां संबन्धिन अनुगर्जितानि प्रतिगर्जितानि तैः संदिग्धा मुरजस्वनाः करणैस्तालव्यवस्थाप स्ताडनविशेषैः । तदुक्तं राजकंदर्पेण—"नृत्यवादित्रगीतानां प्रयोगवशभेदिन म् । संस्थानं ताडनं रोधः करणानि प्रचक्षते" इति ॥ व्यज्यन्ते स्फुटीक्रियन्ते

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता ॥ ४१ ॥

यत्रेति ॥ यत्र नगरे विलोलानि चञ्चलानि विटपेष्वंशुकानि येषां तैः कल द्रुमैरेवापौरादरेण पौरादरं विनैव निर्मिता । अयत्नसिद्धेत्यर्थः । गृहेषु यानि न्त्राण्याधारदारूणि तेषु पताकास्तासां श्रीः संभवतीति शेषः । तत्र लम्बाम्ब कल्पतरव एव वैजयन्तीति संभाव्यन्त इत्यर्थः ॥

यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ॥ ४२ ॥

यत्रेति ॥ यत्र पुरे नक्तं रात्रौ स्फटिकहर्म्येष्वापानभूमिषु पानगोष्ठीमदे ज्योतिषां नक्षत्राणां प्रतिबिम्बान्युपहारतां पुष्पोपहारत्वं मौक्तिकोपहारत्वं वा व्रजन्ति ॥

यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥ ४३ ॥

१ मन्द्रगर्जित. २ पांशुष.

यत्रेति ॥ यत्र पुरे दुर्दिनेषु मेघाच्छन्नदिवसेषु नक्तमोषधीनां तृणज्योतिषां प्रकाशेन संचरन्त एभिरिति संचराः पन्थानः ॥ "गोचरसंचर—" इत्यादिना घप्रत्ययान्तो निपातः ॥ दर्शितसंचराः प्रकाशितमार्गा अभिसारिकाः कान्तार्थिन्यः ॥ "कान्तार्थिनी तु या याति संकेतं साभिसारिका" इत्यमरः ॥ तमिस्राणां तमसाम् ॥ कृद्योगात्कर्मणि षष्ठी ॥ अनभिज्ञाः । तमांसि नाभिजानन्तीत्यर्थः ॥

यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् ।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ॥ ४४ ॥

यौवनान्तमिति ॥ यस्मिन्पुरे वयो यौवनान्तं यौवनावधिकम् । सर्वेऽप्यजरा इत्यर्थः । तथा कुसुमायुधात्कामात् । अन्य इति शेषः । अन्तको मृत्युर्न । अस्तीति शेषः । विरहिणां तादृग्दुःखोत्पादकत्वादन्तकत्वोपचारः । कामं विना मृत्युर्नास्तीत्यर्थः । अतएव तत्कार्यभूतमरणाभाव इत्याशयेनाह—रतीति ॥ रतिखेदसमुत्पन्ना निद्रा सुप्तिरेव संज्ञाविपर्ययश्चेतनापगमः । न तु दीर्घनिद्रारूप इत्यर्थः । अमरत्याः सर्वेऽजरामरा इति श्लोकतात्पर्यार्थः । अन्तयत्यन्तं करोतीत्यन्तकः ॥ अन्तयतेस्तत्करोतीति ण्यन्ताद्यप्रत्ययः ॥

भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ॥ ४५ ॥

भ्रूभेदिभिरिति ॥ यत्र पुरे प्रिया युवानो भ्रूभेदिभिर्भ्रूभङ्गवद्भिः सकम्पा ओष्ठा येषु तैर्ललितान्यङ्गुलितर्जनानि येषु तैः स्त्रीणां कोपैर्मानाख्यैराप्रसादार्थिन आप्रसादं प्रसादपर्यन्तमर्थिनो याचकाः कृताः । न तु शत्रुकोपैरिति भावः ॥

संतानकतरुच्छायासुप्तविद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं गन्धवद्गन्धमादनम् ॥ ४६ ॥

संतानकेति ॥ किंचेति चार्थः । संतानकतरोश्छायासु सुप्ता विद्याधरा देवताविशेषास्त एवाध्वगा यस्मिंस्तत्तथोक्तं गन्धवद्गन्धाढ्यं गन्धमादनं नाम गिरिर्यस्य पुरस्य बहिर्भवं बाह्यमुपवनमारामः ॥ संतानकतरुच्छायेत्यत्र पूर्वपदार्थबाहुल्यसंभवेऽपि "शलभच्छायम्" "इक्षुच्छायम्" इतिवत्समर्थच्छायानिष्पत्तेस्तदपेक्षाभावात् "छाया बाहुल्ये" इति नपुंसकत्वं नास्तीत्यनुसंधेयम् ॥ अत्र "गन्धवद्गन्धमादनम्" इत्यागन्तुकः पाठः । प्राचीनपाठस्तु "सुगन्धिर्गन्धमादनः" इति पुंलिङ्गान्तः । अतएव क्षीरस्वामिना "गन्धमादनमन्ये च" इत्यत्र गन्धेन

१ सप्रत्यायाना. २ सुगन्धि गन्धमादनम् .

जितेति ॥ यत्र पुरे नागा गजा जितं सिंहेभ्यो भयं यैस्ते तथोक्ताः । सिंहाधिकबला इत्यर्थः ॥ नाथस्तु "पदं तुषारस्रुतिधौतरक्तम्" (१ । ६) इत्यत्र सिंहवधभयात् "वीतवीतभयाः" इति पपाठ । तथा न भेतव्यं तत्र वनगजानां सिंहत्रासाभिधानात् । अत्र तोषधिप्रस्थगजानां हिमवन्महिम्ना सिंहातिरेकसंभवेनाविरोधादिति । "वीतवीतभयाः" इति पाठे वीतं विगतं वीतात्पादाङ्कुशकर्मभ्यो भयं येषां ते तथोक्ताः । स्वभावविनीता इत्यर्थः ॥ "पादकर्म पुनं प्रोक्तं यातमङ्कुशवारणम् । उभयं वीतमाख्यातम्" इति यादवः ॥ अश्वा बिलयोनयो बिलसंभवाः । अन्यत्र तु न तथेति वैचित्र्यम् । उक्तं च—"अमृताद्बाष्पतो वह्नेर्वेदेभ्योऽण्डाच्च गर्भतः । साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता" इति ॥ यक्षाः गुह्यकाः किंपुरुषाः किंनराश्च पौराः पुरजनाः । वनदेवता एव योषितः । न तु मानुष्य इत्यर्थः ॥

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ॥ ४० ॥

शिखरेति ॥ यत्र पुरे शिखरेष्वासक्ता मेघा येषां तेषां वेश्मनां संबन्धिनः अनुगर्जितानि प्रतिगर्जितानि तैः संदिग्धा मुरजस्वनाः करणैस्तालव्यवस्थार्थैस्ताडनविशेषैः । तदुक्तं राजकंदर्पेण—"नृत्यवादित्रगीतानां प्रयोगवशभेदिनाम् । संस्थानं ताडनं रोधः करणानि प्रचक्षते" इति ॥ व्यज्यन्ते स्फुटीक्रियन्ते ॥

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता ॥ ४१ ॥

यत्रेति ॥ यत्र नगरे विलोलानि चञ्चलानि विटपान्येवांशुकानि येषां तैः कल्पद्रुमैरेवापौरादरेण पौरादरं विनैव निर्मिता । अयत्नसिद्धेत्यर्थः । गृहेषु यानि यन्त्राण्याधारदारूणि तेषु पताकास्तासां श्रीः संभवतीति शेषः । तत्र लम्बाम्बराः कल्पतरव एव वैजयन्तीति संभाव्यन्त इत्यर्थः ॥

यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ॥ ४२ ॥

यत्रेति ॥ यत्र पुरे नक्तं रात्रौ स्फटिकहर्म्येष्वापानभूमिषु पानगोष्ठीप्रदेशेषु ज्योतिषां नक्षत्राणां प्रतिबिम्बान्युपहारतां पुष्पोपहारत्वं मौक्तिकोपहारत्वं वा प्राप्नुवन्ति ॥

यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥ ४३ ॥

१ मन्द्रगर्जित. २ पद्धिषु.

संप्रति हिमवन्तमेव जंगमस्थावररूपद्वयसाधारणैर्विशेषणैर्विशिनष्टि—

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ॥ ५१ ॥

धात्विति ॥ धातुवत्ताम्रोऽधरो यस्य स तथोक्तः । अन्यत्र धातुरेव ताम्रोऽधरो यस्य । प्रांशून्नतः । उभयत्रापि समानम् । देवदारुवद्बृहन्तौ भुजौ यस्य स तथोक्तः । देवदारव एव बृहन्तो भुजा यस्येत्यन्यत्र । प्रकृत्या स्वभावेनैव शिलावदुरो यस्य स शिलोरस्कः । शिलैवेत्यन्यत्र ॥ " उरःप्रभृतिभ्यः कप् " इति कप् ॥ अतो हिमवानिति सुव्यक्तः ॥ वर्तमाने क्तः ॥ सत्यं स एवायं हिमवानिति तद्धर्मसत्यभिज्ञानादवधारित इत्यर्थः ॥

विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्मभिः ॥ ५२ ॥

विधीति ॥ स हिमवान्विधिना शास्त्रेण प्रयुक्तसत्कारैः कृतार्चनैः शुद्धकर्मभिरदुष्टचारित्रैः । शुद्धान्तप्रवेशार्हैरित्यर्थः । तैर्मुनिभिः स्वयं मार्गस्य दर्शयतीति दर्शको दर्शयिता सन् ॥ पश्यतेर्ण्यन्तादण्प्रत्ययः ॥ शुद्धान्तमन्तःपुरमाक्रमयामास । प्रवेशयामासेत्यर्थः ॥ अत्र क्रमेरगत्यर्थत्वात् " गतिबुद्धि- " इत्यादिना तैरित्यस्य न कर्मत्वम् ॥

तत्र वेत्रासनासीनान्कृतासनपरिग्रहः ।
इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ॥ ५३ ॥

तत्रेति ॥ वेत्रं लताविशेषः । तत्र शुद्धान्ते वेत्रासनासीनान्वेत्रमयपीठोपविष्टानीश्वरान्प्रभून्मुनीन्भूधरेश्वरो हिमवान्कृतासनपरिग्रहः । उपविष्टः सन्नित्यर्थः । प्राञ्जलिः कृताञ्जलिः सन् । इत्येवं वाचमुवाच ॥

अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥ ५४ ॥

अपेति ॥ अतर्कितोपपन्नमविचारितमेवोपगतम् । अनन्यागमभावितमित्यर्थः । वो युष्माकं दर्शनमपमेघोदयं वर्षमनभ्रा वृष्टिस्तथाऽदृष्टं कुसुमं यस्य तत्तथोक्तं फलं च तन्मे प्रतिभाति । अतिदुर्लभलाभः संवृत्त इत्यर्थः ॥ अत्र मेघोदयकुसुमरूपकारणयोरभावेऽपि वर्षफलरूपकार्ययोरुत्पत्तिकथनाद्विभावना । मुनिदर्शनस्य विशिष्टत्वेन न रूपणादुपकार्योपकारकत्वेनुपमयोः संसृष्टिः ॥

---

१ प्रकाशन्. २ देवत. ३ तत्र. ४ गौरवम. ५ दुर्लभोदयः.

मादयतीति गन्धमादन इति व्याख्याय प्रयोगे च पुंलिङ्गता दृश्यत इत्याशये नोक्तं " सुगन्धिर्मन्थमादनः " इति कालिदास इति ।

अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसंधिसुकृतं वञ्चनामिव मेनिरे ॥ ४७ ॥

अथेति ॥ अथ ते दिवि भवा दिव्या मुनयो हिमवत इदं हैमवतं पुरं प्रेक्ष्य स्वर्गाभिसंधिना स्वर्गोद्देशेन यत्सुकृतं ज्योतिष्टोमाद्यनुष्ठानं तत्स्वर्गाभिसंधिसुकृतं वञ्चनां प्रतारणामिव मेनिरे । हिमवन्नगरमवेक्ष्य स्वर्गस्य पुण्यफलत्वं वदता वेदेन वयं विप्रलब्धा इत्यर्थः । स्वर्गादतिरमणीयमिति भावः ॥

ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः ।
अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥ ४८ ॥

त इति ॥ लिखितानलनिश्चलैः । चित्रगतज्वलननिष्पन्दैरिति वेगप्रकर्षोक्तिः । जटाभारैरुपलक्षितास्ते मुनयः । द्वारि तिष्ठन्तीति द्वाःस्था द्वारपालकाः' " प्रतीहारे द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः " इत्यमरः ॥ उन्मुखैरूर्ध्वमुखैर्द्वाःस्थैर्वीक्षिताः सन्तः । न तु विनिवारिता इत्यर्थः । गिरेर्हिमवतः सद्मनि वेगादवतेरुरवतीर्णवन्तः ॥

गगनादवतीर्णा सा यथावृद्धपुरःसरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरंपरा ॥ ४९ ॥

गगनादिति ॥ गगनादवतीर्णावरूढा यथावृद्धं वृद्धानुक्रमेण स्थिताः पुरःसरा अग्रेसरा यस्यां सा तथोक्ता ॥ अनुपसर्जनाधिकारान्न ङीप् ॥ सा मुनिपरंपरा मुनिपङ्क्तिस्तोयान्तस्तोयाभ्यन्तरे भास्करालो प्रतिबिम्बितार्कपङ्क्तिरिव रेजे । एतेन मुनीनां तेजस्वित्वेऽपि सुखसंदर्शनं सूचयति । भास्कराणां भूयिष्ठत्वसंभावनार्थं तोयान्तरित्युक्तम् । अतएव बहुत्वसिद्धिश्च ॥

तानर्घ्यानर्घ्यमादाय दूरात्प्रत्युद्ययौ गिरिः ।
नमयन्सारगुरुभिः पादन्यासैर्वसुंधराम् ॥ ५० ॥

तानिति ॥ गिरिर्हिमवानर्घ्यमर्घार्थं जलमादाय सारगुरुभिरन्तःसारदुर्भरैः पादन्यासैर्वसुंधरां नमयन्नधः प्रापयन् । अर्घमर्हन्तीत्यर्घ्यान्पूज्यान् ॥ दण्डादित्वाद्यत्प्रत्ययः ॥ तान्मुनीन्दूरात्प्रत्युद्ययौ ॥

१ नरा. २ निश्चलाः.

संप्रति हिमवन्तमेव जंगमस्थावररूपद्वयसाधारणैर्विशेषणैर्विशिनष्टि—

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ॥ ५१ ॥

धात्विति ॥ धातुवत्ताम्रोऽधरो यस्य स तथोक्तः । अन्यत्र धातुरेव ताम्रोऽधरो यस्य । प्रांशुरुन्नतः । उभयत्रापि समानम् । देववदारुवद्बृहन्तौ भुजौ यस्य स तथोक्तः । देवदारव एव बृहन्तौ भुजौ यस्येत्यन्यत्र । प्रकृत्या स्वभावेनैव शिलावदुरो यस्य स शिलोरस्कः । शिलैवेत्यन्यत्र ॥ "उरःप्रभृतिभ्यः कप्" इति कप् ॥ अतो हिमवानिति सुव्यक्तः ॥ वर्तमाने क्तः ॥ सत्यं स एवायं हिमवानिति तद्धर्मप्रत्यभिज्ञानादवधारित इत्यर्थः ॥

विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्मभिः ॥ ५२ ॥

विधीति ॥ स हिमवान्विधिना शास्त्रेण प्रयुक्तसत्कारैः कृतार्चनैः शुद्धकर्मभिरदुष्टचारित्रैः । शुद्धान्तप्रवेशार्हैरित्यर्थः । तैर्मुनिभिः स्वयं मार्गस्य दर्शयतीति दर्शको दर्शयिता सन् ॥ पश्यतेर्ण्यन्ताद्ण्वुल्प्रत्ययः ॥ शुद्धान्तमन्तःपुरमाक्रमयामास । प्रवेशयामासेत्यर्थः ॥ अत्र क्रमेरगत्यर्थत्वात् "गतिबुद्धि–" इत्यादिना तैरित्यस्य न कर्मत्वम् ॥

तत्र वेत्रासनासीनान्कृतासनपरिग्रहः ।
इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ॥ ५३ ॥

तत्रेति ॥ वेत्रं लताविशेषः । तत्र शुद्धान्ते वेत्रासनासीनान्वेत्रमयपीठेषूपविष्टानीश्वरान्प्रभून्मुनीन्भूधरेश्वरो हिमवान्कृतासनपरिग्रहः । उपविष्टः सन्नित्यर्थः प्राञ्जलिः कृताञ्जलिः सन् । इत्येवं वाचमुवाच ॥

अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥ ५४ ॥

अपेति ॥ अतर्कितोपपन्नमविचारितमेवोपगतम् । अत्यन्तासंभावितमित्यर्थः । वो युष्माकं दर्शनमपमेघोदयं वर्षमभ्रादृष्टिरिवादृष्टं कुसुमं यस्य तत्तथोक्तं फलं च तन्मे प्रतिभाति । अतिदुर्लभलाभः संवृत्त इत्यर्थः ॥ अत्र मेघोदयकुसुमरूपकारणयोरभावेऽपि वर्षफलरूपकार्ययोरुत्पत्त्यभिधानाद्विभावना । मुनिदर्शनस्य विशिष्टवर्षत्वेन च रूपणाद्रूपकालंकारश्चेत्युभयोः संसृष्टिः ॥

१ स हारादः. २ देवहः. ३ नम्. ४ नीरम्भनः. ५ दृष्टचौरः.

मूढं बुद्धमिवात्मानं हैमीभूतमिवायसम् ।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ॥ ५५ ॥

मूढमिति ॥ भवदनुग्रहादात्मानं मां मूढं बुद्धिं विनाकृतं बुद्धमिव मूढो भूत्वा यो बुद्धवांस्तमिव ॥ कर्तरि क्तः ॥ आयसमयोविकारं हैमीभूतम् । आयसत्वं विहाय सौवर्णत्वं प्राप्तमिवेत्यर्थः । भूमेर्भूलोकाद्दिवं स्वर्गमारूढमिव मन्ये । ज्ञानरूपस्थानान्यद्य मे परमुत्कृष्यन्त इति भावः ॥

अद्यप्रभृति भूतानामधिगम्योऽस्मि शुद्धये ।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ॥ ५६ ॥

अद्येति ॥ अद्यप्रभृतीत आरभ्य भूतानां प्राणिनां शुद्धयेऽधिगम्योऽस्मि । शुद्ध्यर्थिनां तीर्थभूतोऽस्मीत्यर्थः । भवदागमनादिति शेषः । हि यस्मात् । यदर्हद्भिः सद्भिरध्यासितमधिष्ठितम् । जुष्टमिति यावत् । तत्तीर्थं प्रचक्षते ॥ "निपानागमयोस्तीर्थमृपिजुष्टजले गुरौ" इत्यमरः ॥

अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥ ५७ ॥

अवैमीति ॥ हे द्विजोत्तमाः । आत्मानं मां द्वयेनैव पूतं शुद्धमवैम्यवगच्छामि । केन द्वयेन । मूर्ध्नि गङ्गाप्रपातेन मन्दाकिनीपातेन वो युष्माकं धौतयोः क्षालितयोः पादयोरम्भसा च ॥ गङ्गाजलवत्पादाम्भसः पावनत्वमिरौपम्यं गम्यते । तच्च "प्रस्तुताप्रस्तुतयोः" इति दीपकालंकारः । "प्रियः प्रियतराख्यानम्" इति लक्षणात्प्रियोऽलंकार इति केचित् ॥

जंगमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥ ५८ ॥

जंगममिति ॥ हे मुनयः । द्विरूपं जंगमस्थावरात्मकत्वाद्विप्रकारकमपि वपुर्विभक्तानुग्रहं विभज्य कृतप्रसादं मन्ये । कुतः । जंगमं वपुर्वो युष्माकं प्रैष्यभावे कैंकर्ये । स्थितमिति शेषः ॥ "प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या" इति वृद्धिः ॥ "नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः" इत्यमरः ॥ स्थावरं वपुश्चरणाङ्कितम् । अयमेव हि महाननुग्रहो दासजनस्य यत्कर्मसु नियोजनं मूर्धनि पादन्यासमर्थेन तात्पर्यार्थः ॥

१ प्रवदत्तः. २ मन्दाकिनी. ३ स्थितम्; देवस्थम्.

भवत्संभावनोत्थाय परितोषाय मूर्च्छते ।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥ ५९ ॥

भवदिति ॥ व्याप्ता दिगन्ता यैस्तानि व्याप्तदिगन्तानि । महान्त्यपीत्यर्थः । मे ममाङ्गानि भवत्संभावनोत्थाय युष्मदनुग्रहजन्याय मूर्च्छते व्याप्नुवते परितोषाय न प्रभवन्ति न पर्याप्नुवन्ति ॥ अलमर्थयोगाच्चतुर्थी ॥ यथा महत्स्वपि मद्गात्रेषु न माति तथा मे हर्षो वर्धत इत्यर्थः ॥

न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥ ६० ॥

नेति ॥ भास्वतां तेजस्विनां विवस्वतां च वो युष्माकं दर्शनेन केवलं दरीसंस्थं गुहागतं तमो ध्वान्तरूपमेव नापास्तम् । किंतु मेऽन्तर्गतमन्तरात्मगतं रजसो रजोगुणात्परमनन्तरं तमोऽज्ञानरूपमप्यपास्तम् । रजस्तु पादन्यासैरेवापास्तमिति भावः ॥ प्रसिद्धभास्वद्भिर्बाह्यं तमोऽपास्यत एभिस्त्वान्तरमपीति व्यतिरेको व्यज्यते ॥

कर्तव्यं वो न पश्यामि स्याच्चेत्किं नोपपद्यते ।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥ ६१ ॥

कर्तव्यमिति ॥ कर्तव्यं कार्यं वो युष्माकं न पश्यामि । निस्पृहत्वादिति भावः । अथ स्याच्चेद्विद्येत यदि किं नोपपद्यते किं नाम न संभवति । सर्वं सुलभमेवेत्यर्थः । अथवा किमत्र प्रयोजनचिन्तयेत्याह—मत्पावनाय मच्छोधनायैव भवतामिह विषये प्रस्थानम् । इमं देशमुद्दिश्येदं प्रयाणमित्यर्थः । मन्ये तर्कयामि ॥

तथापि तावत्कस्मिंश्चिदाज्ञां मे दातुमर्हथ ।
विनियोगप्रसादा हि किंकराः प्रभविष्णुषु ॥ ६२ ॥

तथापीति ॥ तथापि भवतां निस्पृहत्वेऽपि कस्मिंश्चित् । कर्मणीति शेषः । आज्ञामिदं कुर्विध्यादेशं तावदिदानीं मे मह्यं दातुमर्हथ । मदनुग्रहबुद्ध्येति भावः । हि यस्मात्किंकरा भृत्याः प्रभवन्तीति प्रभविष्णवः प्रभुषु विषये ॥ "भुवश्च" इतीष्णुच्प्रत्ययः ॥ विशेषेण नियोगो विनियोगः प्रेषणमेव प्रसादोऽनुग्रहो येषां ते तथोक्ताः । अन्यथा स्वस्वामिभावो निष्फल इति भावः ॥

एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥ ६३ ॥

एत इति ॥ किं बहुना । एते वयममी दारा इयं कुलस्य जीवितं प्राणभूता ।

---

१ [illegible]. २ [illegible]. ३ [illegible]. ४ [illegible].

परमप्रेमास्पदमित्यर्थः । कन्या । अर्थिनां मध्ये येन जनेन वः कार्यं प्रयोजनं ब्रूत । तमिति शेषः । येन सोऽपि दीयत इति भावः ॥ रत्नहिरण्यादिकं तु न मे गण्यमित्याह—बाह्यवस्तुषु कनकरत्नादिष्वनास्थानादरः ॥ प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते ॥ अदेयं न किंचिदस्तीति भावः ॥

इत्यूचिवांस्तमेवार्थं गुहामुखविसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥ ६४ ॥

इतीति ॥ इत्यूचिवानुक्तवान् ॥ वचेः क्वसुप्रत्ययः ॥ हिमालयो हिमवान्गुहानां मुखेषु विवरेषु विसर्पतीति तथोक्तेन प्रतिशब्देन तमेव पूर्वोक्तमेवार्थं द्विर्वारम् ॥ "द्वित्रिचतुर्भ्यः सुच्" इति सुच्प्रत्ययः ॥ व्याजहार बभाषे ॥

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥ ६५ ॥

अथेति ॥ अथानन्तरमृषय उदाहरणानि कथाप्रसङ्गास्त एव वस्तून्यर्थास्तेष्वग्रं नयतीत्यग्रणीस्तमग्रण्यं प्रगल्भम् ॥ "सत्सूद्विष—" इत्यादिना क्विप् । "अग्रग्रामाभ्यां नयतेरिति वक्तव्यम्" इति णत्वम् ॥ आङ्गिरसं नामर्षिं नोदयामासुः प्रतिवक्तुं प्रेरयामासुः । सोऽङ्गिरा भूधरं हिमवन्तं प्रत्युवाच ॥

उपपन्नमिदं सर्वमतः परमपि त्वयि ।
मनसः शिखराणां च सदृशी ते समुन्नतिः ॥ ६६ ॥

उपपन्नमिति ॥ इदम् "एते वयममी दाराः" (६ । ६३) इत्याद्युक्तं सर्वमतः परमतोऽधिकमपि त्वय्युपपन्नं युज्यते । तथाहि । ते मनसः शिखराणां च समुन्नतिः सदृशी । शिखराणीव मनो महोन्नतमित्यर्थः । किं नाम दुष्करमुन्नतचित्तानामिति भावः ॥ प्रस्तुताप्रस्तुतयोर्मनःशिखरयोरौपम्यस्य गम्यत्वाद्दीपकालंकारः ॥

स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथाहि ते ।

गामधास्यत्कथं नागो मृणालमृदुभिः फणैः ।
आ रसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥ ६८ ॥

गामिति ॥ नागः शेषादिर्मृणालमृदुभिर्बिसकोमलैः फणैर्गां भुवं कथमधास-रयेत् । त्वमा रसातलमूलात्पातालपर्यन्तम् ॥ विकल्पादसमासः ॥ नावालम्बिष्य-थेत्पादैर्नावलम्बेथा यदि । त्वदवलम्बनादेव भुजगराजोऽपि भुवं बिभर्तीत्य-ः ॥ अत्र क्रियातिपत्त्यभावाल्लृङ्प्रयोगश्चिन्त्यः ॥

अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः ।
पुनन्ति लोकान्पुण्यत्वात्कीर्तयः सरितश्च ते ॥ ६९ ॥

अच्छिन्नेति ॥ अच्छिन्ना अविच्छिन्ना अमलाश्च संतानाः प्रबन्धाः प्रवाहाश्च या-नां तास्तथोक्ताः समुद्रोर्मिभिरनिवारिताः । पारगमनादन्तःप्रवेशाच्चेति भावः । ते तव कीर्तयः सरितश्च गङ्गादयः पुण्यत्वात्पवित्रत्वाल्लोकान्पुनन्ति पावयन्ति । लोकपा-वनाः खलु पुण्यश्लोका इति भावः ॥ केवलप्रकृतविषयस्तुल्ययोगितालंकारः ॥

यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया ॥ ७० ॥

यथेति ॥ गङ्गा भागीरथी । प्रभवत्यस्मादिति प्रभवस्तेन कारणेन परमे ति-ष्ठतीति परमेष्ठिनो विष्णोः ॥ परमे किल्मसयः । "तत्पुरुषे कृति बहुलम्" इ-त्यलुक् । "–परमेर्वादिभ्यमिभ्यः स्थः" इति षत्वम् ॥ पादेन चरणेन यथैव श्ला-घ्यते प्रशस्यते तथैव द्वितीयेन प्रभवेणोच्छिरसा त्वया श्लाघ्यते । हरिचरणवत्तीर्थ-स्यापि तीर्थभूतस्त्वमिति भावः ॥

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ।
त्रिविक्रमोद्यतस्यासीत्स तु स्वाभाविकस्तव ॥ ७१ ॥

तिर्यगिति ॥ तिर्यगूर्ध्वमधस्ताच्च व्यापकः । सर्वव्यापीत्यर्थः । महिमा महत्त्वं हरेर्विष्णोस्त्रिषु विक्रमेषूद्यतस्य सत आसीत् । त्रिविक्रमोद्यतस्यासि कदाचिदेव । न तु सर्वदेत्यर्थः । तव तु व्यापको महिमा स्वाभाविकः । नित्यसिद्ध इत्यर्थः ॥

यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया ।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥ ७२ ॥

यज्ञेति ॥ यज्ञभागभुजामिन्द्रादीनां मध्ये पदमातस्थुषा निहितवता न्ययोर्ध-

---

१ सर्गैः. २ निवारिताः. ३ गोदम्. ४ प्रभावेन. ५ च. ६ तथा.

तं हिरण्यस्य विकारो हिरण्मयम् ॥ "दाण्डिनायनहास्तिनायन-" इत्यादिना
त्साधु ॥ सुमेरोः शृङ्गं शिखरम् । प्राधान्यं तु ध्वन्यते ॥ "शृङ्गं प्राधान्य
थ" इत्यमरः ॥ वितथीकृतं व्यर्थीकृतम् । तस्य गन्धभागाभावादिति भावः ।
स्य तु तत्सद्भावे प्रमाणम्—"हिमवतो हस्ती" इति श्रुतिः ॥

काठिण्यं स्थावरे काये भवता सर्वमर्पितम् ।
इदं तु ते भक्तिनम्रं सतामाराधनं वपुः ॥ ७३ ॥

काठिन्यमिति ॥ भवता सर्वं काठिन्यम् । अनम्रतामित्यर्थः । स्थावरे स्थिरे
काये । शिलामय इत्यर्थः । अर्पितं न्यस्तम् । सतामर्हतामाराधनं पूजासाधनं त
इदं वपुस्तु । जंगममित्यर्थः । भक्तिनम्रम् । काठिन्यलेशोऽप्यत्र नास्त्यन्यथा न
म्रतासंभवादित्यर्थः । तथा चासाधारण्यं ध्वन्यते ॥

तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ॥ ७४ ॥

तदिति ॥ तत्तस्मान्नोऽस्माकमागमनस्य कार्यं प्रयोजनं शृणु । तत्कार्यं च त
वैव । न त्वस्माकमित्यवधारणार्थ एवकारः । वयं तु श्रेयसामुपदेशादत्र कार्येऽश
भागिनः । स्मेवात्र फलभाग्वयमुपदेष्टार इति भावः ॥

कार्यमेवाह—

अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः ॥ ७५ ॥

अणिमेति ॥ यः शंभुरणिमादिगुणोपेतमणिमादिभिरष्टभिर्गुणैर्वाच्यभूतैरुपे
म् । अष्टैश्वर्यवाचकमित्यर्थः । अतएवास्पृष्टं पुरुषान्तरं येन तं तथोक्तं पुरुषा
न्तरस्यानभिधायकम् । तस्यैवैवंगुणत्वादित्यर्थः । उच्चैः परममीश्वर इति शब्द
म् । निरुपपदेश्वरशब्दमित्यर्थः । सार्धचन्द्रमर्धचन्द्रयुक्तम् । अर्धचन्द्रं चेत्यर्थः । बिभर्ति ॥

कलितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ७६ ॥

कलितेति ॥ येन शंभुना कलितं धृतिसंग्रहादिस्वस्वगुणसंपादितमन्योन्यस
मर्थ्यं परस्परसहकारत्वं यैस्तथोक्तैः । स्वस्वरूपसामर्थ्यमन्योन्याधेयमेवेति भाव
पृथिव्यादिभिरात्मभिः । अष्टाभिर्मूर्तिभिरित्यर्थः । इदं व्यक्तं विश्वं धुरं वहन्तीति
धुर्यैरश्वैः ॥ "धुरो यड्ढकौ" इति यत्प्रत्ययः ॥ अध्वनि यानं रथ इव ध्रियते ॥

१ अर्हतामाराधनम्. २ यथा; यत. ३ तथा. ४ च. ५ अपि. ६ भाजिनः. ७ गुणोत्थानम्.
१० धार्यते.

योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥ ७७ ॥

योगिन इति ॥ योगिनोऽध्यात्मवेदिनः क्षेत्राभ्यन्तरवर्तिनं शरीरान्तश्चरं सर्वभूतान्तर्यामिनम् । परमात्मस्वरूपिणमित्यर्थः ॥ "क्षेत्रं पत्नीशरीरयोः" इत्यमरः ॥ यं शंभुं विचिन्वन्ति मृगयन्ते । मनीषिणो विद्वांसो यस्य शंभोः पदं स्थानमविद्यमानमावृत्तेः पुनः संसारापत्तेर्भयं यत्र तत्तथाभूतमाहुः ॥

स ते दुहितरं साक्षात्साक्षी विश्वस्य कर्मणाम् ।
वृणुते वरदः शंभुरस्मत्संक्रामितैः पदैः ॥ ७८ ॥

स इति ॥ विश्वस्य जगतः कर्मणां साक्षी द्रष्टा ॥ "साक्षाद्द्रष्टरि संज्ञायाम्" इतीनिप्रत्ययः ॥ वरानिष्टान्ददातीति वरदः ॥ "आतोऽनुपसर्गे कः" ॥ इति कप्रत्ययः ॥ स पूर्वोक्तः शंभुरस्मत्संक्रामितैः पदैरस्मासु निवेशितैर्वाक्यैस्ते दुहितरं साक्षाद्वृणुते । अस्मन्मुखेन स्वयमेव याचत इत्यर्थः ॥

तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥ ७९ ॥

तमिति ॥ तं शंभुं भारत्या वाचार्थमभिधेयमिव सुतया दुहित्रा योक्तुं संघटयितुमर्हसि ॥ अत्र वागर्थयोरुपमानत्वसामर्थ्याच्छिवयोर्नित्ययोगो विवक्षित इत्युक्तम् "वागर्थाविव संपृक्तौ" (रघुवंशे १ । १) इत्यत्रापि ॥ तथाहि । सद्भर्त्रे प्रतिपादिता दत्ता कन्या पितुरशोच्या ॥

गुणान्तरमप्याह—

यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥ ८० ॥

यावन्तीति ॥ स्थावराणि चराणि च यावन्त्येतानि भूतानि । सन्तीति शेषः । सर्वाणि भूतानीत्यर्थः । एनां ते दुहितरं मातरं कल्पयन्तु । हि यस्मादीशो जगतः पिता । पितृदारेषु मातृभावो न्याय्य इति भावः ॥

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥ ८१ ॥

प्रणम्येति ॥ विबुधा देवाः शितिकण्ठाय शिवाय प्रणम्य तदनन्तरं नीलकण्ठप्रणामानन्तरमस्याश्चरणौ चूडामणिमरीचिभी रञ्जयन्तु । ईश्वरपरिग्रहादीशितृदेवतावन्द्या भवत्वित्यर्थः ॥

---

१ संक्रान्तैः. २ सद्भर्त्रे. ३ इत्याह.

उमा वधूर्भवान्दाता याचितार इमे वयम् ।
वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥ ८२ ॥

उमेति ॥ उमा वधूः । भवान्दाता । इमे वयं याचितारः प्रार्थकाः । शंभुर्वरो वोढा । एष विधिरेषा सामग्री त्वत्कुलस्योद्भूतय उच्छ्रायायालं पर्याप्तं हि ॥ "नमःस्वस्तिस्वाहास्वधा–" इत्यादिना चतुर्थी ॥

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुतासंबन्धविधिना भव विश्वगुरोर्गुरुः ॥ ८३ ॥

अस्तोतुरिति ॥ स्वयमन्यस्तोता न भवतीत्यस्तोतुः किंतु स्तूयमानस्य सर्वस्तुत्यस्य वन्द्यस्य जगद्वन्द्यस्य स्वयमन्यं न वन्दत इत्यनन्यवन्दिनो विश्वगुरोर्हरस्य सुतासंबन्धविधिना यौनसंबन्धाचरणेन गुरुर्भव । यो नान्यं स्तौति न वन्दते तस्यापि त्वं स्तुत्यो वन्द्यश्चेत्यहो तव भाग्यवत्तेत्यर्थः ॥

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ ८४ ॥

एवमिति ॥ देवर्षावङ्गिरस्येवं वादिनि सति पार्वती पितुः पार्श्वेऽधोमुखी सती । लज्जयेति शेषः । लीलाकमलपत्राणि गणयामास संचख्यौ । लज्जावशात्कमलदलगणनाव्याजेन हर्षं जुगोपेत्यर्थः ॥ अनेनावहित्थाख्यः संचारी भाव उक्तः । तदुक्तम्—"अवहित्था तु लज्जादेर्हर्षाद्याकारगोपनम्" इति ॥

शैलः संपूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ॥ ८५ ॥

शैल इति ॥ शैलो हिमवान्संपूर्णकामोऽपि । दातुं कृतनिश्चयोऽपीत्यर्थः । मेनामुखमुदैक्षत । उचितोत्तरजिज्ञासयेति भावः । तथाहि । प्रायेण कुटुम्बिनो गृहस्थाः कन्यार्थेषु कन्याप्रयोजनेषु गृहिण्येव नेत्रं कार्यज्ञानकारणं येषां ते तथोक्ताः । कलत्रप्रधानवृत्तय इत्यर्थः ॥

मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ॥ ८६ ॥

मेन इति ॥ मेनापि पत्युर्हिमवतस्तत्सर्वमभीप्सितं कार्यं मेनेऽङ्गीचकार । तथाहि । पतिरेव व्रतं यासां ता भर्तुरिष्टेऽभीप्सिते न विद्यते व्यभिचारो यासां ता अव्यभिचारिण्यो भवन्ति । भर्तृचित्तानुवर्तिन्यो भवन्तीति भावः ॥

---

१ कन्यार्थे हि. २ यथः. ३ मनोरिप्सन.

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालंकृतां सुताम् ॥ ८७ ॥

इदमिति ॥ स हिमवान्वचसामन्ते मुनिवाक्यावसानेऽत्र मुनिवाक्य इदमुत्त-रश्लोके वक्ष्यमाणं दानमेव न्याय्यं न्यायादनपेतमुत्तरमिति बुद्ध्या चित्तेन विमृश्य विचिन्त्य मङ्गलं यथा तथालंकृतां मङ्गलालंकृतां सुतामाददे हस्ताभ्यां जग्राह ॥

एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥ ८८ ॥

एहीति ॥ हे वत्से पुत्रि । एह्यागच्छ । त्वं विश्वात्मने शिवाय भिक्षा परिक-ल्पितासि निश्चितासि । "रत्नादिस्तम्भपर्यन्तं सर्वं भिक्षा तपस्विनः" इति वच-नादिति भावः । अर्थिनो याचितारो मुनयः । मया गृहमेधिनो गृहस्थस्य फलं प्राप्तम् । इह परत्र च तारकत्वात्पात्रे कन्यादानं गार्हस्थ्यस्य फलमित्यर्थः ॥

एतावदुक्त्वा तनयामृषीनाह महीधरः ।
इयं नमति वः सर्वांस्त्रिलोचनवधूरिति ॥ ८९ ॥

एतावदिति ॥ महीधरो हिमवांस्तनयामेतावत्पूर्वोक्तवाक्यमुक्त्वार्षीनाह—कि-मिति । इयं त्रिलोचनवधूस्त्र्यम्बकपत्नी वः सर्वान्नमतीति । त्रिलोचनवधूरिति सिद्धवदभिधानेनाविमर्शितपूर्वं दानमिति सूचयति ॥

ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम् ॥ ९० ॥

ईप्सितार्थेति ॥ ते मुनयः । ईप्सितार्थक्रिययेष्टार्थकरणेनोदारं महत् ॥ "उ-दारो दातृमहतोः" इत्यमरः ॥ गिरेर्हिमवतो वचो वचनमभिनन्द्य श्लाघित्वा सं-स्तुत्याम्बिकामम्बाम् । पच्यत इति पाकः फलम् । पुरःपाकाभिः पुरस्कृतफला-भिराशीर्भिराशीर्वादैरेधयामासुः संवर्धयामासुः ॥

तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम् ।
अङ्कमारोपयामास लज्जमानामरुन्धती ॥ ९१ ॥

तामिति ॥ प्रणामादरेण नमस्कारासक्तया स्रस्ते जाम्बूनदे सुवर्णविकारे अवतंसके कर्णकुण्डले यस्यास्तां लज्जमानां शालीनतामरुन्धत्यङ्कमारोपयामास ॥ "स्त्रः शेऽवतंसकम्स्यात्" इति यादवः ॥

---

१ हर्षेण. २ [illegible]

तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् ।
वरस्यानन्यपूर्वस्य विशोकामकरोद्गुणैः ॥ ९२ ॥

तदिति ॥ दुहितृस्नेहेन पुत्रिकाप्रेम्णा विक्लवां वियोक्ष्यत इति भीताम् । अत एवाश्रूणि मुखे यस्यास्तामश्रुमुखीं तस्या अम्बिकाया मातरं तन्मातरं मेनां च । अन्या पूर्वं यस्यास्ति सोऽन्यपूर्वः ॥ "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति पूर्वपदस्य पुंवद्भावः ॥ स न भवतीत्यनन्यपूर्वस्तस्यानन्यपूर्वस्य । सापत्न्यदुःखमङ्केत इत्यर्थः । वरस्य वोढुर्गुणैर्मृत्युंजयत्वादिभिर्विशोकां निर्दुःखामकरोत् ॥

वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना ।
ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः ॥ ९३ ॥

वैवाहिकीमिति॥ चीरपरिग्रहा वल्कलमात्रवसनास्ते तपस्विनस्तत्क्षणं तस्मिन्नेव क्षणे हरबन्धुना हिमवता वैवाहिकीं विवाहयोग्यां तिथिं पृष्टाः केरप्यनुयुक्ताः सन्तः । त्रयाणामह्नां समाहारस्त्र्यहः ॥ "तद्धितार्थोत्तरपदसमाहारे च" इति समासः । "राजाहःसखिभ्यष्टच्" इति टच्प्रत्ययः । द्विगुत्वादेकवचनम् । "रात्राह्नाहाः पुंसि" इति पुंलिङ्गता ॥ तस्मात्त्र्यहादूर्ध्वमुपर्याख्याय चतुर्थेऽहनि विवाह इत्युक्त्वा चेरुश्चलिताः ॥

ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ ९४ ॥

त इति ॥ ते मुनयो हिमालयमामन्त्र्य साधु यामेत्यापृच्छ्य पुनः शूलिनं हरं संकेतस्थानस्थं प्राप्य सिद्धं निष्पन्नमर्थं प्रयोजनमस्मै निवेद्य च ज्ञापयित्वा च तद्विसृष्टास्तेन शूलिना विसृष्टाः खमाकाशं प्रत्युद्ययुरुत्पेतुः ॥ अत्र संक्षिप्तार्थाभिधानात्संक्षेपो नाम गुण उक्तः । तदुक्तम्—"संक्षिप्तार्थाभिधानं यत्संक्षेपः परिकीर्तितः" इति ॥

भगवान्पशुपतिस्त्र्यहमात्रविलम्बमपि सोढुं न शशाक तदौत्सुक्यादित्याह—

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥९५

पशुपतिरिति ॥ उत्कं मनो यस्य स उत्कः ॥ "उत्क उन्मनाः" इति निपातः ॥ अद्रिसुतासमागमोत्कः पार्वतीपरिणयोत्सुकः पशुपतिरपि तानि । त्रीणीति शेषः। अहानि कृच्छ्रादगमयद्यापयत्। कविराह—अमी भावा औत्सुक्यादयः

. . . . . ३ मेदय. ४ तस्मै.

संचारिणोऽवशमिन्द्रियपरतन्त्रमपरं पृथग्जनं कं न विमकुर्युर्न विकारं नयेयुः । यद्यस्मात्प्रभुं समर्थम् । जितेन्द्रियमपि यावत् । तं स्मरहरमपि स्पृशन्ति । विकुर्वन्तीत्यर्थः ॥ अत्र विभुविकारसमर्थनादर्थादितरजनविकारः कैमुतिकन्यायादापततीत्यर्थापत्तिरलंकारः । तथा च सूत्रम्—"दण्डापूपिकयार्थान्तरपतनमर्थापत्तिः" इति ॥ अर्थान्तरन्यास इति केचित्तदुपेक्षणीयम् । युक्तिस्तु विस्तरभयान्नोच्यते ॥ पुष्पिताग्रावृत्तम्—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्य उमाप्रदानो नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान्सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥ १ ॥

अथेति ॥ अथ त्र्यहानन्तरं हिमवानोषधीनामधिपस्य चन्द्रस्य वृद्धौ । शुक्लपक्ष इत्यर्थः । शुभकर्मस्वापूर्यमाणपक्षस्य प्राशस्त्यात् । तिथौ च जामित्रं लग्नात्सप्तमं स्थानं तस्य गुणः शुद्धिः सा च ग्रहराहित्यं तेनान्वितायां सत्याम् । यद्यपि जामित्रशुद्धिर्लग्नधर्मस्तथापि तद्द्वारा तिथेरपि तथा व्यपदेशो न दोषः । समेतबन्धुर्युक्तबन्धुः सन् । सुताया दुहितुर्विवाहदीक्षा विवाहसंस्कारः सैव विधिः कर्म तमन्वतिष्ठदकृतवान् ॥

वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरंध्रिवर्गम् ।
आसीत्पुरं सानुमतोऽनुरागादन्तःपुरं चैककुल्योपमेयम् ॥ २ ॥

वैवाहिकैरिति ॥ अनुरागात्प्रीतिविशेषात् । गृहे गृहे प्रतिगृहम् ॥ वीप्सायां द्विर्भावः ॥ विवाहः प्रयोजनमेषामिति वैवाहिकानि तैः ॥ "प्रयोजनम्" इति ठञ् ॥ कौतुकसंविधानैर्मङ्गलार्थसंपादनैर्व्यग्रा व्यापृताः पुरंध्रिवर्गाः कुटुम्बिनीसंघा यस्मिंस्तत्तथोक्तं सानुमतोऽद्रेः पुरं सान्तोपचितमन्तःपुरकुटुम्बगौरवं चैककुल्येनैकगृहेणोपमेयमासीत् ॥ "सजातीयगणे गोत्रे गृहेऽपि कथितं कुलम्" इति विश्वः ॥ सर्वत्रापि स्वगृह एवेदं शोभनं कर्मेत्यभिमानोऽस्त्रीजनस्येत्यर्थः । एतेन हिमाद्रेः महानुराग उक्तः । अत्र सर्गे उपजातिवृत्तम् ॥

संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरं स्वर्ग इवावभासे ॥३॥

संतानकेति ॥ संतानकैर्मन्दारकुसुमैराकीर्णा आस्तृता महापथा राजवीथयो यस्मिंस्तत्तथोक्तम् । चीनांशुकैः पट्टवस्त्रैः कल्पिता रचिताः केतुमाला ध्वजपङ्क्तयो यस्य तत्तथोक्तम् । काञ्चनतोरणानां भासा प्रभया उज्ज्वलत्प्रकाशमानं तत्पुरं स्थानान्तरं मेरोरन्यत्र स्थितः स्वर्ग इवावभासे ॥ उत्प्रेक्षालंकारः ॥

एकैव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ॥ ४ ॥

एकैवेति ॥ पुत्राश्च दुहितरश्च पुत्राः ॥ "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" इत्येकशेषः ॥ "पुत्रौ पुत्रश्च दुहिता च" इत्यमरः ॥ तेषां पङ्क्तौ संघे सत्यामप्युमैकैव चिरस्य दृष्टेव चिरादुपलब्धेव मृतोत्थितेव मृत्वा पुनरुत्थितेवासन्नपाणिग्रहणासन्नविवाहेति । भर्तृगृहं गमिष्यतीति हेतोरित्यर्थः । पित्रोर्मातापित्रोः ॥ "पिता मात्रा" इत्येकशेषः ॥ विशेषेणोच्छ्वसितं प्राणभूता बभूव । पुत्रपत्यादपि अधिकप्रेमास्पदमभूदित्यर्थः ॥

अङ्काद्ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त ।
संबन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम ॥५॥

अङ्कादिति ॥ सा पार्वत्युदीरिताशीः प्रयुक्ताशीर्वादा सत्यङ्कादङ्कमुत्सङ्गं ययौ । मण्डनान्मण्डनान्तरमन्यन्मण्डनमन्वभुङ्क्त । तदा सर्वे बन्धवः प्रत्येकमेव तामङ्कमारोप्य मण्डनं प्रायच्छन्नित्यर्थः ॥ तच्च स्नेहनिबन्धनमेवेत्याह— संबन्धिभिन्नः स्वपुत्रादिभिर्भिन्नो विभक्तोऽपि गिरेः कुलस्य वंशस्य स्नेहस्तदेकायतनं सैवैकमायतनं स्थानं तज्जगाम । तदिति छेदेऽप्ययमेवार्थः ॥ विधेयप्राधान्यान्नपुंसकत्वमिति । बन्धवः स्वापत्येभ्योऽपि तस्यामधिकं स्निह्यन्तीति तात्पर्यार्थः ॥

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः ॥६॥

मैत्र इति ॥ अथ मैत्रे मित्रदैवत्ये मुहूर्ते । उदयमुहूर्तात्तृतीयमुहूर्त इत्यर्थः । आर्द्रः सार्द्रस्तथा मैत्रः शुभो वासव एव च" इति बृहस्पतिस्मरणात् । उत्तरफल्गुनीषु फल्गुनीनक्षत्रे ॥ "फल्गुनीप्रोष्ठपदानां च नक्षत्रे" इत्येकस्मिन्नपि बहुवचनम् ॥ शशलाञ्छनेन चन्द्रेण योगं गतासु सतीषु तस्याः पार्वत्याः शरीरे

१ [illegible] २ भासा ज्वलत्. ३ स्थानान्तरस्वर्गः. ४ चिरेण. ५ उपोढपाणि.

बन्धुस्त्रियः प्रतिकर्म प्रसाधनम् ॥ "प्रतिकर्म प्रसाधनम्" इत्यमरः ॥ चक्रुः । कीदृश्यः । याः पतिपुत्रवत्यः । जीवद्भर्तृका जीवदपत्याश्चेत्यर्थः ॥

प्रतिकर्मप्रकारमेव प्रपञ्चयति—

सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम् ।
निर्नाभि कौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलंचकार ॥ ७ ॥

सेति ॥ सा गौरी गौरसिद्धार्थनिवेशवद्भिः श्वेतसर्षपप्रक्षेपवद्भिर्दूर्वाप्रवालैर्दूर्वाङ्कुरैः प्रतिभिन्नशोभं विशेषितशोभं निर्नाभ्यतिक्रान्तनाभि कौशेयं वस्त्रविशेषो यस्मिंस्तत्तथोक्तम् ॥ "कौशेयं कृमिकोशोत्थम्" इत्यमरः ॥ उपात्तबाणं गृहीतशरम् ॥ "शरः क्षत्रियया ग्राह्यः" इति मनुस्मरणात् ॥ अभ्यङ्गनेपथ्यमभ्यङ्गवेषमलंचकार । अलंकारमप्यलंचकारेत्यर्थः ॥

बभौ च संपर्कमुपेत्य बाला नवेन दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने संधुक्ष्यमाणेव शशाङ्करेखा ॥ ८ ॥

बभाविति ॥ किंचेति चार्थः ॥ बाला नवेन दीक्षाविधौ विवाहकृत्ये यः सायकस्तेन संपर्कमुपेत्य बहुलावसाने कृष्णपक्षात्यये । शुक्लपक्षादावित्यर्थः । भानोः करेण किरणेन संधुक्ष्यमाणोपचीयमाना । "सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम् । क्षपयन्ति" इत्यादिवचनात् । शशाङ्करेखेव बभौ ॥

तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ॥ ९ ॥

तामिति ॥ लोध्रकल्केन लोध्रचूर्णेन हृतमङ्गतैलं यस्यास्ताम् । कृतोद्वर्तनामित्यर्थः । आश्यानमीषच्छुष्कं तेन कालेयेन गन्धद्रव्येण कृताङ्गरागाम् । कृतलेपनामित्यर्थः ॥ "अथ जायकम् । कालेयकं च कालानुसार्यं च" इत्यमरः ॥ अभिषेकयोग्यं वासो वस्त्रं वसानां स्नानशाटीमाच्छादयन्तीं तां पार्वतीं नार्यश्चतुष्कं चतुःस्तम्भगृहं तदभिमुखं व्यनैषुः । स्नानगृहं निन्युरित्यर्थः ॥

विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः ॥ १० ॥

विन्यस्तेति ॥ विन्यस्तं वैदूर्यशिलामयं [illegible] यस्मिंस्तस्मिन्नाबद्धानां मुक्ताफलानां भक्तिभी रचनाभिश्चित्रे [illegible] पार्वतीमष्टापदानां [illegible] कुम्भानां [illegible] तोयैः सतूर्यं तूर्यघोषपूर्वं

1 [illegible]. 2 [illegible]. 3 [illegible]. 4 [illegible]. 5 [illegible].

था तथा स्नपयांबभूवुः । अष्टसु लोहेषु पदं प्रतिष्ठा यस्येत्यष्टापदम् ॥ "अष्टनः ञायाम्" इति दीर्घः ॥ "अष्टापदं स्वात्कनकम्" इति विश्वः ॥

सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥

सेति ॥ मङ्गलार्थस्नानेन विशुद्धगात्री निर्मलाङ्गी पत्युर्वरस्योद्गमनीयवस्त्रं तवस्त्रम् ॥ "धौतमुद्गमनीयं स्यात्" इति हलायुधः । "तत्स्यादुद्गमनीयं यद्धौ- पोर्वस्त्रयोर्युगम्" इत्यमरः ॥ युगग्रहणं तु प्रायिकाभिप्रायम् । अतएवात्र क्षीर- ामी—"युगं प्रायशो यल्लक्ष्यं तदेव" इति व्याख्याय "गृहीतपत्युद्गमनीय- स्त्रा" इत्येतदेवोदाहृतवान् ॥ गृहीतं पतिं प्रत्युद्गमनीयवस्त्रं यया सा । धौतवस्त्र- च्छादितवतीत्यर्थः । सा पार्वती निर्वृत्तो निष्पन्नः पर्जन्यस्य जलेनाभिषेको स्याः सा तथोक्ता । प्रफुल्लतीति प्रफुल्लं काशं काशपुष्पं यस्याः सा तथोक्ता सुधेव रेजे शुशुभे ॥

तस्मात्प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम् ॥१२॥

तस्मादिति ॥ किंचेति चार्थः । तस्मात्प्रदेशात्स्नानप्रदेशाद्वितानवन्तमुल्लोचयु- क्तम् ॥ "अस्त्री वितानमुल्लोचः" इत्यमरः ॥ मणिस्तम्भचतुष्टयेन युक्तं क्लृप्तं स- ज्जमानमासनं यस्मिंस्तं कौतुकवेदिमध्यं पतिव्रताभिः परिगृह्य दोर्भ्यामालिङ्ग्य निन्ये नीता । प्रसाधनार्थमित्यर्थः ॥

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरोनिषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः ॥१३॥

तामिति ॥ नार्यः प्रसाधिकास्तां तन्वीं पार्वतीं तत्र वेदिमध्ये प्राङ्मुखीं नि- वेश्योपवेश्य पुरोनिषण्णा अग्रे स्थिताः । प्रसाध्यतेऽनेनेति प्रसाधनेऽलंकारसाध- नवर्गे संनिहितेऽपि भूतार्था सत्यरूपा । स्वाभाविकीति यावत् । या शोभा राम- णीकं तया ह्रियमाणान्याकृष्यमाणानि नेत्राणि यासां तास्तथोक्ताः क्षणं व्यल- म्बन्त । स्वभावसुन्दर्याः किमस्याः प्रसाधनेनेति तूष्णीं तस्थुरित्यर्थः ॥

धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् ।
पर्याक्षिपत्काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना ॥१४॥

धूपेति ॥ काचित्प्रसाधिका धूपोष्मणा करणेनार्द्रभावमार्द्रत्वं त्याजितम् ॥

---

१ गृहीतोद्गमनीय- २ निवृत्त- ३ प्रतिगृह्य- ४ धूपेन समार्जितम्-

अभिमताः । चकाशे रेजे । अत्र लताकुसुमादीनां सहजसंबन्धिनामुपमानत्वेनोपादानादाहार्यकमपि तस्याः सहजमिवाशोभतेति भावः ॥

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥ २२ ॥

आत्मानमिति ॥ किंचेति चार्थः । गौरी शोभमानमात्मानं निजशरीरमादर्शबिम्बे दर्पणमण्डले ॥ "दर्पणे मुकुरादर्शौ" इत्यमरः ॥ स्तिमितायताक्ष्यादराद्विश्रलायतलोचना सत्यालोक्य हरोपयाने हरप्राप्तौ त्वरिता व्यग्रा बभूव । स्त्रीणां वेषो नेपथ्यं प्रियस्य भर्तुरालोको दर्शनं फलं प्रयोजनं यस्य स तथोक्तो हि । अन्यथारण्यचन्द्रिका स्यादिति भावः । अनेन कालाक्षमत्वलक्षणमौत्सुक्यमुक्तमित्यनुसंधेयम् ॥

अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च ।
कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य ॥ २३ ॥

अथेति ॥ अथ प्रसाधनान्तरं माता मेनका माङ्गल्यं मङ्गलार्थमार्द्रं द्रवं हरितालं वर्णद्रव्यविशेषं मनःशिलां धातुविशेषं चाङ्गुलिभ्यां तर्जनीमध्यमाभ्यामादाय कर्णयोरवसक्ते लग्ने अमले दन्तपत्रे यस्य तत्तथोक्तं तस्याः पार्वत्या इदं तदीयं मुखमुन्नमय्य । "विवाहदीक्षातिलकं चकार" (७ । २४) इत्युत्तरश्लोकेनान्वयः ॥

उमास्तनोद्भेदमनु प्रवृद्धो मनोरथो यः प्रथमं बभूव ।
तमेव मेना दुहितुः कथंचिद्विवाहदीक्षातिलकं चकार ॥ २४ ॥

उमेति ॥ उमायाः स्तनोद्भेदमनु । स्तनोदयमारभ्येत्यर्थः । प्रवृद्धो वृद्धिं गतः । भार्गवीरत्नस्य इति भावः । यो मनोरथो वाञ्छा ॥ "वाञ्छा लिप्सा मनोरथः" इत्यमरः ॥ प्रथमं मनोरथान्तरात्प्राक् । अयमेव प्रथमो मनोरथ इत्यर्थः । बभूव । मेना दुहितुस्तमेव मनोरथभूतमेव ॥ तद्विषये तत्त्वोपचारः ॥ विवाहदीक्षायां विवाहकृत्ये तिलकं कथंचित्कृच्छ्रेण चकार । आनन्दबाष्पान्धत्वेति शेषः । विवाहानन्तभावित्वादन्येषामयमेव प्रथमो मनोरथ इति भावः ॥ युग्मकम् ॥

बबन्ध चास्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसंनिवेशम् ।
धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम् ॥ २५ ॥

बबन्धेति ॥ अस्याः पार्वत्या अस्रैरानन्दबाष्पैराकुलदृष्टिरतएव स्थानान्तरे कल्पितः संनिवेशो निक्षेपो यस्य तत् । स्वस्थानादन्यत्र स्थापितमित्यर्थः । अत-

1 अङ्गुलीभ्याम्. 2 मदस्य.

विभक्तः सुश्लिष्टः किंचिदीषन्मधूच्छिष्टेन सिक्थकेन विमृष्टो विशेषे
रागो यस्य स तथोक्तः ॥ " मधूच्छिष्टं तु सिक्थकम् " इति " वि
मृष्टम् " इति चामरः ॥ अन्यत्रोक्तम्—" अलौहित्यापगमायाधरे
क्रियते " ॥ आसन्नं संनिहितं लावण्यफलं सौन्दर्यप्रयोजनं मुखचुम
स तथोक्तोऽधरोष्ठः स्फुरितैर्भाविशुभशंसिभिः स्पन्दैः काममत्यन्त
शोभामपुष्यत्पुपोष ॥ " अभिख्या नामशोभयोः " इत्यमरः ॥

पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहास
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं ज

पत्युरिति ॥ सख्या ॥ कर्त्र्या ॥ चरणौ रञ्जयित्वा लाक्षार
कृताशीरिति करोतिना समानकर्तृकत्वम् ॥ अनेन चरणेन ॥ रञ्जि
यमाचरणावित्युक्ताप्यौचित्यात्ताडनविधावेकतरपरामर्श इत्याहुः ।
शिरश्चन्द्रकलाम् । सुरतविशेष इति शेषः । स्पृश ताडयेति परिहा
प्रयुक्ताशीर्वादा सा पार्वती तां सखीं माल्येन मालया ॥ " माल्यं
इत्यमरः ॥ निर्वचनं यथा तथा । तूष्णीमित्यर्थः । जघान ताडयामा
मित्यनेन विहृताख्यः शृङ्गारानुभाव उक्तः । तदुक्तम्—" प्राप्तक
रतुर्यादा विहृतं हि तत् " इति ॥

तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने नि
न चक्षुषोः कान्तिविशेषबुद्ध्या कालाञ्जनं मङ्गलमित्य

तस्या इति ॥ प्रसाधिकाभिरलंकर्त्रीभिः सुजाते सम्यगुत्पन्ने
कान्ते रम्ये तस्या नयने निरीक्ष्य कालाञ्जनमञ्जनविशेषश्चक्षुषोः क
द्ध्या । शोभातिशयो भविष्यतीति बुद्ध्येत्यर्थः । नोपात्तं न गृहीतं कि
भमिति हेतोरुपात्तम् । निसर्गसुभगस्य किमाहार्यकाडम्बरेणेति भाव

सा संभवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रि
सरिद्विहंगैरिव लीयमानैरामुच्यमानाभरणा चकासे

सेति ॥ आमुच्यमानाभरणा निबध्यमानाभरणा सा गौरी संभ
नैः कुसुमैर्लतेव । अनेन पद्मरागेन्द्रनीलादीन्याभरणानि सूचितानि
नानावर्णत्वात् । उद्यद्भिरुदयं गच्छद्भिर्ज्योतिर्भिरुडुभिस्त्रियामा रात्रि

इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा ।
सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः ॥ २९ ॥

इच्छेति ॥ कृती कुशलः । सभायां साधुः सभ्यः ॥ "सभाया यः" इति यप्रत्ययः ॥ अद्रिर्हिमवानिच्छाविभूत्योरुत्साहैश्वर्ययोरनुरूपं सदृशं यथा तथा तस्याः पार्वत्याः कृत्यं कर्तव्यमशेषयित्वा शेषं निःशेषं कृत्वा । समाप्येत्यर्थः ॥ अशेषशब्दात्तत्करोतीति ण्यन्तात्क्त्वाप्रत्ययः ॥ सुहृदास्थितायां बन्धुजनाक्रान्तायां सभायां संसदि वृषाङ्कस्य हरस्यागमनं प्रतीक्षत इति तथोक्तः सन् ॥ "कर्मण्यण्" इत्यण् ॥ तस्थौ स्थितः ॥

तावद्वरस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम् ।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्पुरशासनस्य ॥ ३० ॥

तावदिति ॥ तावत् । यावद्गौरीप्रसाधनं क्रियते तत्काल एवेत्यर्थः । कुबेरशैले कैलासे । तदेव पूर्वं तत्पूर्वं तच्च तत्पाणिग्रहणं तस्यानुरूपं प्रसाधनमलंकारसामग्री । आदृताभिः सादराभिः ॥ कर्तरि क्तः ॥ मातृभिर्ब्राह्मीप्रभृतिभिः सप्तमातृकाभिः । पुरं शास्तीति पुरशासनस्तस्य पुरशासनस्य ॥ कर्तरि ल्युट् ॥ वरस्यापि पुरस्तादग्रे न्यस्तं निक्षिप्तम् ॥

तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण ।
स एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे ॥ ३१ ॥

तदिति ॥ ईश्वरेण शिवेन सा मङ्गलमण्डनश्रीः शुभप्रसाधनसंपत्तद्गौरवात्तासु मातृष्वादरात्केवलं पस्पृशे । स्पृष्टैव न तु दध्रे इत्यवधारणार्थः केवलशब्दः ॥ "केवलं चावधारणे" इति शाश्वतः ॥ किंतु तस्य विभोर्हरस्य स एव वेषः स्वाभाविको भस्मकपालादिवेष एव परिणेतुर्वोढुरिष्टं समपेक्षितं भावान्तरं रूपान्तरं प्रपेदे । अङ्गरागादिरूपतां प्रापेत्यर्थः ॥

भावान्तरापत्तिमेवाह—

बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रीः ।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः ॥ ३२ ॥

बभूवेति ॥ भस्मैव सिताङ्गरागः शुभ्रगन्धानुलेपनं बभूव । कपालमेवामलं शेखरं शिरोभूषणं तस्य श्रीः शोभा बभूव । गजाजिनस्यैवोपान्तभागेषु प्रान्तदेशेषु रोचनाङ्को रोचनाचिह्नं यस्य स तथोक्तो दुकूलभावः क्षौमवस्त्रत्वं च बभूव । भस्मादिरेवाङ्गरागादिभावं प्राप्त इत्यर्थः ॥

[illegible]

एव धान्य उपमातुरङ्गुलीभिः प्रतिसार्यमाणं स्वस्थानं प्राप्यमाणमूर्णामयं मेषादिलोमनिर्मितम् ॥ "ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः ॥ कौतुकहस्तसूत्रं मङ्गलहस्तसूत्रम् ॥ "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः ॥ बबन्ध च । मेनेति शेषः ॥ पूर्वोक्ततिलकक्रियासमुच्चयार्थश्चकारः ॥

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा ।
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना ॥२६॥

क्षीरोदेति ॥ नवं नूतनं क्षौमं दुकूलं निवस्त आच्छादयतीति नवक्षौमनिवासिनी ॥ वस्तेराच्छादनार्थाण्णिनिः ॥ तथा नवं दर्पणमादधाना बिभ्रती सा गौरी सफेनपुञ्जा सडिण्डिरपङ्क्तिः । क्षीरमुदकं यस्य स क्षीरोदः क्षीरसमुद्रः ॥ "उदकस्योदः संज्ञायाम्" इत्युदादेशः ॥ तस्य वेला तीरभूमिरिव ॥ "वेला काले च जलधेस्तीरनीरविकारयोः" इति विश्वः ॥ पर्याप्तचन्द्रा पूर्णचन्द्रा शरत्त्रियामा शरद्रात्रिरिव भूयो भूयिष्ठं बभौ चकासे ॥

तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता ।
अकारयत्कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम् ॥ २७॥

तामिति ॥ कारयितव्येषु दक्षा कारयित्री । कर्मोपदेशकुशलेत्यर्थः । माता मेना । प्रतितिष्ठत्यस्यामिति प्रतिष्ठा ॥ "आतश्चोपसर्गे" इति कः । स्त्रियां टाप् ॥ कुलस्य प्रतिष्ठां कुलालम्बनभूताम् । स्थितिकारिणीमित्यर्थः । तां गौरीम् । अर्चिताभ्यः पूजिताभ्यः कुलदेवताभ्यो गृहदेवताभ्यः प्रणमय्य प्रणामं कारयित्वा ॥ "ल्यपि लघुपूर्वात्" इति णेरयादेशः ॥ सतीनां पतिव्रतानां पादग्रहणं पादाभिवन्दनं क्रमेणाकारयत्कारयामास ॥ "हृक्रोरन्यतरस्याम्" इत्यणिकर्तुः कर्मत्वम् । अन्यत्र च नमेरकर्मकत्वात् "गतिबुद्धि—" इत्यादिना ॥

अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरभाजा पश्चात्कृताः स्निग्धजनाशिषोऽपि ॥२८॥

अखण्डितमिति ॥ नम्रा प्रणतोमा ताभिः सतीभिः पत्युः शिवस्याखण्डितमभग्नं प्रेम लभस्व प्राप्नुहीत्युच्यते स्म अभिहिता ॥ "लट् स्मे" इति भूतार्थे लट् ॥ तस्य हरस्य । अर्धं शरीरस्यार्धशरीरम् ॥ "अर्धं नपुंसकम्" इति समासः ॥ तदर्धशरीरभाजा तया गौर्या तु स्निग्धजनाशिषो बन्धुजनाशीर्वादा अपि पश्चात्कृता अधःकृताः । ततोऽप्यधिकफललाभादिति भावः ॥

गौरी

स इति ॥ स देवो नन्दिभुजावलम्बी नन्दिकेश्वरभुजावलम्बनः सन् । शार्दूलचर्मणा व्याघ्रचर्मणान्तरितमाच्छादितमुरु विशालं पृष्ठं यस्य तं तथोक्तम् ॥ "शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः ॥ तस्मिन्देवे भक्त्या संक्षिप्तं संकोचितं बृहत्प्रमाणं यस्य तं गोपतिं वृषभं कैलासमिवारुह्य प्रतस्थे चचाल ॥

तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः।
मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरीक्षम् ॥३८॥

तमिति ॥ तं देवमनुव्रजन्त्योऽनुगच्छन्त्यः स्ववाहनानां क्षोभेण प्रकम्पेण चलावतंसाश्चलत्कुण्डला मातरः सप्तमातृकाः प्रभामण्डलान्येव रेणवः परागास्तैर्गौरैररुणैः ॥ "गौरोऽरुणे सिते पीते" इति यादवः ॥ मुखैरन्तरीक्षमाकाशं पद्माकरमिव चक्रुः ॥

तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे।
बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव ॥ ३९ ॥

तासामिति ॥ कनकप्रभाणां सुवर्णवर्णानां तासां मातॄणां पश्चात्कपालाभरणा । सितकपालालंकारेत्यर्थः । काली महाकाली देवी च । कृष्णवर्णत्वसूचनाय कालीसंज्ञयाभिधानम् । बलाकिनी बलाकावती ॥ व्रीह्यादित्वादिनिः ॥ दूरं यथा तथा पुरोऽग्रे क्षिप्ताः प्रसारिताः शतह्रदा विद्युतो यस्याः सा तथोक्ता नीलपयोदराजी कालमेघपङ्क्तिरिव चकासे ॥

ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ॥ ४० ॥

तत इति ॥ ततोऽनन्तरं शूलभृतः शिवस्य पुरो गच्छन्तीति पुरोगैरग्रेसरैः ॥ "अन्यत्रापि दृश्यत इति वक्तव्यम्" इति गमेर्डप्रत्ययः ॥ गणैः प्रमथैरुदीरित उत्पादितो मङ्गलतूर्यघोषो मङ्गलवाद्यध्वनिर्विमानशृङ्गाण्यवगाहमानः सन् । सुरेभ्यो विमानस्थेभ्यः सेवावसरं शशंस । सुराः प्रस्थानतूर्यध्वनिमाकर्ण्यायमेव नः सेवावसर इत्याजग्मुरित्यर्थः ॥

सुराणां सेवाप्रकारमेवाह—

उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ॥ ४१ ॥

उपाददे इति ॥ तस्य हरस्य सहस्ररश्मिः सूर्यस्त्वष्ट्रा विश्वकर्मणा निर्मितं

१ आसीत्. २ पद्माकरोपमम्. ३ अन्तरिक्षम्. ४ शोभे. ५ तदन्तहतिं प्रयातम्.

शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम् ।
सांनिध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः ॥३३॥

शङ्खेति ॥ शङ्खान्तरे ललाटास्थिमध्ये द्योतत इति तथोक्तम् ॥ "शङ्खो निधौ ललाटास्थ्नि" इत्यमरः ॥ अन्तर्निविष्टा मध्यगतामला पिङ्गा तारा कनीनिका यस्य तत्तथोक्तम् ॥ "ताराक्ष्णः कनीनिका" इत्यमरः ॥ यद्विलोचनं तद्विलोचनमेव हरितालमय्या वर्णद्रव्यविशेषविकारस्य तिलकक्रियायास्तिलकरचनायाः संनिधिरेव सांनिध्यं तदेव पक्षः साध्यम् ॥ "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः ॥ तस्मिन्सांनिध्यपक्षे जातम् । प्रविष्टमित्यर्थः । अनेन ललाटलोचनमेव तस्य हरितालतिलकमभूदित्युक्तम् ॥

यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ॥ ३४ ॥

यथेति ॥ यथाप्रदेशं प्रदेशान्प्रकोष्ठादीननतिक्रम्याभरणान्तरत्वं कङ्कणाद्याभरणविशेषत्वं करिष्यतां संपादयिष्यतां भुजगेश्वराणां शरीरमात्रं शरीरमेव विकृतिं रूपान्तरं प्रपेदे । फणरत्नशोभास्तथैव तस्थुः । तासां तथैवोपादेयत्वादिति भावः ॥

दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य ॥३५॥

दिवापीति ॥ दिवा दिनेऽपि निष्ठ्यूता उद्गीर्णा मरीचिभासः किरणकान्तयो यस्य तेन बाल्यादल्पतनुत्वादनाविष्कृतलाञ्छनेन । अदृश्यमानकलङ्केनेत्यर्थः । चन्द्रेण नित्यं सर्वदा प्रतिभिन्नमौलेः संगतमुकुटस्य हरस्य चूडामणेर्ग्रहणं स्वीकारः किं किमर्थम् । चन्द्रचूडामणेर्देवस्य किमन्यैश्चूडामणिभिरिति भावः ॥

इत्यद्भुतैकप्रभवः प्रभावात्प्रसिद्धनेपथ्यविधेर्विधाता ।
आत्मानमासन्नगणोपनीते खड्गे निपक्तप्रतिमं ददर्श ॥३६॥

इत्थमिति ॥ इत्थं प्रभावात्सामर्थ्यात्संसिद्धस्य नेपथ्यविधेर्वेषरचनाविधानस्य विधाता निर्माता । अद्भुतानामाश्चर्याणामेकप्रभवो मुख्यनिधिः स देव आसन्नगणेन पार्श्वचरेण । समीपगणेनेत्यर्थः । उपनीत आनीते खड्गे निपक्तप्रतिमं संक्रान्तप्रतिबिम्बमात्मानं ददर्श । वीरभूषणत्वादेव आचारः ॥

स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे ॥ ३७ ॥

[illegible]

तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः ॥४५॥

तमिति ॥ पुरुहूतमुख्या इन्द्रादयो लोकपालाः श्रीलक्षणानामैश्वर्यचिह्नानां छत्रचामरवाहनानामुत्सर्गेण त्यागेन विनीतवेषा अनुनीतवेषाः सन्तः। तथा दृष्टिप्रदाने दर्शननिमित्ते। दर्शनप्रदानार्थमित्यर्थः। कृता नन्दिनः प्रतीहारस्य संज्ञा संकेतो यैस्तादृशाः। मम दर्शनं दापयेति नन्दिनं प्रति कृतहस्तादिसूचना इत्यर्थः॥ "संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना" इत्यमरः॥ तद्दर्शितास्तेन नन्दिना दर्शिता अयमिन्द्रः प्रणमत्ययं चन्द्र इत्याद्युक्तिपूर्वकं निवेदिताः प्राञ्जलयः कृताञ्जलयः सन्तः। तं भवं प्रणेमुः प्रणताः॥

कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन।
आलोकमात्रेण सुरानशेषान्संभावयामास यथाप्रधानम् ॥४६॥

कम्पेनेति ॥ स देवः शतपत्रयोनिं चतुर्मुखं मूर्ध्नः कम्पेन तथा हरिं वाचा संभाषणेन वृत्रं हतवन्तं वृत्रहणमिन्द्रम् ॥ "ब्रह्मभ्रूणवृत्रेषु क्विप्" इति क्विप् ॥ स्मितेन मन्दहासेनाशेषान्सुरानालोकमात्रेण दृष्टिमात्रेणेत्थं यथाप्रधानं यथार्हं संभावयामास ॥

तस्मै जयाशीः ससृजे पुरस्तात्सप्तर्षिभिस्तान्स्मितपूर्वमाह।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति ॥ ४७ ॥

तस्मा इति ॥ तस्मै शिवाय सप्तर्षिभिः ॥ "दिक्संख्ये संज्ञायाम्" इति समासः ॥ पुरस्तादग्रे जयेत्याशीः ससृजे प्रयुक्ता। तान्सप्तर्षीन्स्मितपूर्वमाह—किमिति। वितते विस्तृतेऽत्र प्रवर्तिते विवाह एव यज्ञस्तस्मिन्यूयं मया पूर्वमेव वृताः प्रार्थिता अध्वर्यवो ऋत्विज इति ॥ विशेषवाचिना सामान्यमुक्तम् ॥

विश्वावसुप्राग्रहरैः प्रवीणैः संगीयमानत्रिपुरावदानः।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार ताराधिपखण्डधारी ॥४८॥

विश्वावस्विति ॥ विश्वावसुर्नाम कश्चिद्गन्धर्वो देवगायकः स प्राग्रहरः श्रेष्ठो येषां तैः प्रवीणैः प्रकृष्टवीणैर्निपुणैर्वा ॥ "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः ॥ त्रयाणां पुराणां समाहारस्त्रिपुरम् ॥ "तद्धितार्थोत्तरपद—" इत्यादिना समाहारसमासः ॥ "पात्रादिभ्यः प्रतिषेधो वक्तव्यः" इति स्त्रीत्वप्रतिषेधः ॥ त्रिपुरस्य संबन्ध्यवदानं पूर्ववृत्तं कर्म त्रिपुरवधरूपं त्रिपुरावदानं संगीयमानं गीयमानं यस्य स तथोक्तः ॥ "अवदानं कर्म वृत्तम्" इत्यमरः ॥ ध्वान्तं तमः। [illegible]

नवमातपत्रमुपादद । धृतवानित्यर्थः । उत्प्रेक्षते—तद्दुकूलात्तस्यातपत्रस्य प्रान्तलम्बिनो दुकूलादविदूरमौलिः । तद्दुकूलस्यासन्नमौलिरित्यर्थः । स हर उत्तमाङ्गे शिरसि ॥ "उत्तमाङ्गं शिरः शीर्षम्" इत्यमरः ॥ पतन्ती गङ्गा यस्य स पतद्गङ्ग इव बभौ ॥ तद्दुकूलादित्यत्र "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" इति दूरार्थयोगे विकल्पेन पञ्चमी ॥ नाथेनोक्तम् "अन्यारात्—" इत्यत्राराच्छब्दस्यार्थग्रहणार्थत्वात्पञ्चमीति तदनाकरम् । किंचास्य शास्त्रोक्तविकल्पापवादत्वात् "दूरं ग्रामस्य" इत्यादिषष्ठीप्रयोगो दूरापास्तः स्यादित्युपेक्षणीयमेव ॥

मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।
समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे ॥ ४२ ॥

मूर्ते इति ॥ गङ्गा च यमुना च गङ्गायमुने मूर्ते विग्रहधारिण्यौ सचामरे चामरसहिते सत्यौ । अतएव समुद्रगा नदी तस्या रूपं स्वरूपं तस्य विपर्ययेऽप्यभावेऽपि । सह हंसपातेन हंससंचारेण वर्तेते इति सहंसपाते इव ॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः । "वोपसर्जनस्य" इति सभावः ॥ लक्ष्यमाणे दृश्यमाने सत्यौ तदानीं विवाहसमये देवमसेविषातामभजताम् ॥ सेवतेर्लुङ् ॥ गङ्गायमुने चामरग्राहिण्यौ देवमुपतस्थतुरित्यर्थः ॥

तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम् ॥ ४३ ॥

तमिति ॥ प्रथम आद्यो विधाता चतुर्मुखस्तथा श्रीवत्सलक्ष्मा श्रीवत्साङ्कः पुरुषो विष्णुश्च साक्षात्तं देवमभ्यगच्छत्संमुखमाययौ । किं कुर्वन्तौ । जयेति वाचा जयशब्देनास्येश्वरस्य महिमानं महत्त्वं हविषा वह्निमिव संवर्धयन्तौ वृद्धिं गमयन्तौ ॥

न चानुचितमेतदुक्तमित्याह—

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ ॥ ४४ ॥

एकैवेति ॥ एकैव मूर्तिस्त्रिधा ब्रह्मविष्णुशिवात्मकत्वेन बिभिदे । औपाधिकोऽयं भेदो न वास्तविक इत्यर्थः । अतएवैषां त्रयाणां प्रथमावरयोर्भावः प्रथमावरत्वं ज्येष्ठकनिष्ठभावः सामान्यं साधारणम् । इच्छया सर्वे ज्येष्ठा भवन्तीत्यर्थः । एतदेव विवृणोति—कदाचिद्धरो विष्णोराद्यः । कदाचिद्धरस्याद्यः । कदाचिद्वेधास्तयोर्हरिहरयोराद्यः । कदाचित्तौ हरिहरावपि धातुः सकाशात्पूर्वौ । एवमेतेषां पौर्वापर्यमनियतमिति दर्शितम् ॥

---

१ [illegible]. २ एव. ३ अग्नौ. ४ हरौ.

वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ ॥ ५३ ॥

वर्गाविति ॥ दूरविसर्पी दूरगामी घोषो ययोस्तौ देवाश्च महीधराश्च तेषां देवमहीधराणामुभौ वर्गावुद्घटितापिधानेऽपनीतकवाटे पुरस्य द्वारे भिन्नो दीर्ण एकसेतु याभ्यां तौ भिन्नैकसेतू पयसामोघौ प्रवाहाविव समीयतुः संगतौ ॥

ह्रीमानभूद्भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद॥५४॥

ह्रीमानिति ॥ भूमिधरो हिमवान् । त्रयो लोकास्त्रैलोक्यम् ॥ चातुर्वर्ण्यादित्वात्ष्यञ्प्रत्ययः ॥ तस्य वन्द्येन नमस्कार्येण कृतप्रणामः सन् ॥ "ऋत्विक्पितृव्यश्वशुरमातुलानां यवीयसाम् । प्रवयाः प्रथमं कुर्यात्प्रत्युत्थायाभिवादनम्" इति स्मरणात् ॥ ह्रीमानभूत् । महादेवं प्रति स्वयमल्पत्वात्संकोचं प्रापेत्यर्थः ॥ ननु विदितेश्वरमहिम्नः स्वयं प्रागेव प्रणतस्य जामातुराचारमात्रस्वीकारे कः संकोच इति शङ्कां निरस्यति—पूर्वमिति ॥ हि यस्मात्स हिमवान्पूर्वं प्रागेव तस्येश्वरस्य महिम्ना सामर्थ्येन दूरमत्यन्तमावर्जितं नमितमात्मशिरो न विवेद । सत्यं स्वयं प्रणतत्वानुसंधानेन संकोचः । तदनुसंधानं त्विदानीमुत्पन्नं प्रागासीदिति भावः ॥

स प्रीतियोगाद्विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य ।
प्रावेशयन्मन्दिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पम् ॥ ५५ ॥

स इति ॥ प्रीतियोगात्संतोषसंबन्धाद्विकसन्मुखश्रीर्विकसन्ती मुखश्रीर्यस्य स तथोक्तः स हिमवान् । जायां मिमीते जानातीति जामाता तस्य ॥ पृषोदरादित्वात्साधु ॥ "जामाता दुहितुः पतिः" इत्यमरः ॥ अग्रेसरतां पुरोगामित्वमुपेत्यैनं देवमागुल्फं पादग्रन्थिपर्यन्तं कीर्णानि पर्यस्तान्यापणमार्गेषु पण्यवीथिकासु पुष्पाणि यस्मिंस्तदागुल्फकीर्णापणमार्गपुष्पम् ॥ "तद्ग्रन्थी घुटिके गुल्फौ" इत्यमरः ॥ ऋद्धं समृद्धं मन्दिरं नगरम् ॥ "मन्दिरं नगरेऽगारे मन्दिरो मकरालये" इति विश्वः ॥ प्रावेशयत् ॥

तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि ५६

तस्मिन्निति ॥ तस्मिन्मुहूर्ते हरपुरप्रवेशसमये ईशानस्य संदर्शने लालसानां लोलुपानाम् ॥ "लोलुपो लोलुभो लोलो लालसो लम्पटश्च सः" इति यादवः॥

१ हरात् । २ मात्स.

इति यावत् । तद्विकारेण रागादिना लङ्घ्योऽभिभवनीयो न भवतीत्यध्वान्तविकारलङ्घ्यः । विवाहादिकं तु तस्य लीलेत्यर्थः । ताराधिपखण्डधारी चन्द्रशेखरः शंभुरध्वानं मार्गं ततारातरत् अगच्छत् ॥

खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिंकिणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन्मुहुः प्रोतघने विषाणे ॥४९॥

ख इति ॥ खे आकाशे खेलं सुन्दरं गच्छतीति खेलगामी । सशब्दाः शब्दायमानाश्चामीकरकिंकिण्यः काञ्चनक्षुद्रघण्टिका यस्य स तथोक्तः ॥ "किंकिणी क्षुद्रघण्टिकाः" इत्यमरः ॥ "नद्यृतश्च" इति कप् ॥ वाह्यतेऽनेनेति वाहो वृषभः ॥ करणे घञ् ॥ प्रोतघने स्यूतमेघे अतएव तटाभिघाताद्रोधोभेदाल्लग्नपङ्के श्लिष्टकर्दम इव स्थिते विषाणे शृङ्गे मुहुर्धुन्वंस्तं हरमुवाह वहति स्म ॥

स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः ॥ ५० ॥

स इति ॥ स वाहोऽप्राप्तः पराभियोगः शत्रुसमाक्रान्तिर्यस्य तत्तथोक्तं नगेन्द्रेण हिमवता गुप्तं रक्षितं नगरमोषधिप्रस्थं पुरोऽग्रे विलग्नैः संक्रान्तैर्हरदृष्टिपातैः सुवर्णसूत्रैः कृष्यमाण इव मुहूर्तात्प्रापत् । अन्यथा कथं दूरस्याशुप्राप्तिः स्यादिति भावः । पुरः प्रसृता हरदृष्टयः पिङ्गलवर्णत्वात्सौवर्णानि वृषाकर्षणदामानीवालक्ष्यन्तेत्यर्थः ॥

तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः ।
स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः ॥ ५१ ॥

तस्येति ॥ तस्य पुरस्योपकण्ठेऽन्तिके घनो मेघ इव नीलः कण्ठो यस्य स घननीलकण्ठो देवः कुतूहलाद्दर्शनौत्सुक्यादुन्मुखैः पौरैर्दृष्टः सन् । स्वबाणचिह्नात्त्रिपुरविजयसमये स्वबाणाङ्कान्मार्गात्कुतश्चिदाकाशदेशादवतीर्यावरुह्यासन्नभूपृष्ठं निकटभूतलमियाय प्राप ॥

तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती ।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥ ५२ ॥

तमिति ॥ आगमनेन शिवागमनेन प्रतीतो हृष्टो गिरिचक्रवर्ती पर्वताधिराजो हिमवानृद्धिमता वस्त्रालंकारादिसमृद्धेन बन्धुजनेनाधिरूढैः । अनेन बन्धूनां समप्राप्यं सूचितम् । गजानां वृन्दैः प्रफुल्ला विकसितकुसुमा वृक्षा येषु तैः स्वैः स्वकीयैः कटकैर्नितम्बैरिव तं हरं प्रत्युज्जगामाभिययौ ॥ "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः ॥

---

1 कृष्यमानम्. 2 स्वपादवाहात्. 3 वाहान्.

न्यौ स्त्रीणां जघनवाससि" इति विश्वः ॥ न बबन्ध नावधात् । किंतु नाभिं प्रविष्टाभरणानां कङ्कणानां प्रभा यस्य तेन । प्रभैव नाभेरावरणमभूदिति भावः । हस्तेन वासोऽवलम्ब्य धृत्वा तस्थौ ॥

अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद्रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥ ६१ ॥

अर्धाचितेति ॥ सत्वरं सवेगमुत्थितायाः कस्याश्चिदर्धमाचिता मणिभिर्गुम्फितार्धाचिता दुर्निमिते संभ्रमाद्दुःखेन निक्षिप्ते॥ "डुमिञ् प्रक्षेपणे" इति धातोः कर्मणि क्तः ॥ पदे पदे प्रतिपदम् ॥ वीप्सायां द्विर्भावः ॥ गलन्ती गलद्रत्ना सती रसना मेखला तदानीं तस्मिन्नवसरेऽङ्गुष्ठमूलेऽर्पितं लगितं सूत्रमेव शेषो यस्याः सासीत् ॥

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥ ६२ ॥

तासामिति ॥ तदानीं सान्द्रकुतूहलानां तासां स्त्रीणामासवगन्धो गर्भो येषां तैः । विलोलानि नेत्राण्येव भ्रमरा येषु तैर्मुखैर्व्याप्तान्तराश्छन्नावकाशा गवाक्षाः सहस्रपत्राभरणा इवासन् । कमलालंकृता एव स्थिता इत्यर्थः ॥

तावत्पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे ।
प्रासादशृङ्गाणि दिवापि कुर्वञ्ज्योत्स्नाभिषेकद्विगुणद्युतीनि ॥ ६३ ॥

तावदिति ॥ तावत्तस्मिन्नवसरे इन्दुमौलिरीश्वरो दिवापि प्रासादशृङ्गाणि ज्योत्स्नाया अभिषेकेण स्नपनेन द्विगुणद्युतीनि द्विरावृत्तकान्तीनि ॥ "गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु" इति वैजयन्ती ॥ कुर्वन्पताकाभिराकुलं व्याप्तीर्णमुत्तोरणमुच्छ्रिततोरणं राजपथं प्रपेदे ॥

तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ ६४ ॥

तमिति ॥ एक एव दृश्यो दर्शनीयस्तमेकदृश्यं तमीश्वरं नयनैः पिबन्त्यः । अतितृष्णया पश्यन्त्य इत्यर्थः ॥ "ताः शंकरं दृष्टिभिरापिबन्त्यः" इति वा पाठः ॥ नार्यो विषयान्तराणि ततोऽन्यान्विषयान् । शब्दादीनित्यर्थः । न जग्मुः ।

१ अर्धाचिता. २ द्युतीनि.

६१-६२ श्लोकयोर्मध्येऽयं श्लोको दृश्यते—

[illegible]
[illegible]

पुरसुन्दरीणां प्रासादमालास्थितानां पश्यमानप्रकारेण गवाक्षान्तराणि विचेष्टितानि व्यापाराः ॥ "नपुंसके भावे क्तः" इति क्तः ॥ बभूवुरिति ॥

तान्येवाह षड्भिः श्लोकैः—

आलोकमार्गं सहसा प्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धुं न संभावित एव तावत्करेण रुद्धोऽपि च केशपाशः ॥५७॥

आलोकमार्गमिति ॥ आलोकमार्गं दर्शनपथम् । गवाक्षमित्यर्थः । सहसा प्रजन्त्या गच्छन्त्या कयाचिदुद्वेष्टनो द्रुतगमनवशादुन्मुक्तबन्धनोऽत एव वान्तमाल्य उद्गीर्णमाल्यश्च यः स उद्वेष्टनवान्तमाल्यः करेण रुद्धो गृहीतः । अपि च केशपाशः केशकलापः ॥ "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः ॥ तावदालोकनमार्गप्राप्तिपर्यन्तं बद्धुम् । बन्धनायेत्यर्थः । न संभावितो न स्मृत एव ॥

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरा गवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ५८ ॥

प्रसाधीति ॥ काचित्स्त्री प्रसाधिकयालंकर्त्र्यालम्बितं रञ्जनार्थं धृतं द्रवरागमेवार्द्रालक्तकमेव । अग्रश्चासौ पादश्चाग्रपादः ॥ इति समानाधिकरणसमासः ॥ "हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः ॥ तमाक्षिप्याकृष्योत्सृष्टलीलागतिस्त्यक्तमन्दगमना सत्या गवाक्षाद्गवाक्षपर्यन्तम् ॥ पदद्वयमेतत् ॥ पदवीमलक्तकाङ्कां लाक्षारसचिह्नां चकार ॥

विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥ ५९ ॥

विलोचनमिति ॥ अपरा स्त्री दक्षिणं विलोचनमञ्जनेन संभाव्यालंकृत्य तद्वञ्चितं तेनाञ्जनेन वर्जितं वामनेत्रं यस्याः सा तथोक्ता सती । तथैव तेनैव रूपेण शलाकामञ्जनकूर्चिकां वहन्ती बिभ्रती वातायनसंनिकर्षं गवाक्षसमीपं ययौ ॥ दक्षिणग्रहणं संभ्रमाद्व्युत्क्रमद्योतनार्थम् । "सव्यं हि पूर्वं मनुष्या अञ्जते" इति श्रुतेः ॥

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ ६० ॥

जालान्तरेति ॥ अन्या स्त्री जालान्तरप्रेषितदृष्टिर्गवाक्षमध्यप्रसारितदृष्टिः सती प्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं वस्त्रग्रन्थिम् ॥ "नीवी परिपणे ग्र-

१ न केशहस्तः; हि केशपाशः. २ उन्मृष्ट.

जो हिमवान् । दिष्ट्येत्यानन्देऽव्ययम् । मनोरथैः प्रार्थितमवरुद्धम् । अभिलाषविषयीकृतमित्यर्थः ॥ "प्रार्थना याच्ञावरोधयोः" इत्यभिधानात् ॥ अनेनेश्वरेण संबन्धमुपेत्यावाप्य क्षितिधारणेनोच्चमुन्नतं मूर्धानमुच्चैस्तरमुन्नततरम् ॥ उच्चैरित्यव्ययात्तरप्प्रत्ययः ॥ मूर्ध्नो द्रव्यत्वादामुप्रत्ययान्तो निपातः । "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" इत्यादिना द्रव्यप्रकर्षे तस्य विधानादिति ॥ वक्ष्यति धारयिष्यति ॥ वहतेर्लृट् ॥

इत्योषधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ॥ ६९ ॥

इतीति ॥ त्रिनेत्रस्त्र्यम्बकः ॥ त्रिनेत्रत्रिनयनशब्दयोः "क्षुभ्नादिषु च" इति णत्वाभावः ॥ इतीत्थमोषधिप्रस्थविलासिनीनां संबन्धिनीः श्रोत्रसुखाः श्रवणमधुराः कथा आलापाञ्शृण्वन्केयूरैरङ्गदैश्चूर्णीकृता लाजानां मुष्टयो यस्मिंस्तं तथोक्तम् । तथावकीर्णा आचारलाजा अन्तराल एवाङ्गदैश्चूर्णपेषं पिष्यन्त इति पुरंध्रिजनसंबन्धातिशयोक्तिः । हिमालयस्य हिमवत आलयं भवनमाससाद ॥

तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ॥७०॥

तत्रेति ॥ तत्र हिमवदालयेऽच्युतेन विष्णुना दत्तहस्तो वितीर्णहस्तावलम्बः सन् । शरद्घनाच्छरन्मेघात् । शरद्विशेषणान्मेघस्य शुभ्रत्वं गम्यते । दीधितिमान्सूर्य इवोक्ष्णो वृषादवतीर्य कमलासनेन पूर्वमग्रे क्रान्तानि प्रविष्टान्यद्रिपतेः कक्ष्यान्तराणि गेहप्रकोष्ठान्तराणि विवेश ॥ "कक्ष्या कक्षेवरत्रायां काञ्च्यां गेहे प्रकोष्ठके" इति यादवः ॥

तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन्प्रशस्तमारम्भमिवोत्तमार्थाः॥७१॥

तमिति ॥ तमीश्वरमन्वगनुपदम् ॥ अव्ययमेतत् ॥ "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्" इत्यमरः ॥ इन्द्रप्रमुखा देवाश्च सप्तर्षयः पूर्वे येषां ते सप्तर्षिपूर्वाः ॥ "न बहुव्रीहौ" इति सर्वनामसंज्ञाप्रतिषेधः ॥ परमर्षयः सनत्कुमारादयश्च ॥ "सनत्कुमारोऽप्यभूद्ब्रह्मा [illegible]" इति [illegible] ॥ गणाः [illegible] उत्तमार्थाः [illegible] प्रशस्तं श्रेष्ठम् । [illegible] । आरम्भम् [illegible] गिर्यालयं हिमवन्मन्दिरमभ्यगच्छन् । [illegible] ॥

---

१ ईशः, ईशम्. २ [illegible] ३ [illegible]. ४ [illegible].

न विदुरित्यर्थः। तथाहि। आसां नारीणां शेषेन्द्रियवृत्तिः श्रोत्रादिवृत्तिः सर्वात्मना स्वरूपकार्त्स्न्येन चक्षुः प्रविष्टेव। श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेश्चक्षुरेव प्रविश्य कौतुकात्स्वयमप्येनमुपलभन्ते किमु। अन्यथा स्वस्वविषयाधिगमः किं न स्यादिति भावः॥

अथ पौराङ्गनावचनान्याह—

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तम्।

जो हिमवान् । दिष्ट्येत्यानन्देऽव्ययम् । मनोरथैः प्रार्थितमवरुद्धम् । अभिलापविष-यीकृतमित्यर्थः ॥ "प्रार्थना याच्ञावरोधयोः" इत्यभिधानात् ॥ अनेनेश्वरेण संबन्धमुपेत्यावाप्य क्षितिधारणेनोच्चमुन्नतं मूर्धानमुच्चैस्तरमुन्नततरम् ॥ उच्चैरि-त्यव्ययात्तरप्प्रत्ययः ॥ मूर्ध्नो द्रव्यत्वादामुप्रत्ययान्तो निपातः । "किमेत्तिङव्य-यघादाम्वद्रव्यप्रकर्षे" इत्यादिना द्रव्यप्रकर्षे तस्य विधानादिति ॥ वक्ष्यति धा-रयिष्यति ॥ वहतेर्लृट् ॥

इत्यौपधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ॥ ६९ ॥

इतीति ॥ त्रिनेत्रस्त्र्यम्बकः ॥ त्रिनेत्रत्रिनयनशब्दयोः "क्षुभ्नादिषु च" इ-ति णत्वाभावः ॥ इतीत्थमोषधिप्रस्थविलासिनीनां संबन्धिनीः श्रोत्रसुखाः श्रव-णमधुराः कथा आलापाञ्शृण्वन्केयूरैरङ्गदैश्चूर्णीकृता लाजानां मुष्टयो यस्मिंस्तं त-थोक्तम् । तत्रावकीर्णा आचारलाजा अन्तराल एवाङ्गदैश्चूर्णपेषं पिष्यन्त इति । पुरंध्रिजनसंबन्धातिशयोक्तिः । हिमालयस्य हिमवत आलयं भवनमाससाद ॥

तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ॥७०॥

तत्रेति ॥ तत्र हिमवदालयेऽच्युतेन विष्णुना दत्तहस्तो वितीर्णहस्तावलम्बः स-न् । शरद्घनाच्छरन्मेघात् । शारदविशेषणान्मेघस्य शुभ्रत्वं गम्यते । दीधितिमा-न्सूर्य इवोक्ष्णो वृषादवतीर्य कमलासनेन पूर्वमग्रे क्रान्तानि प्रविष्टान्यद्रिपतेः क-क्ष्यान्तराणि गेहप्रकोष्ठान्तराणि विवेश ॥ "कक्ष्या कच्छेवरत्रायां काञ्च्यां गेहे प्रकोष्ठके" इति यादवः ॥

तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन्प्रशस्तमारम्भमिवोत्तमार्थाः॥७१॥

तमिति ॥ तमीश्वरमन्वगनुपदम् ॥ अव्ययमेतत् ॥ "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्" इत्यमरः ॥ इन्द्रप्रमुखा देवाश्च सप्तर्षयः पूर्वे येषां ते सप्तर्षिपूर्वाः ॥ "न बहुव्रीहौ" इति सर्वनामसंज्ञाप्रतिषेधः ॥ परमर्षयः सनकादिमहर्षयश्च ॥ "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति समासः ॥ गणाः प्रमथाश्चोत्तमा-[illegible] महान्तं नक्षत्रम् । अमोघमित्यर्थः । आरम्भम् इत्यारम्भ इवा-[illegible] हिमवन्मन्दिरमभ्यगच्छन् । प्राविशन्नित्यर्थः ॥

१ दूरेण; दूरात्. २ ऋषः ३ [illegible]. ४ अभ्यगच्छन्.

न विदुरित्यर्थः। तथाहि। आसां नारीणां शेषेन्द्रियवृत्तिः श्रोत्रादिप्रवृत्तिः सर्वात्मना स्वरूपकारस्न्येंन चक्षुःप्रविष्टेव। श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेश्चक्षुरेव प्रविश्य कौतुकात्स्वयमप्येनमुपलभन्ते किमु। अन्यथा स्वस्वविषयाधिगमः किं न स्यादिति भावः॥

अथ पौराङ्गनावचनान्याह—

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयापि तप्तम्।
या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुताङ्कशय्याम्

स्थान इति॥ पेलवया कोमलयाप्यपर्णया पार्वत्यैतस्मै शिवायैतदर्थम्॥"अर्थेन सह नित्यसमासः सर्वलिङ्गता च" इति विशेष्यनिघ्नत्वम्॥ दुश्चरं तपस्तप्तं स्थाने युक्तम्। कुतः। या नार्यस्येश्वरस्य दास्यं दासीत्वमपि लभेत सा कृतार्था स्यात्। या अङ्क एव शय्या तामङ्कशय्यां लभेत सा किमुत। कृतार्थेति किमु वक्तव्यमित्यर्थः॥

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्॥

परस्परेणेति॥ स्पृहणीयशोभं सर्वैराशास्यमानसौन्दर्यमिदं द्वन्द्वं मिथुनम्॥ "द्वन्द्वं रहस्य–" इति निपातः॥ परस्परेण नायोजयिष्यच्चेन्न योजयेद्यदि प्रजानां पत्युर्विधातुरस्मिन्द्वये द्वन्द्वे रूपविधाने सौन्दर्यनिर्माणे यत्नः प्रयासो विफलोऽभविष्यद्भवेत्। एतदनुरूपस्त्रीपुंसान्तराभावादिति भावः॥ "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति लृङ्॥

न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य।
व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः॥६७॥

नेति॥ आरूढरुषा प्ररूढकोपेनानेन हरेण कुसुमायुधस्य कामस्य शरीरं न दग्धं नूनं किंतु कामोऽमुं देवमुदीक्ष्य दृष्ट्वा व्रीडात्सौन्दर्येण जितोऽस्मीति लज्जया स्वयमेव संन्यस्तदेहस्त्यक्तदेह इति मन्ये। इत्युत्प्रेक्षा। न स्वयं न्यस्ताकृतेः कोपः संभवतीति भावः॥

काचित्काचिदाह—

अनेन संबन्धमुपेत्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण।
मूर्धानमालि क्षितिधारणोच्चमुच्चैस्तरं वक्ष्यति शैलराजः॥६८॥

अनेनेति॥ हे आलि सखि॥ "आलिः सखी वयस्या च" इत्यमरः॥ शैलरा-

जो हिमवान् । दिष्ट्येत्यानन्देऽव्ययम्। मनोरथैः प्रार्थितमवरुद्धम् । अभिलापविषयीकृतमित्यर्थः ॥ "प्रार्थना याच्ञावरोधयोः" इत्यभिधानात् ॥ अनेनेश्वरेण संबन्धमुपेत्यावाप्य क्षितिधारणेनोच्चमुन्नतं मूर्धानमुच्चैस्तरमुन्नततरम् ॥ उच्चैरित्यव्ययात्तरप्प्रत्ययः ॥ मूर्ध्नो द्रव्यत्वादामुप्रत्ययान्तो निपातः । "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" इत्यादिना द्रव्यप्रकर्षे तस्य विधानादिति ॥ वक्ष्यति धारयिष्यति ॥ वदतेर्लृट् ॥

इत्योषधिप्रस्थविलासिनीनां शृण्वन्कथाः श्रोत्रसुखास्त्रिनेत्रः ।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद ॥ ६९ ॥

इतीति ॥ त्रिनेत्रस्त्र्यम्बकः ॥ त्रिनेत्रत्रिनयनशब्दयोः "क्षुभ्नादिषु च" इति णत्वाभावः ॥ इतीत्थमोषधिप्रस्थविलासिनीनां संबन्धिनीः श्रोत्रसुखाः श्रवणमधुराः कथा आलापाञ्शृण्वन्केयूरैरङ्गदैश्चूर्णीकृता लाजानां मुष्टयो यस्मिंस्तं तथोक्तम् । तदवकीर्णा आचारलाजा अन्तराल एवाङ्गदैश्चूर्णीभवं पिष्यन्त इति पुरंध्रिजनसंबन्धातिशयोक्तिः । हिमालयस्य हिमवत आलयं भवनमाससाद ॥

तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश ॥७०॥

तत्रेति ॥ तत्र हिमवदालयेऽच्युतेन विष्णुना दत्तहस्तो वितीर्णहस्तावलम्बः सन् । शरद्घनाच्छरन्मेघात् । शारद्विशेषणाद्घनस्य शुभ्रत्वं गम्यते । दीधितिमान्सूर्य इवोक्ष्णो वृषादवतीर्य कमलासनेन पूर्वमग्रे क्रान्तानि अधिष्ठितान्यद्रिपतेः कक्ष्यान्तराणि गृहप्रकोष्ठान्तराणि विवेश ॥ "कक्ष्या कञ्चुकरश्नायां काञ्च्यां गेहे प्रकोष्ठके" इति यादवः ॥

तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन्प्रशस्तमारम्भमिवोत्तमार्थाः॥७१॥

तमिति ॥ गिरीशमन्वगनुगतम् ॥ अन्वयदित्यर्थः ॥ "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्" इत्यमरः ॥ इन्द्रप्रमुखा देवाश्च सप्तर्षयः पूर्वे येषां ते सप्तर्षिपूर्वाः ॥ "न बहुव्रीहौ" इति सर्वनामसंज्ञानिषेधः ॥ परमर्षयः सनकादयश्च ॥ "गणाः पारिषदाः प्रोक्ताः प्रमथाः" इति सज्जनः ॥ गणाः उत्तमार्थाः उत्कृष्टप्रयोजनाः प्रशस्तं श्लाघ्यम् । आरम्भमिवोद्योगमिव । उत्तमार्थाः इव गिर्यालयं हिमवद्भवनमभ्यगच्छन् । अभिमुखमगच्छन् ।

---

१ इति पुस्त. २ [illegible] ३ [illegible] ४ [illegible]

बहुरित्यर्थः। तथाहि। आसां नारीणां शेषेन्द्रियप्रवृत्तिः श्रोत्रादिप्रवृत्तिः सर्वात्म-
तस्तत्प्रकारत्स्न्येन चक्षुःप्रविष्टेव। श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणाशक्तेश्च-
। प्रविश्य कौतुकात्स्वयमप्येनमुपलभन्ते किमु । अन्यथा स्वस्वविषयाधिगमः
न स्यादिति भावः ॥
अथ पौराङ्गनावचनान्याह—

" लोलश्चलसतृष्णयोः " इत्यमरः ॥ विलोचनानि दृष्टयस्तत्क्षणं तस्मिन्क्षणे ह्रीय-न्त्रणां ह्रिया निमित्तेन संकोचमन्वभूवन् ॥

तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः ।
उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम् ॥७६

तस्या इति ॥ अष्टमूर्तिः शिवः । तस्मादीश्वराच्छङ्कत इति तच्छङ्किनः । त-द्भीतस्येत्यर्थः । अतएवोमातनावुमाशरीरे गूढतनोर्गुप्तशरीरस्य स्मरस्य पूर्वं प्ररोहमि-व प्रथमाङ्कुरमिव स्थितं शैलगुरूपनीतं शैलगुरुणा हिमवतोपनीतं प्रापितम् । अथवा शैलगुरुणा हिमवत्पुरोधसोपनीतं ताम्राङ्गुलिं रक्ताङ्गुलिं तस्याः पार्वत्याः करं जग्राह ॥

रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुंगवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य ॥ ७७॥

रोमोद्गम इति ॥ उमाया रोमोद्गमो रोमाञ्चः प्रादुरभूत् । पुमान्गौः पुंगवो वृषभः ॥ " गोरतद्धितलुकि " इति टच् ॥ स केतुश्चिह्नं यस्य स पुंगवकेतुः शिवः स्विन्नाङ्गुलिरासीत् । अथोत्प्रेक्षते—पाणिसमागमेन पाण्योः संस्पर्शेन ॥ कर्त्रा ॥ तयोर्वधूवरयोर्मनोभवस्य वृत्तिर्व्यापारः समं विभक्तेव । समीकृतेवेत्यर्थः ॥ सात्त्वि-कलिङ्गसाम्यादनुरागसाम्यस्य संभवात् तत्कार्यदर्शनात्पाणिसंस्पर्शकृतस्तत्समुत्प्रेक्ष्यते । ननु क-न्या तु प्रथमसंगमे स्विद्यत्करचरणा भवति पुमांस्तु रोमाञ्चितो भवतीति वात्स्याय-नेन विपरीतमुक्तमिति चेन्न दोषः । एतेभ्यस्तयोर्भावं परीक्षेतेति वाक्यशेष एभि-रिति बहुवचनेन स्वेदरोमाञ्चग्रहणस्य सकलसात्त्विकोपलक्षणत्वावगमेनानियमा-वधारणात् । अतएव रघुवंशेऽन्यथाभिधानात्सोऽक्तिविशेष इत्यलम् । रघुवंशे तु पूर्वसंजीविन्यां (७ । २२) गुप्यत्तत्परोक्षम् । सात्त्विकास्तु " स्तम्भस्वरभेदरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः " इति ॥

प्रयुक्तपाणिग्रहणं यदन्यद्वधूवरं पुष्यति कान्तिमग्र्याम् ।
सांनिध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य ॥७८

प्रयुक्तेति ॥ [illegible] पाणिग्रहणं यस्य [illegible]-वम् । वधूश्च वरश्च वधूवरम् ॥ [illegible] इदानीं सांनिध्ययोगा-[illegible] [illegible]

१ [illegible] २ [illegible] ३ [illegible]

तत्रेश्वरो विष्टरभाग्यथावत्सरत्नमर्घ्यं मधुमच्च गव्यम् ।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत्सर्वममन्त्रवर्जम् ॥७२॥

तत्रेति ॥ तत्र हिमवदालये ईश्वरो विष्टरभागासनगतः । उपविष्ट इत्यर्थः । यथावद्यथार्हम् । विधिवदित्यर्थः । सरत्नं रत्नसहितमर्घ्यं पूजार्थं जलम् । मधु क्षौद्रमस्यास्तीति मधुमत् । गवि भवं गव्यम् । दधि च । मधुपर्कमित्यर्थः ॥ "दधिमधुनी मधुपर्कः" इत्याश्वलायनगृह्यसूत्रात् ॥ नवे दुकूले चेति सर्वं नगोपनीतं हिमवदानीतमर्घ्यादिकं मन्त्रान्वर्जयित्वा मन्त्रवर्जम् ॥ ततो नञ्समासः ॥ अमन्त्रवर्जम् । मन्त्रांश्च वर्जयित्वेत्यर्थः ॥ "द्वितीयायां च" इति णमुल्प्रत्यय इत्याह न्यासकारः "अनुदात्तं पदमेकवर्जम्" इत्यत्र ॥ प्रत्यग्रहीत्स्वीकृतवान् ॥

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः ।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः ॥७३॥

दुकूलेति ॥ अथ दुकूलवासाः । दुकूलं वसान इत्यर्थः । स हरो विनीतैरुद्धतैरवरोधेषु ये दक्षास्तैरवरोधदक्षैर्वधूसमीपं निन्ये नीतः । कथमिव । स्फुटा फेनानां राजिर्यस्य स उदकमस्यास्तीत्युदन्वान्समुद्रः ॥ "उदन्वानुदधौ च" इति निपातनात्साधुः ॥ नवैरचिरोद्गितैश्चन्द्रपादैश्चन्द्रकिरणैर्वेलासमीपमिव ॥

तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुः कुमुदः कुमार्या ।
प्रसन्नचेतःसलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः ॥७४॥

तयेति ॥ आननं चन्द्र इव । इत्युपमितसमासः । प्रवृद्धाननचन्द्रस्य कान्तिर्यस्यास्तया तथोक्तया तया कुमार्या शरदा लोक इव संसृज्यमानः संगच्छमानः शिवश्चक्षूंषि कुमुदानीव तानि प्रफुल्लानि यस्य स तथोक्तः । चेतः सलिलमिव तत्प्रसन्नं यस्य स तथोक्तः । प्रसन्नचेतःसलिलोऽभूत् । शरल्लोकयोरपि यथोचितं विशेषणानि योज्यानि ॥

तयोः समापत्तिषु कातराणि किंचिद्व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि ७५

तयोरिति ॥ तयोर्वधूवरयोः समापत्तिषु यदृच्छया संगतिषु कातराणि चकितानि ॥ "अधीरे कातरे" इत्यमरः ॥ द्रष्टुमसमर्थानीति भावः । किंचिदीषद्व्यवस्थापितानि स्थिरीकृतानि पश्चात्संहृतानि निवर्तितानि चेति व्यवस्थापितसंहृतानि ॥ "पूर्वकाल–" इत्यादिना तत्पुरुषः ॥ अन्योन्यस्मिँल्लोलानि सतृष्णानि ॥

१ नगोपनीते. २ नव्यम्. ३ दक्षैः. ४ सकाशम्. ५ विवृद्ध. ६ आननशिरे मुहूर्तम्; आननशिरे मनोज्ञाम्.

वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी ।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति ॥ ८३ ॥

वधूमिति ॥ अथ वधूं द्विजः पुरोधाः प्राह । किमिति । हे वत्से । एष वह्निस्तव विवाहं प्रति । विवाहकर्मणीत्यर्थः । कर्मसाक्षी कर्मद्रष्टा । भर्त्रा शिवेन सह मुक्तविचारया निर्विचारया त्वया धर्मचर्या धर्माचरणं कार्या कर्तव्येति । अयं च प्राजापत्यविवाहो द्रष्टव्यः । यथाहाश्वलायनः—"सह धर्मं चरेदिति प्राजापत्ये" इति ॥

आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्वणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ॥८४॥

आलोचनान्तमिति ॥ भवस्य पत्न्या भवान्या ॥ "इन्द्रवरुणभवशर्वरुद्र–" इत्यादिना ङीप् । आनुगागमश्च ॥ आलोचनान्तं नेत्रान्तपर्यन्तम् ॥ "आङ् मर्यादाभिविध्योः" इत्यव्ययीभावः ॥ श्रवणे श्रोत्रे वितत्य विस्तार्य तत्पूर्वोक्तं गुरोर्याज्ञिकस्य वचनं "सह धर्मं चर" इति वाक्यं निदाघकाले ग्रीष्मकाले उल्वणतापयोत्कटसंतापया पृथिव्या प्रथममाद्यं माहेन्द्रं पार्जन्यमम्भ इव पीतम् । अत्यादरेण शुश्रावेत्यर्थः ॥

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ॥ ८५ ॥

ध्रुवेणेति ॥ प्रियं दर्शनं यस्य ॥ कर्मभूतस्य ॥ तेन प्रियदर्शनेन ध्रुवेण शाश्वतेन भर्त्रा ध्रुवस्य नक्षत्रविशेषस्य दर्शनाय ॥ "ध्रुवो भभेदे क्लीबं तु निश्चिते शाश्वते त्रिषु" इत्यमरः ॥ प्रयुज्यमाना इत्यनाभिमानि प्रेर्यमाणा ह्रीसन्नकण्ठी ह्रिया लीनस्वरा सा वधूः कथमप्याननमुन्नमय्य दृष्ट इत्युवाच ॥

इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ॥८६ ॥

इत्थमिति ॥ इत्थमनेन प्रकारेण ॥ "इदमस्थमुः" इति थमुप्रत्ययः ॥ विधिज्ञेन विवाहप्रयोगज्ञेन । शास्त्रज्ञेनेत्यर्थः । पुरोहितेन हितकारिणा प्रयुक्तपाणिग्रहणोपचारौ कृतविवाहकर्माणौ प्रजानां पितरौ मातापितरौ पद्मासनस्थाय पद्मासनोपविष्टाय पितॄणां पित्रे पितामहाय ब्रह्मणे ॥ "पितामहो पितरि वा [illegible]

---

१ [illegible]. २ भवानी. ३ [illegible]. ४ [illegible].

न्यस्य शोभालाभस्तस्य शोभा किमु वक्तव्येत्यर्थः ॥ "विवाहसमये गौरीगिरी वा वरावनुमविशेताम्" इत्यागमः ॥

प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे ।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम् ॥ ७९ ॥

प्रदक्षिणेति ॥ तन्मिथुनमुदर्चिष उन्नतज्वालस्य कृशानोः कर्मणः प्रदक्षिणप्रक्रमणात्प्रदक्षिणीकरणाच्चकासे । किमिव । मेरोरुपान्तेषु परिसरेषु वर्तमानमावर्तमानम् । मेरुं प्रदक्षिणीकुर्वदित्यर्थः । अन्योन्येन संसक्तं संगतम् । मिथुनस्यापि तद्विशेषणम् । अहश्च त्रियामा चाहस्त्रियामं रात्रिंदिवमिव ॥ समाहारे द्वन्द्वैकवद्भावः॥

तौ दंपती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ ।
स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षम् ॥ ८० ॥

ताविति ॥ स पुरस्तादेव हितं विधत्त इति पुरोधाः पुरोहितोऽन्योन्यस्य संस्पर्शेन स्पर्शसुखेन निमीलिताक्षौ तौ जाया च पतिश्च दंपती ॥ कर्मभूतौ ॥ जायाशब्दस्य दंभावो निपातितः ॥ वह्निं त्रिस्त्रिवारम् ॥ "द्वित्रिचतुर्भ्यः सुच्" इति सुच् ॥ परिणीय परितो नीत्वा । प्रदक्षिणीकार्येत्यर्थः ॥ नयतेर्द्विकर्मकात्ल्यप् । समिद्धार्चिषि दीप्तज्वाले तस्मिन्वह्नौ वधूं लाजमोक्षं लाजविसर्गं कारयामास ॥ "हृक्रोरन्यतरस्याम्" इति विकल्पादणिकर्तुः कर्मत्वम् ॥

सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद्वदनं निनाय ।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥ ८१ ॥

सेति ॥ सा वधूर्गुरोः पुरोधस उपदेशादिष्टः । घ्राणतर्पण इत्यर्थः । गन्धो यस्य तं लाजधूमाञ्जलिं वदनं निनाय । कपोलसंसर्पिणी शिखा यस्य स तथोक्तः स धूमस्तस्या गौर्या मुहूर्तकर्णोत्पलतां प्रपेदे । धूमस्य विसृमरत्वान्मुहूर्तग्रहणम् ॥

तदीषदार्द्रारुणगण्डलेखमुच्छ्वासि कालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद्बभूव ॥ ८२ ॥

तदिति ॥ तद्वधूमुखमाचारधूमग्रहणादाचारमात्रधूमत्वादीषदार्द्रे स्विन्ने अरुणे च गण्डलेखे गण्डस्थले यस्य तत्तथोक्तम् । अक्ष्णोरुच्छ्वासि उद्गच्छत्कालाञ्जनस्य रागोऽञ्जनं यस्य तत्तथोक्तम् । क्लान्तो यवावतंसो यवाङ्कुरकर्णपूरो यस्य तत्तथाभूतं बभूव ॥ "लाजाञ्जलिं विसृज्य धूमं जिघ्रेत" इति प्रयोगदर्पिकारः ॥

वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति कर्मसाक्षी ।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति ॥ ८३ ॥

वधूमिति ॥ अथ वधूं द्विजः पुरोधाः प्राह । किमिति । हे वत्से । एष वह्नि-
र्विवाहं प्रति । विवाहकर्मणीत्यर्थः । कर्मसाक्षी कर्मद्रष्टा । भर्त्रा शिवेन सह
मुक्तविचारया निर्विचारया त्वया धर्मचर्या धर्माचरणं कार्या कर्तव्येति । अयं च
प्राजापत्यविवाहो द्रष्टव्यः । यथाहाश्वलायनः—"सह धर्मं चरेदिति प्राजा-
पत्यः" इति ॥

आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या ॥ ८४ ॥

आलोचनान्तमिति ॥ भवस्य पत्न्या भवान्या ॥ "इन्द्रवरुणभवशर्वरुद्र-"
इत्यादिना ङीप् । आनुगागमश्च ॥ आलोचनान्तं नेत्रान्तपर्यन्तम् ॥ "आङ् मर्या-
दाभिविध्योः" इत्यव्ययीभावः ॥ श्रवणे श्रोत्रे वितत्य विस्तार्य तत्पूर्वोक्तं
गुरोर्ऋत्विजस्य वचनं "सह धर्मं चर" इति वाक्यं निदाघकाले ग्रीष्मकाले उ-
ल्बणतापयोत्कटसंतापया पृथिव्या प्रथममाद्यं माहेन्द्रं पार्जन्यमम्भ इव पीतम् ।
सादरेण शुश्रावेत्यर्थः ॥

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ॥ ८५ ॥

ध्रुवेणेति ॥ प्रियं दर्शनं यस्य ॥ कर्मभूतस्य ॥ तेन प्रियदर्शनेन ध्रुवेण शा-
श्वतेन भर्त्रा ध्रुवस्य नक्षत्रविशेषस्य दर्शनाय ॥ "ध्रुवो भभेदे क्लीबं तु निश्चिते
शाश्वते त्रिषु" इत्यमरः ॥ प्रयुज्यमाना इत्यनाशीनि नेर्दिश्यमाना ह्रीसन्नकण्ठी ह्रिया
निम्नया सा वधूः . . .

इत्थं विधि

जनकेऽपि च" इति विश्वः ॥ "पितृव्यमातुलमातामहपितामहाः" इति निपातनात्साधुः ॥ प्रणेमतुर्नमश्चक्रतुः । पितामहस्य, पित्रोरपि पूज्यत्वादिति भावः ॥

वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्य चिन्तास्तिमितो बभूव ॥

वधूरिति ॥ वधूः कन्या विधात्रा ब्रह्मणा । हे कल्याणि शोभने । वीराः प्रसवोऽपत्यं यस्याः सा वीरप्रसवा वीरसूर्भवेति प्रतिनन्द्यते स्म । आशिषमुक्तेत्यर्थः । स विधाता वाचस्पतिर्वागीश्वरोऽपि सन् ॥ कस्कादिषु पाठात्साधुः ॥ अष्टमूर्तौ शिवे त्वाशास्यमाकाङ्क्ष्यं तत्र चिन्ता विचारस्तस्यां स्तिमितो मन्दो बभूव । तस्य निरीहस्याशास्याभावादाशिषि स्तिमितत्वमित्यर्थः ॥

कॢप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कनकासनस्थौ ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम् ॥८८॥

कॢप्तेति ॥ तौ जायापती वधूवरौ पश्चान्नमस्कारानन्तरं कॢप्ता रचिता उपचाराः पुष्परचनादयो यस्यां तां चतुरस्रवेदीमेत्य प्राप्य कनकासनस्थौ सन्तौ लौकिकं लोके विदितम् । आचारमाप्तमित्यर्थः । अतएवैषणीयमाशास्यम् । तथाहि । "लौकिकाचारं मनसापि न लङ्घयेत्" इति शास्त्रादवश्यकर्तव्यमित्यर्थः ॥ इषेरिच्छार्थादनीयर्प्रत्ययः ॥ आर्द्राक्षतारोपणमन्वभूताम् ॥

पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम् ॥ ८९ ॥

पत्रान्तेति ॥ लक्ष्मीः श्रीदेवी पत्रान्तेषु दलप्रान्तेषु लग्नैर्जलबिन्दुजालैराकृष्टाहृता मुक्ताफलजालेन प्रान्तलम्बिना मुक्ताकलापेन या शोभा सा येन तत्तथोक्तमायतं दीर्घं नालमेव दण्डो यस्य तत्कमलमेवातपत्रं तत्तयोरुपर्याधत्त दधौ ॥

द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ॥ ९० ॥

द्विधेति ॥ अथ सरस्वती वाग्देवी द्विधा संस्कृतप्राकृतरूपेण द्वैविध्येन प्रयुक्तेनोच्चारितेन वाङ्मयेन शब्दजालेन तन्मिथुनं नुनाव तुष्टाव ॥ "णु स्तुतौ" इति धातोर्लिट् ॥ केन कथमित्याह—संस्कारेति ॥ संस्कारेण शास्त्रव्युत्पत्त्या पूतेन प्रकाशनसर्गविभागशुद्धेन । संस्कृतेनेत्यर्थः । वरेण्यं वरणीयम् । श्लाघ्यमित्यर्थः ॥

१ उभय. २ मुक्ताजाल. ३ [illegible]. ४ [illegible]. ५ [illegible].

वृणोतेरौणादिक एन्यप्रत्ययः ॥ वरं वोढारं शिवम्। सुखेन ग्राह्यं सुबोधं निबन्धनं रचना यस्य तेन वाङ्मयेन। प्राकृतभाषयेत्यर्थः। वधूम्। नुनावेत्यनेन संबन्धः॥

तौ संधिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम्।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम्॥ ९१॥

ताविति ॥ तौ दंपती संधिषु मुखादिनिर्वहणान्तेषु पञ्चसंधिषु ॥ तदुक्तं दशरूपके—"मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः" इति ॥ व्यञ्जितवृत्तिभेदं स्फुटीकृतकैशिक्यादिवृत्तिविशेषम्। रसानुगुण्येनेति शेषः॥ तदुक्तं भूपालेन—"कैशिकी स्यात्तु शृङ्गारे रसे वीरे तु सात्वती। रौद्रबीभत्सयोर्वृत्तिर्नियतारभटी पुनः। शृङ्गारादिषु भावेषु रसेष्विष्टा तु भारती"। तथा। "कैशिक्यारभटी चैव सात्वती भारती तथा। चतस्रो वृत्तयो ज्ञेयास्तासु नाट्यं प्रतिष्ठितम्" इति॥ रसान्तरेषु शृङ्गारादिरसभेदेषु ॥ "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः॥ "शृङ्गारहास्यकरुणारौद्रवीरभयानकाः। बीभत्साद्भुतशान्ताख्या रसाः पूर्वैरुदाहृताः" इति॥ प्रतिबद्धरागं प्रतिनियमेन प्रवर्तितो वसन्तललितादिरागो यस्मिंस्तम्। यस्मिन्रसे यो रागो विहितस्तदनुसारेण प्रयुक्तरागमित्यर्थः। यथाह काहलः—"रौद्रेऽद्भुते तथा वीरे पुंरागेण प्रगीयते। शृङ्गारहास्यकरुणाः स्त्रीरागेण प्रकीर्तिताः। भयानके च बीभत्से शान्ते गेयो नपुंसके" इति॥ ललिताङ्गहारं मधुराङ्गविक्षेपम् ॥ "अङ्गहारोऽङ्गविक्षेपः" इत्यमरः॥ आद्यं प्रथमाद्यम्। रूपकान्तरप्रकृतिभूतमित्यर्थः। तदुक्तम्—"आहुः प्रकरणादीनां नाटकं प्रकृतिं बुधाः" इति॥ अप्सरसामुर्वश्यादीनाम्। प्रयुज्यत इति प्रयोगो रूपकम्। नाटकमित्यर्थः। आद्यमिति विशेषणात्। तं मुहूर्तमपश्यतां दृष्टवन्तौ ॥ "पाघ्रा-ध्मास्था–" इत्यादिना दृशेः पश्यादेशः॥

देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य।
शापावसाने प्रतिपन्नमूर्तेर्ययाचिरे पञ्चशरस्य सेवाम्॥ ९२॥

देवा इति॥ देवा इन्द्रादयस्तदन्ते तस्य प्रयोगदर्शनस्यान्तेऽवसान ऊढभार्यं परिणीतदारं हरं किरीटेषु बद्धा अञ्जलयो येषां ते तथोक्ताः सन्तः। निपत्य प्रणम्य शापावसाने प्रतिपन्नमूर्तेर्लब्धशरीरस्य। "परिणेष्यति पार्वतीं यदा" (४।४२)इत्यादिना शापस्य पार्वतीपरिणयान्ततादित्यर्थः। पञ्चशरस्य कामस्य॥ कर्तुः॥ सेवां ययाचिरे। पुनः समासादितशरीरस्य तस्य सेवा स्वीक्रियतामिति प्रार्थयामासुरित्यर्थः॥ "दुह्याच्पच्–" इत्यादिना द्विकर्मकत्वम्॥

१ प्रतिलब्ध.

जनकेऽपि च" इति विश्वः ॥ "पितृव्यमातुलमातामहपितामहाः" इति निपा नात्साधुः ॥ प्रणेमतुर्नमश्चक्रतुः । पितामहस्य. पित्रोरपि पूज्यत्वादिति भावः॥

वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति।
वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्य चिन्तास्तिमितो बभूव

वधूरिति ॥ वधूः कन्या विधात्रा ब्रह्मणा । हे कल्याणि शोभने । वीरः प्र सवोऽपत्यं यस्याः सा वीरप्रसवा वीरसूर्भवेति प्रतिनन्द्यते स्म । आशिषयुक्तेत्य र्थः । स विधाता वाचस्पतिर्वागीश्वरोऽपि सन् ॥ कस्कादिषु पाठात्साधुः ॥ अ ष्टमूर्तौ शिवे त्वाशास्यमाकाङ्क्ष्यं तत्र चिन्ता विचारस्तस्यां स्तिमितो मन्दो ब भूव । तस्य निरीहस्याशास्याभावादाशिषि स्तिमितत्वमित्यर्थः ॥

क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात्कनकासनस्थौ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम् ॥८८॥

क्लृप्तेति ॥ तौ जायापती वधूवरौ पश्चान्नमस्कारानन्तरं क्लृप्ता रचिता उपचा राः पुष्परचनादयो यस्यां तां चतुरस्रवेदीमेत्य प्राप्य कनकासनस्थौ सन्तौ लौ किकं लोके विदितम् । आचारमात्रमित्यर्थः । अतएवैषणीयमाशास्यम् । तथाहि । "लौकिकाचारं मनसापि न लङ्घयेत्" इति शास्त्रादवश्यकर्तव्यमित्यर्थः ॥ इष्ये रिच्छार्थादनीयर्प्रत्ययः ॥ आर्द्राक्षतारोपणमन्वभूताम् ॥

पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम्।
तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम् ॥ ८९ ॥

पत्रान्तेति ॥ लक्ष्मीः श्रीदेवी पत्रान्तेषु दलप्रान्तेषु लग्नैर्जलबिन्दुजालैराकृ ष्टाहृता मुक्ताफलजालेन प्रान्तलम्बिना मुक्ताकलापेन या शोभा सा येन तत् थोक्तमायतं दीर्घं नालमेव दण्डो यस्य तत्कमलमेवातपत्रं तत्तयोरुपर्याधत्त दधौ॥

द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन ॥ ९० ॥

द्विधेति ॥ अथ सरस्वती वाग्देवी द्विधा संस्कृतप्राकृतरूपेण द्वैविध्येन प्रयु क्तेनोच्चारितेन वाङ्मयेन शब्दजालेन तन्मिथुनं नुनाव तुष्टाव ॥ "णु स्तुतौ" इति धातोर्लिट् ॥ केन कमित्याह—संस्कारेति ॥ संस्कारेण शास्त्रव्युत्पत्त्या पूते न प्रकृतिप्रत्ययविभागशुद्धेन । संस्कृतेनेत्यर्थः । वरेण्यं वरणीयम् । श्लाघ्यमित्यर्थः ॥

१ उभय. २ मूर्तावाशास्य. ३ एषितव्यम्. ४ वृन्दैः. ५ भक्तिशोभम.

शयनसखीभ्योऽपि शयने सहशायिनीभ्योऽपि । नर्मसहचरीभ्योऽपीत्यर्थः । कथंचित्कृच्छ्रेण दत्तवाचं दत्तोत्तरां गौरीं प्रमथा भृङ्गरीटिप्रभृतयो हास्यरसाधिदेवताः पशुपतेः पारिषदाः । यथाह भरतः—"शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः" इति ॥ "प्रमथाः स्युः पारिषदाः" इत्यमरः ॥ तेषां मुखविकारैर्मुखविकृतचेष्टितैर्गूढमप्रकाशं हासयामास । हास्याद्युपायैर्लज्जामपाकर्तुं प्रवृत्त इत्यर्थः । यथाह गोनर्दः—"हासेन मधुना नर्मवचसा लज्जितां प्रियाम् । विलुप्तलज्जां कुर्वीत निपुणैश्च सखीजनैः" इति ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये उमापरिणयो नाम सप्तमः सर्गः ।

तस्यानुमेने भगवान्विमन्युर्व्यापारमात्मन्यपि सायकानाम् ।
कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति ॥९३॥

तस्येति ॥ विमन्युर्विगतक्रोधो भगवानीश्वर आत्मन्यपि तस्य कामस्य सायकानां व्यापारमनुमेने । तथाहि । कार्यविद्भिः कार्यज्ञैः । अथवा कालविद्भिः । अवसरज्ञैः काले योग्यावसरे प्रयुक्तानुष्ठिता भर्तृषु स्वामिषु विषये विज्ञापना सिद्धिमेति खलु । सफला भवतीत्यर्थः । अयमेवास्य स्मरसेवास्वीकारो यदात्मन्यपि तत्सायकव्यापारमङ्गीकृतवानिति ॥

अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण ।
कनककलशयुक्तं भक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात् ॥ ९४ ॥

अथेति ॥ अथेन्दुमौलिरीश्वरस्तान्विबुधगणान्विसृज्य क्षितिधरपतिकन्यां पार्वतीं करेणाददानः कनककलशयुक्तं मङ्गलार्थमन्तर्निहितहेममयपूर्णकुम्भं भक्तयः पुष्पादिरचनास्तासां शोभया सनाथम् । सहितमित्यर्थः । क्षितिविरचितशय्यं क्षितौ विरचिता स्थण्डिले कल्पिता शय्या तल्पं यस्मिंस्तत्तथोक्तं कौतुकागारमागाच्छयनागृहं जगाम ॥ अत्राश्वलायनः—“ अत ऊर्ध्वमक्षारलवणाशिनावधःशायिनौ ब्रह्मचारिणौ स्याताम् ” इति । अत ऊर्ध्वं विवाहादूर्ध्वम् । आ त्रिरात्रादिति शेषः । “ त्रिरात्रं द्वादशरात्रं वा ” इति वचनात् ॥ तथा कामशास्त्रेऽपि “ अथ परिणयरात्रौ मक्रमेणैव किंचित्सिमृदु च रजनीषु स्तब्धभावा दुनोति । त्रिदिनमिह न भिन्द्याद्ब्रह्मचर्यं न चास्या हृदयमनुरुध्य स्वेच्छया नर्म कुर्यात् ” ॥

नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृताक्षेपमीशः ।
अपि शयनसखीभ्यो दत्तवाचं कथंचि-
त्प्रमथमुखविकारैर्हासयामास गूढम् ॥ ९५ ॥

नवेति ॥ तत्र कौतुकागार ईश ईश्वरो नवपरिणयेन नवोद्वाहेन या लज्जा सा भूषणं यस्यास्तामत एव तेनेश्वरेण कृताक्षेपं कृताकर्षणम् । उन्नमितमिति यावत् । वदनमपहरन्तीं साचीकुर्वन्तीम् । अयं लज्जानुभावः । अनुभावान्तरमाह—

१ काले प्रयुक्ता. २ कालविद्भिः. ३ आददानः. ४ रक्ता. ५ प्रथम.

निमित्तेन मनोहर रुचिकरमभूत्। अतिमनोहराण्यपि कामिनीवपूंषि सकामेच्छयैव याचकानि भवन्तीति भावः॥ सर्गोऽस्मिन्रथोद्धतावृत्तम्— "रान्नराविह रथोद्धता लगौ" इति लक्षणात्॥ रसश्च प्रायः संभोगशृङ्गार एव॥

इदानीं लक्षणरीत्या नवोढात्वमेव दशभिः प्रपञ्चयति—

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः॥ २॥

व्याहृतेत्यादि॥ सा पार्वती व्याहृता प्रियेण पृष्टा सती प्रतिवचः प्रत्युत्तरं न संदधे। न दत्तवतीत्यर्थः। तथावलम्बितं करेण धृतमंशुकं वस्त्रं यस्यास्तथोक्ता सती गन्तुमैच्छत्। तथा पराङ्मुखी परिवर्तितवदना सती शयनं पर्यङ्कं सेवते स्म सिषेवे। तथापि तस्यां प्रतिकूलवर्तिन्यामपि सत्यां पिनाकिनो हरस्य रतये प्रमोदाय बभूव। प्रियायाः प्रतिकूलव्यापारैरपि प्रियः प्रसन्न एवाभूदित्यर्थः। तस्य मुग्धास्वभावबोधकुशलत्वादिति भावः॥

कैतवेन शयिते कुतूहलात्पार्वती प्रति मुखं निपातितम्।
चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत्॥३॥

कैतवेनेति॥ पार्वती॥ कर्त्री॥ प्रिये हरे कुतूहलात्कैतवेन मिथ्यैव शयिते सुप्ते सति। किमियं कुर्यादित्यभिप्रायेणेति भावः। मुखं प्रियामुखं प्रति लक्ष्यीकृत्य निपातितं निक्षिप्तम्। किमयं स्वपिति जागर्ति वेत्यभिप्रायादिति भावः। चक्षुः स्वनेत्रम्॥ कर्म॥ अथ च प्रिये इत्याकाङ्क्षावशात्पुनरपि संबध्यते। तस्मिन् सस्मितं यथा स्यात्तथोन्मिषत्युन्मीलति सति विद्युताहतमिव प्रतिहतमित्युत्प्रेक्षा। न्यमीलयत्। मुद्रयति स्मेत्यर्थः॥

नाभिदेशनिहितः सकम्पया शंकरस्य रुरुधे तया करः।
तद्दुकूलमथ चाभवत्स्वयं दूरमुच्छ्वसितनीविबन्धनम्॥ ४॥

नाभिदेश इति॥ नाभिदेशे निहितः स्थापितः। नीविमोचनार्थमिति भावः। शंकरस्य करस्तया पार्वत्या सकम्पया सत्या रुरुधे प्रतिरुद्धः॥ कर्मणि लट्॥ अथ च तद्दुकूलं तस्या दुकूलं वस्त्रम्॥ कर्तृ॥ स्वयमात्मना। न तु शंकरानियोगात्। दूरमतिशयेनोच्छ्वसितमुद्भाटितं नीव्या बन्धनं यस्य तथोक्तमभवत्। [illegible] भावः॥

[illegible]

॥ श्रीः ॥

॥ कुमारसंभवम् ॥

॥ संजीविन्या समेतम् ॥

अष्टमः सर्गः ।

शिरसा शकलं शशाङ्कमूर्तेर्भासितं बिभ्रतमङ्ककेन भूरि ।
गरलं च गलेन चिन्तयामो हरमर्धाङ्गहराद्रिराजकन्यम् ॥
टीका सप्तसु मल्लिनाथकृतिना संजीविनीसंज्ञिका
या सर्गेषु कुमारसंभवमहाकाव्यस्य चक्रे पुरा ।
सैवैनर्थविशिष्टदिव्यमर्मितत्तरसर्गेषु विद्वन्मुदे
सीतारामकवीश्वरेण हि यथामज्ञं समापूर्यते ॥

नवपरिणीतगिरिजारहःकेलिमपि विवर्णयिषुस्तत्रभवान्कालिदासोऽष्टमं सर्गमारभते—

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत्कामदोहदमनोहरं वपुः ॥ १ ॥

पाणिपीडनविधेरिति ॥ पाणिपीडनं नाम षोडशविधेषु संस्कारेषु कश्चित्संस्कारविशेषः । पीडयति यस्मिन्निति पीडनम् ॥ "करणाधिकरणयोश्च" इति ल्युट् ॥ पाणेः करतलस्य पीडनं ग्रहणम् । विवाह इत्यर्थः ॥ पाणेरिति कृद्योगलक्षणा कर्मणि षष्ठी ॥ तस्य विधेर्विधानात् ॥ "विधिर्विधाने दैवे च" इत्यमरः ॥ अनन्तरं पश्चात् । भावसाध्वसयोः कामेच्छातिभययोः परिग्रहात् । परिग्रहं ग्रहणं कृत्वेत्यर्थः ॥ ल्यब्लोपे पञ्चमी ॥ मुग्धासादुये अप्यवलम्ब्येति भावः ॥ "भावः स्वभावेऽभिप्राये चेच्छासत्तात्मजन्मसु" इति विश्वः ॥ स्थितायाः इति शेषः ॥ इयं च मुग्धाभेदो नवोढा। तदुक्तं भानुमिश्रैः—"लज्जाभयपराधीनरतिर्नवोढा" इति ॥ शैलराजस्य हिमालयस्य दुहितुः कन्यायाः पार्वत्या वपुरङ्गम् । हरं शिवं प्रति। लक्षयित्वेत्यर्थः ॥ "लक्षणेत्थं–" इति प्रतेः कर्मप्रवचनीयसंज्ञा । "तद्योगे कर्मप्रवचनीययुक्ते" इति द्वितीया ॥ कामे यद्दोहदमभिलाषः । इच्छेति यावत् ॥ "अथ दोहदम् । इच्छा काङ्क्षा" इत्यमरः॥ कामविषयकोऽभिलाष इत्यर्थः । तेन

१ मुखं मनोहरम्.

भावे निष्ठा ॥ तथोक्तमपि । वधूरतं प्रियासुरतं प्रभोः प्रियस्य प्रियं प्रीतिजनकम् ॥ "इगुपध–" इति कः ॥ अभूदिति शेषः ॥

यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत् ।
यद्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत् ॥ ९ ॥

यदिति ॥ पार्वती प्रियस्य प्रियकर्तृकम् ॥ "कर्तृकर्मणोः–" इति कर्तरि षष्ठी ॥ अक्षताधरमदष्टाधरोष्ठं यन्मुखस्य ग्रहणं चुम्बनार्थं करेणादानम् । तथाव्रणपदमदर्शचिह्नं यन्नखस्य दानम् ॥ इह कर्मणः शेषत्वविवक्षायां षष्ठी । अन्यथा "नलोक–" इति तन्निषेधः प्रसज्जेत ॥ तथा सदयं स्पर्शमात्रविरामं यच्च रतम् ॥ मध्यान्तयोस्तृतीयान्तेन संबन्धः ॥ "नलोक–" इति कृद्योगलक्षणायाः षष्ठ्या बाधात् ॥ तद्विषहते स्म सोढवती ॥ "लट् स्मे" इति भूतार्थे लट् । "परिनिविभ्यः" इति षत्वम् ॥ इतरत्कठोरमुखग्रहणादि न विषहते स्मेत्यर्थः ॥

रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे ॥ १० ॥

रात्रिवृत्तमिति ॥ प्रभातसमये रात्रिवृत्तं नैशं वृत्तान्तम् ॥ "वाच्यवद्वर्तने वृत्तं चरित्रच्छन्दसोरपि" इति विश्वः ॥ अनुयोक्तुं प्रष्टुम् ॥ "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः ॥ उद्यतं सखीजनं सा पार्वती ह्रिया हेतुभूतयापकुतूहलं शमितजिज्ञासाकौतुकं नाकरोत्प्रोत्तरयांचक्र इत्यर्थः । अथ च हृदयेन मनसा तु कर्तृणा शंसितुमुत्तरं कर्तुं तत्वरे त्वरितम् ॥ भावे लिट् ॥

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया ११

दर्पण इति ॥ किं चेति चार्थः । दर्पणे परिभोगदर्शिनी संभोगचिह्नावलोकिनी सा पार्वती । पृष्ठतो निषेदुषः स्थितवतः प्रणयिनो हरस्य बिम्बं मुखमण्डलम् ॥ "बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः ॥ आत्मन उपबिम्बं बिम्बसमीपे ॥ "अव्ययं विभक्ति–" इति समीपार्थेऽव्ययीभावः ॥ प्रतिनं प्रेक्ष्य लज्जया कानि कानि चेष्टाविशेषचमत्कृतानि न चकार । अपि तु चकारैवेत्यर्थः ॥

नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् ।
भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ॥१२॥

---

१ दमनु. २ नख प. ३ दरस्र. ४ विनाश. ५ प. ६ अनुविन्दनु. ७ अंग. ८ समाश्वसीत् ।

एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत्प्रमुखवर्तिनि प्रिये ॥ ५ ॥

एवमिति ॥ सा पार्वती ॥ कर्त्री ॥ हे आलि हे सखि पार्वति । त्वया रहसि निगृहीतं सक्तं साध्वसं भयं यस्मिन्कर्मणि यथा तथा शंकरः सेव्यतामित्येवंभूतं सखीभिः कर्त्रीभिः ॥ "नलोक–" इति षष्ठीनिषेधः ॥ उपदिष्टमुपदेशम् ॥ भावे निष्ठा ॥ प्रिये प्रमुखवर्तिनि सत्याकुला संभ्रान्ता सती नास्मरत् ॥

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥ ६ ॥

अपीति ॥ पार्वत्यनङ्गशासनं प्रियं कथायां संभाषणे प्रवृत्तये । लज्जावशान्मां प्रति मौनमाश्रितायाः अस्याः संभाषणे कथमपि । प्रवृत्त्यर्थमित्यर्थः । अवस्तुन्यप्यलभ्यपदार्थेऽपि प्रश्नतत्परं परिवीक्ष्य ज्ञात्वा । हृच्चक्षुपावेक्षणमिहापेक्षितम् । वीक्षितेन प्रियसंमुखमवलोकनेन मूर्ध्नः कम्पस्तन्मयं तद्रूपम् । न हि किंचिन्मयापेक्षितमित्यभिलापव्यञ्जकमिति भावः । उत्तरं ददौ ॥

शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ॥ ७ ॥

शूलिन इति ॥ रहसि हृतांशुका । रतार्थमिति भावः । अतएव करतलयोर्द्वयेन शूलिनः प्रियस्य नयने । द्वे इति शेषः । संनिरुध्यावृत्य स्थिता सा पार्वती । तस्य ललाटलोचने तृतीये नेत्रे पश्यति सति । मोघो निष्फलो यत्नो यस्या अतएव विधुरा दुःखिता ॥ ततो विशेषणसमासः ॥ अभूत् ॥

चुम्बनेष्वधरदानवर्जितं खिन्नहस्तसदयोपगूहनम् ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ॥ ८ ॥

चुम्बनेष्विति ॥ चुम्बनेष्वधरदानेनाधरोष्ठखण्डनेन ॥ "दो अवखण्डने" । भावे ल्युट् ॥ वर्जितं रहितमपि । तथा खिन्नहस्तं मन्दप्रचारितकरम् । स्तनयोरिति शेषः ॥ गम्यमानार्थत्वादप्रयोगः ॥ "पाणिः" इति पाठे भिन्नं पदम् । तदाखिन्नपाण्यपीति योजनीयम् । सदयमगाढं यदुपगूहनमालिङ्गनं तद्यस्मिंस्तादृशमपि । अतएव क्लिष्टः परितोषाभावान्निग्रो मन्मथः कामो यस्मिंस्तथोक्तमपि । तथा दुर्लभं प्रतिकृतं प्रतीकारो यस्य । रमाभावगर्भमिति भावः ॥ प्रतिकृतमपि

१ दाखूथ. २ सदयभरोपगूहने.

प्रेम्णः परस्पराश्रयत्वमेव प्रपञ्चयति—

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकवृत्तिभाक् ॥१६॥

तमिति ॥ वधूः पार्वती । आत्मसदृशं तं वरं शिवमनु लक्षयित्वा यथा येन प्रकारेणारज्यत ॥ "रञ्ज रागे" । दैवादिकाल्लङ् ॥ वरः शिवस्तां वधूमनु तथैवारज्यत । हि यथा जाह्नवी सागरात्समुद्रादनपगानिवर्तमाना । अस्तीति शेषः । सोऽपि समुद्रोऽपि तस्या जाह्नव्या मुखसंबन्धिनि रस एकां केवलां वृत्तिं भजतीति तथोक्तः । अस्तीति शेषः ॥ उपमालंकारः ॥

शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम् ॥ १७ ॥

शिष्यतामिति ॥ निधुवनोपदेशिनः सुरतोपदेष्टुः शंकरस्य शिष्यतामुपदेश्यतां प्रपन्नया प्राप्तया तया पार्वत्या रहसि यद्युवतिषु विलासिनीषु मध्ये नैपुणं कौशलं शिक्षितमधीतम् । तदेव नैपुणाचरणमेव गुरुदक्षिणीकृतं गुरोरदक्षिणा दक्षिणा संपद्यते तथा कृतम् ॥ अभूततद्भावे च्विः । "अस्य च्वौ" इतीकारः ॥ शिवोपयोगित्वेन तत्कृतसुरतारम्भानुगुणसुरतकौशलमेव दक्षिणात्वेन परिणतमिति भावः ॥ इह वाक्यार्थवृत्तिनिदर्शनालंकारः—"वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना" इत्युक्तत्वात् ॥

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत्क्षणं मौलिचन्द्रशकलेन शूलिनः ॥१८॥

दष्टमुक्तमिति ॥ अम्बिका पार्वती पूर्वं दष्टं पश्चान्मुक्तमधरोष्ठं वेदनया पीडया विधुतौ कम्पितौ हस्तौ पाणी एव पल्लवौ यया तथोक्ता सती शीतलेन शूलिनः शिवस्य मौलौ यश्चन्द्रस्य शकलं कलारूपं तेन कृत्वा क्षणं निरवापयत् । सुखयति स्मेत्यर्थः ॥

शिवानुरागस्यस्व चेष्टामाह—

चुम्बनादलकचूर्णदूषितं शंकरोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥१९॥

[illegible]ति ॥ चुम्बनाद्धेतोरलकचूर्णेन [illegible] दूषित-
[illegible] ललाटे जातम् ॥ "सप्तम्यां जनेः" इति डप्रत्ययः । [illegible]

---

१ [illegible]

नीलकण्ठेति ॥ जननी मेना । तां पार्वतीं नीलकण्ठेन शिवेन परिभुक्तं यौवनं यस्यास्तथोक्तां विलोक्य समाश्वसदाश्वासं प्राप । हृष्यतीति यावत् । तथाहि । वधूजनो मातुर्मानसीं मनसिजां शुचं शोकं भर्तृवल्लभतया भर्तृप्रीतिपात्रतयास्यति क्षिपति ॥ " असु क्षेपणे " । लट् ॥ आत्मजासु पतिप्रसाद एव मातॄणां मुदो हेतुरिति भावः ॥

वासराणि कतिचित्कथंचन स्थाणुना रतमकारि चानया ।
ज्ञातमन्मथरसा शनैःशनैः सा मुमोच रतिदुःखशीलताम् ॥ १३ ॥

वासराणीति ॥ कतिचिद्वासराणि दिवसान् ॥ "वा तु क्लीबे दिवसवासरौ" इत्यमरः ॥ "कालाध्वनोः–" इति द्वितीया ॥ स्थाणुना शिवेन ॥ "स्थाणू रुद्र उमापतिः" इत्यमरः ॥ अनया पार्वत्या सह कथंचन बलेन रतं सुरतमकारि कृतम् । तदनुकूलरसोत्पत्त्यभावादिति भावः । अथ च सा शनैःशनैर्ज्ञातो मन्मथरसो यया तथा सती रतौ या दुःखशीलता दुरवगाहस्वभावता तां मुमोच । स्वयमप्यनुरज्यति स्मेत्यर्थः ॥

तदेवाह—

सस्वजे प्रियमुरोनिपीडनं प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ॥ १४ ॥

सस्वज इति ॥ सा पार्वती । उरसो निपीडनं यस्मिन्कर्मणि यथा स्यात्तथा प्रियं सस्वज आलिङ्गितवती । तथानेन प्रियेण प्रार्थितम् । चुम्बनार्थमित्यर्थः । मुखं नाहरन्नावक्रयत् । परंतु मेखलया काञ्च्या सह यः प्रणयः स्नेहस्तत्र या लोलता । जिवृक्षया मन्दप्रसरणमित्यर्थः । तां गतं प्राप्तमस्य प्रियस्य हस्तं पाणिं शिथिलं मन्दं यथातथा रुरोध । न तु प्रागिवेति भावः ॥

भावसूचितमदृष्टविप्रियं दार्ढ्यभाक्क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम् ॥ १५ ॥

भावेति ॥ भावेन स्वगततत्ताभिव्यञ्जकचेष्टाविशेषेण सूचितं ज्ञापितम् ॥ "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु" इति मेदिनी ॥ तथा न दृष्टं विप्रियमौदासीन्यं यत्र । तथा दार्ढ्यं दृढत्वं भजति तथोक्तम् । तथा क्षणवियोगेऽपि कातरम् । तदसहिष्ण्वित्यर्थः । गूढं सर्वजनानभिज्ञेयं तयोः शिवपार्वत्योः प्रेम स्नेहः ॥ "प्रेम स्नेहोऽथ दोहदम्" इत्यमरः ॥ कैश्चिदेव दिवसैरितरेतराश्रयं परस्परनिष्ठम् । अभूदिति शेषः ॥

---

१ पद्मकार्यंत प्रिया. २ रत. ३ निपीडितम्; निपीडिता. ४ चाटु लक्षण; चाटुमल्लाण. ५ तदा.

मेरुमिति ॥ मरुदिवाशु गच्छतीति मरुदाशुग उक्षा वृषभो यस्य सः ॥ "शेषाद्विभाषा" इति कप् ॥ कृती कुशलो हरः । मेरुं सुमेरुम् ॥ "मेरुः सुमेरुर्हेमाद्रिः" इत्यमरः ॥ एतागसः पार्वत्याः स्तनाभ्यां पुरस्कृतान्पूजितानाश्रयत्वेन स्वीकारात् । अल्पीयसां महत्स्वीकार एव पूजात्वेन परिणमतीति भावः । महताल्पीयः स्वीकारे को हेतुरित्याशङ्क्य विशेषयति—सुरतेषु यानि मर्दनानि तेषु क्षमान्सहिष्णून् । हेम्नः पल्लवानां विभङ्गाः खण्डास्तेषां संस्तरानास्तरणान्यन्वभूत् । तत्र सुप्त्वा विजहारेत्यर्थः । अल्पीयसामपि सहिष्णुत्वं हेम्नो विकारत्वात् । अल्पीयस्त्वं तु पदो लवः पल्लव इति श्लिष्टार्थमहिम्ना समर्थ्यते ॥

पद्मनाभचरणाङ्किताश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः ।
मन्दरस्य कटकेषु चावसत्पार्वतीवदनपद्मषट्पदः ॥ २३ ॥

पद्मनाभेति ॥ हरः । पद्मनाभो हरिः ॥ "पद्मनाभो मधुरिपुः" इत्यमरः ॥ तस्य चरणाभ्यामङ्किताश्चिह्निता अश्मानो येषाम् । एतेन हरेरपि विहारयोग्यत्वं ध्वन्यते । तथा नवा अमृतविप्रुषोऽमृतबिन्दून् ॥ "पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्" इत्यमरः ॥ प्राप्तवत्सु । समुद्रमन्थनसाधनत्वादस्येति भावः । मन्दरस्य च कटकेषु नितम्बेषु ॥ "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः ॥ पार्वत्या वदनरूपे पद्मे षट्पदो भ्रमरः सन् । अवसद्वासमकरोत् ॥

रावणध्वनितभीतया तया कण्ठसक्तदृढबाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ॥२४॥

रावणेति ॥ जगतां गुरुर्नियन्ता । उत्पत्त्यादित्रिविधकर्मणां गुणभेदेन कारकत्वादिति भावः । शिवः । एकपिङ्गलस्य कुबेरस्य ॥ "यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः" इत्यमरः ॥ गिरौ कैलासे रावणस्य प्रसिद्धराक्षसस्य ध्वनितात्सिंहनादाद्भीतया तया पार्वत्या कण्ठे सक्तं सञ्जितं दृढं बाहुबन्धनं यस्य स तथोक्तः सन् । विशदाः स्वच्छाः शारदिका इति भावः । शशिनः प्रभाः कौमुदीर्निर्विवेशोपभुक्तवान् ॥

तस्य जातु मलयस्थलीरतेर्धूतचन्दनलतः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ॥ २५ ॥

तस्येति ॥ जातु कदाचित् । तस्य तत्कर्तृके मलयस्थलीषु रतं सुरतं यत्र मति । धूताः कम्पिताश्चन्दनानां चन्दनवृक्षाणां लताः शाखा येन तथोक्तः ।

१ वस्य. २ मारहेषु. ३ शारदसीम. ४ मृदु. ५ वनः. ६ मुधारागीरः.

वैभापिकत्वान्नालुक् ॥ नयनं नेत्रम् । उच्छ्वसत्कमलगन्धये विकसत्कमलसुगन्धये। पद्मिनीत्वादिति भावः ॥ "उपमानाच्च" इतीकारः ॥ "गन्धो गन्धक आमोदः" इति विश्वः ॥ पार्वत्या वदनमेव गन्धवाही पवनस्तस्मै ॥ "गन्धवाहानिलाशुगाः" इति कोशनिर्दिष्टगन्धवाहशब्दस्य गन्धं वहतीति योगालम्बनेन गन्धवाहिशब्देनापि वायुत्वप्रतीतिः । रूढ्यालम्बने लिण्प्रत्ययान्तस्यैव पवनत्वप्रतीतौ शक्तिभ्रमत्वादवाचकपददोषप्रसङ्ग इति बोध्यम् ॥ ददौ । तत्राधो रजो निवर्तयितुं स्थापितवानित्यर्थः ॥

एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः।
शैलराजभवने सहोमया मासमात्रमवसद्वृषध्वजः ॥२०॥

एवमिति ॥ एवमिन्द्रियाणां सुखयतीति सुखः ॥ सुखशब्दात्करोत्यर्थकाणिजन्तात्पचाद्यच् । णिलोपश्च ॥ तस्य वर्त्मनः सेवनादाचरणाद्धेतोरनुगृहीतः प्रसादितो मन्मथो येन । स्ववपुर्योजनादिति भावः। "परिणेष्यति पार्वतीं यदा वपुषा स्वेन नियोजयिष्यति" (४।४२) इति चतुर्थसर्गोक्तमनुसंधेयम् । तथोक्तो वृषध्वजो हरः शैलराजभवने हिमालयगृह उमया पार्वत्या सह मासमात्रं त्रिंशद्दिनात्मकः कालो मासस्तमेवावसत् ॥ "कालाध्वनोः–" इति द्वितीया ॥ "मात्रं कार्त्स्न्येऽवधारणे" इत्यमरः ॥

सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम् ।
तत्र तत्र विजहार संपतन्नप्रमेयगतिना ककुद्मता ॥ २१ ॥

स इति ॥ स आत्मभूः शिवः । आत्मजायाः पार्वत्या विरहदुःखेन खेदितं हिमवन्तमनुमान्य तत आज्ञां गृहीत्वा । अप्रमेयेयत्तैव स्थानेष्वस्य वर्तत इत्यपरिच्छेद्या गतिर्गमनव्यापारो यस्य तथाभूतेन ककुद्मता नन्दिना तत्र तत्र पर्वते संपतन्संचरमाणो विजहार विहारं कृतवान् ॥ इह "संचरन्" इति पाठोऽसाधुः॥ "समस्तृतीयायुक्तात्" इति नित्यमात्मनेपदनियमाच्छत्रुर्दौर्लभ्यात् । अप्रमेयमार्गपदं शेषयित्वा सकर्मकत्वादप्रसङ्ग इति केचित्समर्थयन्ते ॥

मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतः कृती ।
हेमपल्लवविभङ्गसंस्तरानन्वभूत्सुरतमर्दनक्षमान् ॥ २२ ॥

स्प॰ १ यान्तनः. २ माननेकम्. ३ अनुमन्य. ४ पीडितम्. ५ संचरन्. ६ आशुवाहनः. ७ पल्लवान्. ८ सुरतान्तरः क्षमाम्.

स्ताम् । तत्र स्थितामित्यर्थः । सहधर्मचारिणीं पत्नीं पार्वतीं व्याजहारोक्तवान् ॥ " व्याहार उक्तिर्लपितम् " इत्यमरः ॥

पद्मकान्तिमरुणत्रिभागयोः संक्रमय्य तव नेत्रयोरिव ।
संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥ ३० ॥

पद्मेति ॥ हे प्रिये । असौ पुरोवर्त्यहर्पतिः सूर्यः । अरुणे त्रिभागौ तृतीयांशौ ययोस्तयोस्तव नेत्रयोरिव पद्मकान्तिं कमलशोभां संक्रमय्य तुलयित्वा । कमलप्रतिनिधित्वेन रात्रौ तव नेत्रकमल एव स्थास्यत इति विचार्येति भावः । संक्षये प्रलये प्रजेश्वरो ब्रह्मा जगदिव । अहो दिनं संहरति । सूर्यस्यास्तंगतत्वादिति भावः ॥ अत्र गम्योत्प्रेक्षा ॥

सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ॥ ३१ ॥

सीकरेति ॥ हे प्रिये । अवनते नम्रीभूते । अस्तंगत इति यावत् । विवस्वति सूर्ये मरीचिभिः स्वकिरणैः सह सीकराणां जलकणानाम् ॥ " सीकरोऽम्बुकणाः स्मृताः " इत्यमरः ॥ व्यतिकरं संबन्धं दूरयति दूरं कुर्वति सति । अमी पुरोवर्तिनस्तव पितुर्हिमालयस्य निर्झराः प्रवाहा इन्द्रचापेन यः परिवेषः परिधिः ॥ "परिवेषस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः ॥ तेन शून्यास्तेषां भावस्तत्ता तां व्रजन्ति । गच्छन्तीत्यर्थः । निर्झरकणपातनमार्गेऽर्ककिरणैरुद्भासमानेन्द्रचापपरिधिना सूर्यस्यास्तंगतत्वाद्विलीननिति भावः ॥

दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥ ३२ ॥

दष्टेति ॥ हे प्रिये । दष्टा तामरसमसंबन्धिनां केसराणां स्रग्याभ्यां तयोः । तथा विपरिवृत्तौ परस्परपराङ्मुखीभूतौ कण्ठौ ययोः । तथा निघ्नयोः पराधीनयोः ॥ " अधीनो निघ्न आयत्ते " इत्यमरः ॥ अतएव क्रन्दतो रुदतोः । तथा सरसि स्थितयोश्चक्रवाकयोरल्पमन्तरं वियोगोऽनल्पतामधिकतां गतम् । प्राप्तमित्यर्थः ॥

स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ॥ ३३ ॥

१ ब्रह्मा... २ ... ३ ... ४ ... ५ ... ६ ... ७ ... ८ ... ९ ...

लवङ्गानां केसरैः किंजल्कैः सह वर्तते तथोक्तः । दक्षिणानिलो मलयपवनः। चाटुकार इव मधुरभाषीव । प्रियायाः क्लमं खेदमाचचाम । हृतवानित्यर्थः ॥

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।
सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥ २६ ॥

हेमेति ॥ सोमा पार्वती हेम्नस्तामरसेन रक्तोत्पलेन तटोत्पन्नेन ताडितः प्रियो यया सा । परिहासविधित्सयेति भावः । तथा तस्य प्रियस्य कराम्बुना हस्तक्षिप्तजलेन विनिमीलिते ईक्षणे नेत्रे यया । तथा मीनपङ्क्त्या पुनरुक्ता मेखला रशना यस्यास्तथोक्ता सती । तरङ्गिणीं नदीं व्यगाहत विजगाहे । जलक्रीडां चकारेत्यर्थः ॥ "तरङ्गिणी शैवलिनी" इत्यमरः ॥

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥ २७ ॥

तामिति ॥ अयुग्मानि विषमाणि । त्रीणीति यावत् । लोचनानि यस्य स तथोक्तः शिवो नन्दन इन्द्रोद्याने पुलोमतनया शची ॥ "पुलोमजा शचीन्द्राणी" इत्यमरः ॥ तस्या अलकेषु केशेषूचितैः पारिजातकुसुमैः कल्पवृक्षपुष्पैस्तां पार्वतीं प्रसाधयन्भूषयन् । तथा सुरवधूभिर्देवाङ्गनाभिः सस्पृहमीक्षितः सन् । चिरमवसदिति शेषः ॥

इत्यभौममनुभूय शंकरः पार्थिवं च दयितासखः सुखम् ।
लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत ॥ २८ ॥

इत्तीति ॥ शंकरः । इत्येवमभौमं स्वर्गीयं तथा पार्थिवं भौमं च सुखम् । दयितासखः सन्ननुभूय । कदाचित्समय आतपे सूर्ये लोहितायति रक्तवर्णे जायमाने सति ॥ "लोहितादिडाज्भ्यः क्यष्" इति क्यष् ॥ गन्धमादनस्य गिरेर्वनं व्यगाहत । तत्र क्रीडितुं जगामेत्यर्थः ॥

तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम् ।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम् ॥ २९ ॥

तत्रेति ॥ तत्र गन्धमादनवने स हरो भास्करं सूर्यं नेत्रगम्यं नेत्रप्राप्यम् । नेत्रायत्तोरर्वाग्गतिं यावत् । अवलोक्य विचार्य । काञ्चनं सौवर्णं शिलातलमाश्रयो यस्य तथोक्तः सन् । दक्षिणेतरो भुजो वामभुजस्तत्र व्यपाश्रयः संबन्धो यस्या-

१ सः. २ मेखलाम्. ३ सुरवधूभिरीक्षितः; सुरवधूभिरीक्षितः; सुरवधूभिरीक्षितः. ४ वनिता.
५ स्थितम्.

तस्या आतपं पिबतीवेत्युत्प्रेक्षा । यतो हीयमानम् । अन्यथा कथमस्य हानिः स्यादिति भावः ॥

पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता भाति किंचिदिव शेषवत्सरः ॥ ३७॥

पूर्वेति ॥ विवस्वता हृतं शोषितमातपो जलमिव यस्य तादृशं खं व्योम । पूर्वभागे यास्तिमिरप्रवृत्तयस्तमःप्रसारास्ताभिः कृत्वा । एकत एकत्र भागे व्यक्तः पङ्को यत्र तदिव जातं सत् । किंचिच्छेषवदीषज्जलशेषं सर इव भाति ॥ अस्तंगच्छदर्कालपातपे किंचिज्जलशेषोत्प्रेक्षणपूर्वक उपमालंकारः ॥

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्र्यधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥३८॥

आविशद्भिरिति ॥ उटजस्य पर्णशालाया अङ्गणम् ॥ "पर्णशालोटजोऽस्त्रियाम्" इत्यमरः ॥ आविशद्भिः प्रविशद्भिर्मृगैः । तथा मूलेषु यः सेकः सेचनं तेन सरसा आर्द्रास्तथोक्तैर्वृक्षकैरल्पवृक्षैश्चोपलक्षिताः । तथा प्रविशन्त्योऽग्र्याः श्रेष्ठा धेनवो येषु । तथोदीरिता उद्दीपिताः । सायंहोमार्थमिति भावः । अग्नयो गार्हपत्यादयो येषु तथोक्ता आश्रमा ऋषीणां वासस्थानानि । श्रियं बिभ्रति । शोभन्त इत्यर्थः ॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥ ३९ ॥

बद्धेति ॥ बद्धकोशं मुकुलितमपि कुशेशयं कमलम् ॥ कर्तृ ॥ वसतिं ग्रहीष्यते षट्पदाय भ्रमराय प्रीतिपूर्वमन्तरमवकाशम् ॥ "अन्तरमवकाशावधि" इत्यमरः ॥ दातुमिवेत्युत्प्रेक्षा । क्षणं सावशेषं विवरं छिद्रं यस्य तथा तिष्ठति ॥

दूरमग्रपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका॥ ४० ॥

दूरमिति ॥ हे प्रिये । वारुणी दिक्पश्चिमदिक् । दूरमग्रे परिमेयाः अन्तन्ताः परिमातुं शक्या रश्मयः किरणा यस्य ताहशेनारुणेन भानुना । केसरवता किञ्जल्कवता बन्धुजीवं बन्धुजीवाख्यपुष्पं तदेव तिलकं तेन मण्डिता कन्यकेव । भाति ॥

सामभिः सहचराः सहस्रशो स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥४१॥

---

१ [illegible]. २ [illegible]. ३ [illegible]. ४ [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible]. ८ [illegible]; [illegible]. ९ [illegible].

स्थानमिति ॥ हे प्रिये। दन्तिनो गजाः सल्लकीविटपा वृक्षविशेषास्तेषां भङ्गैः खण्डैर्वासितं सुगन्धितमाह्निकं दैनं स्थानमपास्य त्यक्त्वा। विभातमारभ्येत्यावि-भातं यच्चरणमाचरणम्। सांध्यं कृत्यमिति यावत्। तस्मै तत्कर्तुम्। वारिरुहेषु कमलेषु बद्धाः षट्पदा भ्रमरा यत्र तादृशं वारि जलं गृह्णते। करेणाददत इत्यर्थः ॥ गम्योत्प्रेक्षा ॥

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता।
लब्धया प्रतिमया सरोम्भसां तापनीयमिव सेतुबन्धनम् ॥ ३४ ॥

पश्येति ॥ हे मितकथे मिताः परिमिताः कथा यस्यास्तत्संबोधनं हे मितभाषिणि प्रिये। पश्चिमं दिगन्तं लम्बते तथोक्तेन विवस्वता सूर्येण लब्धया प्रतिमया प्रतिबिम्बेन कृत्वा सरःसंबन्धिनामम्भसां तापनीयं सौवर्णं सेतोर्बन्धनमिव निर्मितम्। कृतमित्यर्थः। इति त्वं पश्य। तरङ्गितसरोजलेषु पतितमत एवाविरलतया सहस्रधा विभक्तं स्वप्रतिबिम्बमेव सूर्यनिर्मितः सेतुरिवेत्युत्प्रेक्षा ॥ " तपनीयं शातकौम्भम् " इत्यमरः ॥ ततः " तस्य विकारः " इत्यण् ॥

उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः।
दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव ॥ ३५ ॥

उत्तरन्तीति ॥ हे प्रिये। गाढः पङ्को यत्र तादृशं पल्वलमल्पसरः ॥ " वेशन्तः पल्वलं चाल्पसरः " इत्यमरः ॥ विनिकीर्य। स्वाधिवासेन विक्षिप्तं कृत्वेत्यर्थः। अतिवाहितोऽतिक्रान्त आतपो घर्मो यैः। तथा दंष्ट्रिणः प्रशस्तदंष्ट्रायुक्ताः। वनवराहाणामारण्यकशूकराणां यूथं पान्ति रक्षन्ति ते वनवराहयूथपाः। महान्तो वराहा इत्यर्थः। दष्टा भङ्गुरा भङ्गशीला बिसाङ्कुरा मृणालतन्तवो यैस्ते तथोक्ता इव। उत्तरन्ति निःसरन्ति। अर्थात्सरस इत्यर्थः ॥ अत्र बहिर्दृश्येषु दंष्ट्राङ्कुरेषु बिसाङ्कुरत्वोत्प्रेक्षणादुत्प्रेक्षालंकारः ॥

एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः।
हीयमानमहरत्ययातपं पीवरोरु पिबतीव बर्हिणः ॥ ३६ ॥

एष इति ॥ हे पीवरोरु। वृक्षशिखरे कृतमास्पदं स्थितिर्येन। तत्र स्थित इत्यर्थः। एष पुरोवर्ती बर्हिणो मयूरः ॥ " मयूरो बर्हिणो बर्ही " इत्यमरः ॥ कर्ता ॥ जातरूपस्य सुवर्णस्य ॥ " चामीकरं जातरूपम् " इत्यमरः ॥ यो रसो जलं तद्वद्गौरं पीतं मण्डलं बर्हसमूहो यस्य तादृशम्। अह्नो दिवसस्यात्ययः संध्या

१ कथमिदम्. २ दीर्घया. ३ मण्डलम्.

रक्तेति ॥ हे कुटिलकेशि प्रिये। अमूः पुरोगताः। रक्ताश्च पीताश्च कपिशाश्च तथोक्ताः। नानावर्णा इत्यर्थः। पयोमुचां कोटयोऽश्रयः ॥ "स्यात्कोटिरश्रौ चापाग्रे संख्याभेदप्रकर्षयोः" इति विश्वः ॥ भान्ति। तास्त्वं द्रक्ष्यसीति हेतोस्त्वया संध्यया ॥ कर्त्र्या ॥ वर्तिकाभिश्चित्रशलाकाभिः साधु यथा तथा मण्डिता इव भूषिताः किमित्युत्प्रेक्षा ॥

सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च।
पश्य धातुशिखरेषु भानुना संविभक्तमिव सांध्यमातपम् ॥१६॥

सिंहेति ॥ हे प्रिये। भूभृतां पर्वतानां संबन्धिनां सिंहानां केसराः किञ्जल्का इव याः सटाः स्कन्धकेशास्तासु। पल्लवानां प्रसवो येषु तेषु द्रुमेषु च। तथा धातुयुक्तेषु शिखरेषु च। भानुना संविभक्तं सम्यग्विभज्य दत्तमिव सांध्यमातपं पश्य। केसरादीनामात्मसदृशत्वात्सुहृद्भूततया सूर्योऽस्तगमनसमय आसन्नमृत्युः पुरुष आत्मधनमिव धनीभूतं तात्कालिकमातपं तेभ्यो दत्त्वास्तं गच्छतीति भावः ॥

अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी॥१७॥

अद्रीति ॥ हे अद्रिराजतनये। विधिविदस्तपस्विनोऽमी ब्राह्मणाः। अभिसंध्यं संध्यामभिव्याप्य। पावनं पवित्रं यदम्बु तेन विहिताञ्जलिक्रियार्घ्यदानं यैस्तथोक्ताः। भूत्वेति शेषः। शुद्धये आत्मशुद्धिं कर्तुमादृता आदरयुक्ताश्च सन्तः। गूढं रहस्यभूतं ब्रह्म गायत्रीं गृणन्ति। जपन्तीत्यर्थः ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति१८

तदिति ॥ हे वल्गुवादिनि मिष्टभाषिणि। तत्तस्मात्कारणात्प्रस्तुताय सांध्याय नियमाय विषये नियमं कर्तुं मामपि मुहूर्तं क्षणमात्रमनुमन्तुं त्वं गच्छेत्यनुमननं कर्तुमर्हसि। तथा त्वां विनोदे विनोदकरणे निपुणः कुशलः सखीजनो विनोदयिष्यति ॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥१९॥

१ भूभृता. २ धातुशिखरेषु धाम्नः; धातुशिखरे विवस्वता; धातुशिखरेषु धाम्नना. ३ पाणिमुक्तसुधास्वरविन्दः. ४ रचिता. ५ अभिसंध्यम्. ६ निदये. ७ सहेतुकम्.

सामभिरिति ॥ किरणोष्मपायिनः किरणानामूष्माणमेव पिबन्तीति तथोक्ताः । सहस्रशः सहचरा वालखिल्यादय ऋषयः । अग्रे परिकीर्णं निक्षिप्तं तेजो येन तं भानुं सूर्यम् । स्यन्दनस्य रथस्य संबन्धिनो येऽश्वास्तेषां हृदयंगमा मनोहराः स्वना येषां तैः सामभिः सामवेदैः संस्तुवन्ति । स्तुतिं कुर्वन्तीत्यर्थः ॥

सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ॥ ४२ ॥

सोऽयमिति ॥ सोऽयं सूर्यो दिवसं महोदधौ संनिधाय संस्थाप्य । आनता न-म्रीभूता शिरोधरा ग्रीवा येषां तैः । अतएव कर्णयोश्चामरैर्विघट्टिते मुकुलिते ई-क्षणे येषां तैः । युगेन स्कन्धधार्यकाष्ठेन भुग्ना मृदिताः केसराः स्कन्धरोमाणि येषां तथोक्तैर्हयैरश्वैः कृत्वा । अस्तमस्ताचलमेति गच्छति ॥ "अस्तस्तु चरमः क्ष्माभृत्" इत्यमरः ॥

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत्प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम् ॥ ४३ ॥

खमिति ॥ हे प्रिये । खं व्योम रवौ संस्थितेऽस्तंगते सति प्रसुप्तमिव भवति । युक्तमेवेत्याह—महतस्तेजस ईदृशी वक्ष्यमाणा गतिरस्ति । सा केत्याह—तत्तेजः॥ कर्तृ ॥ उद्गतमुदितं सत् । यावत् । स्थानमित्यर्थः । प्रकाशयति । च्युतं भ्रष्टमस्तमितं सदिति यावत् । तावतः स्थानस्य मीलनाय संकोचनाय भवति खलु । यत्र ते-जस्तिष्ठति तत्प्रकाशते । यतो गच्छति तच्च प्रकाशत इति भावः ॥ उत्प्रेक्षालंकारः ॥

संध्ययाप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।
येन पूर्वमुदये पुरस्कृता नानुयास्यति कथं तमापदि ॥ ४४ ॥

संध्ययेति ॥ संध्ययापि ॥ कर्त्र्या ॥ अस्तशिखरे समर्पितं निहितं वन्द्यं पूज्यं रवेर्वपुर्मण्डलम् ॥ कर्म ॥ अनुगतमन्वगामि । योग्यमेवैतदित्याह—पूर्वमुदये प्रातः-समये येन पुरस्कृताग्रे कृता संमानिता च । उदये प्रागेव संध्यागम इति प्रसिद्धम् । आपदि विपत्समये । अस्तमय इति यावत् । तं सूर्यं कथं नानुयास्यति । अपि तु यास्यत्येवेत्यर्थः । सतीधर्म एष एवेति भावः ॥

रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति संध्ययानया वर्तिकाभिरिव साधुमण्डिताः ॥

१ निशारदैः. २ उल्लिखन्. ३ तावता. ४ पदम्. ५ धर्मम्. ६ मानयेयम्. ७ साध्वनेनया. ८ वर्णिकाभिः. ९ वर्णिताः.

रक्तेति ॥ हे कुटिलकेशि प्रिये । अमूः पुरोगताः । रक्ताश्च पीताश्च कपिशाश्च तथोक्ताः । नानावर्णा इत्यर्थः । पयोमुचां कोटयोऽग्रयः ॥ "स्यात्कोटिरश्रौ चापाग्रे संख्याभेदप्रकर्षयोः" इति विश्वः ॥ भान्ति । तास्त्वं द्रक्ष्यसीति हेतोरनया संध्यया ॥ कन्यां ॥ वर्तिकाभिश्चित्रशलाकाभिः साधु यथा तथा मण्डिता इव भूषिताः किमित्युत्प्रेक्षा ॥

सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु भानुना संविभक्तमिव सांध्यमातपम् ॥४६॥

सिंहेति ॥ हे प्रिये । भूभृतां पर्वतानां संबन्धिनां सिंहानां केसराः किञ्जल्का इव याः सटाः स्कन्धकेशास्तासु । पल्लवानां प्रसवो येषु तेषु द्रुमेषु च । तथा धातुयुक्तेषु शिखरेषु च । भानुना संविभक्तं सम्यग्विभज्य दत्तमिव सांध्यमातपं पश्य । केसरादीनामात्मसदृशत्वात्सुहृद्भूततया सूर्योऽस्तगमनसमय आसन्नमृत्युः पुरुष आत्मधनमिव धनीभूतं तात्कालिकमातपं तेभ्यो दत्त्वास्तं गच्छतीति भावः ॥

अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥४७॥

अद्रीति ॥ हे अद्रिराजतनये । विधिविदस्तपस्विनोऽमी ब्राह्मणाः । अभिसंध्यं संध्यामभिव्याप्य । पावनं पवित्रं यदम्बु तेन विहिताञ्जलिक्रियार्घ्यदानं यैस्तथोक्ताः । भूत्वेति शेषः । शुद्धये आत्मशुद्धिं कर्तुमादृता आदरयुक्ताश्च सन्तः । गूढं रहस्यभूतं ब्रह्म गायत्रीं गृणन्ति । जपन्तीत्यर्थः ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ४८

तदिति ॥ हे वल्गुवादिनि मिष्टभाषिणि । तत्तस्मात्कारणात्प्रस्तुताय सांध्याय नियमाय विषये नियमं कर्तुं मामपि मुहूर्तं क्षणमात्रमनुमन्तुं त्वं गच्छेत्यनुमननं कर्तुमर्हसि । तथा त्वां विनोदे विनोदकरणे निपुणः कुशलः सखीजनो विनोदयिष्यति ॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥ ४९॥

---

१ भूभृता. २ धातुशिखरेषु धाम्न; धातुशिखरे विवस्वता; धातुशिखरेषु धाम्नता. ३ दाशिमुक्तवसुधारसरिद्भिः. ४ रचिता. ५ अभिसांध्यम्. ६ सिद्धये. ७ महेतुकम्.

निर्विभुज्येति ॥ ततोऽनन्तरं शैलराजतनया पार्वती दशनच्छदमोष्ठं निर्विभुज्य वक्रविजयास्ता भर्तुर्वाच्यवधीरणापरा तिरस्कृतिसक्ता। श्रुतमप्यशृण्वतीत्यर्थः। समीपगां विजयानाम्नीं सखीम्। अहेतुकं निष्कारणमाललाप। आलापं कृतवतीत्यर्थः॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम्।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम्॥ ५०॥

ईश्वर इति ॥ दिवसात्यये सायंकाल उचितं विधिं मन्त्रपूर्वं यथा तथानुतस्थिवान्कृतवानीश्वरोऽप्यसूयया मां सक्ता गत इत्यभिप्रायगर्भितयेर्ष्ययावचनामभाषमाणाम्॥ "वच परिभाषणे"। कर्तरि ल्युः॥ पार्वतीं प्रत्युपेत्य समीपमागत्य पुनः सस्मितं यथा तथाहोक्तवान॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यया।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः॥ ५१॥

मुञ्चेति ॥ हे अनिमित्तकोपनेऽकारणकोपने। कोपं क्रोधं मुञ्च। यतोऽस्म्यहं संध्यया॥ कर्त्र्या॥ प्रणमितो नान्यया। अहं संध्यावशं गतो नान्यावशं गतः। अतः कोपं मा कुर्वित्यर्थः। अथ च। आत्मनः सहधर्मचारिणं माम्। संध्यां कर्तुं गच्छन्तमिति शेषः। चक्रवाकेन समा वृत्तिर्यस्य तं किं न वेत्सि। इदानीमुभयोः प्रियाविरहखिन्नत्वादिति भावः॥

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता।
सेयमस्तमुदयं च सेवते तेन मानिनि ममात्र गौरवम्॥५२॥

निर्मितेष्विति ॥ हे सुतनु। स्वयंभुवा ब्रह्मणा निर्मितेषु कल्पितेषु पितृषु तनुः सूक्ष्मा या संध्या पूर्वमुज्झिता। सेयं संध्यास्तमुदयं च सेवते। तेन कारणेन। हे मानिनि। ममात्र गौरवमादरः। अस्तीत्यर्थः॥

तामिमां तिमिरवृद्धिपीडितां शैलराजतनयेऽधुना स्थिताम्।
एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव॥ ५३॥

तामिति ॥ हे शैलराजतनये प्रिये। तामिमां संध्यामधुनैकतः पूर्वत्र तिमिरवृद्धिपीडितामतएव नष्टे तमालानां माला यस्यास्तथोक्तां धातूनां गैरिकादीनां रसस्य निम्नगां नदीमिव स्थितां पश्य॥ उपमालंकारः॥ मालिनीत्यत्र "व्रीह्यादिभ्यश्च" इतीनिः॥

---

१ अनुतिष्ठवान्. २ मोऽभ्युपेत्य. ३ मयनितः. ४ अन्यया. ५ उज्झिता. ६ मेन्यते. ७ वृत्ति. ८ धूमिलमनिव संनति स्थिताम्; धूमिलमनिव संप्रतिष्ठिताम्.

सांध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।
संपरायवसुधासशोणितं मण्डलाग्रमिव तिर्यगुज्झितम् ॥५४॥

सांध्यमिति ॥ अपरा प्रतीची दिक् । अस्तमितं शेषं च सांध्यम् । तथा रक्ता लेखा पङ्क्तिर्यस्य । तथा सांपराया सांग्रामिकी या वसुधा तत्र सशोणितं सरक्तमत एव तिर्यगुज्झितं त्यक्तं मण्डलस्याग्रमिव स्थितमातपं बिभर्ति ॥

यामिनीदिवससंधिसंभवे तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं दिक्षु दीर्घनयने विजृम्भते ॥ ५५ ॥

यामिनीति ॥ हे दीर्घनयने प्रिये । यामिनीदिवसयोः संधौ संध्यायां संभवति तथोक्ते सांध्ये तेजसि सुमेरुणा व्यवहितेऽन्तर्हिते सति निरङ्कुशं निरर्गलमेतत्पुरोवर्त्यन्धतमसं गाढं तमो दिक्षु विजृम्भते प्रसरति । संध्यापि विलीनेत्यर्थः ॥

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरौघवेष्टितो गर्भवास इव वर्तते निशि ॥ ५६ ॥

नोर्ध्वमिति ॥ निशि तिमिरौघेण वेष्टित एष लोको गर्भवास इव वर्तते । गर्भस्थित इव प्रतिभासमानत्वादिति भावः । यत ईक्षणानां लोकनेत्राणां गतिः प्रसर ऊर्ध्वं न । तथाधोऽपि न । तथाभितो वामदक्षिणोऽपि न । तथा पुरतो न । पृष्ठतश्च न । गर्भस्थितवज्जनैः कुत्रापि नावलोक्यत इत्यर्थः । ततो निशावृत्तौ गर्भवासित्वोत्प्रेक्षा ॥

शुद्धमाविलमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं धिङ्महत्त्वमसतां हृतान्तरम् ॥ ५७ ॥

शुद्धमिति ॥ शुद्धं निर्मलमाविलं मलिनमवस्थितं स्थिरं चलं चञ्चलं वक्रं कुटिलमार्जवगुणेनर्जुत्वगुणेनान्वितं सरलं च यत् । तत्सर्वमेव तमसा समीकृतम् । समीभूतत्वात्पृथगभासमानत्वादिति भावः । तथाहि । असतां दुर्जनानां महत्त्वं धिक् । यतो हृतान्तरं समीकृतसदसत्त्वम् । अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि पूर्वदिङ्मुखं कैतकैरिव रजोभिरावृतम् ॥ ५८ ॥

---

१ शुद्धम्. २ निरङ्कुशः. ३ तिमिरैर. ४ [illegible]; [illegible]. ५ [illegible]. ६ [illegible] [illegible]; [illegible]. ७ [illegible].

निर्विभुज्येति ॥ ततोऽनन्तरं शैलराजतनया पार्वती दशनच्छदमोष्ठं निर्विभुज्य वक्रविजयांला भर्तुर्वाक्यवधीरणापरा तिरस्कृतिसक्ता। श्रुतमप्यश्रृण्वतीत्यर्थः। समीपगां विजयानाम्नीं सखीम्। अहेतुकं निष्कारणमाललाप। आलापं कृतवतीत्यर्थः॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥

ईश्वर इति ॥ दिवसात्यये सायंकाल उचितं विधिं मन्त्रपूर्वं यथा तथानुतस्थिवान्कृतवानीश्वरोऽप्यसूयया मां सक्ता गत इत्यभिप्रायगर्भितयेर्ष्ययावचनामभाषमाणाम् ॥ "वच परिभाषणे" । कर्तरि ल्युः ॥ पार्वतीं प्रत्युपेत्य समीपमागत्य पुनः सस्मितं यथा तथाहोक्तवान् ॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥ ५१ ॥

मुञ्चेति ॥ हे अनिमित्तकोपनेऽकारणकोपने । कोपं क्रोधं मुञ्च । यतोऽस्म्यहं संध्यया ॥ कन्यया ॥ प्रणमितो नान्यया । अहं संध्यावशं गतो नान्यावशं गतः । अतः कोपं मा कुर्वित्यर्थः । अथ च । आत्मनः सहधर्मचारिणं माम् । संध्यां कर्तुं गच्छन्तीमिति शेषः । चक्रवाकेन समा वृत्तिर्यस्य तं किं न वेत्सि । इदानीमुभयोः प्रियाविरहसिद्धत्वादिति भावः ॥

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेवते तेन मानिनि ममात्र गौरवम् ॥५२॥

निर्मितेष्विति ॥ हे सुतनु । स्वयंभुवा ब्रह्मणा निर्मितेषु कल्पितेषु पितृषु तनुः सूक्ष्मा या संध्या पूर्वमुज्झिता। सेयं संध्यास्तमुदयं च सेवते । तेन कारणेन। हे मानिनि । ममात्र गौरवमादरः । अस्तीत्यर्थः ॥

तामिमां तिमिरवृद्धिपीडितां शैलराजतनयेऽधुना स्थिताम् ।
एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ॥ ५३ ॥

तामिमामिति ॥ हे शैलराजतनये प्रिये । तामिमां संध्यामधुनैकतः पूर्वत्र तिमिरवृद्धिपीडितामपरत्र नष्टे तमालानां माला यस्यास्तथोक्तां धातूनां गैरिकादीनां रसस्य निम्नगां नदीमिव स्थितां पश्य ॥ उपमालंकारः ॥ [illegible] "[illegible]" [illegible] ॥

---

१ भर्तुर्वाक्यम्. २ [illegible]. ३ मन्त्रपूर्व. ४ [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible].
८ [illegible]

शक्यमोपधिपतेर्नवोदयाः कर्णपूररचनाकृते तव।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ॥ ६२ ॥

शक्येति ॥ हे प्रिये। नव उदयो येषाम्। तथाप्रगल्भा नूतना ये यवास्तेषां सूचयोऽङ्कुरास्तद्वत्कोमलाः। ओपधीनां पत्युश्चन्द्रस्य कराः किरणाः कर्णपूरस्य रचनाकृते रचनार्थं तवाग्राणि ये नखसंपुटास्तैः। तेषामतितैक्ष्ण्यादिति भावः। छेत्तुं द्विधाकर्तुं शक्यम्। शक्तैर्भूयत इत्यर्थः॥ शक्नोतेः "ऋहलोः-" इति भावे ण्यत्॥ यवाङ्कुरवत्कोमलांश्चन्द्रकरानुत्तार्य त्वया कर्णपूरं कर्तुमुत्साहः क्रियतामिति भावः॥

अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ ६३ ॥

अङ्गुलीभिरिति ॥ शशी चन्द्रः। कुड्मलीकृते मीलिते सरोजे एव लोचने यस्य तथोक्तं रजन्या मुखं वदनम्। अङ्गुलीभिरिव मरीचिभिः किरणैः केशसंचयमिव तिमिरं तमः संनिगृह्य हठाद्गृहीत्वा। चुम्बतीव। अन्योऽपि कश्चिच्चुम्बन्केशसंचयं संनिगृह्णाति। चुम्बनसमये केशसंनिग्रहे यः कोऽपि रसोद्बोधः स तद्वेदैकवेद्य इत्यर्थः॥ समासोक्तिरलंकारः॥

पश्य पार्वति नवेन्दुरश्मिभिर्भिन्नसान्द्रतिमिरं नभस्तलम्।
लक्ष्यते द्विरदभोगदूषितं संप्रसादमिव मानसं सरः ॥ ६४ ॥

पश्येति ॥ हे पार्वति। नवस्येन्दो रश्मिभिर्भिन्नं सान्द्रं सघनं तिमिरं यस्य तन्नभस्तलं द्विरदभोगेन दूषितं मलिनं सत्पुनश्च कालान्तरेण संप्रसादं निर्मलं मानसं सर इव लक्ष्यते। त्वं पश्य। जलस्य नीलत्वादिति भावः॥

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ॥ ६५

रक्तभावमिति ॥ हे प्रिये। एष चन्द्रमा रक्तभावं रक्तिमानमपहाय मुक्त्वा परिशुद्धं विशदं मण्डलं यस्य तथोक्तो जातः। तथाहि। निर्मलप्रकृतिषु वस्तुषु कालदोषेण जाता विक्रिया विकारः स्थिर उदय उत्पत्तिर्यस्यास्तादृशी न भवति खलु॥ सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥

१ ग्रहदः. २ नवोदयः. ३ नखाः. ४ कोमलाः. ५ करः. ६ भग्नसान्द्र; सान्निभिन्न, संभिन्न. ७ संप्रसीदत्. ८ एव.

नूनमिति ॥ हे पुण्डरीकमुखि कमलमुखि प्रिये । नूनं यज्वनां द्विजानां पतिश्चन्द्रः शार्वरस्य शर्वरीसंबन्धिनस्तमसो निषिद्धये निवृत्तय उन्नमत्युदेति। अतएव केतकैः केतकसंबन्धिभी रजोभिरिवाहतं व्याप्तं पूर्वदिशो मुखम् । पश्येति शेषः ॥

मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः॥५९॥

मन्दरेति ॥ सतारका सनक्षत्रा निशा रात्रिर्मन्दरेण गिरिणान्तरिता मूर्तिर्यस्य तेन शशभृता चन्द्रेण प्रियसखीभिः समागता मिलिता त्वं पृष्ठतः स्थित्वा वचनानि श्रोष्यता मयेव लक्ष्यते ॥ उपमालंकारः ॥

रुद्धनिर्गमनमा दिनक्षयात्पूर्वदृष्टतनु चन्द्रिकास्मितम् ।
एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिनोदितम् ॥ ६० ॥

रुद्धमिति ॥ आ दिनक्षयाद्दिनक्षयं मर्यादीकृत्य रुद्धनिर्गमनं रुद्धोदयम् । अथ च । पूर्वस्यां दृष्टा तनुर्यस्य ॥ "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति पूर्वाशब्दस्य पुंवद्भावः ॥ एतच्चन्द्रमण्डलम् ॥ कर्तृ ॥ रात्र्या नोदितं कथयितुं प्रेरितं सत् । चन्द्रिकैव स्मितं यस्मिन्कर्मणि यथा तथा दिशः पूर्वस्या रहस्यमुद्गिरतीव वमतीव । यथा सेर्ष्या काचित्केनचिद्द्वारा सपत्नीरहस्यं कथयति तथा रात्रिरूपा स्त्री दिग्रूपायाः स्त्रियो रहस्यं तदवयवप्रदर्शनं प्रकटयति । त्वं पश्येत्यभिप्रायः ॥ उत्प्रेक्षालंकारः ॥

पश्य पक्कफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ॥ ६१ ॥

पश्येति ॥ पक्वा या फलिनी तस्याः फलं तस्य त्विडिव त्विड् यस्य । तथा बिम्बेन लाञ्छितं योजितं वियत्सरोऽम्भश्च येन । उभयत्रापि दृश्यमानेनेत्यर्थः । हिमांशुना चन्द्रेण ॥ कर्त्रा ॥ चक्रवाकयोर्मिथुनं तीरस्थं विडम्ब्यते प्रतार्यते । यतो विप्रकृष्टं न जातं विवरमन्तरमुभयोस्तारतम्यं यस्य । त्वं पश्य । सरःप्रतिबिम्बितचन्द्रमण्डलं फलिनीफलभ्रान्त्या जिघृक्षुतापूर्वकमुद्दिश्य गच्छन्मिथुनं वस्तुतस्तु तत्र फलिनीफललाभाभावाद्व्यस्तशस्त्रेण भूयत इति भावः ॥ "फलिन्यग्निशिखायां च फलिन्याम्" इति मेदिनी ॥

---

१ रात्रिचोदिता. २ चन्द्रमण्डलम्. ३ विप्रकृष्टविधुरम्; विप्रकृष्टविरहम्; विप्रकृत्तविवरम्.

एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमा निबन्धनात् ॥ ७० ॥

एतदिति ॥ उच्छ्वसितं यथा तथा पीतमैन्दवं चान्द्रं प्रभारसं वोढुमक्षममिवैतत्कुमुदम् । मुक्तः षट्पदानां भ्रमराणां विरावः शब्दो येन तथोक्तं सत् । अञ्जसा झटिति ॥ "द्राग्झटित्यञ्जसाह्नाय" इत्यमरः ॥ आ निबन्धनान्निरवशेषबन्धनाद्भिद्यते ॥ सकर्मकाणामपि कर्माविवक्षयाकर्मकत्वात्कर्मकर्तरि लट् ॥ अन्योऽपि बहुमात्रादिरसं पिबन्भिन्नोदरो भवति तद्वत् ॥

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डिके बलाद्व्यज्यते विपरिवृत्तमंशुकम् ॥७१॥

पश्येति ॥ हे चण्डिके । कल्पतरौ लम्बि लम्बायमानत्वेन वर्तमानं शुद्धया ज्योत्स्नया चन्द्रकान्त्या जनितो रूपस्य संशयः संदेहो यत्र । उभयोरपि शुक्लत्वादिति भावः । एतादृशमंशुकं वस्त्रं मारुते चलति सति विपरिवृत्तं सद्बलाद्व्यज्यते । व्यक्तत्वेन ज्ञायत इत्यर्थः । त्वं पश्य ॥

शक्यमङ्गुलिभिरुत्थितैरधः शाखिनां पतितपुष्पपेशलैः ।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ॥ ७२ ॥

शक्यमिति ॥ हे प्रिये । अधः पतितपुष्पवत्पेशलैः सुन्दरैः । तथाङ्गुलिभिरुत्थितैरुत्थापितैरेभिः पुरोवर्तिभिः शाखिनां संबन्धिभिः पत्रैर्जर्जरिता ये शशिनः प्रभाया लवा अंशास्तैस्तवालकानुत्कचयितुमुद्ग्रथितुं शक्यम् । शक्येन भूयतामित्यर्थः । कान्तिलव सदृशी पुष्पसंनिधित्वेन वृक्षाधःपतितजर्जरीभूतचन्द्रकान्तिशकलैः केशानुद्ग्रथयामीति भावः ॥

एष चारुमुखि योगतारया युज्यते तरलबिम्बया शशी ।
साध्वसादुपगतप्रकम्पया कन्ययेव नववीक्षया वरः ॥ ७३ ॥

एष इति ॥ हे चारुमुखि । एष शशी । वरः परिणेता नववीक्षया नवसंगमसमय एव साध्वसाद्भयादुपगतः प्रकम्पो यस्यास्तया कन्ययेव । तरलबिम्बया चलमण्डलया योगतारया नक्षत्रतारकया युज्यते युनक्ति । त्वं पश्य ॥

---

१ [illegible]. २ [illegible]. ३ [illegible]; [illegible]. ४ [illegible]. ५ [illegible]
६ [illegible]; [illegible]. ७ [illegible]. ८ [illegible]; [illegible].

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता वेधसा हि[३] गुणदोषयोर्गतिः॥६६॥

उन्नतेष्विति ॥ हे प्रिये । शशिनः प्रभा चन्द्रिकोन्नतेषु स्थलेषु स्थिता वर्तते । तथा निशातमः ॥ कर्तृ ॥ निम्नेषु नीचेषु संश्रयो यस्य तथोक्तं वर्तते । तथाहि । गुणदोषयोर्गतिर्वेधसा विधिना । आत्मना नीचेनोचेन च सदृशी प्रकल्पिता रचिता हि नूनम् । नीचात्मा नीचस्थ एव भवति । उच्चात्मा उच्चस्थ एवेत्यर्थः ॥

चन्द्रपादजनितप्रवृत्तिभिश्चन्द्रकान्तजलबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डिनः ॥ ६७॥

चन्द्रेति ॥ गिरिर्मेखलासु नितम्बेषु ये तरवस्तेषु निद्रितान्सुप्तानमूञ्शिखण्डिनो मयूरान् । चन्द्रस्य पादैर्जनिता प्रवृत्तिर्निर्गमनं येषां तैश्चन्द्रकान्तस्य ये जलबिन्दवस्तैः कृत्वासमये बोधयति जागरयति ॥ "मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः" इति मेदिनी ॥

कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि ।
हारयष्टिरचनामिवांशुभिः कर्तुमागतकुतूहलः शशी ॥ ६८ ॥

कल्पेति ॥ हे सुन्दरि । संप्रति शशी चन्द्रः प्रस्फुरद्भिरंशुभिः कृत्वा हारयष्टिरचनां कर्तुमिवागतं कुतूहलं यस्य तथोक्तः सन् । कल्पवृक्षयुक्तेषु शिखरेषु वर्तत इति शेषः । इव किम् । त्वं पश्य । यथा कश्चिन्नीलपट्टसूत्रेण मुक्ताहारं विरलतया योजयति तथायं चन्द्रोऽपि वृक्षपत्रान्तरालगतस्वीयकिरणमुक्ताफलैर्वृक्षपत्रच्छायारूपिणा नीलेन पट्टसूत्रेण च हारयष्टिं कर्तुमिवेहागत इति भावः ॥

उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः ॥६९ ॥

उन्नतेति ॥ हे प्रिये । गिरेरुन्नतावनतभाववत्तया सतिमिरेयं चन्द्रिका बहुविधाभिर्भक्तिभी रचनाभिरर्पिता मत्तहस्तिनो भूतिः संपदिव भाति ॥ उपमालंकारः ॥

---

१ इह; एव. २ इमान्. ३ अतिकल्पसुन्दरि; इव शंभुसुन्दरि. ४ गणनाम्. ५ उपत. ६ भागवनथा. ७ दन्तिनः.

एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम्।
मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमा निबन्धनात् ॥ ७० ॥

एतदिति ॥ उच्छ्वसितं यथा तथा पीतमैन्दवं चान्द्रं प्रभारसं वोढुमक्षममिवैतत्कुमुदम्। मुक्तः षट्पदानां भ्रमराणां विरावः शब्दो येन तथोक्तं सत्। अञ्जसा झटिति ॥ "द्राग्झटित्यञ्जसाह्नाय" इत्यमरः ॥ आ निबन्धनान्निरवशेषबन्धनाद्भिद्यते ॥ सकर्मकाणामपि कर्माविवक्षयाकर्मकत्वात्कर्मकर्तरि लट् ॥ अन्योऽपि बहुमात्रादिरसं पिबन्भिन्नोदरो भवति तद्वत् ॥

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम्।
मारुते चलति चण्डिके बलाद्व्यज्यते विपरिवृत्तमंशुकम् ॥७१॥

पश्येति ॥ हे चण्डिके। कल्पतरौ लम्बि लम्बायमानत्वेन वर्तमानं शुद्धया ज्योत्स्नया चन्द्रकान्त्या जनितो रूपस्य संशयः संदेहो यत्र। उभयोरपि शुक्लत्वादिति भावः। एतादृशमंशुकं वस्त्रं मारुते चलति सति विपरिवृत्तं सद्बलाद्व्यज्यते। व्यक्तत्वेन ज्ञायत इत्यर्थः। त्वं पश्य ॥

शक्यमङ्गुलिभिरुत्थितैरधः शाखिनां पतितपुष्पपेशलैः।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ॥ ७२ ॥

शक्यमिति ॥ हे प्रिये। अधः पतितपुष्पवत्पेशलैः सुन्दरैः। तथाङ्गुलिभिरुत्थितैरुत्थापितैरेभिः पुरोवर्तिभिः शाखिनां संबन्धिभिः पत्रैर्जर्जरिता ये शशिनः प्रभाया लवा अंशास्तैस्तवालकानुत्कचयितुमुद्ग्रथितुं शक्यम्। शक्येन भूयतामित्यर्थः। काचित्तव सखी पुष्पभ्रान्तिनिमित्तेन वृक्षाधःपतितजर्जरीभूतचन्द्रकान्तिशकलैः केशानुद्ग्रथयतीति भावः ॥

एष चारुमुखि योगतारया युज्यते तरलबिम्बया शशी।
साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ॥ ७३ ॥

एष इति ॥ हे चारुमुखि। एष शशी। वरः परिणेता नवदीक्षया नवपरिणयातएव साध्वसाद्भयादुपगतः प्रकम्पो यस्यास्तया कन्ययेव। तरलबिम्बया चपलमण्डलया योगतारया नक्षत्रतारकया युज्यते युनक्ति। त्वं पश्य ॥

---

१ उच्छ्वसितपीतम्. २ वोढुम्. ३ चण्डिके पश्य; पश्य केवलम्. ४ उद्वृत्तैः. ५ शेखरैः. ६ भलकम्; अलकाः. ७ चन्द्रमुखि. ८ दत्त तारया; योगतारया.

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।
नूनमात्मसदृशी प्रकल्पिता वेधसा हि[1] गुणदोषयोर्गतिः ॥६६॥

उन्नतेष्विति ॥ हे प्रिये । शशिनः प्रभा चन्द्रिकोन्नतेषु स्थलेषु स्थिता वर्तते । तथा निशातमः ॥ कर्तृ ॥ निम्नेषु नीचेषु संश्रयो यस्य तथोक्तं वर्तते। तथाहि । गुणदोषयोर्गतिर्वेधसा विधिना । आत्मना नीचेनोच्चेन च सदृशी प्रकल्पिता रचिता हि नूनम् । नीचात्मा नीचश्च एव भवति । उच्चात्मा उन्नत एवेत्यर्थः ॥

चन्द्रपादजनितप्रवृत्तिभिश्चन्द्रकान्तजलबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डिनः ॥ ६७॥

चन्द्रेति ॥ गिरिर्मेखलासु नितम्बेषु ये तरवस्तेषु निद्रितान्सुप्तानमून्शिखण्डिनो मयूरान् । चन्द्रस्य पादैर्जनिता प्रवृत्तिर्निर्गमनं येषां तैश्चन्द्रकान्तस्य ये जलबिन्दवस्तैः कृत्वासमये बोधयति जागरयति ॥ "मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः" इति मेदिनी ॥

कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि[2] ।
हारयष्टिरचनामिवांशुभिः कर्तुमागतकुतूहलः शशी ॥ ६८॥

कल्पेति ॥ हे सुन्दरि । संप्रति शशी चन्द्रः प्रस्फुरद्भिरंशुभिः कृत्वा हारयष्टिरचनां कर्तुमिवागतं कुतूहलं यस्य तथोक्तः सन् । कल्पवृक्षयुक्तेषु शिखरेषु । वर्तत इति शेषः । इव किम् । त्वं पश्य । यथा कश्चिन्नीलपट्टसूत्रेण मुक्ताहारं विरलतया योजयति तथायं चन्द्रोऽपि वृक्षपत्रान्तरालगतस्वीयकिरणमुक्ताफलैर्वृक्षपत्रच्छायारूपिणा नीलेन पट्टसूत्रेण च हारयष्टिं कर्तुमिवेहागत इति भावः ॥

उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः ॥६९॥

उन्नतेति ॥ हे प्रिये । गिरेरुन्नतावनतभाववत्तया सतिमिरेयं चन्द्रिका बहुविधाभिर्भक्तिभी रचनाभिरर्पिता मत्तहस्तिनो भूतिः संपदिव भाति ॥ उपमालंकारः ॥

१ इह; एव. २ इमान्. ३ अतिकसुन्दरि; इव शंभुसुन्दरि. ४ गणनाम्. ५ उपत. ६ भागवत्तया. ७ दन्तिनः.

गस्तेन निर्मितां सहकारतामतिसौरभतामिव ययौ । प्रापेत्यर्थः ॥ "आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः ॥ आम्रमेवानुष्ठानविशेषेण यथा सहकारं भवति तद्वद्विक्रियापि मनोहराभूदिति भावः ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ॥७९॥

तत्क्षणमिति ॥ तत्क्षणं मदिरापानानन्तरसमय एव सा सुवदना पार्वती विपरिवर्तिता नष्टा ह्रीर्ययोस्त एवेद्धः प्रवृद्धो रागो ययोस्त एव शयनं नेष्यतोः । सुरतार्थमिति भावः । शूलिनः शिवस्य मदस्य चेत्यनयोर्द्वयोर्वशवर्तिनी वशंगता बभूव ॥

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दु मदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥

घूर्णेति ॥ घूर्णमाने नयने यत्र । तथा स्खलन्ती कथा वाग्यत्र । तथा स्वेदस्य बिन्दवो यत्र । मदरूपिणा कारणेन स्मितं मन्दहासश्च यत्र । तदुमायाः पार्वत्या मुखमीश्वरः शिवस्तावत्प्रथमं चिरं चक्षुषा पपौ सादरं ददर्श । आननेन तु न पपावित्यर्थः ॥

तां विलम्बितपनीयमेखलामुद्वहञ्जघनभारदुर्वहाम् ।
ध्यानसंभृतविभूतिरीश्वरः प्राविशन्मणिशिलागृहं रहः ॥८१॥

तामिति ॥ ध्यानेन संभृता संपादिता विभूतिरुपभोगसाधनसंपत्तिर्येन स ईश्वरो विलम्बिनी तपनीयस्य सुवर्णस्य मेखला काञ्ची यस्यास्ताम् । तथा जघनभारेण दुर्वहां दुःखेन वोढुं शक्याम् ॥ वहतेः "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु" इति खल् ॥ तां पार्वतीमुद्वहन्सन् । रह एकान्ते मणिशिलानां गृहं प्राविशत् ॥

तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः॥८२॥

तत्रेति ॥ तत्र मणिशिलागृहे स हरो हंस इव धवल उत्तरच्छदः शयनोपरितनं वस्त्रं यस्य । तथा जाह्नवीपुलिनवच्चारु दर्शनं यस्य तच्छयनं पल्यङ्कम् । रोहिणीपतिश्चन्द्रः शारदं शरत्कालिकमभ्रं मेघमिव । प्रियासखः सन् । पार्वतीसहित इत्यर्थः । अध्यशेताधिशिश्ये ॥ "अधिशीङ्—" इति कर्मत्वम् ॥

१ तत्क्षणे. २ विपरिवृत्तलज्जयोः. ३ वाञ्छतोः. ४ वशवर्तिता. ५ स्खलत्कथः; स्खलत्कथम्. ६ संभृतविभूतिरीश्वरः; संभृतविभूतिर्योगिनाम्; संभृतविभूतिगोपरम्. ७ हरः.

पाकभिन्नशरकाण्डगौरयोरुल्लसत्प्रकृतिजप्रसादयोः ।
रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षिचन्द्रिका ॥७४॥

पाकमिति ॥ हे प्रिये । चन्द्रबिम्बेन निहिता स्थापिता तवाक्षिणि नेत्रे या चन्द्रिका सा । पाके भिन्नो यः शरकाण्डस्तृणविशेषस्तद्गौरयोः । तयोरुल्लसन्प्रकृतिजः स्वभावजः प्रसादः प्रसन्नता ययोस्तयोस्तव गण्डलेखयोरुपरि रोहतीव । आरोहणं करोतीवेत्युत्प्रेक्षा ॥

लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रति स्वयम् ।
त्वामियं स्थितिमतीमुपागता गन्धमादनवनाधिदेवता ॥ ७५॥

लोहितेति ॥ लोहिता रक्ता येऽर्कमणयस्तेषां भाजनं पात्रं तत्रार्पितं स्थापितं कल्पवृक्षाणां मधु मकरन्दस्तद्बिभ्रतीयं गन्धमादनवनस्याधिदेवता स्थितिमतीं स्थिरां त्वामुद्दिश्य स्वयमुपागता । त्वं पश्य । तुभ्यं मदिरां दातुमागच्छतीत्यर्थः॥

आर्द्रकेसरसुगन्धि ते मुखं मत्तरक्तनयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मदः करिष्यति७६

आर्द्रेति ॥ हे विलासिनि । अत्र लब्धा वसतिर्निवासो येन तथोक्तो मदः किं कीदृशं गुणान्तरमन्यं गुणं करिष्यति । अपि तु नेत्यर्थः । यतस्ते तव मुखं स्वभावतः स्वभावेनैवार्द्रकेसरवत्सुगन्धि । तथा मत्ते रक्ते नयने यस्य तथोक्तं चास्ति । ये ये मदगुणास्ते ते मदात्प्रागेव वर्तन्ते । अतः किमनेन मदेन कर्तव्यमिति भावः॥

मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शंकरस्तामपाययत पानमम्बिकाम् ॥७७॥

मान्यभक्तिरिति ॥ हे प्रिये । अथवा मान्या भक्तिर्भावो यस्य तादृशः सखीजनोऽनङ्गस्य कामस्य दीपनमिदं मधु सेव्यतामित्युदारमभिधाय शंकरस्ताम्बिकां पार्वतीं पानं मदिरामपाययत ॥

पार्वती तदुपयोगसंभवां विक्रियामपि सतां मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मितामाम्रतेव सहकारतां ययौ ॥ ७८॥

पार्वतीति ॥ पार्वती ॥ कर्त्री ॥ तदुपयोगसंभवां मद्यपानजन्यां विक्रियामपि सतां मनोहराम् । आम्रताम्रत्वमप्रतर्क्यो दुर्ज्ञेयो यो विधियोगोऽनुष्ठानयो-

१ पाण्डु. २ प्रतिकृतिप्रसन्नयोः; प्रतिकृतिः प्रदीप्तयोः. ३ उपस्थिता; समागता. ४ मान्तरक्त; रक्तमेव; मत्तमेव. ५ कम्. ६ मधुः. ७ दीपकम्. ८ उपभोग. ९ निर्मिता. १० नम्रता.

गस्तेन निर्मितां सहकारतामतिसौरभतामिव ययौ । प्रापेत्यर्थः ॥ "आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः ॥ आम्रमेवानुष्ठानविशेषेण यथा सहकारं भवति तद्वद्विक्रियापि मनोहराभूदिति भावः ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च॥७९॥

तत्क्षणमिति ॥ तत्क्षणं मदिरापानानन्तरसमय एव सा सुवदना पार्वती विपरिवर्तिता नष्टा ह्रीर्ययोरत एवेद्धः प्रवृद्धो रागो ययोरत एव शयनं नेष्यतोः । सुरतार्थमिति भावः । शूलिनः शिवस्य मदस्य चेत्यनयोर्द्वयोर्वशवर्तिनी वशंगता बभूव ॥

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दु मदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥

घूर्णेति ॥ घूर्णमाने नयने यत्र । तथा स्खलन्ती कथा वाग्यत्र । तथा स्वेदस्य बिन्दवो यत्र । मदरूपिणा कारणेन स्मितं मन्दहासश्च यत्र । तदुमायाः पार्वत्या मुखमीश्वरः शिवस्तावत्प्रथमं चिरं चक्षुषा पपौ सादरं ददर्श । आननेन न पपावित्यर्थः ॥

क्लिष्टकेशमवलुप्तचन्दनं व्यत्ययार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभून्न तृप्तये ॥ ८३ ॥

क्लिष्टेति ॥ क्लिष्टा विक्लृप्ताः केशा यत्र । अवलुप्तं चन्दनं यत्र । व्यत्ययेना- स्थानप्रयोज्यत्वेनार्पिता नखा यत्र । तथा समत्सरं सप्रणयकलहम् । तथा छिदुरो भङ्गशीलो मेखलागुणः काञ्चीसूत्रं यत्र । एतादृशं तत्पार्वतीरतं तस्य शि- वस्य तृप्तये नाभूत् । कामोत्सवस्योद्वेलत्वादिति भावः ॥

केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्प्रतिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥ ८४ ॥

केवलमिति ॥ ज्योतिषां नक्षत्राणां पङ्क्तिष्ववनतासु सतीषु । रजन्यां प्रभा- तकल्पायां सत्यामित्यर्थः । केवलं प्रियतमायां दयालुना । न तु क्षीणशक्तिनेत्यर्थः । तेन शिवेन तया पार्वत्या प्रतिगृहीतमालिङ्गितं वक्षो यस्य तथोक्तेन सता नेत्रमी- लनस्य । निद्राया इत्यभिप्रेतोऽर्थः । कुतूहलं कृतम् । सुप्तमित्यर्थः ॥

स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः किंनरैरुषसि गीतमङ्गलः ॥ ८५ ॥

स इति ॥ बुधानां बुधकर्तृकैः स्तवैः उचितः स शिव उषसि प्रभाते मूर्च्छनयोगा- रणस्वरारोहावरोहेण । तदनुसारेणेत्यर्थः । परिगृहीताः कैशिका वीणातन्तवो यैस्तैः किंनरैः किंपुरुषैर्गीतं मङ्गलं यस्य तथोक्तः सन् । शातकुम्भस्य सुवर्णस्य यानि कमलानि तेषामाकराः समूहास्तैः समं सह व्यबुध्यत । जजागारेत्यर्थः ॥ "खनिः स्त्रियामाकरः स्यात्" इति कोशप्रामाण्यादाकरशब्दस्य खनिवाचकत्वे सत्यपि परिगणनार्थस्वरूपत्वेन समूहवाचकत्वमपि बोद्धव्यम् । [illegible] बाधस्य बहु- [illegible] ॥

तौ क्षणं शिथिलितोपगूहनौ दंपती चलितमानसोर्मयः ।
पद्मभेदपिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः ॥ ८६ ॥

ताविति ॥ क्षणं शिथिलितं [illegible] याभ्यां तौ दंपती गौरीशंकरौ ॥ [illegible] ॥ चलिता [illegible] मानसस्य [illegible] ॥ [illegible] । तथा पद्मानां भेदस्य [illegible] पिशुनाः सूचकाः । [illegible] गन्धमादनवनान्तस्य मारुताः पवनाः सिषेविरे । [illegible] ॥

[illegible]

ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७॥

ऊर्विति ॥ ऊरुमूले या नखमार्गाणां नखक्षतानां राजयः पङ्क्यस्ताभिः ॥ कर्त्रीभिः ॥ हृते स्वविलोकनवशीकृते विलोचने यस्य तथोक्तो हरस्तत्क्षणं प्रभातसमये प्रकर्षेण शिथिलस्य वाससः संयमं बन्धनं कुर्वतीं प्रियतमां पार्वतीमवारयद्बन्धनं मा कुर्विति निवारयांचक्रे । नखक्षतविलोकनवशंवदत्वादिति भावः ॥

स प्रजागरकषायलोचनं गाढदन्तपरिताडिताधरम् ।
आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ८८

स इति ॥ रागवान्स हरः प्रजागरेण रात्रिजागरेण कषाये म्लाने लोचने यत्र । तथा गाढं यथा तथा दन्तैः परिताडितोऽधरो यत्र । तथाकुला विरला अलकाः केशा यत्र । तथा भिन्नं तिलकं यत्र । एतादृशं प्रियाया मुखं प्रेक्ष्यारंस्त प्रससाद । आत्मनः कर्तृत्वादिति भावः ॥

तेन भिन्नविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम्८९

तेनेति ॥ निशात्यये प्रभाते निर्मलेऽपि प्रकटेऽपि सति तेन हरेण भिन्नोऽत एव विषम उत्तरच्छद उपरितनं वस्त्रं यत्र । तथा मध्ये पिण्डिता एकत्रीभूता विसूत्रा सूत्ररहिता मेखला काञ्ची यत्र । तथा चरणरागेण यावकेन लाञ्छितं रक्तीकृतं च शयनं नोज्झितं न त्यक्तम् । सुखार्णवमग्नत्वादिति भावः ॥

स प्रियासुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदनात् ॥९०॥

स इति ॥ हर्षवृद्धेर्जननमुत्पादकं प्रियासुखरसं दिवानिशं सिषेविषुः सेवितुमिच्छति तथोक्तः स शिवो विजयया पार्वतीसख्या यन्निवेदनं स्वागमज्ञापनं तस्मात् । तद्द्वारेत्यर्थः । दर्शने प्रणयिनामभिलाषवतामप्यदृश्यतामदर्शनदातृत्वमाजगाम प्राप । सर्वं त्यक्त्वा तन्मय एव जात इति भावः ॥

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां साग्रमेका निशेव ।

---

१ पङ्क्तिभिः. २ संवयम्. ३ दष्टाधर. ४ अग्रालकविरलम्. ५ भिन्न. ६ प्रियामुखरसम्. ७ निवेदितः. ८ सार्धम्.

ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७॥

ऊर्वित्ति ॥ ऊरुमूले या नखमार्गाणां नखक्षतानां राजयः पङ्क्तयस्ताभिः ॥ कर्त्रीभिः ॥ हृते स्वावलोकनवशीकृते विलोचने यस्य तथोक्तो हरस्तत्क्षणं प्रभातसमये प्रकर्षेण शिथिलस्य वाससः संयमं बन्धनं कुर्वतीं प्रियतमां पार्वतीमवारयद्बन्धनं मा कुर्विति निवारयांचक्रे । नखक्षतावलोकनवशंवदत्वादिति भावः ॥

स प्रजागरकषायलोचनं गाढदन्तपरिताडिताधरम् ।
आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ८८

स इति ॥ रागवान्स हरः प्रजागरेण रात्रिजागरेण कषायं म्लाने लोचने यत्र । तथा गाढं यथा तथा दन्तैः परिताडितोऽधरो यत्र । तथाकुला विरला अलकाः केशा यत्र । तथा भिन्नं तिलकं यत्र । एतादृशं प्रियाया मुखं प्रेक्ष्यारंस्त प्रससाद । आत्मनः कर्तृत्वादिति भावः ॥

तेन भिन्नविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम्८९

तेनेति ॥ निशात्यये प्रभाते निर्मलेऽपि प्रकटेऽपि सति तेन हरेण भिन्नोऽत एव विषम उत्तरच्छद उपरितनं वस्त्रं यत्र । तथा मध्ये पिण्डिता एकत्रीभूता विसूत्रा सूत्ररहिता मेखला काञ्ची [illegible] यावकेन लाञ्छितं रक्तीकृतं

न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समदिवसेति ॥ तत्र गन्धमादनगिरौ समाः प्रत्येकं समसंख्याका ये दिवसा दिनानि तेषां निशीथमर्धरात्रम् । तमभिव्याप्येत्यर्थः । सङ्गिनः सक्तवतः । न तु विषमदिन इत्यर्थः । शंभोः शिवसंबन्धि साग्रं किंचित्साधिकसंख्यमृतूनां शतमेका निशेव तत्तुल्यत्वेनागमद्व्यतीतम् । तथापि सुरतसुखेभ्यस्तु छिन्नतृष्णस्तृप्तो न बभूव । ततो न विररामेत्यर्थः । इव यथा समुद्रान्तर्गतो ज्वलनो वाडवानलस्तज्जलौघैस्तृप्तो न भवति प्रत्यहं ज्वालयत्येव तद्वत् ॥ मालिनीवृत्तम्—"ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्य उमासुरतवर्णनं नामाष्टम सर्गः ।

नवमः सर्गः ।

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः ॥ १ ॥

तथाविध इति ॥ प्रियायाः पार्वत्याः संबन्धिनि मुखारविन्दे वदनकमले मधुपो भ्रमरभूत ईशः शिवस्तथाविधे पूर्वोक्तप्रकारेऽनङ्गरसप्रसङ्गे कामरसावसरे संभोगस्य वेश्म गृहमन्तः प्रविशन्तमेकं पारावतं कपोतं ददर्श दृष्टवान् ॥ सर्गेऽस्मिन्वृत्तमुपजातिः ॥

सुकान्तकान्तामणितानुकारं कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ॥ २ ॥

सुकान्तेति ॥ कथंभूतं पारावतम् । सुकान्तमतिमनोहरं यत्कान्तामणितं रमणीरतिकूजितम् ॥ "मणितं रतिकूजितम्" इत्यमरः ॥ तस्यानुकारोऽनुकरणं यत्र यस्मिन्कर्मणि यथा तथा कूजन्तं शब्दायमानम् । तथाघूर्णिते रक्तने-

१ च; सः. २ सुखेषु. ३ तज्जलेभ्यः; तज्जलेषु. ४ पारापतम्. ५ नर्तित.

येन तथोक्तम् । तथा मस्फारितो विस्तारित उन्नम्र उच्चैस्तथा विनम्रः कण्ठो य तम् । तथा मुहुर्मुहुर्वारंवारं न्यञ्चितः संकुचितश्चारुः पुच्छः पश्चाद्भागो येन थोक्तमित्यर्थः ॥ " पुच्छः पश्चात्प्रदेशो स्यात् " इति विश्वः ॥

विशृङ्खलं पक्षतियुग्मभीपद्दधानमानन्दगतिं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपादमितस्ततो मण्डलकैश्चरन्तम् ॥ ३ ॥

विशृङ्खलमिति ॥ पुनः कथंभूतम् । विशृङ्खलं विगतशृङ्खलाकम् ॥ अनेन शेषणेन कदाचित्कस्यापि बन्धनाभावस्य द्योतनात्स्वेच्छाविहारित्वं ध्वन्यते ॥ शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च " इति विश्वः ॥ पक्षतोः पक्षमूल- र्युग्मं द्वयम् ॥ " पक्षतिः " इति त्रिमसयः ॥ तथेषन्मदेन हेतुनानन्दगतिं च धानम् । तथा शुभ्रांशोश्चन्द्रस्य वर्ण इव वर्णो यस्य तम् ॥ " विधुः सुधांशुः शुभ्रांशुः " इत्यमरः ॥ तथा जटिलौ जटायुक्तावग्रपादौ यस्य तम् ॥ " जटिलस्तु टायुक्तः " इति विश्वः ॥ तथा मण्डलकैर्मण्डलाकारगतिविशेषैरितस्ततश्चरन्तं भ्रममाणम् । तं कपोतं ददर्शेति संबन्धः ॥ " मण्डलके " इति पाठे सुरतमण्डप ति व्याख्येयम् ॥ त्रिभिर्विशेषकम् ॥

रतिद्वितीयेन मनोभवेन ह्रदात्सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थमिवाभ्यनन्दत्क्षणमिन्दुमौलिः ॥४

रतीति ॥ रत्या सपत्न्या द्वितीयेन । रतिसहायेनेत्यर्थः । मनोभवेन ॥ कर्त्रा ॥ प्रविगाह्यमानादवलोड्यमानात्सुधाया ह्रदान्नवमुत्थमुत्पन्नं फेनस्य चयमिव स्थितं तं कपोतं वीक्ष्येन्दुमौलिः शिवः क्षणमभ्यनन्दत्स्तौपीत् ॥ कपोतरूपे वस्तुनि धर्वालमरूपधर्मेण गम्यमानेन फेनचयरूपवस्तूत्प्रेक्षणादुत्प्रेक्षालंकारः ॥

तस्याकृतिं कामपि वीक्ष्य दिव्यामन्तर्भवश्छद्मविहंगमग्निम् ।
विचिन्तयन्संविविदे स देवो भ्रूभङ्गभीमश्च रुषा बभूव ॥५॥

तस्येति ॥ अन्तर्भवतीत्यन्तर्भवः । सर्वान्तर्व्यापीत्यर्थः । स देवो हरः । दि- व्यां भव्यां कामपि लोकोत्तरां तस्य पारावतस्याकृतिं वीक्ष्य छद्मना कैतवेन विहंगं कपोतस्वरूपधारिणमग्निं विचिन्तयन्वितर्कयन्संविविदे विजज्ञे । निश्चया- त्मकबुद्ध्याग्निरेवायमिति बुबुध इत्यर्थः॥ "समो गम्यृच्छि–"इत्यादिनात्मनेपदम्॥ रुषा भ्रुवोर्भङ्गेन भीमो भयंकरश्च बभूव । असामयिकागमनकारित्वादिति भावः॥

१ आनन्दगतम्; आनन्दयन्तिम्. २ ददाहतिम्.

न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समदिवसेति ॥ तत्र गन्धमादनगिरौ समाः प्रत्येकं समसंख्याका ये दिवसा दिनानि तेषां निशीथमर्धरात्रम् । तमभिव्याप्येत्यर्थः । सङ्गिनः सङ्गवतः । न तु विषमदिन इत्यर्थः । शंभोः शिवसंबन्धि साग्रं किंचित्साधिकसंख्यमृतूनां शतमेका निशेव तत्तुल्यत्वेनागमदत्यतीतम् । तथापि सुरतसुखेभ्यस्तु छिन्नतृष्णस्तृप्तो न बभूव । ततो न विररामेत्यर्थः । इव यथा समुद्रान्तर्गतो ज्वलनो वाडवानलस्तज्जलौघैस्तृप्तो न भवति प्रत्यहं ज्वालयत्येव तद्वत् ॥ मालिनीवृत्तम्—"ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्य उमासुरतवर्णनं नामाष्टमः सर्गः ।

नवमः सर्गः ।

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः ॥ १ ॥

तथाविध इति ॥ प्रियायाः पार्वत्याः संबन्धिनि मुखारविन्दे वदनकमले मधुपो भ्रमरभूत ईशः शिवस्तथाविधे पूर्वोक्तप्रकारेऽनङ्गरसप्रसङ्गे कामरसावसरे संभोगस्य वेश्म गृहमन्तः प्रविशन्तमेकं पारावतं कपोतं ददर्श दृष्टवान् ॥ सर्गेऽस्मिन्वृत्तमुपजातिः ॥

सुकान्तकान्तामणितानुकारं कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ॥ २ ॥

सुकान्तेति ॥ कथंभूतं पारावतम् । सुकान्तमतिमनोहरं यत्कान्तामणितं रमणीरतिकूजितम् ॥ "मणितं रतिकूजितम्" इत्यमरः ॥ तस्यानुकारोऽनुकरणं यत्र यस्मिन्कर्मणि यथा तथा कूजन्तं शब्दायमानम् । तथाघूर्णिते रक्तने-

---

१ घ; सः. २ सुखेषु. ३ तज्जलेभ्यः; तज्जलेषु. ४ पारापतम्. ५ नर्तित.

त्रे येन तथोक्तम् । तथा प्रस्फारितो विस्तारित उन्नम्र उच्चैस्तथा विनम्रः कण्ठो यस्य तम् । तथा मुहुर्मुहुर्वारंवारं न्यञ्चितः संकुचितश्चारुः पुच्छः पश्चाद्भागो येन तथोक्तमित्यर्थः ॥ " पुच्छः पश्चात्प्रदेशे स्यात् " इति विश्वः ॥

विशृङ्खलं पक्षतियुग्ममीषद्दधानमानन्दगतिं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपादमितस्ततो मण्डलकैश्चरन्तम् ॥ ३ ॥

विशृङ्खलमिति ॥ पुनः कथंभूतम् । विशृङ्खलं विगतशृङ्खलाकम् ॥ अनेन विशेषणेन कदाचित्कस्यापि बन्धनाभावस्य चेतनात्स्वेच्छाविहारित्वं ध्वन्यते ॥ " शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च " इति विश्वः ॥ पक्षयोः पक्षमूलयोर्युग्मं द्वयम् ॥ " पक्षतिः " इति निघण्टुः ॥ तथैषन्मदेन हेतुनानन्दगतिं च दधानम् । तथा शुभ्रांशोश्चन्द्रस्य वर्ण इव वर्णो यस्य तम् ॥ " विधुः सुधांशुः शुभ्रांशुः " इत्यमरः ॥ तथा जटिलौ जटायुक्तावग्रपादौ यस्य तम् ॥ " जटिलस्तु जटायुक्तः " इति विश्वः ॥ तथा मण्डलकैर्मण्डलाकारगतिविशेषैरितस्ततश्चरन्तं भ्रमयमाणम् । तं कपोतं ददर्शेति संबन्धः ॥ " मण्डलके " इति पाठे गुल्मण्डप इति व्याख्येयम् ॥ विभिरेतद्विशेषकम् ॥

रतिद्वितीयेन मनोभवेन ह्रदात्सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थमिवाभ्यनन्दत्क्षणमिन्दुमौलिः ॥ ४ ॥

रतीति ॥ रत्या सपत्न्या द्वितीयेन । रतिसहायेनेत्यर्थः । मनोभवेन ॥ कर्त्रा ॥ प्रविगाह्यमानादवलोड्यमानात्सुधाया ह्रदादमृतकुण्डादुत्थमुत्पन्नं फेनस्य चयमिव स्थितं तं कपोतं वीक्ष्येन्दुमौलिः शिवः क्षणमभ्यनन्ददस्तावीत् ॥ कपोतस्य धावल्यप्रपञ्चेण गम्यमानेन फेनचयरूपवस्तूत्प्रेक्षणाद्वस्तूत्प्रेक्षालंकारः ॥

तस्याकृतिं कामपि वीक्ष्य दिव्यामन्तर्भवश्छद्मविहंगमग्निम् ।
विचिन्तयन्संविविदे स देवो भ्रूभङ्गभीमश्च रुषा बभूव ॥ ५ ॥

तस्येति ॥ अन्तर्भवतीत्यन्तर्भवः । मनोगतस्यापीत्यर्थः । स देवो हरः । दिव्यां भव्यां कामपि लोकोत्तरां तस्य पारावतस्याकृतिं वीक्ष्य छद्मना कैतवेन विहंगं कपोतरूपधारिणमग्निं विचिन्तयन्निरूपयन्संविविदे विवेद । निश्चयात्मकबुद्ध्यागोचरीचकारेत्यर्थः ॥ " समो गम्यृच्छि- " इत्यात्मनेपदम् ॥ रुषा क्रोधेन भीमो भयंकरश्च बभूव । अभावस्य [illegible] जात ॥

१ अन्तर्भवच्छद्म- [illegible] २ [illegible]

न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समदिवसेति ॥ तत्र गन्धमादनगिरौ समाः प्रत्येकं समसंख्याका ये दिवसा दिनानि तेषां निशीथमर्धरात्रम् । तमभिव्याप्येत्यर्थः । सङ्गिनः सङ्गवतः । न तु विषमदिन इत्यर्थः । शंभोः शिवसंबन्धि साग्रं किंचित्साधिकसंख्यमृतूनां शतमेका निशेव तत्तुल्यत्वेनागमद्व्यतीतम् । तथापि सुरतसुखेभ्यस्तु छिन्नतृष्णस्तृप्तो न बभूव । ततो न विररामेत्यर्थः । इव यथा समुद्रान्तर्गतो ज्वलनो वाडवानलस्तज्जलौघैस्तृप्तो न भवति प्रत्यहं ज्वालयत्येव तद्वत् ॥ मालिनीवृत्तम्—“ननमयययुतेयं मालिनी भोगिलोकैः” इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्य उमासुरतवर्णनं नामाष्टमः सर्गः ।

नवमः सर्गः ।

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः ॥ १ ॥

तथाविध इति ॥ प्रियायाः पार्वत्याः संबन्धिनि मुखारविन्दे वदनकमले मधुपो भ्रमरभूत ईशः शिवस्तथाविधे पूर्वोक्तप्रकारेऽनङ्गरसप्रसङ्गे कामरसावसरे संभोगस्य वेश्म गृहमन्तः प्रविशन्तमेकं पारावतं कपोतं ददर्श दृष्टवान् ॥ सर्गेऽस्मिन्वृत्तमुपजातिः ॥

सुकान्तकान्तामणितानुकारं कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ॥ २ ॥

सुकान्तेति ॥ कथंभूतं पारावतम् । सुकान्तमतिमनोहरं यत्कान्ताभणितं रमणीरतिकूजितम् ॥ “भणितं रतिकूजितम्” इत्यमरः ॥ तस्यानुकारोऽनुकरणं यत्र यस्मिन्कर्मणि यथा तथा कूजन्तं शब्दायमानम् । तथाघूर्णिते रक्तने-

---

१ च; म- २ मुखेषु. ३ तत्रपेऽपः; तन्मयेषु. ४ पारावतम्. ५ भक्ति.

त्रे येन तथोक्तम् । तथा प्रस्फारितो विस्तारित उन्नम्र उच्चैस्तथा विनम्रः कण्ठो यस्य तम् । तथा मुहुर्मुहुर्वारंवारं न्यञ्चितः संकुचितश्चारुः पुच्छः पश्चाद्भागो येन तथोक्तमित्यर्थः ॥ "पुच्छः पश्चात्प्रदेशे स्यात्" इति विश्वः ॥

विशृङ्खलं पक्षतियुग्ममीषद्दधानमानन्दगतिं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपादमितस्ततो मण्डलकैश्चरन्तम् ॥ ३ ॥

विशृङ्खलमिति ॥ पुनः कथंभूतम् । विशृङ्खले विगतशृङ्खलाकम् ॥ अनेन विशेषणेन कदाचित्कस्यापि बन्धनाभावस्य द्योतनात्स्वेच्छाविहारित्वं ध्वन्यते ॥ "शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च" इति विश्वः ॥ पक्षत्योः पक्षमूलयोर्युग्मं द्वयम् ॥ "पक्षतिः" इति त्रिकाण्डशेषः ॥ तथेषन्मदेन हेतुनानन्दगतिं च दधानम् । तथा शुभ्रांशोश्चन्द्रस्य वर्ण इव वर्णो यस्य तम् ॥ "विधुः सुधांशुः शुभ्रांशुः" इत्यमरः ॥ तथा जटिलौ जटायुक्तावग्रपादौ यस्य तम् ॥ "जटिलस्तु जटायुक्तः" इति विश्वः ॥ तथा मण्डलकैर्मण्डलाकारगतिविशेषैरितस्ततश्चरन्तं भ्रममाणम् । तं कपोतं ददर्शेति संबन्धः ॥ "मण्डलके" इति पाठे सुरतमण्डप इति व्याख्येयम् ॥ त्रिभिर्विशेषकम् ॥

रतिद्वितीयेन मनोभवेन ह्रदात्सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थमिवाभ्यनन्दत्क्षणमिन्दुमौलिः ॥४

रतीति ॥ रत्या सपत्न्या द्वितीयेन । रतिसहायेनेत्यर्थः । मनोभवेन ॥ कर्त्रा ॥ प्रविगाह्यमानादवलोड्यमानात्सुधायाः ह्रदान्नवमुत्थमुत्पन्नं फेनस्य चयमिव स्थितं तं कपोतं वीक्ष्येन्दुमौलिः शिवः क्षणमभ्यनन्दत्प्रीतोऽभूत् ॥ कपोतरूपे वस्तुनि धवलिमरूपधर्मेण गम्यमानेन फेनचयरूपवस्तूत्प्रेक्षणादुत्प्रेक्षालंकारः ॥

तस्याकृतिं कामपि वीक्ष्य दिव्यामन्तर्भवश्छद्मविहंगमग्निम् ।
विचिन्तयन्संविविदे स देवो भ्रूभङ्गभीमश्च रुषा बभूव ॥५॥

तस्येति ॥ अन्तर्भवतीत्यन्तर्भवः । सर्वान्तर्व्यापीत्यर्थः । स देवो हरः । दिव्यां भव्यां कामपि लोकोत्तरां तस्य पारावतस्याकृतिं वीक्ष्य छद्मना कैतवेन विहंगं कपोतस्वरूपधारिणमग्निं विचिन्तयन्नित्यनल्पसंविविदे विजज्ञे । निश्चयात्मकबुद्ध्याग्निरेवायमिति बुबुध इत्यर्थः ॥ "समो गम्यृच्छि—" इत्यादिनात्मनेपदम् ॥ रुषा भ्रुवोर्भङ्गेन भीमो भयंकरश्च बभूव । असामयिकागमनकारित्वादिति भावः ॥

---

१ आनन्दगतम्; आनन्दगतिम्. २ वराहान्.

न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समदिवसेति ॥ तत्र गन्धमादनगिरौ समाः प्रत्येकं समसंख्याका ये दि-
सा दिनानि तेषां निशीथमर्धरात्रम् । तमभिव्याप्येत्यर्थः । सान्निनः सव्रनः । न
तु विषमदिन इत्यर्थः । शंभोः शिवसंबन्धि साग्रं किंचित्साधिकसंख्यकं
शतमेका निशेव तत्तुल्यत्वेनागमद्व्यतीतम् । तथापि सुरतसुखेभ्यस्तु छिन्नतृष्णस्तृ-
न बभूव । ततो न विररामेत्यर्थः । इव यथा समुद्रान्तर्गतो ज्वलनो वाडवान-
स्तज्जलौघैस्तृप्तो न भवति प्रत्यहं ज्वालयत्येव तद्वत् ॥ मालिनीवृत्तम्—"नन-
ययसुतेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकवि-
विरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ
कुमारसंभवे महाकाव्य उमासुरतवर्णनं नामाष्टम सर्गः ।

नवमः सर्गः ।

तथाविधेऽनङ्गरसप्रसङ्गे मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्ददर्श पारावतमेकमीशः ॥ १ ॥

तथाविध इति ॥ प्रियायाः पार्वत्याः संबन्धिनि मुखारविन्दे वदनकमले
[म]धुपो भ्रमरभूत ईशः शिवस्तथाविधे पूर्वोक्तप्रकारेऽनङ्गरसप्रसङ्गे कामरसावसरे
[संभ]ोगस्य वेश्म गृहमन्तः प्रविशन्तमेकं पारावतं कपोतं ददर्श दृष्टवान् ॥ सर्गे-
[ऽस्मि]न्वृत्तमुपजातिः ॥

[स]ुकान्तकान्तामणितानुकारं कूजन्तमाघूर्णितरक्तनेत्रम् ।
[प्र]स्फारितोन्नम्रविनम्रकण्ठं मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ॥ २ ॥

[सुक]ान्तेति ॥ कथंभूतं पारावतम् । सुकान्तमतिमनोहरं यत्कान्तामणितं
[र]तिकूजितम् ॥ "मणितं रतिकूजितम्" इत्यमरः ॥ तस्यानुकारोऽनु-
[कर]णं यस्मिन्कर्मणि यथा तथा कूजन्तं शब्दायमानम् । तथाघूर्णिते रक्तने-

---

[...]; सः. २ सुखेषु. ३ तज्जलेभ्यः; तज्जलेषु. ४ पारापतम्. ५ [...]

इति प्रभो चेतसि संप्रधार्य तन्नोऽपराधं भगवन्क्षमस्व ।
पराभिभूता वद किं क्षमन्ते कालातिपातं शरणार्थिनोऽमी १०

इतीति ॥ हे प्रभो । हे भगवन् । तत्तस्मात्कारणात् । इति चेतसि संप्रधार्य संविचार्य नोऽस्माकमपराधं क्षमस्व ॥ असमय इन्द्रप्रेरितस्य तवापराधः कथं सोढव्य इति चेत्तत्राह—परेति ॥ परैरभिभूताः पराभिभूता अत एव शरणार्थिनो रक्षितारं याचमानाः ॥ "शरणं गृहरक्षित्रोः" इत्यमरः ॥ अमी इन्द्रादयः कालातिपातं कालविलम्बं किं कथं क्षमन्ते । आर्तैः कालविलम्बो न सह्यत इति भावः । "प्रतीक्षते जातु न कालमार्तः" इति न्यायात् । वद । कथयेत्यर्थः ॥

प्रभो प्रसीदाशु सृजात्मपुत्रं यं प्राप्य सेनान्यमसौ सुरेन्द्रः ।
स्वर्लोकलक्ष्मीप्रभुतामवाप्य जगत्त्रयं पाति तव प्रसादात् ॥ ११

प्रभो इति ॥ हे प्रभो । प्रसीद प्रसन्नो भव । आत्मपुत्रमाशु सृज । यमात्मपुत्रं सेनान्यं प्राप्यासौ सुरेन्द्रस्तव प्रसादात्स्वर्लोकलक्ष्म्याः प्रभुतामवाप्य जगत्त्रयं पाति रक्षिष्यति ॥ "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥

स शंकरस्तामिति जातवेदोविज्ञापनामर्थवतीं निशम्य ।
अभूत्प्रसन्नः परितोषयन्ति गीर्भिर्गिरीशा रुचिराभिरीशम् १२

स इति ॥ स शंकर इतीत्येवंभूतामर्थवतीं सार्थकाम् । योग्यामिति यावत् । तां जातवेदसोऽग्नेर्विज्ञापनां प्रार्थनां निशम्य श्रुत्वा प्रसन्नोऽभूत् । तथाहि । गिरीशा वाग्मिनः पुरुषा रुचिराभिर्गीर्भिरीशं स्वामिनं परितोषयन्ति । प्रसादयन्तीत्यर्थः ॥

प्रसन्नचेता मदनान्तकारः स तारकारेर्जयिनो भवाय ।
शक्रस्य सेनाधिपतेर्जयाय व्यचिन्तयच्चेतसि भावि किंचित् १३

प्रसन्नेति ॥ प्रसन्नचेताः स मदनान्तकारो हरः जयिनो जयशीलस्य तथा जयाय शत्रुपराजयार्थं शक्रस्य सेनाधिपतेस्तारकारेस्तारकशत्रोः । अपत्यस्येत्यर्थः । भवाय जन्मने । तत्कर्तुमित्यर्थः । भावि भविष्यत्किंचित्चेतसा व्यचिन्तयत् । विचचारेत्यर्थः ॥

युगान्तकालाग्निमिवाविषह्यं परिच्युतं मन्मथरङ्गभङ्गात् ।
रतान्तरेतः स हिरण्यरेतस्यथोर्ध्वरेतास्तदमोघमाधात् ॥ १४ ॥

---

१ मन. २ अन. ३ सृजाशु पुत्रम्; सृजस्व पुत्रम्. ४ स्वर्गैकलक्ष्मी. ५ प्रेक्ष. ६ मदनान्तकारी.

स्वरूपमास्थाय ततो हुताशस्त्वन्वेलत्कम्पकृताञ्जलिः सन् ।
प्रवेपमानो नितरां स्मरारिमिदं वचो व्यक्तमथाभ्युवाच ॥ ६ ॥

स्वरूपमिति ॥ ततोऽनन्तरं हुताशोऽग्निस्त्वन्विभ्यत्सन् ॥ "वा भ्राश-" इत्यादिना वैकल्पिकत्वाच्च श्यन् ॥ स्वरूपमाग्नेयं रूपमास्थायाश्रित्य । अथ स्वरूपाश्रयणानन्तरम् । वलत्नुद्भवत्कम्पो यथा तथा कृतो बद्धोऽञ्जलिर्येन तथा नितरां प्रवेपमानः कम्पमानश्च सन् । स्मरारिं शिवं व्यक्तं स्फुटमिदं वक्ष्यमाणं वचोऽभ्युवाचोक्तवान् ॥ "दुहाच्-" इत्यादिना ब्रुवो द्विकर्मकत्वम् ॥

असि त्वमेको जगतामधीशः स्वर्गौकसां त्वं विपदो निहंसि ।
ततः सुरेन्द्रप्रमुखाः प्रभो त्वामुपासते दैत्यवरैर्विधूताः ॥ ७ ॥

असीति ॥ हे प्रभो । त्वमेको जगतामधीशोऽसि । त्वत्सदृशो जगतां पालयिता न कोऽप्यन्योऽस्तीत्यर्थः। अत एव स्वर्गौकसामिन्द्रादीनां विपदस्त्वं निहंसि दूरीकरोपि । ततः कारणात्सुरेन्द्रप्रमुखा देवास्त्वामुपासते । यतो दैत्यवरैर्विधूतास्तिरस्कृताः ॥

त्वया प्रियाप्रेमवशंवदेन शतं व्यतीये सुरतादृतूनाम् ।
रहःस्थितेन त्वदवीक्षणार्तो दैन्यं परं प्राप सुरैः सुरेन्द्रः ॥ ८ ॥

त्वयेति ॥ हे प्रभो । प्रियायाः पार्वत्याः प्रेम्णा हेतुना वशंवदेन वशीभूतेन ॥ "प्रियवशे वदः खच्" इति खच् । "अरुर्द्विषत्-" इत्यादिना मुम् ॥ तेन त्वया रहःस्थितेन सता सुरताद्धेतोर्ऋतूनां शतं व्यतीये व्यतीतम् ॥ इणः कर्मणि लिट् ॥ अथ च सुरेन्द्रस्त्वदवीक्षणेन तवानवलोकनेनार्तः पीडितः सन्सुरैः सह परमत्यन्तं दैन्यं प्राप । त्वद्विरहासहत्वादिति भावः ॥

त्वदीयसेवावसरप्रतीक्षैरभ्यर्थितः शक्रमुखैः सुरैस्त्वाम् ।
उपागतोऽन्वेष्टुमहं विहंगरूपेण विद्वन्समयोचितेन ॥ ९ ॥

त्वदीयेति ॥ हे विद्वन् । त्वदीया त्वत्कर्मिका या सेवा तस्या अवसरस्य मनीषा येषां तैः शक्रमुखैरिन्द्रादिभिः सुरैरभ्यर्थितोऽहं त्वामन्वेष्टुं मृगयितुं समयोचितेन विहंगरूपेण पारावतरूपेण । "जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन" इति (नैषधचरिते ३ । ४३) श्रीहर्षोक्तेरिति भावः । उपागतोऽस्मि ॥

१ याग; भाम. २ सन्त्. ३ कम्प; कम्ट. ४ अनिशम्. ५ अभ्युवाच. ६ अतः ७ अरमयन्. ८ वहिःस्थितोऽपि. ९ त्वदनीक्षणेन.

इति प्रभो चेतसि संप्रधार्य तन्नोऽपराधं भगवन्क्षमस्व ।
पराभिभूता वद किं क्षमन्ते कालातिपातं शरणार्थिनोऽमी १०

इतीति ॥ हे प्रभो । हे भगवन् । तत्तस्मात्कारणात् । इति चेतसि संप्रधार्य संविचार्य नोऽस्माकमपराधं क्षमस्व ॥ असमय इन्द्रप्रेरितस्य तवापराधः कथं सोढव्य इति चेत्तत्राह—परेति ॥ परैरभिभूताः पराभिभूता अत एव शरणार्थिनो रक्षितारं याचमानाः ॥ "शरणं गृहरक्षित्रोः" इत्यमरः ॥ अमी इन्द्रादयः कालातिपातं कालविलम्बं किं कथं क्षमन्ते । आर्तैः कालविलम्बो न सह्यत इति भावः । "प्रतीक्षते जातु न कालमार्तः" इति न्यायात् । वद । कथयेत्यर्थः ॥

प्रभो प्रसीदाशु सृजात्मपुत्रं यं प्राप्य सेनान्यमसौ सुरेन्द्रः ।
स्वर्लोकलक्ष्मीप्रभुतामवाप्य जगत्त्रयं पाति तव प्रसादात् ॥ ११

प्रभो इति ॥ हे प्रभो । प्रसीद प्रसन्नो भव । आत्मपुत्रमाशु सृज । यमात्मपुत्रं सेनान्यं प्राप्यासौ सुरेन्द्रस्तव प्रसादात्स्वर्लोकलक्ष्म्याः प्रभुतामवाप्य जगत्त्रयं पाति रक्षिष्यतीति ॥ "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥

स शंकरस्तामिति जातवेदोविज्ञापनामर्थवतीं निशम्य ।
अभूत्प्रसन्नः परितोषयन्ति गीर्भिर्गिरीशा रुचिराभिरीशम् १२

स इति ॥ स शंकर इतीत्थंभूतामर्थवतीं सार्थकाम् । योग्यामिति यावत् । तां जातवेदसोऽग्नेर्विज्ञापनां प्रार्थनां निशम्य श्रुत्वा प्रसन्नोऽभूत् । तथाहि । गिरीशा वाग्मिनः पुरुषा रुचिराभिर्गीर्भिरीशं स्वामिनं परितोषयन्ति । प्रसादयन्तीत्यर्थः ॥

प्रसन्नचेता मदनान्तकारः स तारकारेर्जयिनो भवाय ।
शक्रस्य सेनाधिपतेर्जयाय व्यचिन्तयच्चेतसि भावि किंचित् १३

प्रसन्नेति ॥ प्रसन्नचेताः स मदनान्तकारो हरः जयिनो जयशीलस्य तथा जयाय शत्रुपराजयार्थं शक्रस्य सेनाधिपतेस्तारकारेस्तारकशत्रोः । भवत्पस्येत्यर्थः । भवाय जन्मने । उत्पत्तय इत्यर्थः । भावि भविष्यत्किंचिच्चेतसि व्यचिन्तयत् । विचारितवानित्यर्थः ॥

युगान्तकालाग्निमिवाविषह्यं परिप्लुतं मन्मथरङ्गभङ्गात् ।
रतान्तरेतः स हिरण्यरेतस्यपोप्स्वरेतालदनोपमायात् ॥ १४ ॥

१ [illegible]

युगान्तेति ॥ अथ स शिवः । युगान्तकालस्याग्निमिवाविषह्यं सोढुमशक्यं मन्मथरङ्गस्य कामक्रीडाया भङ्गाद्धेतोः परिच्युतं भ्रष्टं तथामोघं सफलं तत्प्रसिद्धं रतान्तस्य सुरतान्तस्य रेतो वीर्यं हिरण्यरेतसि वह्नावाधान्निदधे । यत ऊर्ध्वरेताः । ऊर्ध्वगामिवीर्य इत्यर्थः ॥

अथोष्णबाष्पानिलदूषितान्तं विशुद्धमादर्शमिवात्मदेहम् ।
बभार भूम्ना सहसा पुरारिरेतःपरिक्षेपकुवर्णमग्निः ॥ १५ ॥

अथेति ॥ अथानन्तरमग्निर्विशुद्धमात्मदेहमुष्णबाष्पानिलेन मुखनिःश्वासेन दूषितं म्लानीकृतमन्तर्मध्यं यस्य तमादर्शमिव सहसा भूम्ना बाहुल्येन पुरारेः शिवसंबन्धिनो रेतसः परिक्षेपस्तेन कुवर्णं कुत्सितवर्णं बभार धृतवान् ॥

त्वं सर्वभक्षो भव भीमकर्मा कुष्टाभिभूतोऽनल धूमगर्भः ।
इत्थं शशापाद्रिसुता हुताशं रुष्टा रतानन्दसुखस्य भङ्गात् ॥ १६ ॥

त्वमिति ॥ रतानन्दः सुरतानन्दस्तत्र यत्सुखं तस्य भङ्गादन्तरायाद्धेतो रुष्टाद्रिसुता पार्वती । हे अनल । त्वं सर्वं मेध्यममेध्यं वा भक्षति तथोक्तः । तथा भीमं भयानकं कर्म यस्य । तथा कुष्टेनाभिभूतः पराभूतः । तथा धूमो गर्भे मध्ये यस्य तथोक्तश्च भव । इत्थं हुताशमग्निं शशाप । शपति स्मेत्यर्थः ॥ अत्र शीप्स्यमानत्वाभावात् “श्लाघह्नुङ्स्था–” इति न संप्रदानत्वम् ॥

दक्षस्य शापेन शशी क्षयीव प्लुष्टो हिमेनेव सरोजकोशः ।
वह्निर्विरूपं वपुरुग्ररेतश्चयेन वह्निः किल निर्जगाम ॥ १७ ॥

दक्षस्येति ॥ यद्वद्दक्षस्य शापेन हेतुना क्षयी क्षयरोगवाञ्शशी चन्द्र इव । तथा हिमेन शीतेन प्लुष्टो दग्धः ॥ “प्लुष दाहे” । कर्मणि निष्ठा ॥ सरोजकोश इव । वपुः शरीरमुग्रस्य शिवस्य ॥ “उग्रः कपर्दी श्रीकण्ठः” इत्यमरः ॥ रेतश्चयेन वीर्यसंचयेन ॥ “शुक्रं तेजोरेतसी च” इत्यमरः ॥ हेतुभूतेन विरूपं भ्रष्टशोभमेतादृशं [illegible] निर्जगाम [illegible] निःसृतवान् । किलेति [illegible] ॥

स पावकालोकरुषा विलक्षां स्मरत्रपास्मेरविनम्रवक्त्राम् ।
विनोदयामास गिरीन्द्रपुत्रीं स्वक्षाग्रगैर्मधुरैर्वचोभिः ॥ १८ ॥

स इति ॥ पावकस्य [illegible] रुट् कोपस्तया हेतुना विलक्षां [illegible] [illegible] ॥ तथा [illegible]

[illegible]

भ्यां कामलज्जाभ्यां स्मेरं सस्मितं विनम्रं नतं च वक्त्रं यस्यास्तथोक्तां गिरीन्द्रपुत्रीं पार्वतीं स हरः शृङ्गारगर्भैरत एव मधुरैर्वचोभिर्विनोदयामास । प्रसादितवानित्यर्थः ॥

हरो विकीर्णं घनघर्मतोयैर्नेत्राञ्जनाङ्कं हृदयप्रियायाः ।
द्वितीयकौपीनचलाञ्चलेनाहरन्मुखेन्दोरकलङ्किनोऽस्याः ॥१९॥

हर इति ॥ हरो हृदयस्य प्रियाया अस्याः पार्वत्या अकलङ्किनो मुखेन्दोः संबन्धिनं तथा घनानि यानि घर्मतोयानि प्रस्वेदजलानि तैर्विकीर्णं व्याप्तं नेत्रयोरञ्जनमेवाङ्कः कलङ्कस्तं द्वितीयं यत्कौपीनं योगिनः स्कन्धलम्बि वस्त्रम् ॥ "कौपीनं स्यादधोवस्त्रं योगिनः स्कन्धलम्बि च" इति मेदिनी ॥ तस्य चलं यदञ्चलं प्रान्तस्तेनाहरद्धृतवान् । अकलङ्कस्य कलङ्कानौचित्यादिति भावः ॥

मन्देन खिन्नाङ्गुलिना करेण कम्प्रेण तस्या वदनारविन्दात् ।
परामृशन्घर्मजलं जहार हरः सहेलं व्यजनानिलेन ॥ २० ॥

मन्देनेति ॥ हरः शिवः । मन्देन लघुप्रचारेण । तथा खिन्ना अलसप्रयोगेणोदासीना अङ्गुलयो यस्य । तथा कम्प्रेण कम्पशीलेन ॥ "नमिकम्पिस्म्यजसकम–" इति रः ॥ करेण कृत्वा तस्याः पार्वत्या वदनारविन्दाद्धर्मस्य घर्मरूपं वा जलं परामृशन्विश्लेषयन्सहेलं सक्रीडं यथा तथा व्यजनस्यानिलेन कृत्वा जहार ॥

रतिश्लथं तत्कबरीकलापमंसावसक्तं विगलत्प्रसूनम् ।
स पारिजातोद्भवपुष्पमय्या स्रजा बबन्धामृतमूर्तिमौलिः ॥२१

रतिश्लथमिति ॥ अमृतमूर्तिश्चन्द्रो मौलौ यस्य स हरो देवः । रतौ श्लथं शिथिलबन्धनमत एवांसयोः स्कन्धयोरवसक्तं लग्नमत एव विगलन्त्यधःपातुकानि प्रसूनानि यस्य तं तस्याः कबरीकलापं कचभारं पारिजातोद्भवपुष्पमय्या पारिजातोद्भवानि कल्पवृक्षजानि यानि पुष्पाणि तत्प्रचुरया स्रजा मालया बबन्ध ॥ "तत्प्रकृतवचने" इति प्राचुर्ये मयट् । ततः "टिड्ढा–" इति ङीप् ॥

कपोलपाल्यां मृगनाभिचित्रपत्रावलीमिन्दुमुखः सुमुख्याः ।
स्मरस्य सिद्धस्य जगद्विमोहमन्त्राक्षरश्रेणिमिवोल्लिलेख ॥२२॥

कपोलपाल्यामिति ॥ इन्दुमुखो हरः सुमुख्याः पार्वत्याः संबन्धिन्यां कपोलपाल्यां मृगनाभ्याः कस्तूर्या या चित्रा पत्रावली पत्ररचना तां सिद्धस्य स्मर-

१ हृदयं प्रियायाः. २ हरन्. ३ अति. ४ खिन्नाङ्गुल्या. ५ करेण; प्रेम्णा च.

युगान्तेति ॥ अथ स शिवः । युगान्तकालस्याग्निमिवाविषह्यं सोढुमशक्यं मन्मथरङ्गस्य कामक्रीडाया भङ्गाद्धेतोः परिच्युतं भ्रष्टं तथामोघं सफलं तत्सुरतान्तस्य सुरतान्तस्य रेतो वीर्यं हिरण्यरेतसि वह्नावाधान्निदधे । यत ऊर्ध्वरेताः । ऊर्ध्वगामिवीर्य इत्यर्थः ॥

अथोष्णबाष्पानिलदूषितान्तं विशुद्धमादर्शमिवात्मदेहम् ।
बभार भूम्ना सहसा पुरारिरेतःपरिक्षेपकुवर्णमग्निः ॥ १५ ॥

अथेति ॥ अथानन्तरमग्निर्विशुद्धमात्मदेहमुष्णबाष्पानिलेन मुखनिःश्वासेन दूषितं म्लानीकृतमन्तमध्यं यस्य तमादर्शमिव सहसा भूम्ना बाहुल्येन पुरारेः शिवसंबन्धिनो रेतसः परिक्षेपस्तेन कुवर्णं कुत्सितवर्णं बभार धृतवान् ॥

त्वं सर्वभक्षो भव भीमकर्मा कुष्ठाभिभूतोऽनल धूमगर्भः ।
इत्थं शशापाद्रिसुता हुताशं रुष्टा रतानन्दसुखस्य भङ्गात् ॥ १६ ॥

त्वमिति ॥ रतानन्दः सुरतानन्दस्तत्र यत्सुखं तस्य भङ्गादन्तरायाद्धेतो रुष्टाद्रिसुता पार्वती । हे अनल । त्वं सर्वं मेध्यममेध्यं वा भक्षति तथोक्तः । तथा भीमं भयानकं कर्म यस्य । तथा कुष्ठेनाभिभूतः पराभूतः । तथा धूमो गर्भे मध्ये यस्य तथोक्तश्च भव । इत्थं हुताशमग्निं शशाप । शप्तवती इत्यर्थः ॥ अत्र शीप्स्यमानताभावात् "श्लाघह्नुङ्‍-" इति न संप्रदानत्वम् ॥

दक्षस्य शापेन शशी क्षयीव प्लुष्टो हिमेनेव सरोजकोशः ।
वह्निर्वपुरुग्ररेतभयेन वह्निः किल निर्जगाम ॥ १७ ॥

दक्षस्येति ॥ दक्षप्रजापतेः शापेन हेतुना शशी क्षयरोगवाञ्छशी चन्द्र इव । तथा हिमेन शीतेन प्लुष्टो दग्धः ॥ "प्लुष दाहे" । कर्मणि निष्ठा ॥ सरोजकोश इव । वपुः शरीरमुग्रस्य शिवस्य ॥ "उग्रः कपर्दी श्रीकण्ठः" इत्यमरः ॥ रेतोभयेन वीर्यसंपातेन ॥ "शुक्रं तेजोरेतसी च" इत्यमरः ॥ हेतुभूतेन [illegible] निर्जगाम [illegible] निःसृतवान् । किलेति प्रसिद्धौ ॥

न पावकालोकमहेश्वरस्य [illegible] ।
विनोदयामास गिरीन्द्रपुत्री [illegible] ॥ १८ ॥

स इति ॥ [illegible]
[illegible]

भ्यां कामलज्जाभ्यां स्मेरं सस्मितं विनम्रं नतं च वक्त्रं यस्यास्तथोक्तां गिरीन्द्रपुत्रीं पार्वतीं स हरः शृङ्गारगर्भैरत एव मधुरैर्वचोभिर्विनोदयामास। प्रसादितवानित्यर्थः ॥

हरो विकीर्णं घनघर्मतोयैर्नेत्राञ्जनाङ्कं हृदयप्रियायाः ।
द्वितीयकौपीनचलाञ्चलेनाहरन्मुखेन्दोरकलङ्किनोऽस्याः ॥१९॥

हर इति ॥ हरो हृदयस्य प्रियाया अस्याः पार्वत्या अकलङ्किनो मुखेन्दोः संबन्धिनं तथा घनानि यानि घर्मतोयानि प्रस्वेदजलानि तैर्विकीर्णं व्याप्तं नेत्रयोरञ्जनमेवाङ्कः कलङ्कस्तं द्वितीयं यत्कौपीनं योगिनः स्कन्धलम्बि वस्त्रम् ॥ "कौपीनं स्यादधोवस्त्रं योगिनः स्कन्धलम्बि च" इति मेदिनी ॥ तस्य चलं यदञ्चलं प्रान्तस्तेनाहरदृतवान्। अकलङ्कस्य कलङ्कानौचित्यादिति भावः ॥

मन्देन खिन्नाङ्गुलिना करेण कम्प्रेण तस्या वदनारविन्दात् ।
परामृशन्घर्मजलं जहार हरः सहेलं व्यजनानिलेन ॥ २० ॥

मन्देनेति ॥ हरः शिवः। मन्देन लघुप्रचारेण। तथा खिन्ना अलमप्रयोगेणोदासीना अङ्गुलयो यस्य। तथा कम्प्रेण कम्पशीलेन ॥ "नमिकम्पिस्म्यजसकम–" इति रः ॥ करेण कृत्वा तस्याः पार्वत्या वदनारविन्दाद्धर्मस्य घर्मरूपं वा जलं परामृशन्विश्लेषयन्सहेलं सक्रीडं यथा तथा व्यजनस्यानिलेन कृत्वा जहार ॥

रतिश्लथं तत्कबरीकलापमंसावसक्तं विगलत्प्रसूनम् ।
स पारिजातोद्भवपुष्पमय्या स्रजा बबन्धामृतमूर्तिमौलिः॥२१

रतिश्लथमिति ॥ अमृतमूर्तिश्चन्द्रो मौलौ यस्य स हरो देवः। रतौ श्लथं शिथिलबन्धनमत एवांसयोः स्कन्धयोरवसक्तं लग्नमत एव विगलन्त्यधःपातुकानि प्रसूनानि यस्य तं तस्याः कबरीकलापं कचभारं पारिजातोद्भवपुष्पमय्या पारिजातोद्भवानि कल्पवृक्षजानि यानि पुष्पाणि तत्प्रचुरया स्रजा मालया बबन्ध ॥ "तत्प्रकृतवचने" इति प्राचुर्ये मयट्। ततः "टिड्ढा–" इति ङीप् ॥

कपोलपाल्यां मृगनाभिचित्रपत्रावलीमिन्दुमुखः सुमुख्याः ।
स्मरस्य सिद्धस्य जगद्विमोहमन्त्राक्षरश्रेणिमिवोल्लिलेख ॥२२॥

कपोलपाल्यामिति ॥ इन्दुमुखो हरः सुमुख्याः पार्वत्याः संबन्धिन्यां कपोलपाल्यां मृगनाभ्याः कस्तूर्या या चित्रा पत्रावली पत्ररचना तां सिद्धस्य स्मर-

१ सदयं निपातः. २ हरन्. ३ ऽसि. ४ भिन्नाङ्गुलिना. ५ कम्प्रेण; कम्पेन च.

स कामस्य जगन्ति विमुह्यन्ति यैस्तेषां मन्त्राणां यान्यक्षराणि वर्णास्तेषां श्रेणि पङ्क्तिमिवोल्लिलेख लिखितवान् ॥ अत्र पत्ररचनारूपे वस्तुन्यक्षरश्रेणिरूपणाद्वस्तूत्प्रेक्षालंकारः ॥

रथस्य कर्णावभि तन्मुखस्य ताटङ्कचक्रद्वितयं न्यधात्सः ।
जगज्जिगीषुर्विषमेषुरेष ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥

रथस्येति ॥ स हरः । कर्णावभि कर्णसंमुखे तन्मुखस्य पार्वतीमुखरूपस्य रथस्य संबन्धि ताटङ्करूपं चक्रद्वितयं चक्रद्वयं न्यधात् । यतो विषमेषुरेष पुष्पचापः कामो जगज्जिगीषुस्त्रिभुवनविजयेच्छुः सन् । यमारोहति । ध्रुवं निश्चितम् । मुखरूपिणं रथमारुह्य जगन्ति विजेतुमिच्छति काम इति भावः ॥

तस्याः स कण्ठे पिहितस्तनाग्रां न्यधत्त मुक्ताफलहारवल्लीम् ।
या प्राप मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गौघयुगस्य लक्ष्मीम् ॥२४॥

तस्या इति ॥ स हरस्तस्याः कण्ठे । पिहिते स्वप्रसारेणावृते स्तनाग्रे चूचुके यया तथोक्तां मुक्ताफलहार एव वल्ली तां न्यधत्त निदधे । या मुक्ताफलहारवल्ली मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गाया ओघयोः प्रवाहयोर्युगस्य लक्ष्मीं शोभां प्राप । तद्वच्छुशुभे इत्यर्थः ॥ अभूतोपमा ॥

नखव्रणश्रेणिवरे बबन्ध नितम्बबिम्बे रशनाकलापम् ।
चलस्वचेतोमृगबन्धनाय मनोभुवः पाशमिव स्मरारिः ॥२५॥

नखेति ॥ स्मरारिर्हरः । नखव्रणश्रेणिभिरात्मप्रयुक्ताभिर्वरे मनोहरे तस्या नितम्बबिम्बे रशनाकलापम् । चलं स्वं चेत एव मृगस्तस्य बन्धनाय मनोभुवः संबन्धिनं पाशमिव । बबन्ध । मनोभूरस्यात्मनश्चेतोमृगस्य रशनाकलापरूपजालेन बन्धनं करिष्यत्यतो हरः स्वयमेव तत्र तं निदधावित्यर्थः । नहि कामलुब्धक आत्मनीनं गणयतीति भावः ॥

भालेक्षणाग्नौ स्वयमञ्जनं स भङ्क्त्वा दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाक्ष्याः पुलकोपगूढे कण्ठे विनीलेऽङ्गुलिमुज्जघर्ष ॥२६॥

भालेक्षण इति ॥ स हरः । भाले यदीक्षणं नेत्रं तदेवाग्निः । दीपकरूप इत्यर्थः । तत्राञ्जनं स्वयं भङ्क्त्वा पातयित्वा । अथ च नवोत्पलाक्ष्यास्तस्याः पार्वत्या दृशोः साधु निवेश्य सम्यगर्पयित्वा । अथ च पुलकै रोमाञ्चरूपगूढे व्याप्ते वि-

१ कर्णावभि मुखस्य. २ न्यधात. ३ अभिपतन्मनं गात्; अभिपतन्मनाग्रम्. ४ सा. ५ थे-निदधे. ६ यन्त्र. ७ स्वस्ना. ८ उपगूढः. ९ विनीलाङ्गुलिम्.

नीले श्यामले कण्ठे । स्वीय इति शेषः । अङ्गुलिमुज्जघर्ष मृष्टवान् । यथान्योऽपि दीपकोपर्यङ्गुल्यैव कज्जलं पातयित्वा स्वस्त्रीनेत्रयोर्निवेश्य कुत्रचिदङ्गुलिमुद्धर्षति तद्वत् । अङ्गुलिलग्नकज्जलनिवारणार्थमिति भावः ॥ स्वभावोक्तिरलंकारः ॥

अलक्तकं पादसरोरुहाग्रे सरोरुहाक्ष्याः किल संनिवेश्य ।

स्वमौलिगङ्गासलिलेन हस्तारुणत्वमक्षालयदिन्दुचूडः ॥२७॥

अलक्तकमिति ॥ इन्दुचूडो हरः सरोरुहाक्ष्याः पार्वत्याः पादसरोरुहाग्रेऽलक्तकं संनिवेश्यानुलिप्य । करेणेति शेषः । स्वस्य मौलौ[1] यद्गङ्गासलिलं तेन कृत्वा हस्तस्यारुणत्वमक्षालयन्ममार्ज ॥

भस्मानुलिप्ते वपुषि स्वकीये सहेलमादर्शतलं विमृज्य ।

नेपथ्यलक्ष्म्याः परिभावनार्थमदर्शयज्जीवितवल्लभां सः ॥२८॥

भस्मेति ॥ स हरः । आदर्शतलं भस्मनानुलिप्ते स्वकीये वपुषि विमृज्य शुद्धं कृत्वा नेपथ्यानामाकल्पवेषाणां लक्ष्म्याः शोभायाः परिभावनार्थमवलोकनार्थं सहेलं यथा तथा जीवितवल्लभां प्रियामदर्शयत् ॥

प्रियेण दत्ते मणिदर्पणे सा संभोगचिह्नं स्ववपुर्विभाव्य ।

त्रपावती तत्र घनानुरागं रोमाञ्चदम्भेन बहिर्बभार ॥ २९ ॥

प्रियेणेति ॥ प्रियेण हरेण दत्ते मणीनां दर्पण आदर्शे संभोगस्य चिह्नानि नखक्षतादीनि यत्र तथोक्तं स्वं वपुर्विभाव्यावलोक्य । भावनात्र विलोकनपरिणता ज्ञेया । त्रपावती सलज्जा । एतानि चिह्नानि विलोकयान्यः किं वदिष्यतीति विचारजनितया लज्जयान्वितेत्यर्थः । सा पार्वती तत्र हरे घनमनुरागं प्रेम रोमाञ्चानां दम्भेन कैतवेन बहिर्बहिःस्थितत्वविशिष्टपूर्वकं बभार धृतवती । अन्तरस्था योऽनुरागोऽभूत्स एव बही रोमाञ्चत्वेन परिणत इति भावः ॥

नेपथ्यलक्ष्मीं दयितोपकॢप्तां सस्मेरमादर्शतले विलोक्य ।

अमंस्त सौभाग्यवतीषु धुर्यमात्मानमुद्भूतविलक्षभावा ॥ ३०॥

नेपथ्येति ॥ सा पार्वती । आदर्शतले दयितेन हरेणोपकॢप्तां रचितां नेपथ्यलक्ष्मीमाभूषणमण्डनं सस्मेरं सस्मितम् ॥ अत्र स्मितस्यानुरागव्यञ्जकत्वम् ॥ यथा तथा विलोक्योद्भूतस्त्यक्तो विलक्षभावः पूर्वसंजातवैलक्ष्यं यया । त्यक्तलज्जेत्यर्थः ।

---

१ इन्दुमौलिः. २ लक्ष्मी. ३ [illegible]. ४ संभोगचिह्न. ५ विलक्षता सा; विलक्षभावम्.

स कामस्य जगन्ति विमुग्धानि यैस्तेषां मन्त्राणां यान्यक्षराणि वर्णास्तेषां श्रेणि पङ्क्तिमिवोल्लिलेख लिखितवान् ॥ अत्र पत्ररचनारूपं वस्तुन्यक्षरश्रेणिरूपणाद्वस्तूत्प्रेक्षालंकारः ॥

रथस्य कर्णाविभि तन्मुखस्य ताटङ्कचक्रद्वितयं न्यधात्सः ।
जगज्जिगीषुर्विषमेषुरेष ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥

रथस्येति ॥ स हरः । कर्णाविभि कर्णसंमुखे तन्मुखस्य पार्वतीमुखरूपस्य रथस्य संबन्धि ताटङ्करूपं चक्रद्वितयं चक्रद्वयं न्यधात् । यतो विषमेषुरेष पुष्पचापः कामो जगज्जिगीषुस्त्रिभुवनविजयेच्छुः सन् । यमारोहति । ध्रुवं निश्चितम् । मुखरूपिणं रथमारुह्य जगन्ति विजेतुमिच्छति काम इति भावः ॥

तस्याः स कण्ठे पिहितस्तनाग्रां न्यधत्त मुक्ताफलहारवल्लीम् ।
यां प्राप मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गौघयुगस्य लक्ष्मीम् २४

तस्या इति ॥ स हरस्तस्याः कण्ठे । पिहिते स्वप्रसारेणावृते स्तनाग्रे चूचुके यया तथोक्तां मुक्ताफलहार एव वल्ली तां न्यधत्त निदधे । या मुक्ताफलहारवल्ली मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गाया ओघयोः प्रवाहयोर्युगस्य लक्ष्मीं शोभां प्राप । तद्वच्छुशुभे इत्यर्थः ॥ अभूतोपमा ॥

नखव्रणश्रेणिवरे बबन्ध नितम्बबिम्बे रशनाकलापम् ।
चलस्वचेतोमृगबन्धनाय मनोभुवः पाशमिव स्मरारिः ॥२५॥

नखेति ॥ स्मरारिर्हरः । नखव्रणश्रेणिभिरात्मप्रयुक्ताभिर्वरे मनोहरे तस्या नितम्बबिम्बे रशनाकलापम् । चलं स्वं चेत एव मृगस्तस्य बन्धनाय मनोभुवः संबन्धिनं पाशमिव । बबन्ध । मनोभूरस्यात्मनश्चेतोमृगस्य रशनाकलापरूपजालेन बन्धनं करिष्यत्यतो हरः स्वयमेव तत्र तं निदधावित्यर्थः । नहि कामलुब्धक आत्मनीनं गणयतीति भावः ॥

भालेक्षणाग्नौ स्वयमञ्जनं स भङ्क्त्वा दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाक्ष्याः पुलकोपगूढे कण्ठे विनीलेऽङ्गुलिमुज्जघर्ष ॥२६॥

भालेक्षण इति ॥ स हरः । भाले यदीक्षणं नेत्रं तदेवाग्निः । दीपकरूप इत्यर्थः । तत्राञ्जनं स्वयं भङ्क्त्वा पातयित्वा । अथ च नवोत्पलाक्ष्यास्तस्याः पार्वत्या दृशोः साधु निवेश्य सम्यगञ्जयित्वा । अथ च पुलकैः रोमाञ्चैरुपगूढे व्याप्ते वि-

१ कर्णविलितं मुखस्य. २ व्यधात्. ३ अभिघनस्तनं याम्; अभिघनस्तनाग्राम्. ४ सा. ५ श्रेणिकरे. ६ चलत्. ७ न्यस्ता. ८ उपगूढः. ९ विनीलाङ्गुलिम्.

नीले श्यामले कण्ठे । स्वीय इति शेषः । अङ्गुलिमुज्जघर्ष घृष्टवान् । यथान्योऽपि दीपकोपर्यङ्गुल्यैव कज्जलं पातयित्वा स्वस्त्रीनेत्रयोर्निवेश्य कुर्वाचदङ्गुलिमुद्धर्षेति तद्वत् । अङ्गुलिलग्नकज्जलनिवारणार्थमिति भावः ॥ स्वभावोक्तिरलंकारः ॥

अलक्तकं पादसरोरुहाग्रे सरोरुहाक्ष्याः किल संनिवेश्य ।
स्वमौलिगङ्गासलिलेन हस्तारुणत्वमक्षालयदिन्दुचूडः ॥२७॥

अलक्तकमिति ॥ इन्दुचूडो हरः सरोरुहाक्ष्याः पार्वत्याः पादसरोरुहाग्रेऽलक्तकं संनिवेश्यानुलिप्य । करेणेति शेषः । स्वस्य मौलौ यद्गङ्गासलिलं तेन कृत्वा हस्तस्यारुणत्वमक्षालयन्ममार्ज ॥

भस्मानुलिप्ते वपुषि स्वकीये सहेलमादर्शतलं विमृज्य ।
नेपथ्यलक्ष्म्याः परिभावनार्थमदर्शयज्जीवितवल्लभां सः ॥२८॥

भस्मेति ॥ स हरः । आदर्शतलं भस्मनानुलिप्ते स्वकीये वपुषि विमृज्य शुद्धं कृत्वा नेपथ्यानामाकल्पवेषाणां लक्ष्म्याः शोभायाः परिभावनार्थमवलोकनार्थं सहेलं यथा तथा जीवितवल्लभां प्रियामदर्शयत् ॥

प्रियेण दत्ते मणिदर्पणे सा संभोगचिह्नं स्ववपुर्विभाव्य ।
त्रपावती तत्र घनानुरागं रोमाञ्चदम्भेन बहिर्बभार ॥ २९ ॥

प्रियेणेति ॥ प्रियेण हरेण दत्ते मणीनां दर्पण आदर्शे संभोगस्य चिह्नानि नखक्षतादीनि यत्र तथोक्तं स्वं वपुर्विभाव्यावलोक्य । भावनात्र विलोकनपरिणता ज्ञेया । त्रपावती सलज्जा । एतानि चिह्नानि विलोकयन्नयं किं वदिष्यतीति विचारजनितया लज्जयान्वितेत्यर्थः । सा पार्वती तत्र हरे घनमनुरागं प्रेम रोमाञ्चानां दम्भेन कैतवेन शरीरोद्भिन्नत्वरोमहर्षपूर्वकं बभार धृतवती । अन्तःस्थो योऽनुरागोऽभूत्स एव बहिः रोमाञ्चरूपेण परिणत इति भावः ॥

नेपथ्यलक्ष्मीं दयितोपक्लृप्तां सस्मेरमादर्शतले विलोक्य ।
अमंस्त सौभाग्यवतीषु धुर्यमात्मानमुद्वृत्तविलक्षभावा ॥ ३०॥

नेपथ्येति ॥ सा पार्वती । आदर्शतले दयितेन हरेणोपक्लृप्तां रचितां नेपथ्यलक्ष्मीमाभूषणशोभां सस्मेरं सस्मितम् ॥ अत्र स्मितस्यानुरागस्य सूचनम् ॥ यथा तथा विलोक्योद्वृत्तस्त्यक्तो विलक्षभावः पूर्वसंभोगजनितलज्जा यया । सलज्जेत्यर्थः ।

१ इन्दुमौलिः. २ रक्तं. ३ क. ४ दर्पणतलं. ५ विलक्षण; विलक्षणम्.

स कामस्य जगन्ति विमुह्यन्ति यैस्तेषां मन्त्राणां यान्यक्षराणि वर्णास्तेषां श्रेणि पङ्क्तिमिवोल्लिलेख लिखितवान् ॥ अत्र पत्ररचनारूपे वस्तुन्यक्षरश्रेणिरूपणा द्वस्तूत्प्रेक्षालंकारः ॥

रथस्य कर्णाविभि तन्मुखस्य ताटङ्कचक्रद्वितयं न्यधात्तः ।
जगज्जिगीषुर्विषमेषुरेष ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥

रथस्येति ॥ स हरः । कर्णाविभि कर्णसंमुखे तन्मुखस्य पार्वतीमुखरूपस्य रथस्य संबन्धि ताटङ्करूपं चक्रद्वितयं चक्रद्वयं न्यधात् । यतो विषमेषुरेष पुष्पचापः कामो जगज्जिगीषुस्त्रिभुवनविजयेच्छुः सन् । यमारोहति । ध्रुवं निश्चितम् । मुखरूपिणं रथमारुह्य जगन्ति विजेतुमिच्छति काम इति भावः ॥

तस्याः स कण्ठे पिहितस्तनाग्रां न्यधत्त मुक्ताफलहारवल्लीम् ।
या प्राप मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गौघयुगस्य लक्ष्मीम् २४

तस्या इति ॥ स हरस्तस्याः कण्ठे । पिहिते स्वप्रसारेणावृते स्तनाग्रे चूचुके यया तथोक्तां मुक्ताफलहार एव वल्ली तां न्यधत्त निदधे । या मुक्ताफलहारवल्ली मेरुद्वितयस्य मूर्ध्नि स्थितस्य गङ्गाया ओघयोः प्रवाहयोर्युगस्य लक्ष्मीं शोभां प्राप । तद्वच्छुशुभे इत्यर्थः ॥ अभूतोपमा ॥

नखव्रणश्रेणिवरे बबन्ध नितम्बबिम्बे रशनाकलापम् ।
चलस्वचेतोमृगबन्धनाय मनोभुवः पाशमिव स्मरारिः ॥ २५ ॥

नखेति ॥ स्मरारिर्हरः । नखव्रणश्रेणिभिरात्मप्रयुक्ताभिर्वरे मनोहरे तस्या नितम्बबिम्बे रशनाकलापम् । चलं स्वं चेत एव मृगस्तस्य बन्धनाय मनोभुवः संबन्धिनं पाशमिव । बबन्ध । मनोभूरस्यात्मनश्चेतोमृगस्य रशनाकलापरूपजालेन बन्धनं करिष्यत्यतो हरः स्वयमेव तत्र तं निदधावित्यर्थः । नहि कामलुब्धक आत्मनीनं गणयतीति भावः ॥

भालेक्षणाग्नौ स्वयमञ्जनं स भङ्क्त्वा दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाक्ष्याः पुलकोपगूढे कण्ठे विनीलेऽङ्गुलिमुज्जघर्ष ॥ २६ ॥

भालेक्षण इति ॥ स हरः । भाले यदीक्षणं नेत्रं तदेवाग्निः । दीपकरूप इत्यर्थः । तत्राञ्जनं स्वयं भङ्क्त्वा पात[illegible] पार्वत्या दृशोः साधु निवेश्य सम्य[illegible] [illegible]पगूढे व्याप्ते वि-

१ कर्णावलितं मुखस्य. २ [illegible] भिधनस्तनाग्र[illegible] सा. ५ अं[illegible] गिकरे. ६ चलत् . ७ न्यवक्[illegible]

त् ॥ "निकाय्यनिलयालयाः" इत्यमरः ॥ बहिस्तान्सुरानभि सहेलं सलीलं यथा तथा निर्जगाम । निश्चक्रामेत्यर्थः ॥

क्रमान्महेन्द्रप्रमुखाः प्रणेमुः शिरोनिबद्धाञ्जलयो महेशम् ।
प्रालेयशैलाधिपतेस्तनूजां देवीं च लोकत्रयमातरं ते ॥ ३५ ॥

क्रमादिति ॥ महेन्द्रप्रमुखास्ते देवाः शिरःसु निबद्धा अञ्जलयो यैस्तथोक्ताः सन्तो महेशं हरम् । तथा प्रालेयो हिमानीरूपो यः शैलाधिपतिः पर्वतराजो हिमालयस्तस्य तनूजां कन्यां लोकत्रयस्य मातरं जननीं देवीं पार्वतीं च क्रमात्प्रणेमुः । नमश्चक्रुरित्यर्थः ॥ "उपसर्गादसमासेऽपि" इति णत्वम् ॥

यथागतं तान्विबुधान्विसृज्य प्रसाद्य मानक्रियया प्रतस्थे ।
स नन्दिना दत्तभुजोऽधिरुह्य वृषं वृषाङ्कः सह शैलपुत्र्या ॥ ३६

यथागतमिति ॥ स वृषाङ्को हरस्तान्विबुधानिन्द्रादीन्मानक्रियया । संमानविधानेनेत्यर्थः । प्रसाद्य प्रसन्नान्कृत्वा । तथा यथागतं विसृज्य च । नन्दिना दत्तो भुजो यस्मै तथोक्तः सन् । शैलपुत्र्या पार्वत्या सह वृषमधिरुह्यास्थाय प्रतस्थे ॥ "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥ "साकं सार्धं समं सह" इत्यमरः ॥

मनोऽतिवेगेन ककुद्मता स प्रतिष्ठमानो गगनाध्वनोऽन्तः ।
वैमानिकैः साञ्जलिभिर्ववन्दे विहारहेलागतिभिर्गिरीशः ॥३७॥

मन इति ॥ मनसोऽप्यत्यन्तं वेगो गतिर्जवो यस्य तेन ककुद्मता वृषेण गगनरूपिणोऽध्वनो मार्गस्यान्तर्मध्ये प्रतिष्ठते चलतीति प्रतिष्ठमानः स गिरीशो हरो विहारार्थं हेलया क्रीडया गतिर्येषां तैः । यदृच्छया संचरमाणैरित्यर्थः । वैमानिकैर्विमानैश्चरन्तीति वैमानिकाः ॥ "चरति" इति ठक् । "ठस्येकः" इतीकादेशः । "किति च" इत्यादिवृद्धिः ॥ तथोक्तैः । देवैरित्यर्थः । साञ्जलिभिः सद्भिर्ववन्दे नमस्कृतः ॥ कर्मणि लिट् ॥

स्वर्वाहिनीवारिविहारचारी रतान्तनारीश्रमशान्तिकारी ।
तौ पारिजातप्रसवप्रसङ्गो मरुत्सिषेवे गिरिजागिरीशौ ॥३८ ॥

स्वर्वाहिनीति ॥ तौ गिरिजागिरीशौ गौरीहरौ । कर्मभूतावित्यर्थः । स्वर्वाहिन्या मन्दाकिन्याः संबन्धिनि वारिणि विहारं संचारं चरत्याचरति । करोतीति यावत् । मन्दाकिनीशीकरवाहीत्यर्थः ॥ अनेन शैत्योक्तिः ॥ तथा रतान्ते

१ गिरीशम्. २ तान्. ३ प्रसादमानक्रियया; प्रसाद्यमानः प्रियया. ४ गगनाध्वनीनः.

तथोक्ता सती । आत्मानं सौभाग्यवतीषु सतीषु मध्ये धुर्यमग्रगण्यममंस्त मेने। प्रियकृतनेपथ्यलक्ष्म्या अन्यदुर्लभत्वादिति भावः ॥

अन्तः प्रविश्यावसरेऽथ तत्र स्निग्धे वयस्ये विजया जया च।
सुसंपदोपाचरतां कलानामङ्के स्थितां तां शशिखण्डमौलेः ॥

अन्तरिति ॥ अथानन्तरं तत्रावसरे समये विजया जया चेत्युभे स्निग्धे सार्द्रचित्ते वयस्ये सख्यौ ॥ "आलिः सखी वयस्या च" इत्यमरः ॥ अन्तः प्रविश्य तत्र शशिनः खण्डं मौलौ यस्य तथोक्तस्य हरस्य संबन्धिन्यङ्के स्थितां तां पार्वतीं कलानां भूषणकरणचातुरीविशेषाणां सुसंपदा शोभनया संपदा । शोभयेत्यर्थः । उपाचरताम् । अलंचक्रतुरित्यर्थः ॥ उपाचरतामिति लङः प्रथमपुरुषस्य द्विवचनम् ॥

व्यधुर्बहिर्मङ्गलगानमुच्चैर्वैतालिकाश्चित्रचरित्रचारु ।
जगुश्च गन्धर्वगणाः सशङ्खस्वनं प्रमोदाय पिनाकपाणेः ॥३२॥

व्यधुरिति ॥ बहिःप्रदेशे वैतालिका बन्दिनश्चित्रेण चरित्रेण चारु मनोहरं मङ्गलरूपं गानम् । गीतमित्यर्थः । उच्चैरुच्चस्वरेण व्यधुश्चक्रुः । तथा गन्धर्वगणाश्च पिनाकपाणेर्हरस्य प्रमोदायानन्दाय ॥ "प्रमोदामोदसंमदाः" इत्यमरः ॥ सशङ्खस्वनं पाञ्चजन्यशब्दसहितं यथा तथा जगुः । गायन्ति स्मेत्यर्थः ॥

ततः स्वसेवावसरे सुराणां गणांस्तदालोकनतत्पराणाम् ।
द्वारि प्रविश्य प्रणतोऽथ नन्दी निवेदयामास कृताञ्जलिः सन्॥३३॥

तत इति ॥ ततोऽनन्तरं स्वस्य स्वकर्तृकायाः सेवाया अवसरे समये तस्य हरस्य यदालोकनं तत्र तत्पराणामासक्तानां सुराणां गणान्कर्मभूतान् । नन्दी ॥ कर्ता ॥ प्रणतो नम्रीभूतः सन् । द्वारि प्रविश्य । न त्वन्तरेवेत्यर्थः । कृताञ्जलिः सन् । निवेदयामास । देवा भवदवलोकनसमुत्सुकाः सन्तीति हरं बोधयामासेत्यर्थः ॥

महेश्वरो मानसराजहंसीं करे दधानस्तनयां हिमाद्रेः ।
संभोगलीलालयतः सहेलं हरो बहिस्तानभि निर्जगाम ॥३४॥

महेश्वर इति ॥ महानीश्वरः समर्थो हरो मानसस्य मनोरूपस्य सरसो राजहंसीं हिमाद्रेस्तनयां पार्वतीं करे दधानः सन् । संभोगलीलाया आलयतो मन्दिरा-

१ उभे सदोपचरतां कलानाम्; सुसंपदोपाचरतां कलानाम्. २ दूरे स्थिताम्; अङ्कस्थिताम्. ३ विचित्रपद्यैदान्. ४ ध्वनिम्. ५ हरम्.

त् ॥ "निकाय्यनिलयालयाः" इत्यमरः ॥ वहिस्तान्सुरानभि सहेलं सलीलं यथा तथा निर्जगाम । निश्चक्रामेत्यर्थः ॥

क्रमान्महेन्द्रप्रमुखाः प्रणेमुः शिरोनिबद्धाञ्जलयो महेशम् ।
प्रालेयशैलाधिपतेस्तनूजां देवीं च लोकत्रयमातरं ते ॥ ३५ ॥

क्रमादिति ॥ महेन्द्रप्रमुखास्ते देवाः शिरःसु निबद्धा अञ्जलयो यैस्तथोक्ताः सन्तो महेशं हरम् । तथा प्रालेयो हिमानीरूपो यः शैलाधिपतिः पर्वतराजो हिमालयस्तस्य तनूजां कन्यां लोकत्रयस्य मातरं जननीं देवीं पार्वतीं च क्रमात्प्रणेमुः । नमश्चक्रुरित्यर्थः ॥ "उपसर्गादसमासेऽपि" इति णत्वम् ॥

यथागतं तान्विबुधान्विसृज्य प्रसाद्य मानक्रियया प्रतस्थे ।
स नन्दिना दत्तभुजोऽधिरुह्य वृषं वृषाङ्कः सह शैलपुत्र्या ॥ ३६

यथागतमिति ॥ स वृषाङ्को हरस्तान्विबुधानिन्द्रादीन्मानक्रियया । संमानविधानेनेत्यर्थः । प्रसाद्य प्रसन्नान्कृत्वा । तथा यथागतं विसृज्य च । नन्दिना दत्तो भुजो यस्मै तथोक्तः सन् । शैलपुत्र्या पार्वत्या सह वृषमधिरुह्यास्थाय प्रतस्थे ॥ "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥ "साकं सार्धं समं सह" इत्यमरः ॥

मनोऽतिवेगेन ककुद्मता स प्रतिष्ठमानो गगनाध्वनोऽन्तः ।
वैमानिकैः साञ्जलिभिर्ववन्दे विहारहेलागतिभिर्गिरीशः ॥ ३७ ॥

मन इति ॥ [illegible] गतिर्वेगो यस्य तेन ककुद्मता वृषेण गगनरूपिणो [illegible] ष्ठे वर्त्मनीति प्रतिष्ठमानः स गिरीशो हरो [illegible] तैः । यदृच्छया संचरमाणैरित्यर्थः । वैमानि- [illegible] चरति" इति ठक् । "इस्येकः" इतीकादेशः । [illegible] साञ्जलिभिः सोद्यं-

[illegible] श्रमशान्तिकारी ।
[illegible] गिरिजागिरीशौ ॥ ३८ ॥

[illegible] र्गो । धर्मभूतावित्यर्थः । स- [illegible] संचारं चन्द्रार्कतेज । रवी- [illegible] न शैत्योक्तिः ॥ तथा

यो नारीणां संबन्धी श्रमः खेदस्तस्य शान्तिं करोति ॥ अनेन मान्द्यो
तथा पारिजातस्य कल्पवृक्षस्य संबन्धिनां प्रसवानां पुष्पाणां प्रसङ्गः संव
स ॥ अनेन सौगन्ध्योक्तिः ॥ शैत्यमान्द्यसौगन्ध्यरूपगुणत्रयविशिष्टो मरु
रणः । कर्तृभूत इत्यर्थः । सिषेवे । आराधयामासेत्यर्थः ॥

पिनाकिनापि स्फटिकाचलेन्द्रः कैलासनामा कलिताम्बर
धृतार्धसोमोऽद्भुतभोगिभोगो विभूतिधारी स्व इव प्रपेदे ॥

पिनाकिनेति ॥ पिनाकिनापि हरेणापि कलितः स्वमहत्त्वेनावृतोऽ
श आकाशप्रान्तदेशो येन तथोक्तः । द्वितीयपक्षे कलिता वेष्टिता अम्बर
दिग्रूपा येन । दिगम्बर इत्यर्थः । तथा अर्धो यः सोमश्चन्द्रः सोऽस्यास्तीत्य
हरः स धृतो येन । कैलासवासी हि भगवान्गिरीश इति भावः । द्वितीयपक्षे धृ
कलारूपश्चन्द्रो येन । चन्द्रशेखरो हि भगवान्गिरीश इति भावः । भोगिन्य
गिनश्च भोगिनः ॥ "पुमान्स्त्रिया" इत्येकशेषः ॥ भोगिनः कामुका इ
तेषां तत्कर्तृको यो भोगः संभोगः सोऽद्भुत आश्चर्यकारी यत्र । द्वितीयपक्षे
भोगिनां सर्पाणां भोगा देहा यत्र । सर्पभूषणो हि भगवानिति भावः ।
विभूतिं धरतीति विभूतिधारी । संपद्वानित्यर्थः । द्वितीयपक्षे विभूतिं भ
रतीति तथा । भस्मोद्धूलनकारी हि भगवान्गिरीश इति भावः । तथा कैलास
स्फटिकानामचलेन्द्रो गिरीन्द्रः । कर्मभूत इत्यर्थः । स्व इवात्मेव प्रपेदे प्रा
कर्मणि लिट् ॥ पूर्णोपमालंकारः ॥

विलोक्य यत्र स्फटिकस्य भित्तौ सिद्धाङ्गनाः स्वं प्रतिबिम्बमा
भ्रान्त्या परस्या विमुखीभवन्ति प्रियेषु मानग्रहिला नमत्सु॥

विलोक्येति ॥ यत्र कैलासे स्फटिकस्य भित्तावारात्समीपम् ॥ "आरा
समीपयोः" इत्यमरः ॥ पतितं स्वं स्वकीयं प्रतिबिम्बं विलोक्य परस्याः सप
भ्रान्त्या भ्रमेण मानग्रहिला माने प्रणयकलहे ग्रहिला आग्रहवत्यः ॥ तुन्दा
कृतिगणत्वाश्रयणादिल्च् ॥ सिद्धाङ्गनाः प्रियेषु नमत्स्वपि सत्सु विमुखीभव
पराङ्मुख्यो भवन्तीत्यर्थः ॥

सुबिम्बितस्य स्फटिकांशुयुतेश्चन्द्रस्य चिह्नप्रकरः करोति ।
नीवार्पितस्येव रसेन यत्र कस्तूरिकायाः शकलस्य लीलाम् ।

[illegible]

सुविम्बितस्येति ॥ यत्र स्फटिकाचलेन्द्रे सुबिम्बितस्य प्रतिबिम्बितस्यात एव स्फटिकांशुभिः । शुभ्रैरित्यर्थः । सुप्तिः प्रतिबिम्बगोपनं यस्य । उभयोः शुक्लत्वा-पृथगभासमानस्येत्यर्थः । तथोक्तस्य चन्द्रस्य संबन्धी चिह्नप्रकरः कलङ्कसंचयः ॥ "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः ॥ गौर्या पार्वत्यार्पितस्य निहितस्य कस्तूरि-कायाः शकलस्य खण्डस्य । संचय इवेत्युत्प्रेक्षा । लीलां क्रीडाम् । शोभामिति यावत् । करोति ॥ निदर्शनाभेदः । स चोपमयोत्प्रेक्षया वा संकीर्यत इति संदेह-संकरोऽयमलंकारः । यदि गौर्यार्पितं तर्ह्युपमा । यदि नार्पितं तर्ह्युत्प्रेक्षेत्यवधेयम् ॥

यदीयभित्तौ प्रतिबिम्बिताङ्गमात्मानमालोक्य रुषा करीन्द्राः ।
मत्तान्यकुम्भिभ्रमतोऽतिभीमदन्ताभिघातव्यसनं वहन्ति ॥ ४२

यदीयेति ॥ करीन्द्रा आत्मानं शरीरम् । स्वीयमिति शेषः । यदीयभित्तौ प्रतिबिम्बिताङ्गं प्रतिबिम्बितावयवमालोक्य विलोक्य मत्ता येऽन्ये कुम्भिनो दन्ति-नस्तेषां भ्रमतो भ्रमाज्जनितया रुषा क्रोधेन ॥ "प्रतिघा रुट्क्रुधौ स्त्रियाम्" इ-त्यमरः ॥ अतिभीमा ये दन्तास्तेषां योऽभिघात आघातस्तेन यद्व्यसनं दुःखं द-न्तजर्जरितत्वलक्षणं वहन्ति प्राप्नुवन्ति । भ्रमात्मकं ज्ञानं दुःखावहं भवती-ति भावः ॥

निशासु यत्र प्रतिबिम्बितानि ताराकुलानि स्फटिकालयेषु ।
दृष्ट्वा रतान्तच्युततारहारमुक्ताभ्रमं बिभ्रति सिद्धवध्वः ॥ ४३ ॥

निशास्विति ॥ यत्र स्फटिकाचले स्फटिकालयेषु प्रतिबिम्बितानि ताराकु-लानि नक्षत्रकुलानि निशासु दृष्ट्वा सिद्धवध्वः किंनरनार्यो रतान्ते च्युतो भ्रष्ट-स्तारोऽत्युज्ज्वलो हारो मुक्ताहारः ॥ "तारोऽत्युज्ज्वलमौक्तिके" इत्यमरः ॥ तस्य या मुक्ता मौक्तिकानि तासां भ्रमं बिभ्रति । स्फटिकालयप्रतिबिम्बितमुक्तागण-नक्षत्रकुलमभिवीक्ष्य सुरतान्तकालीनहारभ्रंशोन्मुक्तमुक्ताफलभ्रान्तिमत्यः सि-द्धवध्वो भवन्तीति भावः ॥

नभश्चरीमण्डनदर्पणश्रीः सुधानिधिर्मूर्धनि यस्य तिष्ठन् ।
अनर्घ्यचूडामणितामुपैति शैलाधिनाथस्य शिवालयस्य ॥४४॥

नभश्चरीति ॥ नभसि चरन्तीति नभश्चरी । आकाशचारिणीत्यर्थः ॥ "चरे-ष्टः" इति टप्रत्यये टित्वात् "टिड्ढाणञ्-" इति ङीप् ॥ तथोक्ता मण्डनस्य वि-भागस्य यो दर्पण आदर्शस्तस्य श्रीरिव श्रीर्यस्य तथोक्तः ॥ अत्र श्रीशब्दस्य स्व-

१ नभ. २ रतान्ते. ३ टित्वाद्दगटः.

त्वेन शोभेतिसंज्ञावाचकत्वात् "संज्ञापूरण्योश्च" इति पुंवद्भावो न ॥ सुधानिधिश्चन्द्रो यस्य कैलासस्य मूर्धनि शृङ्गे तिष्ठन्। शिवालयस्य शिवाः कल्याणकारिण आलया गृहा यत्र तस्य। शैलानामधिनाथस्य पत्युर्हिमालयस्यानर्घ्यश्चूडामणिस्तत्तामुपैति। हिमालयशिखरस्य कैलासशिखरात्किंचिदधिकत्वम्। यदा कैलासमूर्धनि चन्द्रस्तदा हिमालयस्य मूर्ध्नोऽधः किंचिद्वर्तत इति भावः ॥

समीयिवांसो रहसि स्मरार्ता रिरंसवो यत्र सुराः प्रियाभिः।
एकाकिनोऽपि प्रतिबिम्बभाजो विभान्ति भूयोभिरिवान्विताः स्वैः॥

समीयिवांस इति ॥ यत्र सुराः स्मरार्ता अतएव रिरंसवो रन्तुमिच्छन्तः॥ रमतेः सन्नन्तात् "सनाशंसभिक्ष उः" इत्युप्रत्ययः ॥ तथोक्ताः। अत एव प्रियाभिः सहैकाकिनोऽपि प्रत्येकमेकसंख्याका अपि रहसि समीयिवांसः प्राप्नुवन्तो भूयोभिः स्वैर्देहैरन्विता इव विभान्ति। यतः प्रतिबिम्बभाजः। प्रतिबिम्बवशादेक एवानेकधा दृश्यत एवेति युक्तमेवेति भावः ॥

देवोऽपि गौर्या सह चन्द्रमौलिर्यदृच्छया स्फाटिकशैलशृङ्गे।
शृङ्गारचेष्टाभिरनारताभिर्मनोहराभिर्व्यहरच्चिराय ॥ ४६ ॥

देवोऽपीति ॥ चन्द्रमौलिर्देवोऽपि हरोऽपि स्फाटिकशैलः कैलासस्तस्य शृङ्गे शिखरे ॥ "शृङ्गं प्रभुत्वे शिखरे" इति मेदिनी ॥ गौर्या पार्वत्या सह यदृच्छया स्वेच्छया। यथाकाममित्यर्थः। मनोहराभिरत एवानारताभिर्निरन्तरं भवन्तीभिः शृङ्गारचेष्टाभिश्चिरायव्यहरद्विजहार ॥

देवस्य तस्य स्मरसूदनस्य हस्तं समालिङ्ग्य सुविभ्रमश्रीः।
सा नन्दिना वेत्रभृतोपदिष्टमार्गा पुरोगेण कलं चचाल ॥४७॥

देवस्येति ॥ सुविभ्रमश्रीः शोभना विभ्रमस्य विलासस्य श्रीर्यस्याः सा पार्वती। स्मरसूदनस्य स्मरविनाशकस्य तस्य देवस्य हरस्य हस्तं समालिङ्ग्य। अवलम्ब्येत्यर्थः। वेत्रभृता यष्टिधारकेण तथा पुरोगेणाग्रगामिना नन्दिना गणेनोपदिष्टमार्गेणो गमनं विधेयमिति प्रदर्शितमार्गा सती कलं मधुरं यथा तथा चचाल। मन्थरां गतिमकार्षीदित्यर्थः ॥

चलच्छिरायो विकटाङ्गभङ्गः सुदन्तुरः शुष्कसुतीक्ष्णतुण्डः।
भुवोपदिष्टः स तु शंकरेण तस्या विनोदाय ननर्त भृङ्गी ॥ ४८

१ रिष्ट.. २ समालम्ब्य. ३ उपदिष्ट मार्गेण, ४ चलच्छिरागः. ५ मदन्तुरः. ६ शुष्क. ७ टि.

चलदिति ॥ चलन्ति शिखाग्राणि चूडाग्राणि यस्य ॥ "शिखा शाखा बर्हिचूडा लाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च" इति मेदिनी ॥ तथा विकटाः कराला अङ्गभङ्गा नृत्यचेष्टाविशेषा यस्य ॥ "विकटो यज्ञवाराह्यां त्रिषु रुचिकरालयोः" इति मेदिनी ॥ तथा सुदन्तुर उन्नतः ॥ "दन्तुरस्तून्नते त्रिषु" इति मेदिनी ॥ "दन्त उन्नत उरच्" इत्युरच्प्रत्ययः ॥ शृङ्गं शुभ्रं सुतीक्ष्णं सुतरां तिग्मं तुण्डं मुखं यस्य । एतादृशः स प्रसिद्धो भृङ्गी गणविशेषस्तु । तस्या भवान्या विनोदायानन्दाय शंकरेण भ्रुवोपदिष्टः प्रेरितः सन्ननर्त ॥

कण्ठस्थलीलोलकपालमाला दंष्ट्राकरालाननमभ्यनृत्यत् ।
प्रीतेन तेन प्रभुणा नियुक्ता काली कलत्रस्य मुदे प्रियस्य ॥४९

कण्ठस्थलीति ॥ कण्ठस्य स्थल्यां लोला कपालानां नृकपालानां माला यस्याः । तथा दंष्ट्राभिः करालं भयानकमाननं बिभ्रती काली कालिका ॥ "काली तु कालिकाक्षीरकीटेषु परिकीर्तिता" इति मेदिनी ॥ प्रियस्य कलत्रस्य पार्वत्या मुदे प्रीत्यै तेन प्रभुणा हरेण प्रीतेन सता नियुक्ता प्रेरिता सती । अभ्यनृत्यमनर्त ॥ नृत्यतेर्दैवादिकात्कर्तरि लङ् ॥

भयंकरौ तौ विकटं नदन्तौ विलोक्य बाला भयविह्वलाक्षी ।
सरागमुत्सङ्गमनङ्गशत्रोर्गाढं प्रसह्य स्वयमालिलिङ्ग ॥ ५० ॥

भयंकराविति ॥ विकटं करालं यथा तथा नदन्तौ शब्दायमानौ । अत एव भयंकरौ तौ कालीभृङ्गिणौ विलोक्य भयेन विह्वलमक्षि यस्याः सा बाला पार्वती प्रसह्य बलात्कारेण स्वयमात्मनैवानङ्गशत्रोर्हरस्योत्सङ्गं सरागं सानुरागं यथा तथा॥ "सरङ्गम्" इति पाठे भावे नलोपश्छन्दसः ॥ गाढमालिलिङ्ग । अन्योऽपि भीतः सन्वोढारमालिङ्गति तद्वदिति भावः ॥

उत्तुङ्गपीनस्तनपिण्डपीडं ससंभ्रमं तत्परिरम्भमीशः ।
प्रपद्य सद्यः पुलकोपगूढः स्मरेण रूढप्रमदो ममाद ॥ ५१ ॥

उत्तुङ्गेति ॥ ईशो हरो रूढोत्पर्षितदा प्रमदा पार्वती यस्मात् एवोत्तुङ्गमूर्ध्वः-पीनं पुष्टं परस्तनपिण्डम् । उभयोर्गाढमनुरक्तया परस्परसंयुक्तत्वात्पिण्डीभूतौ स्तनाविति भावः । तेन कृत्वा पीडा यत्र । तथा ससंभ्रमं सत्वरं तस्यास्तत्कर्तृकं परिरम्भ-

---

१ प्रभुणा. २ नाल्यो. ३ सुरहर. ४ दोः.

माश्लेषं प्रपद्य प्राप्य स्मरेण कामेन हेतुना सद्यः सहसा पुलकितवपुः मन्मथाद्मत्तो बभूव ॥

इति गिरितनुजाविलासलीलाविविधविभङ्गिभिरेष तोषितः सन् ।
अमृतकरशिरोमणिर्गिरीन्द्रे कृतवसतिर्वशिभिर्गणैर्ननन्द ॥ ५२ ॥

इतीति ॥ गिरीन्द्रे कैलासे कृता वसतिर्येन । तथामृतकरश्चन्द्रः शिरसि मणिरिव यस्य स एष हर इत्येवंभूतैर्गिरिरतनुजायाः पार्वत्याः संबन्धिनी या विलासलीला सकामचेष्टक्रीडा तस्या विविधा नानाविधा या विभङ्ग्यो रचनास्ताभिस्तोषितः प्रीतः सन् । वशिभिः स्ववशंगतैर्गणैर्नन्दिप्रभृतिभिः सह ननन्द जहर्ष । तेषां हर्षोऽनयोरलौकिकक्रीडादर्शनादिति भावोऽनुसंधेयः ॥ पुष्पिताग्रावृत्तम्—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कैलासगमनो नाम नवमः सर्गः ।

दशमः सर्गः ।

आससाद सुनासीरं सदसि त्रिदशैः सह ।
एष त्रैयम्बकं तीव्रं वहन्वह्निर्महन्महः ॥ १ ॥

आससादेति ॥ एष वह्निः । तीव्रं दुःसहं महत्त्रैयम्बकं शैवम् ॥ त्र्यम्बकशब्दात् "इदमर्थेकेऽणि नय्वाभ्याम्" इत्यैजादेशः ॥ महो वीर्यं वहन् । त्रिदशैर्देवैः सह सदसि सभायां स्थितं सुनासीरं महेन्द्रमाससाद प्राप ॥ "वृद्धश्रवाः सुनासीरः" इत्यमरः ॥

सहस्रेण दृशामीशो कुत्सिताङ्गं च सादरम् ।
दुर्दर्शनं ददर्शाग्निं धूम्रर्धूमितमण्डलम् ॥ २ ॥

सहेति ॥ कुत्सिताङ्गमत एव दुर्दर्शनं धूम्रं धूम्रवर्णं धूमितं संजातधूमम् ॥ तारकादित्वादितच् ॥ मण्डलं यस्य तमग्निमीशो महेन्द्रो दृशां सहस्रेण सादरं यथा तथा ददर्श दृष्टवान् ॥

---

१ सुतया. २ तेषु; मता. ३ सुसदां सोऽतिसादरम्; सुसदां सदि सादरम्. ४ धूमिल.

दृष्ट्वा तथाविधं वह्निमिन्द्रः क्षुब्धेन चेतसा ।
व्यचिन्तयच्चिरं किंचित्कंदर्पद्वेपिरोपजम् ॥ ३ ॥

दृष्ट्वेति ॥ इन्द्रो वह्निं तथाविधं दृष्ट्वा क्षुब्धेन संचलितेन चेतसा कंदर्पद्वेपिणो हरस्य रोषाज्जातं किंचिदपराधलक्षणं चिरं व्यचिन्तयत् ॥

स विलक्ष्यमुखैर्देवैर्वीक्ष्यमाणः क्षणं क्षणम् ।
उपाविशत्सुरेन्द्रेणादिष्टं सादरमासनम् ॥ ४ ॥

स इति ॥ सोऽग्निर्विलक्ष्यमुखैर्म्लानमुखैर्देवैः क्षणं क्षणं प्रतिक्षणं वीक्ष्यमाणो दृश्यमानः सन् । सुरेन्द्रेण सादरमादिष्टमासनमुपाविशत् ॥

हव्यवाह त्वयासादि दुर्दशेयं दशा कुतः ।
इति पृष्टः सुरेन्द्रेण स निःश्वस्य वचोऽवदत् ॥ ५ ॥

हव्यवाहेति ॥ सोऽग्निः । हे हव्यवाह । त्वया दुर्दशेयं दशावस्था कुतो हेतोरासादि प्रापीति सुरेन्द्रेण पृष्टः सोऽग्निःश्वस्य निःश्वासं कृत्वा वचो वक्ष्यमाणमवदत् ॥

अथ युग्मेनाह—

अनतिक्रमणीयात्ते शासनात्सुरनायक ।
पारावतं वपुः प्राप्य वेपमानोऽतिसाध्वसात् ॥ ६ ॥
अभिगौरीरतासक्तं जगामाहं महेश्वरम् ।
कालस्येव स्मरारातेः स्वं रूपमहमासदम् ॥ ७ ॥

अनतीति । अभिगौरीति ॥ हे सुरनायक । अहं पारावतं कापोतं वपुः प्राप्यानतिक्रमणीयादनुल्लङ्घनीयात्ते तव शासनाद्धेतोरभिगौरि गौर्यामित्यभिगौरि ॥ “अव्ययं विभक्ति-” इत्यादिना विभक्त्यर्थेऽव्ययीभावः ॥ रतासक्तं महेश्वरं जगाम प्राप ॥ जगामेति लिट उत्तमपुरुषैकवचनम् ॥ अथ चातिसाध्वसाद्वेपमानः कम्पमानोऽहं कालस्येव । तद्वद्भयानकस्येत्यर्थः । स्मरारातेर्हरस्य । पुर इति शेषः । स्वं रूपमाग्नेयस्वरूपमासदं प्रापम् ॥ लुङ उत्तमपुरुषैकवचनम् ॥

दृष्ट्वा छद्मविहंगं मां क्रुद्धो विज्ञाय जम्भभित् ।
ज्वलद्भालानले होतुं कोपनो माममन्यत ॥ ८ ॥

---

१ क्रुद्धेन. २ सवनदृष्टमुखैः; सविलक्षमुखैः. ३ मुनहादुर्दशा; सुदुर्दर्शा दशा. ४ अभिगौरी. ५ उमासनम्. ६ भ्रमभृत्; यद्भिन्न. ७ कोपनः. ८ भयममन्यत; मामन्वेददत्.

माश्लेषं प्रपद्य प्राप्य स्मरेण कामेन हेतुना सद्यः सहसा पुलकितपगूढः सन्ममाद मत्तो बभूव ॥

इति गिरितनुजाविलासलीलाविविधविभङ्गिभिरेष तोषितः सन्।
अमृतकरशिरोमणिर्गिरीन्द्रे कृतवसतिर्वशिभिर्गणैर्ननन्द ॥ ५२ ॥

इतीति ॥ गिरीन्द्रे कैलासे कृता वसतिर्येन । तथामृतकरश्चन्द्रः शिरसि मणिरिव यस्य स एष हर इत्येवंभूतोगिरितनुजायाः पार्वत्याः संबन्धिनी या विलासलीला सकामचेष्टक्रीडा तस्या विविधा नानाविधा या विभङ्ग्यो रचनास्ताभिस्तोषितः प्रीतः सन् । वशिभिः स्ववशंगतैर्गणैर्नन्दिप्रभृतिभिः सह ननन्द जहर्ष। तेषां हर्षोऽनयोरलौकिकक्रीडादर्शनादिति भावोऽनुसंधेयः ॥ पुष्पिताग्रावृत्तम्— "अयुजि नयुगरेफतो यकारो युजि च नजौ जरजाश्च पुष्पिताग्रा" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कैलासगमनो नाम नवमः सर्गः ।

दशमः सर्गः ।

आससाद सुनासीरं सदसि त्रिदशैः सह ।
एष त्रैयम्बकं तीव्रं वहन्वह्निर्महन्महः ॥ १ ॥

आससादेति ॥ एष वह्निः । तीव्रं दुःसहं महत्त्रैयम्बकं शैवम् ॥ त्र्यम्बकशब्दात् "इदमर्थकेऽणि नय्वाभ्याम्" इत्यैजादेशः ॥ महो वीर्यं वहन् । त्रिदशैर्देवैः सह सदसि सभायां स्थितं सुनासीरं महेन्द्रमाससाद प्राप ॥ "वृद्धश्रवाः सुनासीरः" इत्यमरः ॥

सहस्रेण दृशामीशो कुत्सिताङ्गं च सादरम् ।
दुर्दर्शनं ददर्शाग्निं धूम्रर्धूमितमण्डलम् ॥ २ ॥

सहेति ॥ कुत्सिताङ्गमत एव दुर्दर्शनं धूम्रं धूम्रवर्णं धूमितं संजातधूमम् ॥ तारकादित्वादितच् ॥ मण्डलं यस्य तमग्निमीशो महेन्द्रो दृशां सहस्रेण सादरं यथा तथा ददर्श दृष्टवान् ॥

---

१ मुतया. २ तद; मता. ३ युसदां सोऽग्निसादरम्; युसदां सद्दि सादरम्. ४ धूमिल.

धाभिव्यञ्जकत्वे न दोषः । च्युतं पतितममोघं सफलं त्रिजगद्दाहकमत एव सुदुर्वहं सुतरां दुःखेन वोढुं शक्यं रेतः शुक्रं मद्विग्रहमधि । मम शरीर इत्यर्थः । सद्यो न्यधात् ॥ "अधिमद्विग्रहम्" इति वक्तव्ये मद्विग्रहमधीत्युक्तं महाकविप्रयोगान्न दोषाय ॥

दुर्विषहेण तेनाहं तेजसा दहनात्मना ।
निर्दग्धमात्मनो देहं दुर्वहं वोढुमक्षमः ॥ १३ ॥

दुर्विषहेणेति ॥ दहनात्मनाग्निरूपेणात एव दुर्विषहेण दुःखेन सोढुं शक्येन ॥ "शकिसहोश्च" इति यत् ॥ तेन तेजसा वीर्येण निर्दग्धमत एव दुर्वहमात्मनो देहं वोढुमहमक्षमोऽस्मि । यथाहं क्षमः स्यां तथैव त्वयाशु विधेयमिति व्यज्यते ॥

रौद्रेण दह्यमानस्य महसातिमहीयसा ।
मम प्राणपरित्राणप्रगुणो भव वासव ॥ १४ ॥

रौद्रेणेति ॥ हे वासव इन्द्र । अतिमहीयसा रौद्रेण शाम्भवेन महसा तेजसा दह्यमानस्य मम प्राणानां परित्राणेन प्रगुणो विख्यातो भव । मम प्राणत्राणे भवतो महद्यशो भविष्यतीति भावः ॥

इति श्रुत्वा वचो वह्नेः परितापोपशान्तये ।
हेतुं विचिन्तयामास मनसा विबुधेश्वरः ॥ १५ ॥

इतीति ॥ विबुधानामीश्वरो महेन्द्रो वह्नेरग्नेरित्थंभूतं वचः श्रुत्वा परितापस्योपशान्तये । अर्थात्तस्यैवेत्यर्थः । मनसा हेतुं निदानं विचिन्तयामास । केनोपायेनास्य तापोपशान्तिर्भवेदिति विचारयामासेत्यर्थः ॥

तेजोदग्धानि गात्राणि पाणिनास्य परामृशन् ।
किंचित्कृपीटयोनिं तं दिवस्पतिरभाषत ॥ १६ ॥

तेज इति ॥ दिवस्पतिरिन्द्रस्तं कृपीटयोनिमग्निं [illegible] तेजसा शाम्भवेन धाम्ना दग्धानि प्लुष्टान्यस्याग्नेर्गात्राणि पाणिना परामृशन्स्पृशन्सन् । किंचिद्वक्ष्यमाणमभाषताब्रवीत् ॥ भाषतेर्द्विकर्मकत्वं हि ब्रुवर्थनिबन्धनात् । "अर्थनिबन्धनेयं संज्ञा" इति वार्तिकात् ॥ "कृपीटयोनिर्ज्वलनः" इत्यमरः । "[illegible]" इति च ॥

अथेन्द्रोऽग्निं [illegible] स्तौति—

प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान्पितॄन्मनुष्यांस्त्वमेकस्तेषां मुखं यतः ॥ १७ ॥

दृष्ट्वेति ॥ हे जम्भभिदिन्द्र । सुधीः हरो मां दृष्ट्वा । अथ न छद्मना विंगं विज्ञाय ज्ञात्वा ॥ दर्शनमात्रादेव तु कापट्यानवगम एव किं तु विलम्बोपस्थिततया । अतो ज्ञानदर्शनयोर्भिन्नकालीनत्वात्पृथग्व्यपदेशः । अतो त्यक्त्वयस्य मननक्रियापेक्षया पूर्वत्वेनान्वयः ॥ कोपनः क्रोधनः सन् ॥ "क्रुधमण्डार्थेभ्यश्च" इति युच् ॥ मां ज्वलति भालस्थेऽनलेऽग्नौ होतुं दग्धुममन्यत मेने । मननमत्र विचारणं तद्धवनफलकमिति । अहमेनमग्नौ धक्ष्यामीति विचचारेत्यर्थः ॥

वचोभिर्मधुरैः सार्थैर्विनम्रेण मया स्तुतः ।
प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ॥ ९ ॥

वचोभिरिति ॥ मया विनम्रेण सता सार्थैः साभिप्रायार्थैरत एव मधुरैर्मनोहरैर्वचोभिः ॥ करणैः ॥ स्तुत ईडितो देवो हरः प्रीतिमानभवत् । मदुपरि प्रसन्नो देत्यर्थः । तथाहि । स्तोत्रं स्तुतिः ॥ "स्तवः स्तोत्रं स्तुतिर्नुतिः" इत्यमरः ॥ कस्य तुष्ट्यै संतोषाय न भवति । अपि तु सर्वस्यापीत्यर्थः ॥ अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

शरण्यः सकलत्राता मामत्रायत शंकरः ।
क्रोधाग्नेर्ज्वलतो ग्रासात्त्रासतो दुर्निवारतः ॥ १० ॥

शरण्य इति ॥ शरण्यः शरणे साधुः ॥ "तत्र साधुः" इति यत्प्रत्ययः ॥ अत एव सकलत्राता सर्वेषां रक्षिता । एवंभूतः शंकरो हरो ज्वलतो दीप्यमानस्य दुर्निवारतो दुःखेन निवारयितुं शक्यस्य क्रोधाग्नेः क्रोधाग्निकर्तृकाद्ग्रासाद्ग्रासो भयं तस्मान्मामत्रायत ररक्ष ॥ "त्रैङ् पालने" । लङ् ॥

परिहृत्य परीरम्भरभसं दुहितुर्गिरेः ।
कामकेलिरसोत्सेकाद्व्रीडया विरराम सः ॥ ११ ॥

परिहृत्येति ॥ स हरो गिरेर्दुहितुः पार्वत्याः संबन्धिनं परीरम्भरभसं परिहृत्योत्सृज्य व्रीडया हेतुभूतया कामस्य केलेः रसस्योत्सेकान्मानसस्यासक्तेर्विरराम विरतोऽभूत् ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥

रङ्गभङ्गच्युतं रेतस्तदामोघं सुदुर्वहम् ।
त्रिजगद्दाहकं सद्यो मद्विग्रहमधिन्यधात् ॥ १२ ॥

रङ्गेति ॥ तदा स हरो रङ्गस्य कामकेलेर्भङ्गादन्तरायात् । अस्य हेतोः क्रो-

१ सान्त्वैः. २ ग्रासत्रासतः. ३ परीरम्भं रभसात्. ४ तदमोघम्. ५ सुदुर्धरम्. ६ अभिन्यधात्.

ाभिव्यञ्जकत्वे न दोषः । च्युतं पतितममोघं सफलं त्रिजगद्दाहकमत एव सुदु-
हं सुतरां दुःखेन वोढुं शक्यं रेतः शुक्रं मद्विग्रहमधि । मम शरीर इत्यर्थः । स-
ो न्यधात् ॥ "अधिमद्विग्रहम्" इति वक्तव्ये मद्विग्रहमधीत्युक्तं महाकविप्रयो-
ान्न दोषाय ॥

दुर्विषह्येण तेनाहं तेजसा दहनात्मना ।
निर्दग्धमात्मनो देहं दुर्वहं वोढुमक्षमः ॥ १३ ॥

दुर्विषह्येणेति ॥ दहनात्मनाग्निरूपेणात एव दुर्विषह्येण दुःखेन वोढुं शक्येन ॥
"शकिसहोश्च" इति यत् ॥ तेन तेजसा वीर्येण निर्दग्धमत एव दुर्वहमात्मनो
देहं वोढुमहमक्षमोऽस्मि । यथाहं क्षमः स्यां तथैव त्वयाशु विधेयमिति व्यज्यते ॥

रौद्रेण दह्यमानस्य महसातिमहीयसा ।
मम प्राणपरित्राणप्रगुणो भव वासव ॥ १४ ॥

रौद्रेणेति ॥ हे वासव इन्द्र । अतिमहीयसा रौद्रेण शांभवेन महसा तेजसा
दह्यमानस्य मम प्राणानां परित्राणेन प्रगुणो विख्यातो भव । मम प्राणत्राणे भ-
वतो महद्यशो भविष्यतीति भावः ॥

इति श्रुत्वा वचो वह्नेः परितापोपशान्तये ।
हेतुं विचिन्तयामास मनसा विबुधेश्वरः ॥ १५ ॥

इतीति ॥ विबुधानामीश्वरो महेन्द्रो वह्नेरितीत्येवंभूतं वचः श्रुत्वा प-
रितापस्योपशान्तये । अर्थात्तस्यैवेत्यर्थः । मनसा हेतुं निदानं विचिन्तयामास ।
केनोपायेनास्य तापोपशान्तिर्भवेदिति विचारयामासेत्यर्थः ॥

तेजोदग्धानि गात्राणि पाणिनास्य परामृशन् ।
किंचित्कृपीटयोनिं तं दिवस्पतिरभाषत ॥ १६ ॥

तेज इति ॥ दिवस्पतिरिन्द्रस्तं कृपीटयोनिमग्निं कर्मभूतं तेजसा शांभवेन धा-
म्ना दग्धानि दुष्टान्यस्याग्नेर्गात्राणि पाणिना परामृशन्स्पृशन्सन् । किंचिद्वक्ष्य-
माणमभाषतोवाच ॥ भाषतेर्द्विकर्मकत्वं द्रुहादिषु पठितत्वात् । " अर्थनिबन्धनेयं
संज्ञा " इति वार्त्तिकात् ॥ " कृपीटयोनिर्ज्वलनः " इत्यमरः । " जातमन्युर्दिव-
स्पतिः " इति च ॥

अथेन्द्रोऽग्निं सप्तभिः स्तौति—

प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान्पितॄन्मनुष्यांस्त्वमेकस्तेषां मुखं यतः ॥ १७ ॥

दृष्ट्वेति ॥ हे जम्भभिदिन्द्र । सुप्तो हरो मां दृष्ट्वा । अथ च छद्मना विहंगं विज्ञाय ज्ञात्वा ॥ दर्शनमात्रादेव तु कापट्यानवगम एव किं तु विलम्बोपस्थिततया । अतो ज्ञानदर्शनयोर्भिन्नकालीनत्वात्पृथग्व्यपदेशः । अतो ल्यब्द्वयस्य मननक्रियापेक्षया पूर्वत्वेनान्वयः ॥ कोपनः क्रोधनः सन् ॥ "क्रुधमण्डार्थेभ्यश्च" इति युच् ॥ मां ज्वलति भालस्थेऽनलेऽग्नौ होतुं दग्धुममन्यत मेने । मननमत्र विचारणं तद्धवनफलकमिति । अहमेनमग्नौ धक्ष्यामीति विचचारेत्यर्थः ॥

वचोभिर्मधुरैः सार्थैर्विनम्रेण मया स्तुतः ।
प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ॥ ९ ॥

वचोभिरिति ॥ मया विनम्रेण सता सार्थैः साभिप्रायार्थैरत एव मधुरैर्मनोहरैर्वचोभिः ॥ करणैः ॥ स्तुत ईडितो देवो हरः प्रीतिमानभवत् । मदुपरि प्रसन्नोऽभूदित्यर्थः । तथाहि । स्तोत्रं स्तुतिः ॥ "स्तवः स्तोत्रं स्तुतिर्नुतिः" इत्यमरः ॥ कस्य तुष्टये संतोषाय न भवति । अपि तु सर्वस्यापीत्यर्थः ॥ अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥

शरण्यः सकलत्राता मामत्रायत शंकरः ।
क्रोधाग्नेर्ज्वलतो भ्रान्ताञ्त्रासतो दुर्निवारतः ॥ १० ॥

शरण्य इति ॥ शरण्यः शरणे साधुः ॥ "तत्र साधुः" इति यत्प्रत्ययः ॥ अत एव सकलत्राता सर्वेषां रक्षिता । एवंभूतः शंकरो हरो ज्वलतो दीप्यमानस्य दुर्निवारतो दुःखेन निवारयितुं शक्यस्य क्रोधाग्नेः क्रोधाग्निकर्तृकाद्भ्रान्तात्त्रासाद्भयात्तस्मान्मामत्रायत ररक्ष ॥ "त्रैङ् पालने" । लङ् ॥

परिहृत्य परीरम्भरभसं दुहितुर्गिरेः ।
कामकेलिरसोत्सेकाद्व्रीडया विरराम सः ॥ ११ ॥

परिहृत्येति ॥ स हरो गिरेर्दुहितुः पार्वत्याः संबन्धिनं परीरम्भरभसं परिहृत्योत्सृज्य व्रीडया हेतुभूतया कामस्य केले रसस्योत्सेकान्मानसस्यासक्तेर्विरराम विरतोऽभूत् ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥

रतभङ्गच्युतं रेतस्तदामोघं सुदुर्वहम् ।
त्रिजगद्दाहकं सद्यो मद्विग्रहमधि न्यधात् ॥ १२ ॥

रतेति ॥ तदा स हरो रतस्य कामकेलेर्भङ्गाद्न्तरायात् । अस्य हेतोः सं-

१ स्तवैः. २ मनस्तापात्. ३ परीरम्भं रभस. ४ मदमोघम्. ५ सुदुर्धरम्. ६ अधिन्यधात्.

नि भूतानि च त्वत्तो भवन्त्युत्पद्यन्ते । तत उभयकारणतस्त्वं जीवितानि प्राणितानि भूतानि येन तथोक्तो जगतः प्राणदश्चासि ॥ अग्नेरन्तराधेयतयैव प्राणिनां जीवनमतो जीवितभूतत्वम् । अग्नेरेव जगदुत्पादकतया प्राणदत्वं चार्थात्सिद्धम् । उत्तरवाक्यद्वयस्य पूर्ववाक्यद्वयान्तर्गतत्वात्पृथक्त्वेन ग्रहणं व्यर्थमिति चेन्न । अन्तर्व्यापित्वजीवितभूतत्वयोः साहचर्यमयुक्तं न सामानाधिकरण्यम् । यस्य यत्र यत्रान्तर्भावित्वं तस्य तत्र तत्र जीवितभूतत्वमिति नियमाभावात् । न च वह्निसंबन्धावच्छिन्नत्वेन तयोः सामानाधिकरण्यमिति वाच्यम् । वह्निसंबन्धावच्छिन्नत्वमन्तर्व्याप्तेः । तप्तायःपिण्डे न तत्र जीवितभूतत्वम् । अतो वह्निसंबन्धावच्छिन्नत्वेनापि समानाधिकरणतानियमः कर्तुं न शक्यते । उत्पादकत्वप्राणदत्वयोः साहचर्यनियमाभावात् । कुलालस्य घटस्युत्पादकत्वे प्राणदत्वं नास्ति । घटमुत्पादयतोऽपि कुलालस्य न जीवनदातृत्वमित्यलं विवादेन । अतिगहनोऽयं विवादः ॥ "जगतः" इति षष्ठी प्राणान्वयात्तु दानान्वयात् । अन्यथा "कर्मणा यमभिप्रैति स संप्रदानम्" इति संप्रदानत्वाच्चतुर्थी प्रसज्जेतेति । ननु जगत इत्यस्य प्राणान्वये केवलसंबन्धवाचकत्वेन तस्य नित्यसंप्रदानविवक्षा केन निरास्यते । एवं च संप्रदानान्तरं मृग्यं स्यात् । अथवा जगत्संबन्धिनां प्राणानां दानं जगत्संप्रदानकमेवेत्यर्थात्संप्रदानसिद्धिः ॥

जगतः सकलस्यास्य त्वमेकोऽस्युपकारकृत् ।
कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते ॥ २२ ॥

जगत इति ॥ भो अग्ने । त्वमेक एवास्य सकलस्य जगत उपकारकृद्धितकृदसि । अत एवास्माकं तत्र कार्योपपादने त्वत्तोऽन्यः ॥ "अन्यारात्–" इति पञ्चमी ॥ कः प्रगल्भते समर्थो भवेत् । न कोऽपीत्यर्थः ॥

अमीषां सुरसंघानां त्वमेकोऽर्थसमर्थने ।
विपत्तिरपि संश्लाघ्योपकारव्रतिनोऽनल ॥ २३ ॥

अमीषामिति ॥ भो अनल । अमीषां सुरसंघानां देवसमूहानामस्मदादीनामर्थसमर्थने कार्यसाधने विषये त्वमेक एव समर्थोऽसि ॥ एवंविधोऽप्यहं विरघः किं करोमीत्याह— विपत्तिरिति ॥ उपकारेषु परहितेषु व्रतिनो नियमवतः पुरुषस्य विपत्तिरपि संश्लाघ्या भवति । अतो विपत्तोऽपि स्तूयत इति भावः ॥

---

१ सुरैस्त्वानाम् । २ विपत्तेऽपि वद श्लाघ्योऽपकारव्रतिनो हि म.; विपत्तेऽपि वद श्लाघ्योपकारव्रतिनो हि म.

प्रीत इति ॥ भो अग्ने । त्वं प्रीतः सन् । स्वाहाकारः स्वधाकारो हन्तकार एतैः शब्दैः कृत्वा होतृभिः प्रक्षिप्तेन हविषेति शेषः । देवानिन्द्रादीन्पितृन्मनुष्यांश्च स्वयं प्रीणयसे प्रसादयसि । कथमेतान्प्रसादयामीत्याह—यत एक एव त्वं तेषां देवादीनां मुखमसि ॥

त्वयि जुह्वति होतारो हवींषि ध्वस्तकल्मषाः ।
भुञ्जन्ति स्वर्गमेकस्त्वं स्वर्गप्राप्तौ हि कारणम् ॥ १८ ॥

त्वयीति ॥ होतारो हवींषि त्वयि जुह्वति । अत एव ध्वस्तकल्मषाः सन्तः पापाः सन्तः स्वर्गं भुञ्जन्ति । हि यतस्त्वमेक एव स्वर्गप्राप्तौ कारणम् । "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिश्रुत्युक्तयागफलस्वर्गप्राप्तौ यागस्य त्वदायत्ततया कारणत्वोक्तेरिति भावः ॥

हवींषि मन्त्रपूतानि हुताश त्वयि जुह्वतः ।
तपस्विनस्तपःसिद्धिं यान्ति त्वं तपसां प्रभुः ॥ १९ ॥

हवींषीति ॥ भो हुताश । तपस्विनो मन्त्रपूतानि हवींषि त्वयि जुह्वतः सन्तः ॥ "नाभ्यस्ताच्छतुः" इति नुम्प्रतिषेधः ॥ तपःसिद्धिं यान्ति प्राप्नुवन्ति । यतस्त्वं तपसां प्रभुः ॥

निधत्से हुतमर्काय स पर्जन्योऽभिवर्षति ।
ततोऽन्नानि प्रजास्तेभ्यस्तेनासि जगतः पिता ॥ २० ॥

निधत्स इति ॥ भो अग्ने । त्वमर्काय देवान्तःपातिने सूर्याय हुतं हविर्निधत्से निधानरूपतया ददासि । अतः सोऽर्कः पर्जन्यः सन्नभिवर्षति । तद्वर्षणादन्नान्युत्पद्यन्ते । तेभ्योऽन्नेभ्यः प्रजा जायन्ते । तेन कारणेन जगतः पितासि ॥ पातीति पितेति व्युत्पत्त्या साधारणरक्षकस्यापि पितृत्वम् । न केवलं जनकस्यैवेति भावः । अत एवोक्तं नीतौ—"अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति । जनिता चोपनेता च पञ्चैते पितरः स्मृताः" इति ॥

अन्तश्चरोऽसि भूतानां तानि त्वत्तो भवन्ति च ।
ततो जीवितभूतस्त्वं जगतः प्राणदोऽसि च ॥ २१ ॥

अन्तरिति ॥ भो अग्ने । त्वं भूतानां प्राणिनामन्तश्चरोऽन्तर्व्याप्यसि । ता-

१ भुञ्जते. २ ततः. ३ नयसे. ४ प्रजायन्ते. ५ अन्तश्चरसि. ६ तत्त्वन्ति. ७ ततः ८ श्री-[?]रामायणः. ९ सर.

नि भूतानि च त्वत्तो भवन्त्युत्पद्यन्ते। तत उभयकारणतस्त्वं जीवितानि प्राणितानि भूतानि येन तथोक्तो जगतः प्राणदश्चासि॥ अग्नेरन्तराधेयतयैव प्राणिनां जीवनमतो जीवितभूतत्वम्। अग्नेरेव जगदुत्पादकतया प्राणदत्वं चार्थात्सिद्धम्। उत्तरवाक्यद्वयस्य पूर्ववाक्यद्वयान्तर्गतत्वात्पृथक्त्वेन ग्रहणं व्यर्थमिति चेन्न। अन्तर्व्यापित्वजीवितभूतत्वयोः साहचर्यमयुक्तं न सामानाधिकरण्यम्। यस्य यत्र यत्रान्तर्भावित्वं तस्य तत्र तत्र जीवितभूतत्वमिति नियमाभावात्। न च वह्निसंबन्धावच्छिन्नत्वेन तयोः सामानाधिकरण्यमिति वाच्यम्। वह्निसंबन्धावच्छिन्नत्वमन्तर्व्याप्तेः। तप्तायःपिण्डे न तत्र जीवितभूतत्वम्। अतो वह्निसंबन्धावच्छिन्नत्वेनापि समानाधिकरणतानियमः कर्तुं न शक्यते। उत्पादकत्वप्राणदत्वयोः साहचर्यनियमाभावात्। कुलालस्य घटस्योत्पादकत्वे प्राणदत्वं नास्ति। घटमुत्पादयतोऽपि कुलालस्य न जीवनदातृत्वशक्तिरित्यलं विवादेन। अतिगहनोऽयं विवादः॥ "जगतः" इति षष्ठी प्राणान्वयात्र तु दानान्वयात्। अन्यथा "कर्मणा यमभिप्रैति स संप्रदानम्" इति संप्रदानत्वाच्चतुर्थी प्रसज्जेतेति। ननु जगत इत्यस्य प्राणान्वये केवलसंबन्धवाचकत्वेन तस्य नित्यसंप्रदानविवक्षा केन निरास्यते। एवं च संप्रदानान्तरं मृग्यं स्यात्। अथवा जगत्संबन्धिनां प्राणानां दानं जगत्संप्रदानकमेवेत्यर्थात्संप्रदानसिद्धिः॥

जगतः सकलस्यास्य त्वमेकोऽह्युपकारकृत्।
कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते॥ २२॥

जगत इति॥ भो अग्ने। त्वमेक एवास्य सकलस्य जगत उपकारकृद्धितकृदसि। अत एवास्माकं तत्र कार्योपपादने त्वत्तोऽन्यः॥ "अन्यारात्–" इति पञ्चमी॥ कः प्रगल्भते समर्थो भवेत्। न कोऽपीत्यर्थः॥

अमीषां सुरसंघानां त्वमेकोऽर्थसमर्थने।
विपत्तिरपि संश्लाघ्योपकारव्रतिनोऽनल॥ २३॥

अमीषामिति॥ भो अनल। अमीषां सुरसंघानां देवसमूहानामस्मदादीनामर्थसमर्थने कार्यसाधने विषये त्वमेक एव समर्थोऽसि॥ एवंविधोऽप्यहं विपन्नः किं करोमीत्याह— विपत्तिरिति॥ उपकारेषु परहितेषु व्रतिनो नियमवतः पुरुषस्य विपत्तिरपि सम्यक्श्लाघ्या भवति। अतो विपन्नोऽपि स्तुत्य इति भावः॥

---

१ सुरसैन्यानाम्. २ विपदोऽपि परं श्लाघ्योऽपकारयति नो हि सः; विपदोऽपि परं श्लाघोपकारव्रतिनो हि सः.

संप्रत्युपायमुपदिशति—

देवी भागीरथी पूर्वं भक्त्यास्माभिः प्रतोषिता।
निमज्जतस्तवोदीर्णं तापं निर्वापयिष्यति ॥ २४ ॥

देवीति ॥ पूर्वमस्माभिर्भक्त्या प्रतोषिता भागीरथी देवी निमज्जतः स्नानं कुर्वतस्तवोदीर्णमत्युल्बणं तापं निर्वापयिष्यति। प्रशामयिष्यतीत्यर्थः ॥

गङ्गां तद्गच्छ मा कार्षीर्विलम्बं हव्यवाहन।
कार्येष्ववश्यकार्येषु सिद्धये क्षिप्रकारिता ॥ २५ ॥

गङ्गामिति ॥ भो हव्यवाहन। तत्तस्माद्गङ्गां देवीं गच्छ याहि। विलम्बं मा कार्षीर्मा कुरु ॥ "न माङ्योगे" इत्यडागमनिषेधः ॥ तथाहि। अवश्यकार्येष्ववश्यकर्तव्येषु कार्येषु सिद्धये क्षिप्रकारितानलसितत्वम्। उचितेति शेषः। तस्मात्त्वया शीघ्रमेव गन्तव्यमिति भावः ॥

ननु शक्रेणापि मया दुर्वाहं शैवं तेजो गङ्गा कथं धरिष्यतीत्याशङ्क्याह—

शंभोरम्भोमयी मूर्तिः सैव देवी सुरापगा।
त्वत्तः स्मरद्विषो बीजं दुर्धरं धारयिष्यति ॥ २६ ॥

शंभोरिति ॥ भो अग्ने। शंभोरम्भोमयी जलमयी मूर्तिर्देवी सा सुरापगैव गङ्गैव दुर्धरं स्मरद्विषो हरस्य बीजं तेजस्त्वत्त आदाय धारयिष्यति। धरिष्यतीत्यर्थः ॥ "शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च" इत्यमरः ॥

इत्युदीर्य सुनासीरो विरराम स चानलः।
तद्विसृष्टस्तमापृच्छ्य प्रतस्थे स्वर्धुनीमभि ॥ २७ ॥

इतीति ॥ इत्येवमुक्तमुदीर्योक्त्वा सुनासीर इन्द्रो विरराम। तूष्णीं तस्थावित्यर्थः ॥ विररामेति "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥ "वृद्धश्रवाः सुनासीरः" इत्यमरः ॥ सोऽनलश्चाग्निस्तु तद्विसृष्टस्तेन सुनासीरेण विसृष्टस्त्यक्तः। गन्तुमनुमत इत्यर्थः। तादृशः सन्। तमिन्द्रमापृच्छ्याहं गच्छामीत्याज्ञामादाय स्वर्धुनीं गङ्गामभि प्रतस्थे प्रस्थितवान् ॥

हिरण्यरेतसा तेन देवी स्वर्गतरंगिणी।
तीर्णाध्वना प्रपेदे सा निःशेषक्लेशनाशिनी ॥ २८ ॥

हिरण्येति ॥ तेन वह्निना तीर्णाध्वना तीर्णमार्गेण हिरण्यरेतसा वह्नि-

[illegible]

या निःशेषक्लेशनाशिनी निःशेषा ये क्लेशाः पञ्च क्लेशास्तेषां नाशिनी । मुक्तिदायिनीत्यर्थः । सा प्रसिद्धा स्वर्गतरंगिणी स्वर्णदी देवी प्रपेदे प्राप्ता ॥ कर्मणि लिट् ॥

अथ त्रिभिस्तामेव विशिनष्टि—

स्वर्गारोहणनिःश्रेणिर्मोक्षमार्गाधिदेवता ।

उदारदुरितोद्गारहारिणी दुर्गतारणी ॥ २९ ॥

स्वर्गेति ॥ स्वर्गे यदारोहणं तस्य निःश्रेणिः सोपानपङ्क्तिः । अस्यां स्नानमात्रेणैव स्वर्गमारोहन्तीत्यर्थः । पुनश्च मोक्षमार्गस्य मुक्तिपथस्याधिदेवता । यां प्रसाद्य मुक्तिमाप्नुवन्तीत्यर्थः । पुनश्चोदाराणामुत्कृष्टानां दुरितानां पापानामुद्गारस्य समूहस्य हारिणी । विनाशिनीत्यर्थः । पुनश्च तरन्त्यनया सा तारणी । दुर्गस्य संसाररूपस्य तारणी । संसारार्णवमनया तरन्तीत्यर्थः ॥ " तारणी " इति णिजन्तात्तरतेः " करणाधिकरणयोश्च " इति करणे ल्युट् । अतः " टिड्ढा–" इति ङीप् ॥ " तारिणी " इति पाठे तारयति लोकानिति तारिणी । दुर्गतारिणी ॥ अत्र णिनौ कृते " ऋन्नेभ्यः–" इति ङीप् ॥

महेश्वरजटाजूटवासिनी पापनाशिनी ।

वैरागान्वयनिर्वाणकारिणी धर्मधारिणी ॥ ३० ॥

महेश्वरेति ॥ पुनश्च महेश्वरस्य जटाजूटे वासिनी वसन्ती । पुनश्च पापनाशिनी ॥ अत्रापि तारणीवत्प्रत्ययव्यवस्था ॥ पुनश्च सगरस्य विरराजस्यान्वयस्य वंशस्यापि निर्वाणकारिणी मोक्षकारिणी । किं पुनर्विमुक्तानामित्यर्थः । धर्मं धारयति धर्मधारिणी । आत्मसंसर्गेण जन्तूनां धर्मवतः करोतीत्यर्थः ॥

विष्णुपादोदकोद्भूता ब्रह्मलोकादुपागता ।

त्रिभिः स्रोतोभिरश्रान्तं पुनाना भुवनत्रयम् ॥ ३१ ॥

विष्णुपादेति ॥ पुनश्च विष्णुपादोदकादुद्भूतोत्पन्ना । विष्णुपादोदकमेवात्मा यस्याः सेत्यर्थः । विष्णुपादोदकमेवोद्भूतं प्रादुर्भूतं रूपं यस्याः सेति वा । पुनश्च ब्रह्मलोकादुपागतागता । पुनश्च त्रिभिः स्रोतोभिः प्रवाहैर्भुवनत्रयं स्वर्गमर्त्यपाताललक्षणमश्रान्तं निरन्तरं यथा भवति तथा पुनाना । पवित्रीकुर्वतीत्यर्थः ॥ अत एव त्रिस्रोता इति नाम इत्यर्थः ॥ " पूञ् पवने " । शानच् । आत्मनेपद ॥

जातवेदसमायान्तमूर्मिहस्तैः समुत्थितैः ।
आजुहावार्थसिद्धयैतं सुप्रसादधरेव सा ॥ ३२ ॥

जातवेदसमिति ॥ सुतरामतिशयितो यः प्रसादस्तस्य धरा धारिणी सा गङ्गा । आयान्तमागच्छन्तं तं जातवेदसमग्निमर्थसिद्धया अर्थसिद्धिं कर्तुं समुत्थितैरुच्चलितैरूर्मय एव हस्तास्तैः कृत्वाजुहावेव । अन्योऽपि हस्तसंकेतेन कंचिदाह्वयति । पुनः पुनरूर्मिसमुत्थानं तत्कर्तृकमाह्वानमिवेत्युत्प्रेक्षा ॥ आङ्पूर्वाद्ध्वः कर्तरि लिट् ॥

संमिलद्भिर्मरालैः सा कलं कूजद्भिरुन्मदैः ।
ददे श्रेयांसि दुःखानि निहन्मीति तमभ्यधात् ॥ ३३ ॥

संमिलद्भिरिति ॥ संमिलद्भिः सम्यङ्मिलन्त्येकीभवन्तीति तथोक्तैः । तथोन्मदैरुन्मत्तैरत एव कलं मधुरं यथा भवति तथा कूजद्भिः शब्दायमानैर्मरालैर्हंसैर्युक्ता सा देवी गङ्गा तमग्निमित्यभ्यधादुवाच । किमिति तत् । भा अग्ने । तुभ्यं श्रेयांसि ददे । दुःखानि निहन्मि । आत्मशक्त्याभिधाने जलरूपतयाशक्तापि स्वकीयतीरगतहंसनिनादेन वदति स्मेति भावः ॥

कल्लोलैरुद्धतैरर्वाचीनं तटमभिद्रुतैः ।
प्रीतेव तमभीयाय स्वर्धुनी जातवेदसम् ॥ ३४ ॥

कल्लोलैरिति ॥ स्वर्धुनी गङ्गा प्रीता सती । उद्धतैरानन्दादुद्वेलैरत एवार्वाचीनमर्वाग्भवं तटमभिद्रुतैः पलायितैः कल्लोलैः कृत्वा तं जातवेदसमभीयायेव संमुखीयभूवेव ॥

अथाभ्युपेतस्तापार्तो निममज्जानलः किल ।
विपदा परिभूताः किं व्यवस्यन्ति विलम्बितुम् ॥ ३५ ॥

अथेति ॥ अथानन्तरं तापेन हरतेजोजन्मनार्तः पीडितोऽत एवाभ्युपेतः संमुखमुपगतोऽनलोऽग्निः । किलेति प्रसिद्धे । निममज्ज निमग्नोऽभूत् । ननु झटित्येव किं मग्न इत्यर्थान्तरं न्यस्यति— विपदापदा परिभूता जिताः पुरुषा विलम्बितुमापत्प्रतीकारविलम्बमविष्णुतां सोढुं किं व्यवस्यन्त्युद्युञ्जते । अपि तु नैसर्थः । "प्रतीक्षते जातु नकालमार्तः" इति न्यायादिति भावः ॥

१ समुच्छ्रितैः. २ आजुहावाश्च संसिद्धौ सुप्रसादादरेव सा. ३ उद्गतैः. ४ प्रीत्येव. ५ अभ्युपेत्य. ६ परिभूतः. ७ व्यवस्यति.

गङ्गावारिणि कल्याणकारिणि श्रमहारिणि ।
स मग्नो निर्वृतिं प्राप पुण्यभारिणि तारिणि ॥ ३६ ॥

गङ्गेति ॥ सोऽग्निः । कल्याणकारिण्यनेकमङ्गलविधायिनि श्रमहारिणि परिश्रमहारके । पुण्यं भारयति जनैः संग्राहयति तस्मिन्पुण्यभारिणि । येन जनाः पुण्यभारवन्तो भवन्तीति भावः । तारिणि भवार्णवतारिणि गङ्गावारिणि गाङ्गेयजले मग्नः स्नातः सन् । निर्वृतिं सुखं प्राप । तापार्तानां वारिनिमज्जनमेव सुखैकहेतुरिति भावः ॥

तत्र माहेश्वरं धाम संचक्राम हविर्भुजः ।
गङ्गायामुत्तरंगायामन्तस्तापविपद्भृति ॥ ३७ ॥

तत्रेति ॥ माहेश्वरं शैवं धाम तेजो हविर्भुजोऽग्नेः सकाशात्तत्र गङ्गायां संचक्राम संक्रान्तम् । लग्नमिति यावत् । अत एव किंभूतायां गङ्गायाम् । अन्तर्मध्ये ताप एव विपत्तां धरति तथोक्तायामत एवोल्लसिता अतिवेलास्तरंगाः कल्लोला यस्यास्तथोक्तायाम् ॥ विशेषणद्वयार्थस्य पूर्ववाक्यानन्तरभावितया पृथग्वाक्यत्वेन व्यपदेशे कर्तव्ये विशेषणतया वाक्यारपूर्वोत्पादनं यत्तत्पूज्यतया व्यवस्थितम् । न तु चित्तपरितोषाय । धामसंक्रमणात्प्रागिवपद्धरणासंभवात् ॥ "धृतः" इति पञ्चम्यन्तपाठे हविर्भुजो विशेषणम् । उत्तरंगत्वं च जलप्रकृतिविलसितं च स्वीकर्तव्यम् ॥

कृशानुरेतसो रेतस्यादृते सरिता तया ।
निश्चक्राम ततः सौख्यं हव्यवाहो वहन्बहु ॥ ३८ ॥

कृशान्विति ॥ तया सरिता गङ्गया कृशानुरेतसो हरस्य रेतसि धामनि ॥ "कृशानुरेताः सर्वज्ञः" इत्यमरः ॥ आदृते । आदरपूर्वकं गृहीते सतीत्यर्थः । हव्यवाहोऽग्निः ॥ णिजन्तात्पचाद्यच् ॥ बहु सौख्यं वहन्सन् । ततो गङ्गातो निश्चक्राम परिनिःसृतः ॥

सुधासारैरिवाम्भोभिरभिषिक्तो हुताशनः ।
यथागतं जगामाथ परां निर्वृतिमादधत् ॥ ३९ ॥

सुधासारैरिति ॥ अथानन्तरम् । सुधासारैरिवामृतवर्षैरिवाम्भोभिर्जलैरभि-

१ पुण्यकारिणि. २ हरधामात्. ३ अन्तस्तापविपद्भृत्; अन्तस्तापविपद्भृति. ४ आदृते. ५ उदारैः. ६ दधिषिक्तः.

पिक्तः स्नातोऽत एव परामन्युत्कटां निर्वृतिं सुखमादधद्भिर्भद्रुनाग्ननोऽभिर्यया गतमागतमनतिक्रम्य जगाम गतवान् ॥

सा सुदुर्विषहं गङ्गा धाम कामजितो महत् ।
आदधाना परीतापमवाप व्योमवाहिनी ॥ ४० ॥

सेति ॥ व्योम्नि वाहः प्रवाहोऽस्ति यस्यास्तथोक्ता सा गङ्गा कामजितो महेश्वरस्य महत्सुदुर्विषहम् ॥ "ईषद्दुःसुषु–" इति कृच्छ्रार्थे खल् ॥ धाम तेज आदधाना सती परीतापं संतापम् ॥ "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः ॥ अवाप । प्राप्तवतीत्यर्थः ॥

बहिरार्ता युगान्ताग्नेस्तप्तानीव शिखाशतैः ।
हित्वोष्णानि जलान्यस्या निर्जग्मुर्जलजन्तवः ॥ ४१ ॥

बहिरिति ॥ जलजन्तवो यादांस्यार्ताः सन्तो युगान्ताग्नेः प्रलयकालीनानलस्य शिखाशतैः प्रकरणाच्छिवधाम्न एव तप्तान्यत एवोष्णान्यस्या गङ्गाया जलानि हित्वा परित्यज्य बहिर्निर्जग्मुः । निर्गतवन्त इत्यर्थः । यानि महेश्वरधामशिखाशतानि तान्यत्युग्रसंतापरूपसाधारणधर्मेण गम्यमानेन प्रलयकालानलसंबन्धीनीवेत्युत्प्रेक्षा ॥ "अर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः ॥ हित्वेति "ओहाक् त्यागे" इत्यस्य ॥

तेजसा तेन रौद्रेण तप्तानि सलिलान्यपि ।
समुदञ्चन्ति चण्डानि दुर्धराणि बभार सा ॥ ४२ ॥

तेजसेति ॥ सा गङ्गा । रौद्रेण तेन तेजसा तप्तान्यत एव समुदञ्चन्ति । अतितापवशादुत्प्लुत्य बहिर्निःसरन्तीत्यर्थः । अत एव चण्डानि प्रचण्डस्वरूपाण्यत एव दुर्धराण्यपि सलिलानि बभार धृतवती । तेजसो रुद्रसंबन्धित्वादिति भावः ॥

जगच्चक्षुषि चण्डांशौ किंचिदभ्युदयोन्मुखे ।
जग्मुः षट् कृत्तिका माघे मासि स्नातुं सुरापगाम् ॥ ४३ ॥

जगदिति ॥ माघे माघसंज्ञके मासि ॥ "पद्दन्–" इति मासशब्दस्य हलन्तमासादेशः ॥ जगच्चक्षुषि जगन्नेत्रभूते चण्डांशौ सूर्ये किंचिदभ्युदयोन्मुखे । शैलान्तर्हितेन तेजसा दिशः किंचित्प्रकाशयतीत्यर्थः । षट् कृत्तिकाः स्नातुं सुरापगां मन्दाकिनीं जग्मुः प्रापुः ॥

---

१ कामम्. २ पर्यासि. ३ दुर्भराणि.

अथ चतुर्भिः सुरापगां विशिनष्टि—

शुभ्रैरभ्रंकपैरूर्मिशतैः स्वर्गनिवासिनाम् ।
कथयन्तीमिवालोकावगाहाचमनादिकम् ॥ ४४ ॥

शुभ्रैरिति ॥ आलोको दर्शनमवगाहः स्नानमाचमनं चैतान्यादीनि यस्य तादृशं कर्म कुर्वतां स्वर्गनिवासिनामभ्रंकषैरत्युत्याकाशस्पृग्भिः शुभ्रैरूर्मिशतैस्तरङ्गशतैरात्मदुःखं कथयन्तीमिवेत्युत्प्रेक्षा ॥ अस्मिञ्श्लोके पदद्वयाध्याहारदोषः स्फुट एव । क्रियाकारकयोः परस्परनियमसंबन्धादाक्षेपलक्षणन्यायेन केचित्समादधते । उत्प्लुतानि यानि तरङ्गशतानि तानि कथनसंज्ञानानीवेति भावः । यथान्योऽप्यात्मव्याधिहेतुकं कंचिददनीयं पदार्थं कंचिदपि पुरुषं दर्शयित्वास्वाद्य च तत्पदार्थदोषं कथयति तथेयमपीति बोद्धव्यम् ॥ अभ्रंकषैरिति "सर्वकूलाभ्रकरीषेषु" इत्यभ्रोपपदकात्कषेः खश् ॥

सुस्नातानां मुनीन्द्राणां बलिकर्मोचितैरलम् ।
बर्हिः पुष्पोत्करैः कीर्णतीरां दूर्वाक्षतान्वितैः ॥ ४५ ॥

सुस्नातानामिति ॥ सुस्नातानां मुनीन्द्राणां महर्षीणां बलिकर्मणि पूजाविधावुचितानि योग्यानि तैः । तथा दूर्वाभिरक्षतैश्चान्वितैर्युक्तैः पुष्पोत्करैः कुसुमसमूहैर्बर्हिः कीर्णतीरां व्याप्तसैकताम् ॥ "लाजाः पुं भूम्नि चाक्षताः" इत्यमरः ॥ अलंशब्दोऽत्यर्थवाचकः । स च कीर्णतीरामित्यनेन संबन्धनीयः ॥

ब्रह्मध्यानपरैर्योगपरैर्ब्रह्मासनस्थितैः ।
योगनिद्रागतैर्योगपट्टबन्धैरुपाश्रिताम् ॥ ४६ ॥

ब्रह्मेति ॥ ब्रह्मासने स्थितैः । तथा ब्रह्मणो ध्याने परैः सक्तैः । तथा योग एव निद्रा तां गतैः । तथा योगपट्टस्य बन्धो बन्धनं येषां तैः । योगपट्टे पर्यङ्किरित्यर्थः । एवंविधैर्योगपरैर्योगिभिरुपाश्रितां सेविताम् ॥ "ऊर्वोः जानू ऊर्ध्वंनमी सवष्टभुपगुवासमा । बद्धो च कृत्वा सततं ध्यायेत्परमनन्यधीः" इति योगलक्षणम् ॥

पादाङ्गुष्ठाग्रभूमिस्थैः सूर्यसंबद्धदृष्टिभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपसेविताम् ॥ ४७ ॥

पादेति ॥ पादसंबन्धिनोऽङ्गुष्ठस्याग्रेणैव । समग्रपादेनेत्यर्थः । भूमिस्थैः । पृ-

---

१ दर्शनमवगाहनम्. २ आचमनादिका. ३ प्रदा. ४ योगिवरैः. ५ पद्मासनः. ६ योगिभिर्योगबद्धैः- योगिभिर्योगयुक्तैः. ७ मुनिन्द्रैः; मुनिन्द्रैः ८ सेविताम्.

थिव्यां स्थितिरित्यर्थः । तथा भूयं संबद्धदृष्टिभिरन्वितविलोचनैः । तथा परं ब्रह्म गृणद्भिर्जपद्भिर्ब्रह्मर्षिभिः सप्तर्षिभिरुपसेवितामुपाश्रिताम् ॥

अथ दिव्यां नदीं देवीमभ्यनन्दन्विलोक्य ताः ।
कं नाभिनन्दयत्येषा दृष्टा पीयूषवाहिनी ॥ ४८ ॥

अथेति ॥ अथानन्तरं ताः कृत्तिकाः दिव्यां स्वर्गीयां नदीं देवीं गङ्गां विलोक्याभ्यनन्दन् । आनन्दिता बभूवुरित्यर्थः । एतदुक्तमेवेत्याह—एषा पीयूषवाहिनी गङ्गा दृष्टा दर्शनगोचरीभूता सती कं पुरुषं नाभिनन्दयति । अपि तु सर्वमेवेत्यर्थः ॥ "किम्" इति पाठे किं कुतः कारणान्नाभिनन्दयति मोदयति । अपि तु मोदयत्येवेत्यर्थः ॥ अत एतदालोकन आनन्दो युक्त इति भावः ॥

चन्द्रचूडामणिर्देवो यामुद्वहति मूर्धनि ।
यस्या विलोकनं पुण्यं श्रद्दधुस्ता मुदा हृदि ॥ ४९ ॥

चन्द्रेति ॥ चन्द्रश्चूडामणिभूतो यस्य स देवो हरो मूर्धनि यामुद्वहति । यस्या विलोकनं पुण्यं पुण्यकारि । तां गङ्गां ता हृदि मनसि मुदा प्रीत्या श्रद्दधुः । श्रद्धितां चक्रुरित्यर्थः । गुणवत्सु श्रद्धाया औचित्यादिति भावः ॥

दिव्यां विष्णुपदीं देवीं निर्वाणपददेशिनीम् ।
निर्धूतकल्मषां मूर्ध्ना सुप्रह्वास्तां ववन्दिरे ॥ ५० ॥

दिव्यामिति ॥ निर्वाणपदस्य मोक्षपदस्य देशिनीं दात्रीम् । तथा निर्धूतकल्मषां दूरीकृतजनकिल्बिषां दिव्यां स्वर्गीयाम् ॥ "द्युप्रागपागुदक्प्रतीचो यत्" इति दिवो यत् ॥ विष्णोः पदीं चरणसंबन्धिनीम् ॥ "गङ्गा विष्णुपदी" इत्यमरः ॥ देवीं गङ्गां ताः कृत्तिकाः सुतरां प्रह्वा नताः सत्यो मूर्ध्ना ववन्दिरे प्रणेमुः ॥

सौभाग्यैः खलु संप्राप्तां मोक्षप्रतिभुवं सतीम् ।
भक्त्यात्र तुष्टुवुस्तां ताः श्रद्दधाना दिवो धुनीम् ॥ ५१ ॥

सौभाग्यैरिति ॥ अत्र ताः कृत्तिकाः श्रद्दधानाः सत्यः सौभाग्यैः शोभनभाग्यैः सुखेन प्राप्तं प्राप्तां मोक्षस्य प्रतिभुवं लग्नकां सतीं पतिव्रतां तां दिवो धुनीं गङ्गां भक्त्या निर्व्याजेन तुष्टुवुः । भक्तिनिमित्तं स्तवनमित्यर्थः ॥

---

१ देवीं धुनीम्; दिव्यनदीम्. २ देवी. ३ यस्या विलोकनम्; यस्यावलोकनम्. ४ दिव्या. ५ देशिनीम्. ६ निर्धूतकल्मषाः. ७ मूर्ध्ना. ८ ताम्. ९ स्वभाग्यैः. १० संप्राप्ताम्. ११ तास्.

मुक्तिस्त्रीसङ्गदूत्यद्भैस्तत्र ता विमलैर्जलैः।
प्रक्षालितमलाः सस्नुः सुस्नातास्तैपसान्विताः ॥ ५२ ॥

मुक्तिरिति ॥ ताः कृत्तिकाः विमलैर्विगतमलैः। तथा मुक्तिर्मोक्षः सैव स्त्री तस्याः सङ्गः संबन्धः । प्राप्तिरिति यावत् । तत्र यद्दूत्यं दूतीभावः। कर्म वा। तस्य अैः। शाद्भिरित्यर्थः। येषां स्पर्शमात्रेण मुक्तिर्भवतीति भावः। तथाभूतैर्जलैः कृत्वा प्रक्षालितमला निवर्तितकल्मषाः सत्यस्तत्र गङ्गायां सस्नुः। स्नानं चक्रुरित्यर्थः। मलापकर्षस्नानानन्तरं शुद्धस्नानं क्रियत इति भावः॥ किंभूताः। सुस्नाताः शोभनं विध्युक्तप्रकारकं स्नातं स्नानं यासां ताः॥ भावे निष्ठा॥ विध्युक्तप्रकारेण स्नानकर्त्र्य इत्यर्थः। पुनः किंभूताः। तपसान्विताः। तपस्विन्य इत्यर्थः॥ "ष्णा शौचे"। कर्तरि लिट्॥

स्नात्वा तत्र सुलभ्यायां भाग्यैः परिपचेलिमैः।
चरितार्थं स्वमात्मानं बहु ता मेनिरे मुदा ॥ ५३ ॥

स्नात्वेति ॥ परिपचेलिमैः परिपक्वैः ॥ "तव्यत्तव्यानीयरः" इत्यत्र केलिमर उपसंख्यानात्पचतेः केलिमर्॥ भाग्यैरदृष्टैर्निमित्तभूतैः सुलभ्यायां सुखेन लब्धुं शक्यायाम्॥ "पोरदुपधात्" इति यत्॥ तथाभूतायां तत्र गङ्गायां स्नात्वा ताः कृत्तिकाः स्वं स्वकीयमात्मानं मुदा प्रीत्या बहु यथा तथा चरितार्थं पुरुषार्थकारिणं मेनिरेऽमन्यन्त॥ "मनु अवबोधने"। कर्तरि लिट्॥

कृशानुरेतसो रेतस्तासामभिकलेवरम्।
अमोघं संचचाराथ सद्यो गङ्गावगाहनात् ॥ ५४ ॥

कृशानुरेतस इति ॥ अथानन्तरं गङ्गावगाहनाद्धेतोरमोघं सफलं कृशानुरेतसो हरस्य रेतो वीर्यं सद्यस्तत्कालं तासां कृत्तिकानामभिकलेवरं कलेवरे शरीर इत्यभिकलेवरम्। शरीरमध्य इत्यर्थः। संचचार संचक्राम। लग्नमिति यावत्॥ अत्र तृतीयायोगाभावात्समः परतोऽपि चरतेर्नात्मनेपदम्॥ "समस्तृतीयायुक्तात्" इति सोपाधिनियमात्॥

रौद्रं सुदुर्धरं धाम दधाना दहनात्मकम्।
परितापमवापुस्ता मग्ना इव विपाम्बुधौ ॥ ५५ ॥

रौद्रमिति ॥ दहनात्मकमग्निस्वरूपमत एव सुतरां दुर्धरं दुःखेन धर्तुं शक्यं रौद्रं शैवं धाम तेजो दधानास्ताः कृत्तिका विपाम्बुधौ मग्ना इवेत्युत्प्रेक्षा। परि-

---

१ दोर्लँडैः. २ आविमलैः. ३ तपसान्विताः. ४ गुरुस्वाधानात्. ५ इव. ६ दहनाः.

थिव्यां थितिरित्यर्थः । तथा मूर्ध्ने संवद्धदृष्टिभिरन्वितविलोचनैः । तथा परं ब्रह्म गृणद्भिर्जपद्भिर्ब्रह्मर्षिभिः सप्तर्षिभिरुपसेवितामुपाश्रिताम् ॥

अथ दिव्यां नदीं देवीमभ्यनन्दन्विलोक्य ताः ।
कं नाभिनन्दयत्येषा दृष्टा पीयूषवाहिनी ॥ ४८ ॥

अथेति ॥ अथानन्तरं ताः कृत्तिकाः दिव्यां स्वर्गीयां नदीं देवीं गङ्गां विलोक्याभ्यनन्दन् । आनन्दिता बभूवुरित्यर्थः । एतदुक्तमेवेत्याह—एषा पीयूषवाहिनी गङ्गा दृष्टा दर्शनगोचरीभूता सती कं पुरुषं नाभिनन्दयति । अपि तु सर्वमेवेत्यर्थः ॥ "किम्" इति पाठे किं कुतः कारणान्नाभिनन्दयति मोदयति । अपि तु मोदयत्येवेत्यर्थः ॥ अत एतदालोकन आनन्दो युक्त इति भावः ॥

चन्द्रचूडामणिर्देवो यामुद्वहति मूर्धनि ।
यस्या विलोकनं पुण्यं श्रद्दधुस्ता मुदा हृदि ॥ ४९ ॥

चन्द्रेति ॥ चन्द्रश्चूडामणिभूतो यस्य स देवो हरो मूर्धनि यामुद्वहति । यस्या विलोकनं पुण्यं पुण्यकारि । तां गङ्गां ता हृदि मनसि मुदा प्रीत्या श्रद्दधुः । श्रद्धितां चक्रुरित्यर्थः । गुणवत्सु श्रद्धाया औचित्यादिति भावः ॥

दिव्यां विष्णुपदीं देवीं निर्वाणपददेशिनीम् ।
निर्धूतकल्मषां मूर्ध्ना सुप्रह्वास्ता ववन्दिरे ॥ ५० ॥

दिव्यामिति ॥ निर्वाणपदस्य मोक्षपदस्य देशिनीं दात्रीम् । तथा निर्धूतकल्मषां दूरीकृतजनकिल्बिषां दिव्यां स्वर्गीयाम् ॥ "द्युप्रागपागुदक्प्रतीचो यत्" इति दिवो यत् ॥ विष्णोः पदीं चरणसंबन्धिनीम् ॥ "गङ्गा विष्णुपदी" इत्यमरः॥ देवीं गङ्गां ताः कृत्तिकाः सुतरां प्रह्वा नताः सत्यो मूर्ध्ना ववन्दिरे प्रणेमुः ॥

सौभाग्यैः खलु संप्राप्यां मोक्षप्रतिभुवं सतीम् ।
भक्त्यात्र तुष्टुवुस्तां ताः श्रद्दधाना दिवो धुनीम् ॥ ५१ ॥

सौभाग्यैरिति ॥ अत्र ताः कृत्तिकाः श्रद्दधानाः सत्यः सौभाग्यैः शोभनभाग्यैः सुखेन प्राप्तुं शक्यां मोक्षस्य प्रतिभुवं लग्नकां सतीं पतिव्रतां तां दिवो धुनीं गङ्गां भक्त्या निमित्तेन तुष्टुवुः । भक्तिनिमित्तं स्तवनमित्यर्थः ॥

---

१ देवीं धुनीम्; दिव्यनदीम्. २ देवी. ३ तस्या विलोकनम्; तस्यावलोकनम्. ४ दिव्या. ५ दर्शिनीम्. ६ निर्धूतकल्मषाः. ७ मूर्ध्ना. ८ वाम्. ९ स्वभाग्यैः. १० संप्राप्याम्. ११ सनाम्.

जने बाणे " इति मेदिनी ॥ उत्सृज्य परित्यज स्वान्गृहानभिनिर्ययुर्गतवत्यः ॥ " गृहाः पुंसि च भूम्न्येव " इत्यमरः ॥

तामिस्तत्रामृतकरकलाकोमलं भासमानं
तद्विक्षिप्तं क्षणमभिनभोगर्भमभ्युज्जिहानैः ।
स्वैस्तेजोभिर्दिनपतिशतस्पर्धमानैरमानै-
र्वक्त्रैः षड्भिः स्मरहरगुरुस्पर्धयेवाजनीव ॥ ६० ॥

ताभिरिति ॥ ताभिः कृत्तिकाभिस्तत्र शरवणे विक्षिप्तं सक्तम् । तथामृतकरकलावच्चन्द्रकलेव कोमलं मृदु यथा तथा क्षणं भासमानं तद्गर्भजातम् ॥ कर्तृ ॥ अभिनभोगर्भं नभोगर्भं आकाशमध्य इत्यभिनभोगर्भम् ॥ " गर्भो भ्रूणेऽर्भके कुक्षौ " इति मेदिनी ॥ अभ्युज्जिहानैरभ्युज्जिहते संमुखमुद्यन्ते तानि तैः ॥ " ओहाङ् गतौ " इत्यतः शानच् ॥ तथा दिनपतिशतं सूर्यशतं स्पर्धन्ते तानि तैः । ततोऽप्यधिकैरित्यर्थः । तथामानैरसंख्यैः स्वैस्तेजोभिः । तथा षड्भिर्वक्त्रैश्च युक्तं स्मरहरगुरोर्ब्रह्मणः स्पर्धयेर्ष्ययेव । तव चत्वारि मम षडितस्तस्त्वत्तोऽप्यहमधिकोऽस्मीत्येवंभूतवाग्वादावमरफलकयेत्यर्थः । अजनि । परिमाप्तमभूदित्यर्थः ॥ " दीपजन-" इत्यादिना च्लेश्चिण् । " जनिवध्योश्च " इति वृद्धिनिषेधः ॥ अत्र तेजसां षण्णां वक्त्राणां चोत्पादने प्रत्यस्पर्धाया अहेतुत्वेऽपि तद्धेतुत्वेन कल्पनाद्धेतूत्प्रेक्षालंकारः ॥ मन्दाक्रान्ता वृत्तम्— " मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् " इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कुमारोत्पत्तिर्नाम दशमः सर्गः ।

एकादशः सर्गः ।

अभ्यर्थ्यमाना विबुधैः समग्रैः प्रह्वैः सुरेन्द्रप्रमुखैरुपेत्य ।
तं पाययामास सुधातिपूर्णं सुरापगा स्वं स्तनमाशु मूर्ता ॥ १ ॥

अभ्यर्थ्येति ॥ सुरेन्द्रप्रमुखैरिन्द्रादिभिः समग्रैः समस्तैर्विबुधैर्देवैरुपेत्य समी-

१ निक्षिप्तम्. २ तैः. ३ दिनकर. ४ वक्त्र. ५ स्मरहरगुरुस्पर्धयेव मेरे. ६ अभ्यर्थमाना. ७ सुधाभिपूर्णम्. ८ स्वर्गापगा. ९ स्तनम्. १० धात्री.

तापमवापुः । विषाम्बुधिमग्नत्वे यादृशः परितापो भवति तादृशो रौद्रतेजोधारणे जात इति भावः ॥

अक्षमा दुर्वहं वोढुमम्बुनो वहिरातुराः ।
अग्निं ज्वलन्तमन्तस्ता दधाना इव निर्ययुः ॥ ५६ ॥

अक्षमा इति ॥ दुर्वहं दुर्भरं तद्धाम वोढुमक्षमा अत एवातुरा व्याकुलास्ताः कृत्तिकाः । अन्तर्मध्ये ज्वलन्तमग्निमिव दधानाः सत्योऽम्बुनो जलाद्बहिर्निर्ययुः । निर्जग्मुरित्यर्थः ॥ अत्र सामान्यग्निसेनोन्मेक्षणादुन्प्रेक्षा ॥

अमोघं शांभवं बीजं सद्यो नद्योज्झितं महत् ।
तासामभ्युदरं दीप्तं स्थितं गर्भत्वमागमत् ॥ ५७ ॥

अमोघमिति ॥ नद्या गङ्गया सद्य उज्झितमत एव तासां कृत्तिकाणामभ्युदरं दीप्तं सत्स्थितममोघं सफलं महच्छांभवं बीजं गर्भत्वमागमत् । गर्भीभूतमित्यर्थः ॥

सुज्ञा विज्ञाय ता गर्भभूतं तद्वोढुमक्षमाः ।
विषादमदधुः सद्यो गाढं भर्तृभिया ह्रिया ॥ ५८ ॥

सुज्ञा इति ॥ सुज्ञाश्चतुरा अत एव गर्भभूतं तद्वीर्यं विज्ञायापि वोढुमक्षमा असमर्थाः । तस्यातिशयप्रज्वलितत्वादिति भावः । ताः कृत्तिका भर्तृभिया भयेन । यदि न धरिष्यामस्तदानुचितं नो चेच्छरीरदाह इति भयेनेत्यर्थः । ह्रिया लज्जया । एवंविधा इमाः । याभिर्भर्तृवीर्यमपि न धृतमिति लोकमवादजन्मनेत्यर्थः । सद्यो गाढं विषादं खेदमदधुर्धृतवत्यः ॥

ततः शरवणे सार्धं भयेन व्रीडया च ताः ।
तद्गर्भजातमुत्सृज्य स्वान्गृहानभिनिर्ययुः ॥ ५९ ॥

तत इति ॥ ततोऽनन्तरं ताः कृत्तिकास्तद्गर्भजातं गर्भसामान्यम् ॥ "जातिर्जातं च सामान्यम्" इत्यमरः ॥ भयेन व्रीडया च सार्धं सह शरवणे ॥ "प्रणिरन्तः शरेक्षुप्ल–" इत्यादिना शरशब्दात्परवननकारस्य णत्वम् ॥ "शरः स्तुते

५८–५९ श्लोकयोर्मध्येऽयं श्लोको दृश्यते—

अकालमरणं वातमकाण्डं भाविनोऽर्थवः ।
सभूयान्योन्यमात्मान दुद्रुवुस्तास्तदानिलम् ॥ (१ अकाण्डे. २ दुद्रुवुः.)

१ दुर्धरम्. २ अग्नि ज्वलन्तमन्तःस्थं दधाना इव निर्ययुः; निर्ययुः सहिताः शीघ्रं कृत्तिका विस्मयान्विताः. ३ नद्या स्थितम्. ४ सौम्यम्. ५ गर्भीभूतम्. ६ अगमत्. ७ भर्तृभयात्. ८ शापभयेन. ९ सह. १० ताः. ११ अभितो ययुः; अभि ता ययुः.

त्यर्थः । जातानि व्यतीतानि यस्य स षड्दिनजातः स एव षड्दिनजातमात्रस्तं षडाननं षण्मुखं तं कुमारमपश्यतां दृष्टवन्तौ ॥

अथाह देवी शशिखण्डमौलिं कोऽयं शिशुर्दिव्यवपुः पुरस्तात् ।
कस्याथवा धन्यतमस्य पुंसो मातास्य का भाग्यवतीषु धुर्या॥६॥

अथेति ॥ अथ दर्शनानन्तरं देवी भवानी । पुरस्तादयं कः । अथवा कस्य धन्यतमस्य पुंसो दिव्यवपुरादितेयसदृशविग्रहः शिशुर्बालः । पुत्र इति यावत् । अस्य शिशोर्माता जननी का या भाग्यवतीषु धुर्याग्रगण्या ॥ "धुरो यड्ढकौ" इति यत् ॥ एतन्मातृसादिति भावः । इत्येवं प्रश्नभूतं वचः शशिखण्डमौलिं हरमाहोक्तवती ॥ आहेति विभक्तिप्रतिरूपकमव्ययम् । तथा चोक्तम्— "अव्ययानामनन्तत्वाद्गणनाय न शक्यते । महाकविप्रयोगेषु यदि सिद्धास्परं च तत्" इति ॥

स्वर्गापगासावनलोऽयमेताः षट् कृत्तिकाः किं कलहायमानाः ।
पुत्रो ममायं न तवायमित्थं मिथ्येतिवैलक्ष्यमुदाहरन्ति ॥ ७॥

स्वर्गापगेति ॥ किं च । असौ स्वर्गापगा गङ्गा । अयमनलोऽग्निः । एताः षट् कृत्तिकाः कलहायमानाः कलहं कुर्वाणाः सत्यः ॥ "शब्दवैरकलह-" इत्यादिना करोत्यर्थे क्यङ् ॥ अयं पुत्रो मम मत्संबन्धी । इति गङ्गावाक्यम् । अयं तव न किं तु मम । इत्यग्निवाक्यम् । इत्थं मिथ्याभयोर्युवयोर्मध्ये न कस्यापि किं त्वस्माकमिति सत्यम् । इति कृत्तिकावाक्यम् । इति परस्परं वैलक्ष्यं विलक्षणं यथा तथा किं किमर्थमुदाहरन्ति विवदन्ते ॥

एतेषु कस्येदमपत्यमीशाखिलत्रिलोकीतिलकायमानम् ।
अन्यस्य कस्याप्यथ देवदैत्यगन्धर्वसिद्धोरगराक्षसेषु ॥ ८ ॥

एतेष्विति ॥ हे ईश । एतेषु स्वर्गापगादिषु मध्ये कस्येदमपत्यं पुत्रः । किंभूतम् । अखिला या त्रिलोकी तत्र तिलकायमानं तिलक इवाचरत् ॥ "कर्तुः क्यङ् सलोपश्च" इत्याचारार्थे क्यङ् । तत आत्मनेपदित्वाच्छानच ॥ अथाथवा । सिद्धा देवविशेषाः । उरगाः सर्पाः । राक्षसा निशाचराः । देवदैत्यगन्धर्वसिद्धा ये सिद्धोरगराक्षसास्तेषु मध्येऽन्यतमस्य कस्यापीति वदेत्यर्थः ॥

श्रुत्वेति वाक्यं हृदयप्रियायाः कौतूहलिन्या विमलस्मितश्रीः ।
सान्द्रप्रमोदोदयसौख्यहेतुभूतं वचोऽवोचत चन्द्रचूडः ॥ ९ ॥

---

१ असौ. २ ष. ३ सिद्धः. ४ उदाहरन्ते. ५ वाचम्.

पमागत्य महेन्द्रैः सद्भिरभ्यर्थ्यमाना याच्यमाना सुरापगा मन्दाकिनी । आशु शीघ्रं मूर्ता मूर्तिमती सती । तं कुमारं सुधया दुग्धामृतेनातिपूर्णं बहुभृतं स्वमात्मीयं स्तनं पाययामास पानं कारितवती ॥ सर्गेऽस्मिन्वृत्तमुपजातिः ॥

पिवन्स तस्याः स्तनयोः सुधौघं क्षणंक्षणं साधु समेधमानः ।
प्रापाकृतिं कामपि षड्भिरेत्य निषेव्यमाणः खलु कृत्तिकाभिः ॥ २ ॥

पिबन्निति ॥ स कुमारस्तस्या मन्दाकिन्याः स्तनयोः संबन्धिनं सुधौघं दुग्धामृतसमूहं पिबन् । अत एव क्षणंक्षणं प्रतिक्षणं साधु यथा स्यात्तथा समेधमानः सम्यग्वर्धमानः षड्भिः कृत्तिकाभिरेत्य निषेव्यमाणः ध्रियमाणश्च सन् । कामपि लोकोत्तरामाकृतिं प्राप प्राप्तवान् । खलु वाक्यालंकारे ॥ " खलु स्याद्वाक्यभूषायाम् " इति विश्वः ॥

भागीरथीपावककृत्तिकानामानन्दबाष्पाकुललोचनानाम् ।
तं नन्दनं दिव्यमुपात्तुमासीत्परस्परं प्रौढतरो विवादः ॥ ३ ॥

भागीरथीति ॥ आनन्दबाष्पैराकुललोचनानां व्याप्तनेत्राणाम् । पावकश्च कृत्तिकाश्च पावककृत्तिकाः । भागीरथ्या गङ्गया सहिता याः पावककृत्तिकास्तासां संबन्धी दिव्यं लोकोत्तरस्वरूपं तं नन्दनं पुत्रमुपात्तुं गृहीतुं परस्परमन्योन्यं प्रौढतरोऽतिशयितो विवादः कलह आसीत् । ममायं ममायमिति प्रवादपूर्वकः कार्लिर्यभूवेसर्थः ॥

अत्रान्तरे पर्वतराजपुत्र्या समं शिवः स्वैरविहारहेतोः ।
नभो विमानेन विगाहमानो मनोतिवेगेन जगाम तत्र ॥ ४ ॥

अत्रान्तर इति ॥ अत्रान्तरे कलहावसरे शिवः पर्वतराजपुत्र्या पार्वत्या समं सह स्वैरविहारो यथेच्छविहारस्तस्माद्धेतोः कारणान्मनोतिवेगेन चेतसोऽप्यतिशयजवेन विमानेन नभोऽन्तरिक्षं विगाहमानोऽवलोडयंस्तत्र कलहस्थाने जगाम प्राप ॥

निसर्गवात्सल्यवशाद्विवृद्धचेतःप्रमोदौ गलदश्रुनेत्रौ ।
अपश्यतां तं गिरिजागिरीशौ षडाननं षड्दिनजातमात्रम् ॥ ५ ॥

निसर्गेति ॥ गिरिजागिरीशौ निसर्गेण स्वभावेन यद्वात्सल्यं दयावत्त्वं तस्य वशाद्धेतोर्विवृद्धः समृद्धश्चेतसः प्रमोदो हर्षो ययोस्तथाभूतौ । अत एव गलदश्रुणी स्रवद्बाष्पे नेत्रे ययोस्तथाभूतौ सन्तौ । षड्दिनानि । तन्मितदिनादारभ्ये-

१ स्तन. २ निसर्गवात्सल्यवशाद्विवृद्धचेतःप्रमोदौ; निसर्गवात्सल्यविवृद्धचेतःसुप्रमोदौ. ३ हि. ४ षड्दिन.

त्यर्थः । जातानि व्यतीतानि यस्य स षड्दिनजातः स एव षड्दिनजातमात्रस्तं षडाननं षण्मुखं तं कुमारमपश्यतां दृष्टवन्तौ ॥

अथाह देवी शशिखण्डमौलिं कोऽयं शिशुर्दिव्यवपुः पुरस्तात् ।
कस्याथवा धन्यतमस्य पुंसो मातास्य का भाग्यवतीषु धुर्या ॥ ६ ॥

अथेति ॥ अथ दर्शनानन्तरं देवी भवानी । पुरस्तादयं कः । अथवा कस्य धन्यतमस्य पुंसो दिव्यवपुरादितेयसदृशविग्रहः शिशुर्बालः । पुत्र इति यावत् । अस्य शिशोर्माता जननी का या भाग्यवतीषु धुर्याग्रगण्या ॥ "धुरो यड्ढकौ" इति यत् ॥ एतन्मातृत्वादिति भावः । इत्येवं प्रश्नभूतं वचः शशिखण्डमौलिं हरमाहोक्तवती ॥ आहेति विभक्तिप्रतिरूपकमव्ययम् । तथा चोक्तम्— "अव्ययानामनन्तत्वाद्गणनाय न शक्यते । महाकविप्रयोगेषु यदि सिद्धान्तपरं च तत्" इति ॥

स्वर्गापगासावनलोऽयमेताः षट् कृत्तिकाः किं कलहायमानाः ।
पुत्रो ममायं न तवायमित्थं मिथ्येतिवैलक्ष्यमुदाहरन्ति ॥ ७ ॥

स्वर्गापगेति ॥ किं च । असौ स्वर्गापगा गङ्गा । अयमनलोऽग्निः । एताः षट् कृत्तिकाः कलहायमानाः कलहं कुर्वाणाः सत्यः ॥ "शब्दवैरकलह–" इत्यादिना करोत्यर्थे क्यङ् ॥ अयं पुत्रो मम मत्संबन्धी । इति गङ्गावाक्यम् । अयं तव न किं तु मम । इत्यग्निवाक्यम् । इत्थं मिथ्योभयोर्युवयोर्मध्ये न कस्यापि किं त्वस्माकमिति सत्यम् । इति कृत्तिकावाक्यम् । इति परस्परं वैलक्ष्यं विलक्षणं यथा तथा किं किमर्थमुदाहरन्ति विवदन्ते ॥

एतेषु कस्येदमपत्यमीशाखिलत्रिलोकीतिलकायमानम् ।
अन्यस्य कस्याप्यथ देवदैत्यगन्धर्वसिद्धोरगराक्षसेषु ॥ ८ ॥

एतेष्विति ॥ हे ईश । एतेषु स्वर्गापगादिषु मध्ये कस्येदमपत्यं पुत्रः । किंभूतम् । अखिला या त्रिलोकी तत्र तिलकायमानं तिलक इवाचरत् ॥ "कर्तुः क्यङ् सलोपश्च" इत्याचारार्थे क्यङ् । तत आत्मनेपदित्वाच्छानच ॥ अथाथवा । सिद्धा देवविशेषाः । उरगाः सर्पाः । राक्षसा निशाचराः । देवदैत्यगन्धर्वसहिता ये सिद्धोरगराक्षसास्तेषु मध्येऽन्यतमस्य कस्यापीति वदेत्यर्थः ॥

श्रुत्वेति वाक्यं हृदयप्रियायाः कौतूहलिन्या विमलस्मितश्रीः ।
सान्द्रप्रमोदोदयसौख्यहेतुभूतं वचोऽवोचत चन्द्रचूडः ॥ ९ ॥

---

१ असौ. २ च. ३ सिद्धः. ४ उदाहरन्ते. ५ वाचम्.

श्रुत्वेतीति ॥ चन्द्रचूडो हरः कौतूहलिन्याः श्रवणे कौतुकवता हृदयमि- यायाः पार्वत्या इति पूर्वोक्तं वाक्यं वचः ॥ "वच परिभाषणे" । "ऋहलोर्ण्यत्" इति ण्यत् । शुभ्रा विमला स्मितश्रीर्यस्य । किंचिद्धिहस्येत्यर्थः । सान्द्रः सघनः । बहुरी- ति यावत् । यः प्रमोदो हर्षः ॥ "प्रमोदामोदसंमदाः" इत्यमरः ॥ तस्योदय उत्पत्तिस्तेन यत्सौख्यं तस्य हेतुभूतम् । तज्जनकमित्यर्थः । वचो वचनम- वोचतोक्तवान् ॥

जगत्त्रयीनन्दन एष वीरः प्रवीरमातुस्तव नन्दनोऽस्ति ।
कल्याणि कल्याणकरः सुराणां त्वत्तोऽपरस्याः कथमेष सर्गः ॥१०॥

जगत्त्रयीति ॥ हे प्रिये । जगत्त्रय्या नन्दन आनन्दकारकः ॥ नन्द्यादित्वात् "नन्दिग्रहि—" इति ल्युः ॥ वीरः पराक्रम्येष पुरोवर्ती शिशुः प्रवीरमातुः प्र- कृष्टवीरजनन्यास्तव नन्दनः पुत्रोऽस्ति ॥ ममैवायं नन्दन इत्यत्र किं मानमित्याश- ङ्क्याह— हे कल्याणि । सुराणामिन्द्रादीनां कल्याणकरः शर्मकार्येष पुरोवर्ती सर्गः सृष्टिः । पुत्र इति यावत् । त्वत्तोऽपरस्यास्त्वदन्यस्याः स्त्रियाः कथं केन प्रका- रेण स्यात् । तारकविनाशजनितकल्याणकरत्वे त्वज्जनितस्यैव शक्तिः । अतस्तवै- वायं पुत्र इति भावः ॥

देवि त्वमेवास्य निदानमास्से सर्गे जगन्मङ्गलगानहेतोः ।
सत्यं त्वमेवेति विचारयस्व रत्नाकरे युज्यत एव रत्नम् ॥११॥

देवीति ॥ हे देवि प्रिये । जगतां मङ्गलानि मङ्गलकर्माणि गानानि गीतानि । मङ्गलमयन्धरूपाणीति यावत् । तेषां हेतोः कारणस्यास्य शिशोः सर्गे सृष्टौ । उत्पत्ताविति यावत् । त्वमेव निदानमादिकारणमास्स उपविशसि । असीत्यर्थः ॥ "निदानं त्वादिकारणम्" इत्यमरः ॥ "आसु उपवेशने" । लटो मध्यमपुरुषै- कवचनम् ॥ नन्वहमेव कारणमित्यत्र किं मानमित्यत्र दृष्टान्तेन दर्शयति— त्वमेवेति सत्यम् । विचारयस्व । किमिति तत् । रत्नं रत्नाकरे समुद्र एव । अथ वा रत्नखनावेव । युज्यते युक्तं भवति ॥ "खनिः स्त्रियामाकरः स्यात्" इति । "रत्नाकरो जलनिधिः" इति चामरः ॥

अथ युग्मेनाह—

अंतः शृणुष्वावहितेन सृष्टं बीजं यदग्नौ निहितं मया तत् ।
संक्रान्तमन्तस्त्रिदशापगायां ततोऽवगाहे सति कृत्तिकासु ॥१२॥

---

१ जगत्त्रयानन्दन. २ मातः. ३ अयम्. ४ परस्याः. ५ आस्से; आवे. ६ रत्नं. ७ अत. ८ त्रि- दिवापगायाम्. ९ विगाहे.

गर्भस्त्वमात्तं तदमोघमेतत्ताभिः शरस्तम्बमधि न्यधायि ।
बभूव तत्रायमभूतपूर्वो महोत्सवोऽशेषचराचरस्य ॥ १३ ॥

अत इति । गर्भस्त्वमिति ॥ हे प्रिये । अतः कारणात् । अवहितेनावधानेन । सावधानतयेति यावत् ॥ भावे निष्ठा ॥ वृत्तं वृत्तान्तं शृणुष्व शृणु । तथाहि । मया यद्वीर्जं वीर्यमग्नौ निहितं स्थापितं तद्बीजं त्रिदशापगायां गङ्गायामन्तर्मध्ये संक्रान्तं लग्नम् । अवगाहे स्नाने सति ततो गङ्गातः कृत्तिकासु च संक्रान्तं सद्गर्भत्वमाप्तं गर्भीभूतम् । अथ च ताभिः कृत्तिकाभिरमोघं तदेतच्छरस्तम्बमध्यधिशरस्तम्बम् ॥ अधेर्व्यत्ययः प्रामादिक एव ॥ न्यधायि निहितम् ॥ धाञः कर्मणि लुङ् ॥ तत्र शरस्तम्बेऽशेषचराचरस्य समस्तस्थावरजङ्गमस्य जगतोऽभूतपूर्वः पूर्वं भूतो भूतपूर्वस्तादृङ् भवतीत्यभूतपूर्वो महोत्सवो महानुत्सवोऽयं शिशुर्बभूव ॥ जन्यजनकयोरभेदविवक्षयापुर्घृतमितिवन्महोत्सवोऽयमिति प्रयोगः ॥

अशेषविश्वप्रियदर्शनेन धुर्या त्वमेतेन सुपुत्रिणीनाम् ।
अलं विलम्ब्याचलराजपुत्रि स्वपुत्रमुत्सङ्गतले निधेहि ॥ १४ ॥

अशेषेति ॥ हे प्रिये । अशेषविश्वस्य समस्तजगतः प्रियं प्रीतिकारकम् ॥ "इगुपध-" इत्यादिना कः ॥ तथाभूतं दर्शनं यस्य तथोक्तेनैतेन ॥ अत्रान्वादेश एतच्छब्दस्य नित्यमेनादेशनियमात्कथमेनाभावः साधुः । सत्यम् । अत्रान्वादेश एव नास्ति । तत्र किंचिद्विधानोद्देश्यतयाश्रयीभूतस्य पुनरुपादानाश्रयीभूतस्य च भेदाभाववत्त्वेन विवक्षितत्वात् । प्रकृते तु तदन्यथात्वादन्वादेशाभावेनैनादेशाभावसिद्धिरित्यलम् ॥ त्वं सुपुत्रिणीनां शोभनपुत्रवतीनां धुर्याग्रगण्या । श्रेष्ठतमेति यावत् । असीति शेषः । हे अचलराजपुत्रि । विलम्ब्य विलम्बं कृत्वालम् । विलम्बो न कर्तव्य इत्यर्थः । किं तु स्वपुत्रमात्मतनूजमुत्सङ्गतलेऽङ्कतले निधेहि स्थापय ॥

अथ युग्मेनाह—

अथेति वादिन्यमृतांशुमौलौ शैलेन्द्रपुत्री रभसेन सद्यः ।
सान्द्रप्रमोदेन सुपीनगात्री धात्री समस्तस्य चराचरस्य ॥ १५ ॥
किरीटबद्धाञ्जलिभिर्नभःस्थैर्नमस्कृता सत्वरनाकिलोकैः ।
विमानतोऽवातरदात्मजं तं ग्रहीतुमुत्कण्ठितमानसा द्राक् ॥ १६ ॥

१ स्त. २ सुपुत्रिणी. ३ बत्स. ४ शिरोदि. ५ तदा. ६ नाक.

अथेति । किरीटेति ॥ अथामृतांशुश्चन्द्रो मौलौ यस्य तथाभूते हरे । इति पूर्वोक्तप्रकारेण वादिनि भाषमाणे सति । समस्तस्य सकलस्य चराचरस्य जगतो धात्री परिपोषिका ॥ "ऋन्नेभ्यः–" इति ङीप् ॥ तथा सान्द्रः सघनो यः प्रमोद आनन्दस्तेन सुतरां पीनं प्रफुल्लत्वात्पुष्टं गात्रं यस्यास्तथाभूता शैलेन्द्रस्य हिमालयस्य पुत्री कन्या पार्वती नभःस्थः । तत्काल आकाशमाश्रयद्भिरित्यर्थः । तथा सत्वरैश्च नाकिन्योर्नाकरन्द्रादिभिर्लोकैः किरीटेषु बद्धा अञ्जलयो यैस्तथाभूतैः सद्भिर्नमस्कृता वन्दिता सती सद्यो रभसेन वेगेन विमानतो विमानात् ॥ पञ्चम्यास्तसिल् ॥ अवातरदुत्ततार । अथ च तमात्मजं कुमारं ग्रहीतुमुत्कण्ठितमानसा चाभूत् । अहमेनं गृह्णानीति मनस्येच्छादित्यर्थः ॥

स्वर्गापगापावककृत्तिकादीन्कृताञ्जलीनानमतोऽपि भूयः ।
हित्वोत्सुका तं सुतमाससाद पुत्रोत्सवे माद्यति का न हर्षात् ॥ १७

स्वर्गेति ॥ पुत्रोत्सव उत्सुकोत्कण्ठिता पार्वती । स्वर्गापगा गङ्गा तथा सिता याः पावककृत्तिकास्ता आदयो येषां तान् । अत्रादिशब्देनेन्द्रादयो ग्राह्याः ॥ स्वर्गापगा च पावकश्च कृत्तिकाश्चेति द्वन्द्वसमासेऽल्पाच्तरत्वात्पावकशब्दस्य पूर्वनिपातः प्रसज्येतेति पूर्वरीतिरादृता ॥ तान्कृताञ्जलीनत एव भूयोऽतिशयमानमतो नमस्कुर्वतोऽपि हित्वा परित्यज्य तं सुतमाससाद प्राप । तथाहि । हर्षानन्दवशात्का न माद्यत्युन्मत्ता भवति । पुत्रोत्सवेन सर्वासामुन्मत्तत्वं भवतीति भावः ॥

प्रमोदबाष्पाकुललोचना सा न तं ददर्श क्षणमग्रतोऽपि ।
परिस्पृशन्ती करकुड्मलेन सुखान्तरं प्राप किमप्यपूर्वम् ॥ १८ ॥

प्रमोदेति ॥ सा पार्वती । अग्रतः स्थितमपि तं पुत्रं क्षणं न ददर्श । यतः प्रमोदबाष्पैरानन्दाश्रुभिराकुले व्याप्तत्वाद्दर्शनाशक्ते लोचने यस्याः । आनन्दाश्रुभिरन्धीभूतेत्यर्थः । अथ च कर एव कुड्मलं कलिका तेन परिस्पृशन्ती सती किमपि लोकोत्तरमपूर्वम् । अभूतपूर्वमित्यर्थः ॥ शाकपार्थिवादीनामुत्तरपदलोपः ॥ सुखान्तरम् । अन्यत्सुखमित्यर्थः ॥ अन्तरशब्दोऽत्रोपमानाभावद्योतकः ॥ प्राप प्राप्तवती ॥

सुविस्मयानन्दविकस्वरायाः शिशुर्गलद्बाष्पतरंगितायाः ।
विवृद्धवात्सल्यरसोत्तराया देव्या दृशोर्गोचरतां जगाम ॥ १९ ॥

टि. १ मूला; मूर्धा. २ सुकान्तम्. ३ कः. ४ करकुड्मलाभ्याम्. ५ सविस्मय. ६ दृशः.

सुविस्मयेति ॥ शिशुः ॥ कर्ता ॥ सुतरां यौ विस्मयानन्दावाश्चर्यहर्षौ ताभ्यां विकसरायाः प्रफुल्लीभूतायाः । तथा गलद्बाष्पैस्तरंगितायाः संजाततरंगायाः ॥ तारकादित्वादितच् ॥ वपुषि गलद्भिर्बाष्पजलैरुद्भूतप्रवाहकल्लोलकलिताया इत्यर्थः । तथा विरूढं यद्वात्सल्यं दयावत्त्वम् । पुत्रत्वादिति भावः । तत्र यो रसः प्रीतिः स उत्तरः प्रधानं यस्यास्तथाभूताया देव्याः पार्वत्याः संबन्धिनोर्दृशोर्विलोचनयोर्गोचरतां विषयतां जगाम प्राप । बाष्पनिर्मुक्ताभ्यां लोचनाभ्यां देवी तमपश्यदित्यर्थः ॥

तमीक्षमाणा क्षणमीक्षणानां सहस्रमाप्तुं विनिमेषमैच्छत् ।
सा नन्दनालोकनमङ्गलेषु क्षणंक्षणं तृप्यति कस्य चेतः ॥ २० ॥

तमिति ॥ तं बालं क्षणमीक्षमाणावलोकमाना सा देवी विनिमेषं निर्गतनिमेषमीक्षणानां नेत्राणां सहस्रमाप्तुं मम सहस्रं नेत्राणि भवन्त्वित्यैच्छदियेष । द्वाभ्यां विलोचनाभ्यामाकण्ठदर्शनजननाभावादिति भावः । तथाहि । नन्दनस्यालोकनान्येव मङ्गलानि तेषु विषये क्षणंक्षणम् । प्रतिक्षणमित्यर्थः ॥ "नित्यवीप्सयोः" इति वीप्सायां द्विर्भावः ॥ कस्य चेतस्तृप्यति तृप्तिं प्राप्नोति । अपि तु न कस्यापीत्यर्थः ॥

विनम्रदेवासुरपृष्ठगाभ्यामादाय तं पाणिसरोरुहाभ्याम् ।
नवोदयं पार्वणचन्द्रचारुं गौरी स्वमुत्सङ्गतलं निनाय ॥ २१ ॥

विनम्रेति ॥ गौरी पार्वती ॥ "षिद्गौरादिभ्यश्च" इति ङीष् ॥ नवोदयं नूतनोद्भवम् । तत्कालजातमित्यर्थः । अत एव पार्वणः पर्वणि भवः ॥ "तत्र भवः" इत्यण् ॥ स चासौ चन्द्रश्च तद्वच्चारुं मनोहरम् । चन्द्रोऽपि नवोदय इति श्लेषम् । तथाभूतं तं तनूजं पुत्रम् । कर्मभूतमित्यर्थः ॥ आदाननयने उभे अपि प्रत्ययस्य कर्मत्वं विवेचनीयम् ॥ विनम्राः पादप्रणता ये देवासुरास्तेषां पृष्ठेषु गच्छतः संचरतस्ताभ्याम् । अनेन तेभ्योऽभयदानमुद्रा कृतेति व्यज्यते । पाणिसरोरुहाभ्यां करकमलाभ्यामादाय गृहीत्वा स्वमात्मीयमुत्सङ्गतलं निनाय प्रापयामास । हस्ताभ्यामुत्थाप्य स्वाङ्क आरोपितवतीत्यर्थः ॥

स्वमङ्कमारोप्य सुधानिधानमिवात्मनो नन्दनमिन्दुवक्त्रा ।
तमेकमेषा जगदेकवीरं बभूव पूज्या धुरि पुत्रिणीनाम् ॥ २२ ॥

---

१ न नन्दनालोकनमङ्गलेषु; सुनन्दनालोकनकौतुकेन. २ कन्धरि. ३ नवोदयम्; महोदयाम्. ४ तम्. ५ एवमेवम्; एवमेव. ६ एवैतो.

त्वमिति ॥ इन्दुवक्त्रा चन्द्रमुख्येषा पार्वती । एकमद्वितीयं जगदेकवीरं जगत्स्वेकवीरं तमात्मनो नन्दनं पुत्रं सुधानिधानममृतपात्रमिव स्वमात्मीयमङ्कमारोप्य संस्थाप्य पुत्रिणीनां पुत्रवतीनां धुर्यग्रभागे पूज्या पूजयितुं योग्या बभूव । एतत्पुत्रस्य सर्वासामपि पुत्रेभ्योऽधिकत्वादग्रपूज्यत्वमुचितमेवेति भावः ॥

निसर्गवात्सल्यरसौघसिक्ता सान्द्रप्रमोदामृतपूरपूर्णा ।
तमेकपुत्रं जगदेकमाताभ्युत्सङ्गिनं प्रस्नविणी बभूव ॥ २३ ॥

निसर्गेति ॥ निसर्गेण स्वभावेन । न तूपाधिनेत्यर्थः । यो वात्सल्यरसो द्रवावस्थरसस्तस्यौघेन सिक्ता प्लाविता । तत्रातिवात्सल्यवतीत्यर्थः । तथा सान्द्रप्रमोदोऽतिशयहर्षः स एवामृतं पीयूषं तस्य पूरेण प्रवाहेण पूर्णा भृता जगतामेकाद्वितीया माता परिपोषिका देव्युत्सङ्गिनमधिश्रितोत्सङ्गं तमेकपुत्रमभि संमुखं प्रस्नविणी दुग्धस्रावववती बभूव । पुत्रं दृष्ट्वा मातुः स्तनाभ्यां पयः पततीति युक्तमिति भावः ॥

अशेषलोकत्रयमातुरस्याः षाण्मातुरः स्तन्यसुधामधासीत् ।
सुरस्रवन्त्याः किल कृत्तिकाभिर्मुहुर्मुहुः सस्पृहमीक्ष्यमाणः ॥ २४ ॥

अशेषेति ॥ षाण्मातुरः षण्णां मातृणामपत्यं षाण्मातुरः कार्तिकेयः ॥ अत्र षण्मातृशब्दात् "मातुरुत्संख्या—" इत्यादिनाण्मातृशब्दस्योदादेशश्च ॥ "षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः" इत्यमरः ॥ सुरस्रवन्त्या देवनद्याः । गङ्गाया इत्यर्थः ॥ "स्रवन्ती निम्नगापगा" इत्यमरः ॥ तथा कृत्तिकाभिश्च सस्पृहं सेच्छं यथा तथा ॥ "इच्छा काङ्क्षा स्पृहेहा तृट्" इत्यमरः ॥ अस्मदीयपयोधरस्तनदमृतपातायमिदानीमितदीयस्तनपयः पिबन्पुनरप्यस्मदीयपयोधरपयोऽपि स्मरेदेवंभूतेच्छासहितमित्यर्थः । मुहुर्मुहुरनुवेलमीक्ष्यमाणोऽवलोक्यमानः सन्नशेषं सकलं यल्लोकत्रयं तस्य मातुः पोषिण्या अस्या देव्याः स्तन्या स्तनेभवा ॥ "शरीरावयवाद्यत्" इति यत् ॥ सा चासौ सुधा च तामधासीत्पपौ ॥ "धेट् पाने" कर्तरि लुङ् । "विभाषा घ्राधेट्—" इति सिज्लुक् ॥

सुखाश्रुपूर्णेन मृगाङ्कमौलेः कलत्रमेकेन मुखाम्बुजेन ।
तस्यैकनालोद्गतपद्मपद्मलक्ष्मीं क्रमात्षड्वदनीं चुचुम्ब ॥ २५ ॥

सुखेति ॥ मृगाङ्कमौलेर्हरस्य कलत्रं भार्या ॥ "कलत्रं श्रोणिभार्ययोः" इत्यमरः ॥ एकनाल एककाण्ड उद्गतान्युदितानि यानि पद्मपद्मानि तेषां लक्ष्मीरिव शोभेव लक्ष्मीः शोभा यस्यास्तथाभूतां तस्य कुमारस्य षण्णां वदनानां समाहारं

1 [illegible] 2 [illegible] 3 [illegible] 4 [illegible]
1 [illegible]

पङ्कनीम् ॥ "द्विगोः" इति ङीप् ॥ इह संख्यासादृश्यमन्तरा न विरोधः ॥ मुखा-श्रुपूर्णेनानन्दाश्रुजलपरिपूरितेनैकेन मुखाम्बुजेन वदनकमलेन क्रमाद्यथाक्रमं चु-चुम्ब स्पृष्टवती । अतिशयप्रेमवशादिति भावः ॥

हैमी फलं हेमगिरेर्लतेव विकस्वरं नाकनदीव पद्मम् ।

पूर्वेव दिङ्नूतनमिन्दुमाभात्तं पार्वती नन्दनमादधाना ॥ २६ ॥

हैमीति ॥ तं नन्दनं तनयमादधाना सा पार्वती । फलं दधाना हेमगिरेः सु-मेरोः संबन्धिनी । तदुत्पन्नेत्यर्थः । हैमी हेमविकारा ॥ विकारार्थेऽणि "टिड्ढा-" इति ङीप् ॥ लतेव । विकस्वरं प्रफुल्लं पद्मं कमलं दधाना नाकनदीव गङ्गेव । नू-तनं नवोदयमिन्दुं दधाना पूर्वा पूर्वसंज्ञिका दिगिव । आभाच्छुशुभे ॥ अत्र मा-लोपमालंकारः ॥

प्रीतात्मना सा प्रयतेन दत्तहस्तावलम्बा शशिशेखरेण ।

कुमारमुत्सङ्गतले दधाना विमानमभ्रंलिहमारुरोह ॥ २७ ॥

प्रीतेति ॥ कुमारं पुत्रमुत्सङ्गतले दधाना बिभ्रती सा देवी प्रीतात्मना प्रस-न्नीभूतमनसा प्रयतेन सावधानेन । न तु संभ्रमितेन । "नयवर्त्मगाः प्रभवतां हि धियः" इति न्यायादिति भावः । तथाभूतेन शशिशेखरेण शिवेन दत्तहस्तावल-म्बा सती । अलतिप्रेमभरादिति भावः । अभ्रंलिहमाकाशस्पृक् ॥ "वहाभ्रे लिहः" इति खश् ॥ विमानमारोहारूढा ॥

महेश्वरोऽपि प्रमदप्ररूढरोमोद्गमो भूधरनन्दनायाः ।

अङ्कादुपादत्त तदङ्कतः सा तस्यास्तु सोऽप्यात्मजवत्सलत्वात्२८

महेश्वर इति ॥ प्रमदेनानन्देन प्ररूढा रोमोद्गमा यस्य तथाभूतो महेश्वरो-ऽप्यात्मजे पुत्रे वत्सलत्वाद्दयावत्त्वाद्धेतोर्भूधरनन्दनायाः पार्वत्या अङ्कादुत्सङ्ग-तलं पुत्रमुपादत्ताग्रहीत् । अथ च तदङ्कतो हरोत्सङ्गात्सा देव्युपादत्त । अथ च सोऽपि हरोऽपि तस्या देव्या अङ्कादुपादत्त । इत्यनुवेलमन्योन्यग्रहणं चक्रतुरित्यर्थः ॥

दधानया नेत्रसुधैकसत्रं पुत्रं पवित्रं सुतया तयाद्रेः ।

संश्लिष्यमाणः शशिखण्डधारी विमानवेगेन गृहाञ्जगाम ॥२९॥

दधानेति ॥ शशिखण्डधारी महेश्वरः । सुधाया अमृतस्यैकं केवलं सत्रं सदादानम् ॥ "सत्रमाच्छादने यज्ञे सदादाने धनेऽपि च" इत्यमरः ॥ नेत्रयोः

१ हैमन्. २ सुमयेन. ३ अहान्ङमादत्त. ४ वमद्दः. ५ सः. ६ सौम्यान्मम. ७ दधानया.

८ पावन. ९ सद्य. १० मोन्ः; वारो. ११ गृहम्.

संयन्धि सुधैकसत्रं येन । नेत्रयोरमृतवत्सुखदातारमित्यर्थः । तथा पवित्रं पूतम् ॥ "पुवः संज्ञायाम्" इति त्रप्रत्ययः ॥ तथाभूतं पुत्रं सुतं दधानया बिभ्रत्या तयाद्रिहिमालयस्य सुतया कन्यया पार्वत्या ॥ कर्त्र्या ॥ संश्लिष्यमाणः स्नेहवशादालिङ्ग्यमानः सन्निधानस्य वेगेन गृहाङ्गणाय ययौ ॥ "गृहाः पुंसि च भूम्न्येव" इत्यमरः ॥

अधिष्ठितः स्फाटिकशैलशृङ्गे तुङ्गे निजं धाम निकालरम्यम्।
महोत्सवाय प्रमथप्रमुख्यान्पृथून्गणाञ्शंभुरथादिदेश ॥ ३० ॥

अधिष्ठित इति ॥ अथानन्तरं शंभुर्महेश्वरस्तुङ्गे उन्नते स्फाटिकमयः स्फाटिको यः शैलः कैलासस्तस्य शृङ्गे शिखरे ॥ "शृङ्गं प्राधान्यसान्वोश्च" इत्यमरः ॥ निकामरम्यमतिमनोहरं निजं स्वीयम् ॥ " स्वके नित्ये निजं त्रिषु " इत्यमरः ॥ अधिष्ठितः सन् ॥ "अधिशीङ्—" इत्यादिनाधारस्य कर्मसंज्ञा ॥ महोत्सवाय महोत्सवं कर्तुम् ॥ "तुमर्थाच्च" इति चतुर्थी ॥ पृथून्महतः प्रमथप्रमुख्यान्प्रमथादीन्गणानादिदेशाज्ञापयामास ॥

पृथुप्रमोदः प्रगुणो गणानां गणः समग्रो वृषवाहनस्य ।
गिरीन्द्रपुत्र्यास्तनयस्य जन्मन्यथोत्सवं संववृते विधातुम्॥३१॥

पृथ्विति ॥ अथानन्तरं पृथुर्महान्प्रमोदो हर्षो यस्य । तथा प्रकृष्टा गुणा यस्यैवंविधः समग्रः संपूर्णो गणानां गणः प्रमथादीनां समूहो वृषवाहनस्य महेश्वरस्य गिरीन्द्रपुत्र्याः पार्वत्याश्च तनयस्य जन्मन्युत्सवं विधातुं कर्तुं संववृते संवृत्तः । उद्युक्त इति यावत् ॥

इतः परं सप्तभिरुत्सवानेवाह—

स्फुरन्मरीचिच्छुरिताम्बराणि संतानशाखिप्रसवाञ्चितानि ।
उच्चिक्षिपुः काञ्चनतोरणानि गणा वराणि स्फटिकालयेषु॥३२॥

स्फुरदिति ॥ गणाः प्रमथाः स्फटिकालयेषु स्फटिकगृहेषु स्फुरन्तो भासमाना या मरीचयः किरणास्ताभिश्छुरितं मिश्रीकृतमम्बरं यैस्तानि । संतानशाखिनां देववृक्षाणां प्रसवानि पत्राणि तैरञ्चितानि निर्मितानि वराणि श्रेष्ठानि काञ्चनं काञ्चनस्य विकारः काञ्चनं स्वर्णसूत्रं तदाधेयीभूतानि तोरणानि मालाविशेषानुच्चिक्षिपुरुच्चैश्चिक्षिपुः । ववन्धुरित्यर्थः ॥

१ अधिष्ठित. २ निजे. ३ धामनि कालरम्ये; धाम्नि निकामरम्ये. ४ प्रमथान्स नाथः. ५ महिम्ना समुदा; महिम्ना पृथक्. ६ प्रमोद. ७ प्रगुणे. ८ विचिक्षिपुः. ९ चलानि.

दिक्षु प्रसर्पंस्तदधीश्वराणामथामराणामिव मध्यलोके।
महोत्सवं शंसितुमाहतोऽन्यैर्दध्वान धीरः पटहः पटीयान्॥३३॥

दिक्ष्विति॥ अथ तोरणोत्क्षेपानन्तरम्। दिक्षु दशसु दिशासु प्रसर्पन्प्रसिद्धो भवन्। आत्मनिनादेनेति शेषः॥ गम्यमानार्थत्वादप्रयोगः॥ तासां दिशामधीश्वराणां दिक्पालानाममराणां देवानामिन्द्रादीनां संबन्धी पटीयान्समर्थः। घोरनिनाद इति शेषः। धीरो गम्भीरः पटहोऽन्यैर्भृत्यभूतैरमरैराहतस्ताडितः सन्। मध्यश्चासौ लोकश्च मध्यलोकः। भूलोक इत्यर्थः। तस्मिन्। महोत्सवम्। अत्रापि भवत्पुत्रजन्मनास्माकं महानुत्सवो जात इति शंसितुमिव कथयितुमिव। दध्वान ध्वनिं चकार। ध्वनिकरणे महोत्सवज्ञापनस्य फलस्याभावेऽपि फलत्वकल्पनारफलोत्प्रेक्षा॥

महोत्सवे तत्र समागतानां गन्धर्वविद्याधरसुन्दरीणाम्।
संभावितानां गिरिराजपुत्र्या गृहेऽभवन्मङ्गलगीतकानि॥३४॥

महेति॥ तत्र महोत्सवे समागतानां प्राप्तानामत एव गृहे गिरिराजपुत्र्या भवान्या संभावितानां पूजितानाम्। सत्कृतानामित्यर्थः। गन्धर्वा विद्याधराश्च देवविशेषास्तेषां सुन्दरीणां स्त्रीणां स्त्रीकर्तृकाणि मङ्गलगीतकानि मङ्गलप्रयोजनगीतान्यभवन्। जातानीत्यर्थः॥

सुमङ्गलोपायनपात्रहस्तास्तं मातरो मातृवदभ्युपेताः।
निधाय दूर्वाक्षतकानि मूर्ध्नि निन्युः स्वमङ्कं गिरिजातनूजम्॥३५॥

सुमङ्गलेति॥ सुमङ्गलानि यान्युपायनान्युपदास्तासां यस्मिन्नेषां पात्रं तत्संहितो हस्तो यासामेवंभूताः मत्योऽभ्युपेताः माता मातरो ब्राह्म्याद्याः। सप्तेति शेषः॥ "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः" इत्यमरः॥ मूर्ध्नि शिरसि दूर्वाक्षतकानि निधाय संस्थाप्य तं गिरिजातनूजं कुमारं मातृवत्पार्वतीवत्सलत्वं यथा तथा स्वं स्वीयमङ्कं निन्युः। स्वाङ्के स्थापयामासुरित्यर्थः। मातृवदित्यनेन तासामप्यत्र मात्रसेहाप्रीतिर्दर्शितम्॥

ध्वनत्सु तूर्येषु सुमन्द्रमङ्गचालिङ्गयोध्र्वकेप्वप्सरसो रसेन।
सुरंधियन्धं ननृतुः सुनृत्तगीतानुगं भावरसानुविद्धम्॥ ३६॥

ध्वनत्स्विति॥ अथ ... तूर्येषु वाद्येषु सुमन्द्रं स-
... इत्यमरः॥ ध्वनत्सु ...

१ ... २ ... ३ ...

यमानेषु सत्सु । अप्सरसो रम्भादिका रसेन स्नेहेन शोभना मधुराः गंधपः स्वर-संध्यादयो येषु तथाभूता पन्थाः प्रबन्धा गीतप्रबन्धा यत्र यस्मिन्कर्मणि । सुवृत्तानि शोभनच्छन्दांसि गीतान्यनुगानि यत्र यस्मिन्कर्मणि । भावा रत्यादयो रसा शृङ्गारादयस्तैरनुविद्धं व्याप्तं यत्र यस्मिन्कर्मणि । यथा तथा ननृतुर्गात्राणि विचिक्षिपुः ॥

वाता ववुः सौख्यकराः प्रसेदुराशा विधूमो हुतभुग्दिदीपे ।
जलान्यभूवन्विमलानि तत्रोत्सवेऽन्तरिक्षं प्रससाद सद्यः ॥३७॥

वाता इति ॥ तत्रोत्सवे वाताः पवनाः सौख्यकरा ववुश्चेलुः । आशा दिशः प्रसेदुर्निर्मला बभूवुः । हुतभुगग्निर्विधूमो निर्धूमः सन्दिदीपे ज्वलति स्म ॥ "दीपी दीप्तौ" इति लिट् ॥ जलानि विमलान्यभूवन् । अन्तरिक्षं व्योम सद्यः प्रससाद स्वच्छमभूत् । "भवो हि लोकाभ्युदयाय तादृशाम्" इति न्यायादिति भावः ।

गम्भीरशङ्खध्वनिमिश्रमुच्चैर्गृहोद्भवा दुन्दुभयः प्रणेदुः ।
दिवौकसां व्योम्नि विमानसंघा विमुच्य पुष्पप्रचयान्प्रसस्रुः ॥३८॥

गम्भीरेति ॥ गृहोद्भवा महेश्वरनिकेतनीया दुन्दुभयो गम्भीरो मन्द्रो यः शङ्खध्वनिः पाञ्चजन्यशब्दस्तेन मिश्रं यथा स्यात्तथोच्चैः प्रणेदुः ॥ "उपसर्गादसमासेऽपि" इति णत्वम् ॥ अथ च दिवौकसां देवानां विमानसंघाः व्योम्नि पुष्पप्रचयान्विमुच्य विकीर्य प्रसस्रुः । प्रतस्थिर इत्यर्थः ॥

इत्थं महेशाद्रिसुतासुतस्य जन्मोत्सवे संमदयांचकार ।
चराचरं विश्वमशेषमेतत्परं चकम्पे किल तारकश्रीः ॥ ३९ ॥

इत्थमिति ॥ महेशो हरः । अद्रिसुता पार्वती तस्याः सुतस्य पुत्रस्येत्थमेवंभूते जन्मोत्सवेऽशेषं समस्तं चराचरं स्थावरजंगममेतद्विश्वं जगत्संमदयांचकारोन्मत्तीचकार । उन्मादसाधनैरिति शेषः । परं केवलं तारकस्य तारकासुरस्य श्रीर्लक्ष्मीश्चकम्पे । बिभायेत्यर्थः ॥

ततः कुमारः सुमुदां निदानैः स बाललीलाचरितैर्विचित्रैः ।
गिरीशगौर्योर्हृदयं जहार मुदे न हृद्या किमु बालकेलिः ॥४०॥

तत इति ॥ ततोऽनन्तरं स कुमारो विचित्रैरनेकरूपैरत एव सुमुदां सुतरां प्रीतीनां निदानैरादिकारणैः ॥ "निदानं त्वादिकारणम्" इत्यमरः ॥ बालली-

१ शब्द. २ विमुञ्चतां पुष्पचयान्; विमुञ्चतः पुष्पचयान्. ३ जन्मोत्सवः. ४ स मुदः. ५ सबाललीलाललितैः.

लाचरितैः शिशुक्रीडाचरितैर्गिरीशगौर्योः शिवपार्वत्योः ॥ अभ्यर्हितत्वाद्गौरीशब्दस्यापि पूर्वनिपातः ॥ हृदयं मनो जहार । प्रसादयामासेत्यर्थः । ननु मनोहरा बालकेलिर्मुदे न किमु भवतीति न । किं तु भवत्येवेत्यर्थः ॥

महेश्वरः शैलसुता च हर्षात्सतर्षमेकेन मुखेन गाढम् ।
अजातदन्तानि मुखानि सूनोर्मनोहराणि क्रमतश्चुचुम्ब ॥ २१ ॥

महेश्वर इति ॥ महेश्वरो हरः शैलसुता पार्वती च हर्षाद्धेतोः सतर्षं सतृष्णं यथा तथाजातदन्तान्यनुद्भूतदशनानि मनोहराणि सूनोः कुमारस्य मुखान्येकेन मुखेन गाढं दृढं यथा तथा क्रमतो यथाक्रमं चुचुम्ब पस्पर्श ॥ अत्र कर्तृद्वयस्य पार्थक्येन क्रियान्वयो विधेयः । अन्यथा द्विवचनापत्तिरिति विवेचनीयम् ॥

क्वचित्स्खलद्भिः क्वचिदस्खलद्भिः क्वचित्प्रकम्पैः क्वचिदप्रकम्पैः ।
बालः स लीलाचलनप्रयोगैस्तयोर्मुदं वर्धयति स्म पित्रोः॥२२॥

क्वचिदिति ॥ स बालः कुमारः क्वचित्प्रदेशे स्खलद्भिः पतद्भिः क्वचित्प्रदेशेऽस्खलद्भिः क्वचित्प्रदेशे प्रकम्पैः प्रकृष्टकम्पैः क्वचित्प्रदेशेऽप्रकम्पैर्लीलया ये चलनप्रयोगास्तैर्निमित्तभूतैस्तयोः पित्रोर्जननीजनकयोः । माता च पिता च पितरौ तयोः पित्रोः ॥ "पिता मात्रा" इत्येकशेषः ॥ मुदं प्रीतिं वर्धयति स्म ॥ "वन्दत्यपांचकार" इत्यपि पाठः । अर्थः स एव ॥

अहेतुहासस्फुरिताननेन्दुर्गृहाङ्गणक्रीडनधूलिधूम्रः ।
मुहुर्वदन्किंचिदलक्षितार्थं मुदं तयोरङ्कगतस्ततान ॥ २३ ॥

अहेत्विति ॥ गृहाङ्गणे यत्क्रीडनं तेन निमित्तेन धूलिभी रजोभिर्धूम्रो धूसरः समङ्कगत उत्सङ्गं प्राप्तः कुमारः । अहेतुरकारणो यो हासो हसितं तेन स्फुरितो विकसित आननेन्दुर्मुखचन्द्रो यस्य । अलक्षितार्थमव्यक्तार्थं मुहुः किंचिद्वदंस्तयोर्मुदं प्रीतिं ततान चकार ॥

गृह्णन्विषाणे हरवाहनस्य स्पृशन्कुमारः केसरिणं सलीलम् ।
स भृङ्गिणः सूक्ष्मतरं शिखाग्रं कर्षन्बभूव प्रमदाय पित्रोः ॥ २४ ॥

गृह्णन्निति ॥ स कुमारः । हरवाहनस्य वृषभस्य विषाणे शृङ्गे गृह्णन् । कराभ्यामिति शेषः । सधोमार्केसरिणं पार्वतीसिंहं सलीलमवज्ञया यथा तथा स्पृ-

१ [illegible] २ स्खलद्भिः ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible]

शन् । तथा भृङ्गिणो गणस्य सूक्ष्मतरं शिखाग्रं कर्षन् । पित्रोर्जननीजनकयोः प्रमदाय हर्षाय बभूव ॥ क्रियाग्रहणात्संप्रदानत्वम् ॥

एको नव द्वौ दश पञ्च सप्तेत्यजीगणन्नीत्ममुखं प्रसार्य ।
महेशकण्ठोरगदन्तपङ्क्तिं तदङ्कगः शैशवमौग्ध्यमैशिः ॥ ४५ ॥

एक इति ॥ तस्य पितुरङ्कग उत्सङ्गगत ऐशिः । ईशस्यापत्यमित्यर्थः ॥ "अत इञ्" इत्यपत्यार्थ इञ् ॥ आत्ममुखं प्रसार्य महेशस्य ये कण्ठोरगाः सर्पास्तेषां दन्तपङ्क्तिम् । एको नव द्वौ दश पञ्च सप्तेत्यजीगणत्संख्यातवान् । यतः शैशवमौग्ध्यं बालत्वनिमित्तमूढतां दधानः ॥ अजीगणदिति गणयतेर्लुङ् । "ई च गणः" इत्यभ्यासाकारस्येकारः ॥

कपर्दिकण्ठान्तकपालदाम्नोऽङ्गुलिं प्रवेश्याननकोटरेषु ।
दन्तानुपातुं रभसी बभूव मुक्ताफलभ्रान्तिकरः कुमारः॥ ४६ ॥

कपर्दीति ॥ कुमारः कार्तिकेयः कपर्दिकण्ठान्ते शिवकण्ठमध्ये स्थितस्य कपालदाम्नो नृकरोटीस्रज आननकोटरेषु वदनकूपेषु ॥ "कोटरो नागरे कूपे पुष्करिण्युद्घाटके" इति मेदिनी ॥ अङ्गुलिं प्रवेश्य दन्तानुपात्तुं गृहीतुं रभसी रभसो वेगोऽस्यास्तीति तथोक्तः ॥ "रभसो वेगहर्षयोः" इति मेदिनी ॥ बभूव । एतान्वेगेन गृह्णामीत्यैच्छदित्यर्थः । यतो मुक्ताफलभ्रान्तिकरो मौक्तिकभ्रमकारी॥

शंभोः शिरोऽन्तःसरितस्तरंगान्विगाह्य गाढं शिशिरान्रसेन ।
स जातजाड्यं निजपाणिपद्ममतापयद्भालविलोचनाग्नौ ॥ ४७॥

शंभोरिति ॥ स कुमारः । शिशिराञ्छीतलाञ्छंभोः संबन्धिनः शिरसोऽन्तर्मध्ये स्थितायाः सरितो गङ्गायास्तरंगान्रसेन स्वादेन ॥ स्वादोऽत्र त्वगिन्द्रियग्राह्यत्वेन विवक्षितः ॥ "रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये तक्तादौ द्रव्यरागयोः । देहधातुप्रभेदे च पारदस्वादयोः पुमान्" इति मेदिनी ॥ गाढं दृढम् ॥ "गाढबाढदृढानि च" इत्यमरः ॥ विगाह्यावगाह्य । अत एव जातजाड्यं जातशीतकृतजडत्वं निजपाणिपद्मं स्वीयकरकमलं भाले यद्विलोचनं तत्र योऽग्निस्तत्रातापयत् । अन्योऽपि शीतजडं हस्तमग्नौ तापयति तद्वदिति भावः ॥

किंचित्कलं भङ्गुरकंधरस्य नमज्जटाजूटधरस्य शंभोः ।
प्रलम्बमानं किल कौतुकेन चिरं चुचुम्बे मुकुटेन्दुखण्डम् ॥४८॥

१ तत्र. २ तदङ्कगः. ३ नुनजीति; मुग्धमैशिः. ४ करान्; परः. ५ संगावगाहः. ६ भङ्गुरकंधरस्य.

किंचिदिति ॥ किंचिद्भङ्गुरा पतनशीला ॥ "भञ्जभासमिदो घुरच्" इति घुरच्। "चजोः" इति कुत्वम् ॥ कंधरा ग्रीवा यस्य। बालत्वात्। स कुमारो नम्रजटाजूटस्य धरस्तस्य शंभोर्हरस्य प्रलम्बमानमाश्रयमाणं कलं मधुरं मुकुटेन्दुखण्डं मुकुटचन्द्रशकलम् ॥ "भित्तं शकलखण्डे वा" इत्यमरः ॥ कौतुकेनानन्देन चिरं बहुकालं चुचुम्बे। पस्पर्शेत्यर्थः ॥

इत्थं शिशोः शैशवकेलिवृत्तैर्मनोभिरामैर्गिरिजागिरिशौ।
मनोविनोदैकरसप्रसक्तौ दिवानिशं नाविदतां कदाचित् ॥ ४९ ॥

इत्थमिति ॥ गिरिजागिरीशौ मनोभिरामैर्मनोरमैरित्थमेवंभूतैः शिशोः कुमारस्य शैशवस्य बाल्यस्य याः केलयस्तासां वृत्तैश्चरित्रैः ॥ "वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले" इत्यमरः ॥ मनसो विनोदस्तत्र य एको रसः प्रीतिस्तत्र प्रसक्तावासक्तौ सन्तौ कदाचिदपि दिवानिशमहर्निशं नाविदतां नाबुध्येताम्। अगाधपुत्रोत्सवार्णवमग्नत्वादिति भावः ॥

इति बहुविधं बालक्रीडाविचित्रविचेष्टितं
ललितललितं सान्द्रानन्दं मनोहरमाचरन्।
अलभत परां वृद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शास्त्रं शस्त्रं विवेद विभुर्यया ॥ ५० ॥

इतीति ॥ इत्येवंभूतं बहुविधं नानाप्रकारकं ललितललितं ललितप्रकारमतिसुन्दरं सान्द्र आनन्दो येन मनोहरं बालक्रीडाया विचित्रं विचेष्टितं चेष्टाम्। चरित्रमिति यावत्। आचरन्विदधद्विभुः स कुमारः षष्ठे दिने परामुत्कृष्टां वृद्धिं धिषणां नवयौवनं तारुण्यं चालभत प्राप। यया बुद्ध्या सकलं समस्तं शास्त्रम्। सकलानि शास्त्राणीत्यर्थः। शस्त्रम्। शस्त्राणीत्यर्थः ॥ उभयत्रापि जातावेकवचनम् ॥ विवेद ज्ञातवान्। किलेति संभाव्यते। प्राचीनजन्मसंस्काराणां विद्यमानत्वादिति भावः ॥ हरिणीच्छन्दः—"रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीमदनन्तभट्टात्मजसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कुमारोत्पत्तिर्नामैकादशः सर्गः।

---

१ वैभव. २ तूण. ३ दुर्वह. ४ त्रिवेदीभिः.

द्वादशः सर्गः ।

अथ प्रपेदे त्रिदशैरशेषैः क्रूरासुरोपप्लवदुःखितात्मा ।
पुलोमपुत्रीदयितोऽन्धकारिं पत्रीव तृष्णातुरितः पयोदम् ॥१॥

अथेति ॥ अथानन्तरं क्रूरस्तीव्रो योऽसुरस्तारकसंज्ञकस्तस्य तत्कर्तृको य उपप्लव उपद्रवः स्वस्थानोच्चाटनादिकस्तेन दुःखितः क्लिष्ट आत्मा यस्य तथाभूतः पुलोमपुत्र्याः शच्या दयितः प्रिय इन्द्रोऽशेषैः समस्तैस्त्रिदशैरात्मभृत्यभूतवृन्दारकैः सह तृष्णातुरितस्तृष्णया तृषया ॥ कर्त्र्या ॥ आतुरित आतुरीकृतः ॥ "तत्करोति" इति णिचि कृते "णाविष्ठवत्" इति टिलोपः । ततः कर्तरि क्तः ॥ पत्री चातकः पयोदमिव । अन्धकारिं हरं प्रपेदे प्राप ॥ अत्र पूर्णोपमालंकारः ॥ सर्गेऽस्मिन्वृत्तमुपजातिः ॥

दृप्तारिसंत्रासखिलीकृतात्स कथंचिदम्भोदविहारमार्गात् ।
अवाततारामि गिरिं गिरीशगौरीपदन्यासविशुद्धमिन्द्रः ॥ २ ॥

दृप्तेति ॥ स इन्द्रः । दृप्तोऽभिमानी योऽरिस्तारकस्तस्माद्यः संत्रासो भयं तेन खिलीकृतादुरवगाह्यमानीकृतादम्भोदानां मेघानां विहारो यत्र स चासौ मार्गश्च । आकाशमित्यर्थः । तस्मात् । गिरीशमहिता या गौरी भवानी तस्याः पदे चरणे तयोर्न्यासो निधानं तेन विशुद्धं पवित्रं गिरिं कैलासमभि संमुखं कथंचित्केनापि प्रकारेण । कष्टेनेत्यर्थः । अवाततारावततार ॥ गिरीशगौरीति गिरिशस्याभ्यर्हितत्वादत्पाचोऽपि पूर्वनिपात इति वा ॥

संक्रन्दनः स्यन्दनतोऽवतीर्य मेघात्मनो मातलिदत्तहस्तः ।
पिनाकिनोऽथालयमुच्चचाल शुचौ पिपासाकुलितो यथाम्भः ३

संक्रन्दन इति ॥ अथानन्तरं संक्रन्दन इन्द्रः ॥ "संक्रन्दनो दुश्च्यवनः" इत्यमरः ॥ मातलिना सारथिना दत्त आश्रयीकरणार्थमग्रेकृतो हस्तो यस्मै सः । अवलम्बितमातलिहस्तः सन्नित्यर्थः । मेघात्मनो मेघस्वरूपधारिणः । मेघरूपादित्यर्थः । स्यन्दनतो रथात् ॥ पञ्चम्यास्तसिल् ॥ अवतीर्यावतीर्य । शुचौ ग्रीष्मे पिपासया तृष्णया । तृषेति यावत् । आकुलित आतुरः पुरुषोऽम्भो यथा जलमिव पिनाकिनो हरस्यालयं निलयमुच्चचाल । उद्दिश्य चचाल गतवानित्यर्थः ॥ "निकाय्यनि-

१ उदग्र. २ [illegible]. ३ स्वागतवान्. ४ गिरिश. [illegible] ५ [illegible].

लयालयाः" इत्यमरः ॥ पिपासेति "अ प्रत्ययात्" इत्यकारप्रत्यये टाप् ॥ अत्रापि पूर्णोपमालंकारः । सामान्यधर्मस्त्वाकुलितत्वमित्याकुलितत्वे निमित्तभूतौ पिपासोपप्लवौ । अनयोर्बिम्बप्रतिबिम्बभावेन सादृश्यम् ॥

इतस्ततोऽथ प्रतिबिम्बभाजं विलोकमानः स्फटिकाद्रिभूमौ ।
आत्मानमप्येकमनेकधा स व्रजन्विभोरास्पदमाससाद ॥ ४ ॥

इतस्तत इति ॥ अथानन्तरं व्रजन्गच्छन्स इन्द्रः स्फटिकाद्रिः कैलासस्तस्य भूमौ पृथिव्यामितस्ततो यत्र तत्र प्रतिबिम्बभाजं प्रतिबिम्बितमेकमप्यात्मानं शरीरमनेकधानेकसंख्यं विलोकमानः पश्यन्सन् । विभोर्महेश्वरस्यास्पदं स्थानमाससाद प्राप ॥

विचित्रचञ्चन्मणिभङ्गिसङ्गं सौवर्णदण्डं दधतातिचण्डम् ।
स नन्दिनाधिष्ठितमध्यतिष्ठत्सौधाङ्गणद्वारमनङ्गशत्रोः ॥ ५ ॥

विचित्रमिति ॥ स इन्द्रः । विचित्रा अनेकवर्णाश्चञ्चन्तो दीप्यमाना ये मणयो रत्नानि तेषां तत्कर्मिका या भङ्गी रचनाविशेषस्तया सङ्गः संबन्धो यस्य । अनेकवर्णमणिखचितमित्यर्थः । अतिचण्डमतिभीषणं सौवर्णदण्डं सुवर्णमयवेत्रं दधता बिभ्रता नन्दिना गणेनाधिष्ठितं द्वारपालतयाधिष्ठितमनङ्गशत्रोः शिवस्य सौधस्य राजसदनस्य संबन्धिनोऽङ्गणस्याजिरस्य ॥ "अङ्गणं चत्वराजिरे" इत्यमरः ॥ द्वारं प्रतीहारम् ॥ "स्त्री द्वार्द्वारं प्रतीहारः" इत्यमरः ॥ अध्यतिष्ठदधितष्ठौ ॥ "अधिशीङ्स्थासाम्-" इति कर्मत्वम् ॥ अन्तःप्रवेशे भगवदाज्ञानुपालनं कुर्वन्द्वार एव तस्थावित्यर्थः ॥

ततः स कक्षाहितहेमदण्डो नन्दी सुरेन्द्रं प्रतिपद्य सद्यः ।
प्रतोषयामास सुगौरवेण गत्वान्तिकं स्वयमीश्वरस्य ॥ ६ ॥

तत इति ॥ ततोऽनन्तरं स नन्दी सद्यः सुरेन्द्रमिन्द्रं सद्य आशु प्रतिपद्य समीपं प्राप्य सुतरां गौरवेणादरेण स्वागतादिना प्रतोषयामास संतोषितवान् । अथ च स्वयं गत्वा कक्षायां हर्म्यप्रकोष्ठे ॥ "कक्षा प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने" इत्यमरः ॥ आहितः स्थापितो हेमदण्डः सुवर्णवेत्रो येन स तथोक्तः सन् । ईश्वरस्य । ईश्वरान्तिकमित्यर्थः ॥ संबन्धविवक्षायां षष्ठी ॥ [illegible] ।
प्रभो महेन्द्र आगत इति निवेदितवानित्यर्थः ॥

---

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible]

भ्रूसंज्ञयानेन कृताभ्यनुज्ञः सुरेश्वरं तं जगदीश्वरेण ।
प्रवेशयामास सुरैः पुरोगः समं स नन्दी सदनं सदस्य ॥ ७ ॥

भ्रूसंज्ञयेति ॥ अनेन जगतामीश्वरेण महेश्वरेण भ्रूसंज्ञया । भ्रुकुटीचमत्कृतिसंकेतेनेत्यर्थः । कृताभ्यनुज्ञः सुरेन्द्रागमनार्थं कृतानुशासनः स नन्दी गणः पुरोगोऽग्रगामी सन् । तं सुरेश्वरमिन्द्रं सच्छोभनमस्य महेश्वरस्य सदनं गृहं सुरैः समं प्रवेशयामास । प्रवेशितवानित्यर्थः ॥

स चण्डिभृङ्गिप्रमुखैर्गरिष्ठैर्गणैरनेकैर्विविधस्वरूपैः ।
अधिष्ठितं संसदि रत्नमय्यां सहस्रनेत्रः शिवमालुलोके ॥ ८ ॥

स इति ॥ स सहस्रनेत्र इन्द्रो गरिष्ठैरतिशयेन गुरुभिः ॥ "प्रियस्थिर—" इत्यादिना गुरुशब्दस्य गरादेशः ॥ अनेकैर्बहुभिर्विविधस्वरूपैर्नानाकृतिभिश्चण्डिभृङ्गिप्रमुखैर्गणै रत्नमय्यां रत्नप्रचुरायाम् ॥ प्राचुर्ये मयट् । "टिड्ढा—" इति ङीप् ॥ संसदि सभायामधिष्ठितमुपविष्टं शिवमालुलोके ददर्श ॥ इह "अधिशीङ्—" इत्याधारस्य कर्मत्वप्रसङ्गो दुर्निवारः । अतएव रत्नमयीं सभां तामिति प्रतिष्ठितमिति वा पठनीयम् । यथास्थितविन्यासे दूषणोद्धारं सुधियो विभावयन्त्विति ॥

अथ त्रयोदशभिर्महेश्वरं विशिनष्टि— कपर्देत्यादिभिः ॥

कपर्दमुद्धद्धमहीनमूर्धरत्नांशुभिर्भासुरमुल्लसद्भिः ।
दधानमुच्चैस्तरमिद्धधातोः सुमेरुशृङ्गस्य समत्वमाप्तम् ॥ ९ ॥

तत्र कपर्देति ॥ किंभूतं शिवम् । उद्बद्धं भुजंगमरज्जुभिर्दृढीकृतमुल्लसद्भिः शोभमानैरत एवाहीनामिनाः स्वामिनस्तेषां वासुकिप्रभृतिमहासर्पाणां मूर्धसु शिरःसु यानि रत्नानि मणयस्तेषामंशुभिर्मयूखैर्भासुरं दीप्यमानम् ॥ "भञ्जभास—" इति घुरच् ॥ उच्चैस्तरं महान्तं कपर्दं जटाजूटं दधानं बिभ्रतम् ॥ "कपर्दोऽस्य जटाजूटः" इत्यमरः ॥ अत एव पुनः किंभूतम् । इद्धाः प्रवृद्धा धातवो गैरिकादयो यत्र तथाभूतं यत्सुमेरोः स्वर्णाद्रेः शृङ्गं तस्य समत्वं सादृश्यमाप्तं प्राप्तम् ॥

बिभ्राणमुत्तुङ्गतरंगमालां गङ्गां जटाजूटतटं भजन्तीम् ।
गौरीं तदुत्सङ्गजुषं हसन्तीमिव स्वफेनैः शरदभ्रशुभ्रैः ॥ १० ॥

बिभ्राणमिति ॥ पुनः किंभूतम् । उत्तुङ्गोन्नतगामिनी । उत्प्लवनरीतिगामीनीत्यर्थः । तथाभूता तरङ्गमाला कल्लोलपङ्क्तिर्यस्याः । जटाजूटस्य कपर्दस्य तटं

१ तेन. २ हरस्य. ३ अधिष्ठितायां सदि. ४ रत्नरत्याम्. ५ सहस्रलोकः. ६ कंदर्पम्. ७ ऊर्ध्वरयमहाद्रि; प्रगल्भमहाद्रि. ८ करात्. ९ तलम्.

समीपभागं भजन्तीम् । तत्र स्थितामित्यर्थः । तथा शरदभ्रवच्छरत्कालिकमेघव-
च्छुभ्रैर्विशदैः स्वफेनैस्तस्य हरस्योत्सङ्गं जुषते सेवते ताम् । हराङ्कस्थितामित्यर्थः ।
गौरीं पार्वतीं हसन्तीमिवोपहास्यं कुर्वतीमिव । सापत्न्यप्रयुक्तमनःसंतापं हास्येन
स्फुटीकुर्वाणामिवेत्युत्प्रेक्षा । गङ्गां बिभ्राणं दधानम् ॥

गङ्गातरंगप्रतिबिम्बितैः स्वैर्बहूभवन्तं शिरसा सुधांशुम् ।
चलन्मरीचिप्रचयैस्तुषारगौरैर्हिमद्योतितमुद्वहन्तम् ॥ ११ ॥

गङ्गेति ॥ पुनः किंभूतम् । गङ्गातरङ्गेषु जाह्नवीकल्लोलेषु प्रतिबिम्बितैः स्वै-
रात्मभिः । शरीरैरिति यावत् । बहूभवन्तमनेकीभवन्तं सुधांशुं चन्द्रं शिरसा मू-
र्ध्नोद्वहन्तं दधानम् । अत एव पुनः किंभूतम् । तुषारवत्तुहिनवद्गौरैः सितैः ॥
"गौरोऽरुणे सिते पीते" इति विश्वः ॥ चलन्तः प्रसरन्तो ये मरीचिप्रचयाः कि-
रणसंघातास्तैर्हिमद्योतितम् । द्योतते शोभते स द्योती । शोभावानित्यर्थः । तस्य
भावो द्योतिता । द्युतिरित्यर्थः । हिमवद्धिमसंघातवद्द्योतिता द्युतिर्यस्य तम् । पूर्वं
धवलाङ्गमप्यनेकचन्द्रशोभाभिरधिकधवलीभूतमित्यर्थः ॥

भालस्थले लोचनमेधमानधामाधरीभूतरवीन्दुनेत्रम् ।
युगान्तकालोचितहव्यवाहं मीनध्वजप्लोषणमादधानम् ॥१२॥

भालस्थल इति ॥ भालस्थले ललाटदेशे एधमानं वर्धमानं यद्धाम तेजस्तेन
निमित्तेनाधरीभूते परीभावमुपागते रवीन्दू एव नेत्रे यस्मात् । ताभ्यामधिकतेज-
स्कमित्यर्थः ॥ यद्वा । एधमानधाम अधरीभूतं चेति पदद्वयम् । तत्रैवं व्याख्येयम् ।
एधमानं वर्धमानं धाम तेजो यस्य । वर्धिष्णुतेजस्कमित्यर्थः ॥ तथोन्नतानतस्थान-
भेदेनाधरीभूते भालस्थनेत्रापेक्षया नीचैर्भूते रवीन्दू एव नेत्रे यस्य । तथा युगा-
न्तकाले प्रलयकाले उचितं परिचितं हव्यवाहमग्निरूपम् । प्रलयकालिकानलरूप-
मित्यर्थः । अत एव मीनध्वजस्य कामस्य प्लोषणं दाहकम् ॥ "प्लुष दाहे" ।
"कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् ॥ एवंभूतं लोचनमादधानं बिभ्राणमित्यर्थः ॥

महार्हरत्नाञ्चितयोरुदारं स्फुरत्प्रभामण्डलयोः समन्तात् ।
कर्णस्थिताभ्यां शशिभास्कराभ्यामुपासितं कुण्डलयोश्छलेन १३

महेति ॥ पुनः किंभूतम् ॥ महार्हाणि बहुमूल्यानि यानि रत्नानि मणयस्तैर-
ञ्चितयोः खचितयोरत एव समन्तात्सर्वत उदारमधिकं यथा स्यात्तथा स्फुरत्प्रस-
रत्प्रभामण्डलं कान्तिवितानं ययोः । तथाभूतयोः कुण्डलयोः कर्णभूषणयोश्छलेन

१ वरद्रैः. २ हैः. ३ बधूभवन्त. ४ तुषारगौरैर्हिमद्योतितम्. ५ एधमानम्. ६ उदार.

कैतवेन कर्णयोः श्रवणयोः स्थिताभ्यामुपविष्टाभ्यां शशिभास्कराभ्यां चन्द्रसूर्याभ्यामुपासितं सेवितम् ॥ कुण्डलविषये कैतवात्सूर्याचन्द्रमसोरारोप्यमाणतात्ताद्रूप्यरूपकं कैतवापह्नुतिश्चेत्युभयोः संसृष्टिः ॥

स्ववद्धया कण्ठिकयेव नीलमाणिक्यमय्या कुतुकेन गौर्याः।
नीलस्य कण्ठस्य परिस्फुरन्त्या कान्त्या महत्या सुविराजमानम् १४

स्ववद्धयेति ॥ पुनः किंभूतम् । परिस्फुरन्त्या परितः प्रसरन्त्या नीलस्य श्यामस्य कण्ठस्यात्मगलस्य महत्या कान्त्या प्रभया सुतरां विराजमानं शोभमानम् । कयेवेत्युत्प्रेक्षते—कुतुकेन कौतुकेन स्वस्मिन्नात्मीयकण्ठे वद्धया निहितया नीलमाणिक्यमय्या नीलरत्नविशेषप्रचुरया गौर्याः कण्ठिकयेव कण्ठभूषयेव ॥ "कण्ठिका कण्ठभूषणम्" इति मेदिनी ॥

कालार्दितानां त्रिदशासुराणां चितारजोभिः परिपाण्डुराङ्गम्।
महन्महेभाजिनमुद्गताभ्रप्रालेयशैलश्रियमुद्वहन्तम् ॥ १५ ॥

कालेति ॥ पुनः किंभूतम् । कालेनावसानकालिकमृत्युनार्दितानां पीडितानाम् । मृतानामिति यावत् । त्रिदशासुराणां देवदैत्यानां चिताया मृतमण्डपस्य रजोभिर्भस्मभिः परितः पाण्डुरं शुभ्रमङ्गं यस्य । विहितमृतमण्डपभस्मोद्धूलनमित्यर्थः ॥ इह देवानाममरत्वाभावो दुर्घटः । तत्र ज्ञानाभावेन निहितपदस्य कवेः प्रमाद इत्याहुः । केचित्पुनः "मनुजासुराणाम्" इति पाठान्तरं कल्पयन्ति । अथ यद्यपि कालार्दितानामिति विशेषणमुभयविशेष्यान्वयित्वेन द्वितीयविशेष्ये विवक्षितमप्यकालार्दितत्वविशेषणस्य व्यभिचारनियमने नियमनाभिप्रायं भवति । तथापि प्रथमविशेष्ये लोकोपकारकतापक्षेऽपि व्यभिचरितार्थसंभवेन विशेषणानुपयोगात्संभवप्रयुक्तप्रधानभूतद्वितीयविशेष्यसंबन्धेन प्रथमविशेष्यान्वयित्वनिरासः । एवं चोपकार्यमनुजसहचरितत्वेन लोकोपकारकतापक्षावलम्बेन च विवक्षितार्थस्याविवक्षितत्वात् । संहारकतापक्षे तु प्रायो गतिरन्वेषणीयेत्यलम् ॥ तथा महत्परिणाहि महेभस्य महतो गजस्याजिनं चर्म परिदधानमिति पूर्वेण संबन्धः । अत एवोद्गतमुदितमभ्रं मेघो यत्र स चासौ प्रालेयशैलो हिमवांस्तस्य श्रियं शोभामुद्वहन्तं दधानम् ॥ निदर्शनालंकारः ॥

पाणिस्थितब्रह्मकपालपात्रं वैकुण्ठभाजापि निषेव्यमाणम्।
नरास्थिखण्डाभरणं रणान्तमूलं त्रिशूलं कलयन्तमुच्चैः ॥ १६॥

१ सुवद्धया. २ गौर्या. ३ च विराजमानम्. ४ परिपाण्डुराङ्गम्. ५ उन्नत. ६ वैकुण्ठककालकरालकायम्. ७ मुरास्थिकण्ठाभरणम्; मुरास्थिखण्डाभरणम्.

पाणीति ॥ पुनः किंभूतम् । पाणौ स्थितं ब्रह्मकपालमेव पात्रं यस्य । पाणि-
ना ब्रह्मकरोटीपात्रं बिभ्राणमित्यर्थः । पुनः किंभूतम् । वैकुण्ठभाजापि हरिणापि
निषेव्यमाणम् ॥ सेवनमत्र कादाचित्कं नत्विदानींतनमेव त्रयाणामभेदस्यैवेष्टार्थ-
कारत्वात् । एकैव मूर्तिरिति सप्तमसर्गोक्तिरिति भावः । हरापेक्षया हरेरपि लघु-
त्वसंभावनया संभवत्येव कदाचित्सेवनम् ॥ तथा नराणामस्थिखण्डान्येवाभर-
णानि यस्य । हिंसाकालसंलग्नस्वशूलत्रितयाशिर्कामित्यर्थः । तथा रणे योऽन्तो
रिपूणामवसानं तस्य मूलं कारणम् ॥ "मूलं कारणमूल्ययोः" इति मेदिनी ॥
उच्चैर्महत्त्रिशूलमायुधविशेषं कलयन्तं दधानम् ॥

पुरातनीं ब्रह्मकपालमालां कण्ठे वहन्तं पुनराश्वसन्तीम् ।
उद्गीतवेदां मुकुटेन्दुवर्षत्सुधाभरौघाप्लवलब्धसंज्ञाम् ॥ १७ ॥

पुरातनीमिति ॥ पुनः किंभूतम् । मुकुटे य इन्दुश्चन्द्रस्तस्माद्वर्षन्गलन्यः सु-
धाभरौघोऽमृतसमूहप्रवाहस्तत्र य आप्लवः स्नानं तेन निमित्तेन लब्धसंज्ञां प्राप्तचे-
तनामत एवाश्वसन्तीमुज्जीवन्तीम् । अत एव पुनर्भूयोऽप्युद्गीतवेदां पठितश्रुतिकाम् ।
ब्रह्मत्वादिति भावः । पुरातनीं प्राक्तनीम् ॥ "सायंचिरम्—" इत्यादिना
पुराव्ययात् ट्युतुटौ । टित्वान्ङीप् ॥ ब्रह्मकपालानां मालां स्रजं कण्ठे गले
वहन्तम् । दधानमित्यर्थः ॥

सलीलमङ्कस्थितया गिरीन्द्रपुत्र्या नवाष्टापदवल्लिभासा ।
विराजमानं शरदभ्रखण्डं परिस्फुरन्त्याचिररोचिषेव ॥ १८ ॥

सलीलमिति ॥ पुनः किंभूतम् ॥ नवं यदष्टापदं हेम ॥ "हेमन्यष्टापदं वरे"
इति मेदिनी ॥ तस्य वल्ली लता ॥ "वल्ली तु व्रततिर्लता" इत्यमरः ॥ प्रकृत्या
तु वल्लिशब्दस्य ह्रस्वत्वमेव । "कृदिकारादक्तिनः" इति दीर्घत्वम् ॥ तस्या
भा इव भा यस्याः । तद्वच्छोभमानेत्यर्थः । तथा सलीलं सक्रीडमङ्कस्थितयाङ्कमा-
रूढया गिरीन्द्रपुत्र्या हिमालयकन्यया परितः स्फुरन्त्या प्रसरन्त्याचिररोचिषा
चलप्रभया विद्युता शरदभ्रस्य शरत्कालिकमेघस्य खण्डं शकलमिव विराजमानं
शोभमानम् । महेश्वरस्य शुभ्रत्वं भस्मोद्धूलनादिति विवेचनीयम् । खण्डपदस्य
च शुभ्रत्वमात्रतात्पर्येण न विरुध्यते ॥

दृप्तान्धकप्राणहरं पिनाकं महासुरस्त्रीविधवत्वहेतुम् ।
करेण गृह्णन्तमगृह्यमन्यैः पुरास्मरस्तोपणकेलिकारम् ॥ १९ ॥

---

१ उद्गीतवेदाम्; उद्गीतवेदाम्. २ सुधौघसंप्लावन. ३ नुन्यमना. ४ महासुर. ५ विधवात्वम्.
६ असहमन्यैः. ७ पुर.

इत्येति ॥ इप्तोऽभिमानी योऽन्धकोऽसुरस्तस्य प्राणानां हरमपहारकम् । हननसाधनमित्यर्थः । तथा महासुरास्त्रिपुरादयस्तेषां याः स्त्रियस्तासां विध वैधव्यम् । मृतभर्तृकत्वमिति यावत् । तस्य हेतुं कारणम् । महासुरविनाशकमित्य तथा पुरा पूर्वं स्मरस्य कामस्य प्लोषणं दाहं केल्यानायासेन करोतीति तथा । अ शिवातिरिक्तरग्रहं गृहीतुमशक्यं पिनाकं धनुः करेण पाणिना गृह्णन्तं दधानं

भद्रासनं काञ्चनपादपीठं महार्हमाणिक्यविभक्तिचित्रम् ।
अधिष्ठितं चन्द्रमरीचिगौरैरुद्वीज्यमानं चमरैर्गणाभ्याम् ॥२०॥

भद्रासनमिति ॥ महार्हाणां बहुमूल्यानां माणिक्यानां विभक्तिभी रचना भिश्चित्रं विचित्रम् । भद्रं शुभमासनं पट्टादिनिर्मितं यत्र तादृशम् ॥ बध्नन्तमिति पदमध्याहार्य भद्रासनमासनविशेषमिति केचिद्व्याचक्षते । तत्त्वध्याहारदोषायो गाभ्याससमयाभावेन तदसंभवाच्चोपक्षणीयमिति ॥ काञ्चनपादपीठं सौवर्णसिंहा सनमधिष्ठितम् । तत्रोपविष्टमित्यर्थः ॥ " अधिशीङ्स्थासाम्–" इति कर्मत्वम् ॥ पुनश्च । चन्द्रमरीचिवद्गौरैर्धवलैश्चमरैः कृत्वा गणाभ्यां कर्तृभ्यामुद्वीज्यमानं मेव्य मानम् ॥ कर्तृद्वित्वे चमरबहुत्वं प्रतिक्षणनूतनग्रहणात्संगमनीयम् ॥

शस्त्रास्त्रविद्याभ्यसनैकसक्ते सविस्मयैरेत्य गणैः सुदृष्टे ।
नीराज्यमाने स्फटिकाचलेन सानन्दनिर्दिष्टदृशं कुमारे ॥२१॥

शस्त्रास्त्रेति ॥ शस्त्राणि धनुरादीनि । अस्त्राणि मोहनादीनि । तान्येव विद्यास्तासामभ्यसन एवैकं केवलं सक्तेऽनुरक्ते । तथा गणैः प्रमथप्रभृतिभिरेत्य तत्समीपं प्राप्य सविस्मयैः साश्चर्यैः सद्भिः सुतरां दृष्टे । साभिलाषमवलोकित इत्यर्थः । तथा स्फटिकाचलेन कैलासेन । जङ्गमात्मकेन सतेति शेषः । नीराज्य माने । आर्तिक्येनेति शेषः । एवंभूते कुमारे पुत्रे सानन्दं सामोदं निर्दिष्टा संनि हिता दृग्दृष्टिर्येन तम् । सानन्दतया कुमारमवलोकयन्तमित्यर्थः ॥

तथाविधं शैलसुताधिनाथं पुलोमपुत्रीदयितो निरीक्ष्य ।
आसीत्क्षणं क्षोभपरो नु कस्य मनो न हि क्षुभ्यति धामधाम्नि२२

तथाविधमिति ॥ पुलोमपुत्री पुलोमजा । शचीति यावत् ॥ " पुलोमजा शचीन्द्राणी " इत्यमरः ॥ तस्या दयितः प्रियः पुरंदरः । तथाविधं पूर्वोक्तवि शेषणविशिष्टं शैलसुतायाः पार्वत्या अधिनाथं महेश्वरं निरीक्ष्य क्षणं मुहूर्तं क्षोभे चित्तसंचलने पर आसक्तः संचलनेन व्याकुल आसीत् ॥ ननु महेश्वरदर्शनेन

१ महार्घ्य. २ अत्रसक्ते, एकसक्तेः. ३ सुदृष्टम्. ४ संवीज्यमाने. ५ अम्बिकयाचलेन. ६ अथ कस्य; अत्र कस्य; अन्तकस्य.

कथं व्याकुल आसीदित्यर्थान्तरं न्यस्यति--हि यतः । धामवान्ति तेजोराशौ कस्य मनश्चेतो न क्षुभ्यति क्षोभं प्राप्नोति । अपि तु सर्वस्यापीत्यर्थः ॥

विकस्वराम्भोजवनश्रिया तं दृशां सहस्रेण निरीक्षमाणः[1] ।
रोमालिभिः स्वर्गपतिर्विभासे[2] पुष्पोत्कराकीर्ण इवाम्रशाखी[3] ॥ २३ ॥

विकस्वरेति ॥ स्वर्गपतिर्महेन्द्रः । विकस्वराणां प्रफुल्लानामम्भोजानां कमलानां वनस्य श्रीरिव श्रीः शोभा यस्य तथाभूतेन दृशां नेत्राणां सहस्रेण तं महेश्वरं निरीक्षमाणो विलोकमानः सन् । रोम्णामालिभिः समूहैर्निमित्तैः पुष्पाणामुत्करेण समूहेनाकीर्ण आसमन्ताद्व्याप्त आम्रशाख्याम्रवृक्ष इव बभासे शुशुभे ॥ उपमालंकारः ॥

दृष्ट्वा सहस्रेण[4] दृशां महेशमभूत्कृतार्थोऽतितरां महेन्द्रः ।
सर्वाङ्गजातं[5] तदथो विरूपमिव[6] [7] प्रियाकोपकरं[8] विवेद ॥ २४ ॥

दृष्ट्वेति ॥ दृशां सहस्रेण महेशं शिवं दृष्ट्वा महेन्द्र इन्द्रोऽतितरामतिशयं कृतार्थः कृतकृत्योऽभूत् । अथोऽनन्तरं तत्सर्वाङ्गजातं सर्वेष्वङ्गेषु भूतं विरूपं रोमाञ्चजनितवैरूप्यं प्रियायाः शच्याः कोपकरं क्रोधविधायीव विवेद जज्ञे । सपत्नीसंबन्धजनितत्वशङ्काकुलत्वादिति भावः ॥

ततः[9] कुमारं कनकाद्रिसारं पुरंदरः प्रेक्ष्य धृतास्त्रशस्त्रम् ।
महेश्वरोपान्तिकवर्तमानं शत्रोर्जयाशां मनसा बबन्ध ॥ २५ ॥

तत इति ॥ ततोऽनन्तरम् । पुरंदर इन्द्रः कनकाद्रेः सुमेरोः सार इव सारो वीर्यं यस्य तम् । महाबलीयांसमित्यर्थः । अत एव धृतान्यस्त्राणि शस्त्राणि च येन । तथा महेश्वरस्य पितुरुपान्तिके समीपे वर्तमानं तिष्ठन्तं कुमारं प्रेक्ष्य विलोक्य शत्रोस्तारकस्य जय आशां मनसा बबन्ध धृतवान् । एवंभूतोऽयं कुमारो मच्छत्रुक्षेपणक्षम एवेति पुरंदरस्य प्रतीतिरभूदित्यर्थः ॥

अथ धर्मेणाह--

श्रीनीलकण्ठ द्युपतिः पुरोऽस्ति त्वयि प्रणामावसरं प्रतीच्छन्[10] ।
सहस्रनेत्रोऽत्र भव त्रिनेत्र[11] दृष्ट्या[12] प्रसादप्रगुणो[13] महेश[14] ॥ २६ ॥

---

१ निरीक्ष्यमाणः. २ सर्वाङ्गनेत्रो द्युपतिः; सर्वाङ्गनेत्र द्युपतिः. ३ अग्रशाखी. ४ दृष्ट्वा तेन दृशः. ५ सर्वाङ्गजातं विकटम्; सर्वाङ्गजातं तदलम्. ६ विरूपम्. ७ इव. ८ प्रियाकोपकरम्; प्रियाकोपकरः. ९ तत. १० प्रतीच्छन्; प्रतीक्षन्. ११ सहस्रनेत्रोऽत्र भव त्रिनेत्र; सहस्रनेत्रं नयत त्रिनेत्रम्. १२ दृशा. १३ मवना. १४ महेशः.

इति प्रबद्धाञ्जलिरेत्य नन्दी निधाय कक्षामभि हेमवेत्रम् ।
प्रसादपात्रं पुरतो भविष्णुरथ स्मरारातिमुवाच वाचम् ॥२७॥

श्रीति । इतीति ॥ अथ नन्दी गणः पुरतः सर्वेभ्योऽग्रगामितयेन्द्राधिष्ठितकक्षामारभ्य महेश्वराधिश्रितमन्दिरपर्यन्तमहंपूर्विकया । बहुविधगणगणसुरगणावृते मध्यगतदेशेऽहंपूर्विकावलम्बेनेति तात्पर्यार्थः । प्रसादस्येन्द्रागमनिवेदनामुदन्धेनान्धकारिणा दत्तपारितोषिकरूपस्य पात्रं योग्यो भविष्णुर्भवितुमिच्छुः सन्नेत्य । अन्तरिति शेषः । तथा कक्षां द्वारमभि संमुखं हेमवेत्रं सौवर्णयष्टिकां निधाय संस्थाप्य । इयं वेत्रधारिणीरीतिर्नन्दिना । प्रबद्धाञ्जलिः सन्स्मरारातिं महेश्वरम् । भोः श्रीयुक्तनीलकण्ठ सत्पार्वतीकमहेश्वर । सुपतिरिन्द्रस्त्वयि भवति प्रणामावसरं प्रणतिसमयं प्रतीच्छन्प्रतीक्षमाणः पुरोऽग्रेऽस्ति विद्यते । महेश्वरमणिनंष्ठुः सन्वहिरास्त इत्यर्थः । अतो हे त्रिनेत्र भो महेश । अत्र पुरोवर्तिनि सहस्रनेत्र इन्द्रे दृष्ट्या दर्शनेन प्रसादप्रगुणः प्रसादविधानानुकूलो भव । आत्मीयदर्शनरूपं प्रसादं तदुपरि कुर्वित्यर्थः । इत्येवंभूतां वाचमुवाचोक्तवान् ॥

पुरा सुरेन्द्रं सुरसंघसेव्यं त्रिलोकसेव्यस्त्रिपुरासुरारिः ।
प्रीत्या सुधासारनिधारिणेव ततोऽनुजग्राह विलोकनेन ॥२८॥

पुरेति ॥ ततोऽनन्तरं निवेदनानन्तरं त्रिलोकसेव्यस्त्रैलोक्यपूजनीयस्त्रिपुरासुरस्यारिः शत्रुर्महेश्वरः सुरसंघेन देवसमूहेन सेव्यं पूज्यं सुरेन्द्रमिन्द्रं पुरा प्रथमं प्रीत्या निमित्तेन सुधासारम् । अमृततुल्यमित्यर्थः । निधारयति नितरां धारां धारारूपं करोति ॥ "तत्करोति" इति करोत्यर्थे णिच् ॥ सुधासारधारां वर्षतेत्यर्थः । एवंभूतेनेव विलोकनेन दर्शनेनानुजग्राह । तदुपर्यनुग्रहमकार्षीदित्यर्थः । स्वामिनां प्रसादपूर्वकमवलोकनमेव भृत्यानामुपरि महाननुग्रह इति भावः ॥

किरीटकोटिच्युतपारिजातपुष्पोत्करेणानमितेन मूर्ध्ना ।
स्वर्गैकवन्द्यो जगदेकवन्द्यं तं देवदेवं प्रणनाम देवः ॥ २९ ॥

किरीटेति ॥ स्वर्गे एवैकं केवलं वन्द्यो नमस्करणीयो देव इन्द्रः । आनमितेनाऽत एव किरीटकोट्याश्च्युतोऽधःपतितः पारिजातपुष्पाणां मन्दारकुसुमानामुत्करः समूहो यस्मात्तथाभूतेन मूर्ध्ना शिरसा जगतामेकमेव वन्द्यं नमस्करणी-

---

१ हेमदण्डम्, २ भविष्णुमथान्धकारातिम् ; भविष्णुरथिस्मरारातिम्. ३ सुरा. ४ अमृतारम्. ५ त्रैलोक्यसेव्यः; त्रैलोक्यमान्यः. ६ सुधासारविसारिणा; सुधाःसारनिधारिणा. ७ पूर्वेण भक्त्या. ८ स्वर्गैकवन्द्यः. ९ प्रणतस्तदेव ननाम देवः स सहस्रनेत्रः.

यम् । एतत्सदृशो जगतां वन्द्यतयान्यो न विद्यत इत्यर्थः । तं देवदेवं महेश्वरं प्रणनाम नमश्चक्रे ॥

अनेकलोकैकनमस्क्रियार्हं महेश्वरं तं त्रिदशेश्वरः सः ।
भक्त्या नमस्कृत्य कृतार्थतायाः पात्रं पवित्रं परमं बभूव॥३०॥

अनेकेति ॥ स त्रिदशेश्वर इन्द्रो भक्त्या । भक्तिपूर्वकमित्यर्थः । अनेके त्रयो ये लोकास्तेषामेक एव नमस्क्रियायामर्ह उचितस्तथोक्तं तं महेश्वरं नमस्कृत्य ॥ "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इत्युक्तेर्द्वितीया ॥ परममत्यन्तं पवित्रं विशदं कृतार्थतायाः कृतकृत्यत्वस्य पात्रं स्थानं बभूव । महेन्द्रो महेश्वरं प्रणम्य कृतकृत्योऽभूदित्यर्थः ॥

सुभक्तिभाजामधि पादपीठं प्रान्तक्षितिं नम्रतरैः शिरोभिः ।
ततः प्रणेमुः पुरतो गणानां गणाः सुराणां क्रमतः पुरारिम्॥३१॥

सुभक्तीति ॥ ततोऽनन्तरम् । सुभक्तिं भजन्ति तेषाम् ॥ "भजो ण्विः" इति ण्विः ॥ सुराणामिन्द्रातिरिक्तानां सुराणां गणाः । गणानां प्रमथप्रभृतीनां पुरतोऽग्रे । अनेन मर्यादातिरिक्तकरणस्य दुर्विधेयत्वमुक्तम् । पादपीठस्य चरणाधारपीठविशेषस्य प्रान्तक्षितिसमीपभूमिस्तामध्याधिकृत्य । आधारभूतां कृत्वेत्यर्थः ॥ अत्राधिशब्देनाधिकरणमाधारः । स चोपश्लेषिकः । अव्ययानामाकृतिगणत्वाद् धिशब्दोऽत्राधिकरणपर्यायोऽव्ययम् । अन्यथासन्नत्वमन्वेषणीयम् ॥ नम्रतरैः शिरोभिः पुरारिं महेश्वरं क्रमतः क्रमेण प्रणेमुर्नमश्चक्रुः ॥

गणोपनीते प्रभुणोपदिष्टः शुभासने हेममये पुरस्तात् ।
प्राप्योपविश्य प्रमुदं सुरेन्द्रः प्रभुप्रसादो हि मुदे न कस्य॥३२॥

गणेति ॥ सुरेन्द्रः । गणेन केनचिदुपनीते । प्रभुणा समर्पिते इत्यर्थः । तथा हेममये सुवर्णमये शुभासने प्रभुणा हरेणोपदिष्ट आरोढुमाज्ञप्तः सन् । पुरस्तात्सम्मुख उपविश्य स्थित्वा प्रकृष्टां मुदं हर्षं प्राप । तथा हि । प्रभुप्रसादः प्रभुकृतोऽनुग्रहः कस्यानुगस्य मुदे प्रीत्यै न भवति । अपि तु सर्वस्यापीति वाक्यं व्याख्येयम् ॥

क्रमेण चान्येऽपि विलोकनेन संभाविताः सस्मितमीश्वरेण ।
उपाविशंस्तोषविशेषभाजो दृग्गोचरे तस्य सुराः समग्राः॥३३॥

---

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ [illegible]

क्रमेणेति ॥ ईश्वरेण महेश्वरेण क्रमेणानुक्रमतोऽन्येऽपि च समग्राः सुराः सस्मितं सप्रसादव्यञ्जकहासं यथातथा विलोकनेन संभाविताः आदृता अत एव तोषविशेषं संतोषाधिक्यमाप्ताः प्राप्ताः सन्तस्तस्य प्रभोर्दृग्गोचरे दृष्टिविषय उपाविशंस्तस्थुः । यथा युगपदेव भगवान्सर्वानवलोकयेत्तथैव सर्वे तस्थुरित्यर्थः ॥

अथाह देवो बलवैरिमुख्यान्गीर्वाणवर्गान्करुणार्द्रचेताः ।
कृताञ्जलीकानसुराभिभूतान्ध्वस्तश्रियः श्रान्तमुखानवेक्ष्य॥३४॥

अथेति ॥ अथ देवो हरो बलवैरीन्द्रः स मुख्यो येषु तथाभूतान्गीर्वाणवर्गान्देवसमूहान् । असुरेण तारकेणाभिभूताञ्जितानत एव ध्वस्तश्रियो नष्टलक्ष्मीकानत एव श्रान्तं खिन्नं मुखं येषाम् । नष्टमुखतेजस इत्यर्थः । अत एव कष्टनिवृत्त्यर्थं कृतोऽञ्जलिर्यैस्तानवेक्ष्य दृष्ट्वा करुणयार्द्रं स्निग्धं चेतो यस्य तथाभूतः सन्नाहोवाच ॥

अहो बतानन्तपराक्रमाणां दिवौकसो वीरवरायुधानाम् ।
हिमोदबिन्दुग्लपितस्य किं वः पद्मस्य दैन्यं दधते मुखानि॥३५॥

अहो इति ॥ अहोशब्दोऽत्र हेशब्दपर्यायः । हे दिवौकसो देवाः । अनन्तपराक्रमाणामपारविक्रमाणाम् । तथा वीरान्वृणतेऽभिलषन्ति । वीरहस्तनिर्गमाभिलाषशालीनीत्यर्थः । एवंभूतान्यायुधानि येषां तथाभूतानां वो युष्माकं मुखानि हिमस्य यदुदमुदकं तस्य यो बिन्दुस्तेन ग्लपितस्य क्षीणहर्षीकृतस्य ॥ "उदकस्योदः संज्ञायाम्" इत्युदादेशः ॥ तथाभूतस्य पद्मस्य दैन्यं दीनतां किं कुतो दधते बिभ्रति । यूयं कुतः कारणतो भ्रष्टलक्ष्मीका इति प्रश्नाशयः ॥

स्वर्गौकसः स्वर्गपरिच्युताः किं स्वपुण्यराशौ सुमहत्तमेऽपि ।
चिह्नं चिरोढं न तु यूयमेते निजाधिपत्यस्य परित्यजध्वम्॥३६॥

स्वर्गौकस इति ॥ हे स्वर्गौकसः । स्वपुण्यराशौ स्वर्गप्राप्तिनिमित्तपुण्यव्रजे सुतरां महत्तमेऽपि । अक्षयेऽपीत्यर्थः । किं कुतः स्वर्गपरिच्युताः स्वस्थानभ्रष्टाः । भ्रंशे किं कारणमिति प्रश्नाशयः । अथ चाश्वासयति—एते यूयं चिरोढं बहुकालमूढं निजाधिपत्यस्य स्वीयस्वामितायाश्चिह्नं छत्रचामरादि तु न परित्यजध्वं मा परित्यजत ॥ विध्यर्थे लोट् । त्यजध्वमित्यात्मनेपदं चिन्त्यम् ॥

१ [illegible]मुख्यान्. २ असुरैरभिभूतान्. ३ ध्वस्तश्रियान्. ४ श्रान्तमुखान्. ५ दिवौकसाम्. ६ सुपुण्यराशौ. ७ सुमहत्तरे. ८ बत; ननु.

दिवौकसो देवगृहं विहाय मनुष्यसाधारणतामवाप्ताः ।
यूयं कुतः कारणतश्चरध्वं महीतले मानभृतो महान्तः ॥ ३७ ॥

दिवौकस इति ॥ हे दिवौकसः । महान्तोऽत एव मानभृतो मनस्विनो यूयं कुतः कारणतः कारणाद्देवगृहं स्वर्गं विहाय परित्यज्य मनुष्यसाधारणतां मानवसाम्यमवाप्ताः सन्तो महीतले चरध्वम् ॥ संप्रश्ने लोट् । अत्राप्यात्मनेपदं चिन्त्यम् ॥

अनन्यसाधारणसिद्धमुच्चैस्तद्दैवतं धाम निकामरम्यम् ।
कस्मादकस्मान्निरगाद्बवज्ञाश्चिरार्जितं पुण्यमिवापचारात् ॥३८॥

अनन्येति ॥ हे देवाः । अन्यसाधारणेनान्यदीयदेशतुल्यत्वेन सिद्धं साधितम् । रचितमित्यर्थः । तत्र भवद्भिर्न तथोक्तमत एव निकामं बहु रम्यं मनोहरमुच्चैर्महत्तत्प्रसिद्धं दैवतं धाम स्वर्गमकस्मान्महदेव कस्माद्धेतोः । भवद्भ्योऽपचारात्पापाद्धेतोश्चिरार्जितं बहुकालेन संपादितं पुण्यमिव निरगान्निर्गतम् । "तु- ल्योपाग्न स्थल कर्म जातें राहिलें" इति लोकोक्तिरनुसंधेया ॥

दिवौकसो वो हृदयस्य कस्मात्तथाविधं धैर्यमहार्यमार्याः ।
अगादगाधस्य जलाशयस्य ग्रीष्मातितापादिवशादिवाम्भः ३९

दिवौकस इति ॥ हे दिवौकसो हे आर्याः । तथाविधं तादृगहार्यमनिर्वपनीयं वो युष्माकं हृदयस्य मनसो धैर्यं कस्माद्धेतोर्ग्रीष्मेण योऽतितापादिः संतापादिस्तस्य वशाद्धेतोः । अगाधस्य जलाशयस्याम्भ इव । अगादगात् । अन्यत्र शुष्यतीत्यर्थः । धैर्यं न हेयमिति भावः ॥

संप्रति स्वयमेव भयनिमित्तं दर्शयति—

सुराः सुराधीशपुरःसराणां सैमीयुषां वः समभ्यातुराणाम् ।
तहृत लोकत्रयजित्वराक्तिं महासुरात्कतो विरुद्धम् ॥ ४० ॥

सुरा इति ॥ हे सुराः । तत्र [illegible] एव सर्वे सह समीयुषामागतानां तथा सुराधीशपुरःसराणामिन्द्रप्रमुखानां वो युष्माकं लोकत्रयजित्वर-

१ [illegible]. २ [illegible]. ३ महीतले. ४ [illegible]. ५ [illegible]. ६ [illegible]; [illegible]. ७ [illegible]. ८ [illegible]. ९ [illegible]. १० [illegible]. ११ [illegible]. १२ [illegible]. १३ [illegible]. १४ [illegible].

त्रैलोक्यजेतुस्तारकतस्तारकसंज्ञकान्महासुराद्विरुद्धं वैरं किम् । स
मिति प्रश्नः । ब्रूत वदत ॥

पराभवं तस्य महासुरस्य [1]निषेद्धुमेकोऽहमलंभविष्
दावानलप्लोषविपत्तिमन्यो महाम्बुदात्किं हरते वना
पराभवमिति ॥ भो देवाः । तस्य महासुरस्य तारकस्य तत्कर्तृ
र्तृकर्मणोः " इति कर्तरि षष्ठी ॥ पराभवं पराजयम् । अर्थाद्योष्माकी
निषेद्धुं निवारयितुमहमेक एवालंभविष्णुः । समर्थोऽस्मीत्यर्थः । तथा
नां संबन्धिनीं दावानलस्य दावानलकर्तृको यः प्लोषो दाहः स एव वि
महाम्बुदान्महतो मेघादन्योऽपरः ॥ " अन्यारात्- " इत्यादिना पञ्चमी
किम् । अपि तु नैवेति काका व्याख्येयम् ॥

इतीरिते मन्मथमर्दनेन सुराः सुरेन्द्रप्रमुखा मुखेषु ।
[3]सान्द्रप्रमोदाश्रुतरंगितेषु दधुः श्रियं सत्वरमाश्वसन्तः ॥ ४

इतीति ॥ मन्मथमर्दनेन महेश्वरेण इतीत्थमीरित उक्ते सति सुरेन्द्रप्रमु
सुरा देवा आश्वसन्तो विश्वसन्तः सन्तः । उज्जीवन्त इति यावत् । सान्द्राणि
घनानि यानि प्रमोदाश्रूण्यानन्दबाष्पाणि तैस्तरंगितेषु तरंगयुक्तेषु मुखेषु सत्व
शीघ्रम् । महेश्वरवाक्यस्यात्यानन्दहेतुत्वाच्छैघ्यम् । श्रियं शोभां दधुर्बभ्रुः ॥

ततो गिरीशस्य गिरां विरामे जगाद लब्धेऽवसरे सुरेन्द्रः ।
भवन्ति वाचोऽवसरे प्रयुक्ता ध्रुवं फलाविष्टमहोदयाय ॥ ४३॥

तत इति ॥ ततोऽनन्तरं गिरीशस्य हरस्य गिरां वाचां विरामे सति लब्धे
प्राप्तेऽवसरे समये सुरेन्द्र इन्द्रो जगादोवाच । तथा हि । अवसरे काले प्रयुक्ताः
प्रेरिताः । उक्ता इति यावत् । वाचो गिरः फलेनाविष्टः पूर्णो यो महोदयो म-
हर्द्धिस्तस्मै तदर्थं भवन्ति ध्रुवम् ॥ क्रियाग्रहणात्संप्रदानत्वम् । तादर्थ्ये वा चतुर्थी ॥

ज्ञानप्रदीपेन तमोपहेनाविनश्वरेणास्खलितप्रभेण ।
भूतं भवद्भावि च यच्च किंचित्सर्वज्ञ सर्वं तव गोचरं तत् ॥ ४४॥

ज्ञानेति ॥ हे सर्वज्ञ । तमोपहेनाज्ञानहन्त्राविनश्वरेणाक्षयेनास्खलितप्रभेणा-
स्खलितकान्तिना । अनेन विशेषणेनामन्दकान्तित्वं हि बोद्धव्यम् । अतो न पौ-
नरुक्त्यम् । तथाभूतेन ज्ञानप्रदीपेनात्मज्ञानरूपप्रदीपकेन भूतं व्यतीतं भवद्वर्तमानं

१ निषद्धुमः. २ अरण्यम् हर्तुं जलदास्वधुः किम. ३ सान्द्रप्रमोदाः मुखेषु तरंगितेषु. ४ विश्व-
से. ५ लब्धावसरे. ६ सुरेशः. ७ प्रतिरम्यफलोदयाय; प्रभाविष्टफलोदयाय. ८ सर्वत्र. ९ गोचरः.

भावि भविष्यच्च यत्किंचित्तत्सर्वमेव तव गोचरं ज्ञानविषयम् । अस्तीत्यर्थः । आत्मज्ञानेन त्रैकालिकस्यापि कर्मादिकस्य ज्ञातासीति भावः ॥

दुर्वारदोरुद्यमदुःसहेन यत्तारकेणामरघस्मरेण ।
तदीशतामाप्तवता निरस्ता वयं दिवोऽमी वेद किं न वेत्सि ॥ २५

दुर्वारेति ॥ हे भगवन् । दुर्वारो दुर्धर्षणीयो यो दोरुद्यमो भुजदण्डबलं तेन कारणेन दुःसहेनात एवामराणां देवानां घस्मरेण वधकेन ॥ "घस्मरो वधकेऽपि च" इति मेदिनी ॥ "सृघस्यदः क्मरच्" इति क्मरच्प्रत्ययः ॥ ईशतां स्वर्गाधीशतामाप्तवता तारकेणामी वयं दिवः स्वर्गसकाशाद्यन्निरस्ता निष्कासिता-स्तच्च वेत्सि किम् । अपि तु वेत्स्येव । वद ॥ वाक्यार्थः कर्म ॥

विधेरमोघं स वरप्रसादमासाद्य सद्यस्त्रिजगज्जिगीषुः ।
सुरानशेषानहकप्रमुख्यान्दोर्दण्डचण्डो मनुते तृणाय ॥ २६ ॥

विधेरिति ॥ हे भगवन् । स तारको विधेर्ब्रह्मणः सकाशादमोघं सफलं वर-प्रसादमभिलाषानुग्रहम् ॥ "वरोऽभिलषिते वरे" इति मेदिनी ॥ आसाद्य प्राप्य सद्यः सहसैव दोर्दण्डाभ्यां भुजदण्डाभ्यां चण्डः प्रचण्डः । दुर्जय इति यावत् । अत एव त्रिजगतो जिगीषुर्जेता सन् । अहकप्रमुख्यानहं प्रमुखो ज्येष्ठो येषु तथा-भूतानशेषान्सर्वान्सुरान् । तृणाय तृणं मनुते मन्यते ॥ "मन्यकर्मण्यनादरे विभा-षाप्राणिषु" इति चतुर्थी सविकरणग्रहणात्तनोतियोगे चिन्त्या ॥

स्तुत्या पुरास्माभिरुपासितेन पितामहेनेति निरूपितं नः ।
सेनापतिः संयति दैत्यमेतं पुरः स्मरारातिसुतो निहन्ति ॥ २७ ॥

स्तुत्येति ॥ हे भगवन् । पुरा पूर्वमस्माभिः स्तुत्या श्लाघयोपासितेनानुकू-लितेन पितामहेन ब्रह्मणा नोऽस्मान् "हे देवाः । संयति संगरे स्मरारातिसुतः शां-करिः सेनापतिः सेनानीः प्रधेनं दैत्यं पुरोऽग्र निहन्ति । निहनिष्यतीत्यर्थः" ॥ "यावत्पुरानिपातयोर्लट्" ॥ इति निरूपितं कथितम् ॥

अहो ततोऽनन्तरमद्ययावत्सुदुःसहां तस्य पराभवार्तिम् ।
विषेहिरे हन्त हृदन्तशल्यमाज्ञानिवेशं त्रिदिवौकसोऽमी ॥ २८ ॥

---

१ दोर्दर्प. २ वदीय नन्वाम्नायोभिरस्ताः; वदीय बालाम्बराभिरस्ताः. ३ वर. ४ सुरर. ५ अस्मत्प्रमुख्यानमरानशेषान्; सुरांश्च सर्वानिभुजान्प्रचण्ड; सुरांश्च सर्वान्सुरात्सुरदारान्. ६ ए-नम्. ७ पुरा स्मराराविसुतः; पुरः स्मरारेस्तनयः. ८ अधुनाः; अनन्तरः. ९ पुरा अनन्तरत पराभवार्तिम्; सुदुःसहं चाय पराभवं मन. १० हन्त. ११ निवेदन.

अहो इति ॥ अहो भगवन् । ततः पितामहनिरूपणादनन्तरमद्यपर्यन्तममी त्रिदिवौकसो देवाः सुदुःसहाम् ॥ "ईषद्दुःसुषु–" इति खल् ॥ दस्युकर्तृकां पराभवेन निमित्तेनार्तिं पीडां हृदन्ते मनोमध्ये शल्यं तद्दुःसहमनुशासनस्य "भारं वहते" इत्यादिकस्य निवेशं स्थापनं निर्पीडेऽस्मान् हन्तेति दुःखे ॥

निदाघधामक्रमविक्लवानां नवीनमम्भोदमिवौषधीनाम् ।
सुनन्दनं नन्दनमात्मनो नः सेनान्यमेतं स्वयमादिश त्वम् ॥४९॥

निदाघेति ॥ हे भगवन् । त्वं स्वयमेव निदाघे ग्रीष्मे यद्धाम सौरं तेजस्तेन यः क्रमः खेदो दाहलक्षणस्तेन विक्लवानां मलिनानामौषधीनां सुतरां नन्दनमानन्दकारिणं नवीनमापाढीयमम्भोदमिव नोऽस्माकं नन्दनमानन्दकारिणं तथा सेनान्यं सेनाधिपतिमेतं पुरोवर्तिनमात्मनो नन्दनं पुत्रम् ॥ नन्द्यादित्वाल्ल्युः । युवोरनाकावित्यनादेशः ॥ आदिशानुशाधि ॥ प्रार्थनायां लोट् ॥ अस्मत्कार्यं कर्तुमिति शेषः ॥

त्रैलोक्यलक्ष्मीहृदयैकशल्यं समूलमुत्खाय महासुरं तम् ।
अस्माकमेषां पुरतो भवन्सन्दुःखापहारं युधि यो विधत्ते ॥५०॥

त्रैलोक्येति ॥ यो भवन्नन्दनस्त्रैलोक्यस्य लक्ष्म्या हृदय एकमद्वितीयं शल्यं तद्दुर्धर्षं तं महासुरं तारकं युधि संगर एषामस्माकं पुरतोऽग्रे भवन्सन् । अग्रे भूत्वेत्यर्थः । समूलं सकुटुम्बपरिवारमुत्खाय निहत्य दुःखापहारं दुःखविनाशं विधत्ते कुरुते । त्वन्नन्दनं विनास्माकं दुःखसमूहः केन निवार्यत इति भावः ॥

महाहवे नाथ तवास्य सूनोः शस्त्रैः शितैः कृत्तशिरोधरा[illegible]
महासुराणां रमणीविलापैर्दिशो[illegible]

महाहव इति ॥ हे नाथ । महाहवे [illegible]
सुतस्य शितैस्तीक्ष्णैः शस्त्रैः करवालादि[illegible]
हासुराणां दैत्यानां तारकप्रमुखाणां [illegible]
दश दिशो मुखरीभवन्तु वाचालका भवन्तु ॥ "मुखरो वावदूकेऽपि" इति [illegible]
"लघुसकुलेऽपणो रः" इति रमत्ययः ॥

महारणक्षोणिपरिप्लवारीकृतोऽसुरे तत्र तवात्मजेन ।
गन्दिस्थितानां सुदृशां करोतु वेणिप्रमोक्षं सुरलोक एषः ॥

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] [illegible]
[illegible] ८ [illegible]

महेति ॥ हे भगवन् । तत्रासुरे तारके तवात्मजेन पुत्रेण महती या रणक्षोणिः सङ्ग्रामभूमिस्तत्र ये पशवः क्रोष्ट्रादयस्तेषामुपहारीकृत उपदीकृते सति ॥ " उपहारश्चोपदायाम् " इति मेदिनी ॥ एष सुरलोको बन्दिर्बन्धनागारं तत्र स्थितानां सुदृशां स्वरमणीनां वेणिप्रमोक्षं वेणीमोचनं करोतु ॥

इत्थं सुरेन्द्रे वदति स्मरारिः सुरारिदुश्चेष्टितजातरोषः ।

कृतानुकम्पस्त्रिदशेषु तेषु भूयोऽपि भूताधिपतिर्बभाषे ॥ ५३ ॥

इत्थमिति ॥ सुरेन्द्रे महेन्द्रे इत्थं वदति सति सुरारिस्तारकस्तस्य दुश्चेष्टितमपराधजनकचेष्टाविशेषस्तेन हेतुना जातरोष उत्पन्नामर्षः स्मरारिर्भूतानामधिपतिर्हरः । तेषु त्रिदशेषु कृतानुकम्पो विहितदयः सन् ॥ " कृपा दयानुकम्पा स्यात् " इत्यमरः ॥ भूयोऽपि पुनरपि बभाषे उवाच ॥

अहो अहो देवगणाः सुरेन्द्रमुख्याः शृणुध्वं वचनं ममैते[1] ।

विचेष्टते शंकर एष देवः कार्याय सज्जो भवतां सुतार्थैः ॥ ५४ ॥

अहो इति ॥ अहो अहो इति संबोधने ॥ संभ्रमे द्विरुक्तिः ॥ हे देवगणाः । सुरेन्द्रमुख्याः पुरंदरप्रधाना एते यूयं मम वचनं शृणुध्वं शृणुत ॥ तदेव माधई-ग्याह—एष शंकरो देवः सुतार्थैः पुत्रप्रार्थनाभिः । पुत्रपौत्रादिभिरित्यर्थः । भवतां युष्माकं कार्याय । कार्यं कर्तुमित्यर्थः ॥ "क्रियार्थ–" इत्यादिना चतुर्थी ॥ सज्जः सिद्धो विचेष्टते । यतत इत्यर्थः ॥ मम पुत्रपौत्रजनकतायामपि भवत्कार्यमेव बीजमिति भावः ॥

पुरा मयाकारि गिरीन्द्रपुत्र्याः प्रतिग्रहोऽयं नियतात्मनापि ।

तत्रैव हेतुः खलु तद्भवेन वीरेण यद्वध्यत एष शत्रुः ॥ ५५ ॥

पुरेति ॥ हे देवाः । पुरा पूर्वं नियतात्मनापि योगिनापि मया गिरीन्द्रपुत्र्या अयं प्रतिग्रह आदानम् ॥ परिणयनमित्यर्थः । यदकारि कृतः । तत्रैव हेतुर्निमित्तम् । खलु निश्चितम् । यद्यस्मादेष शत्रुस्तारकसंज्ञकस्तद्भवेन पार्वतीजन्मना वीरेण वध्यते हन्यते । अतस्तदर्थं पार्वतीपरिग्रहः कृत इति भावः । अतोऽहं भवतामुपालम्भपात्रं नास्मि श्लोकतात्पर्यम् ॥

अत्रोपपन्नं तदमी नियुज्य कुमारमेनं पृतनापतित्वे ।

निघ्नन्तु शत्रुं सुरलोक एष जैनन्तु भूयोऽपि तुरैः महेन्द्रः ॥ ५६ ॥

---

१ म. २ सुरेन्द्रमुख्याः. ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible] १३ [illegible]

अत्रेति ॥ तत्तस्मादमी भवन्तोऽत्र भवत्कार्य उपपन्नं युक्तम् । योग्यमित्यर्थः। तथाभूतमेनं कुमारं पृतनापतित्वे सैनापत्ये नियुज्य नियुक्तं कृत्वा शत्रुं तारकं निघ्नन्तु । एतत्साहाय्येन भवन्तस्तारकं मारयन्त्विति भावः । अत एव इन्द्रः सुरेन्द्रः सुरैः सह भूयोऽपि पुनरपि सुरलोकं स्वर्गं भुनक्तु पालयतु ॥ आशिषि लोट्॥

इत्युदीर्य भगवांस्तमात्मजं घोरसंगरमहोत्सवोत्सुकम् ।
नन्दनं हि जहि देवविद्विषं संयतीति निजगाद शंकरः ॥५७॥

इत्युदीर्येति ॥ शंकरः शंकरसंज्ञको भगवानिति पूर्वोक्तमुदीर्योक्त्वा घोरो भीमः॥ " घोरं भीमं भयानकम् " इत्यमरः ॥ यः संगरः सङ्ग्रामः स एव महोत्सवो महानानन्दस्तत्रोत्सुकमुत्कण्ठितमत एव नन्दनमानन्दकरम् ॥ " नन्दिग्रहि-" इति ल्युः ॥ तमात्मजं कुमारम् " हे पुत्र, संयति सङ्ग्रामे देवानामिन्द्रादीनां विद्विषं विशेषेण द्वेष्टारं तारकं जहि " ॥" हन्तेर्जः" इति हनो जादेशः ॥ इति निजगादोक्तवानिह ॥ रथोद्धतावृत्तम् ॥

शासनं पशुपतेः स कुमारः स्वीचकार शिरसावनतेन ।
सर्वथैव पितृभक्तिरतानामेष एव परमः खलु धर्मः ॥ ५८ ॥

शासनमिति ॥ स कुमारः कार्तिकेयः पशुपतेः पितुर्हरस्य शासनमाज्ञामवनतेन नम्रीकृतेन शिरसा स्वीचकार । स्वीयं चकारेत्यर्थः ॥ " कृभ्वस्तियोगे" इति च्विः । " अस्य च्वौ " इतीकारः । " च्वौ च " इति दीर्घः ॥ तथाहि । सर्वथैव सर्वप्रकारेणैव पितृभक्तौ जनकश्रद्धायां रतानां सक्तानां खल्वेष एव परमो धर्मः । यदाज्ञां झटित्येव स्वीकुर्वन्तीति ॥ स्वागतावृत्तम् ॥

असुरयुद्धविधौ विबुधेश्वरे पशुपतौ वदतीति तमात्मजम् ।
गिरिजया मुमुदे सुतविक्रमे सति न नन्दति का खलु वीरसूः ॥५९॥

असुरेति ॥ विबुधेश्वरे सकलदेवस्वामिनि पशुपतौ हरे । असुरस्य तारकस्य यो युद्धविधिः सङ्ग्रामकरणं तत्र । उक्तमिति शेषः । तमात्मजं पुत्रमिति वदति सति । गिरिजया पार्वत्या मुमुदे प्रसेदे । तथा हि । खलु निश्चये । सुतविक्रमे पुत्रपराक्रमे सति का वीरसूर्वीरप्रसूतिः स्त्री न नन्दति । अपि तु सर्वापि नन्दतीत्यर्थः । पुत्रविषये पराक्रमस्सत्वेव परममुत्कारणं वीरसूनां भवतीति भावः ॥ द्रुतविलम्बितं वृत्तम्—" द्रुतविलम्बितमाह नभौ भरौ " इति लक्षणम् ॥

---

१ स्तन. २ नन्दनेदि. ३ यत. ४ देवविद्विषः. ५ तु. ६ विबुधेश्वरः. ७ वदति नियमात्मजम्; वदति नियन्तकम्; वदति नियमात्रकम्. ८ न किमु. ९ सर्वति.

सुरपरिवृढः प्रौढं वीरं कुमारमुमापते-
र्बलवदमरारातिस्त्रीणां दृगञ्जनभञ्जनम् ।
जगदभयदं सद्यः प्राप्य प्रमोदपरोऽभव-
द्ध्रुवमभिमते पूर्णे को वा मुदा न हि माद्यति ॥ ६० ॥

सुरेति ॥ सुराणां परिवृढः परिशास्तेन्द्रः ॥ "वृहू हिंसायाम्" । कर्तरि क्तः ॥ प्रौढमतिशयं वीरं पराक्रमशालिनं बलवान्योऽमरारातिस्तारकासुरस्तस्य स्त्रीणां दृगञ्जनस्य दृष्टिकज्जलस्य भञ्जनं भञ्जकम् ॥ कर्तरि ल्युट् ॥ मृतभर्तृकतया कज्जलधारणस्यानुचितत्वादिति भावः । अत एव जगद्भ्योऽभयदमभयदातारमुमापतेर्हरस्य कुमारं पुत्रं प्राप्य सद्यः सहसा प्रमादे प्रकृष्टोन्मोदे ॥ पर आसक्तोऽभवज्जातः । तथा हि । अभिमते मनोरथे पूर्णे सति मुदा प्रीत्यानिमित्तेन को वा न माद्यति । अपि तु सर्व एवोन्मत्तो भवतीत्यर्थः ॥ अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः ॥ इदं हरिणीच्छन्दः— "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कुमारसैनापत्यवर्णनं नाम द्वादशः सर्गः ।

त्रयोदशः सर्गः ।

प्रस्थानकालोचितचारुवेषः स स्वर्गिवर्गैरनुगम्यमानः ।
ततः कुमारः शिरसा नतेन त्रैलोक्यभर्तुः प्रणनाम पादौ ॥१॥

प्रस्थानेति ॥ ततोऽनन्तरं स कुमारः कार्तिकेयः प्रस्थानकाल उचितो योग्यश्चारुश्च वेषो यस्य । तथा स्वर्गिवर्गैरिन्द्रादिदेवगणैरनुगम्यमानः सन् । नतेन शिरसा त्रैलोक्यभर्तुः शिवस्य पादौ प्रणनाम नमश्चक्रे ॥ "उपसर्गादसमासेऽपि" इति णत्वम् ॥

जहीन्द्रशत्रुं समरेऽमरेशपदं स्थिरत्वं नय वीर वत्स ।
इत्याशिषा तं प्रणमन्तमीशो मूर्धन्युपाघ्राय मुदाभ्यनन्दत्॥२॥

१ गच्छन्. २ त्रिलोक.

अत्रेति ॥ तत्तस्मादमी भवन्तोऽत्र भवत्कार्ये उपपन्नं युक्तम् । योग्यमित्यर्थः। तथाभूतमेनं कुमारं पृतनापतित्वे सैनापत्ये नियुज्य नियुक्तं कृत्वा शत्रुं तारकं निघ्नन्तु । एतत्साहाय्येन भवन्तस्तारकं मारयन्त्विति भावः । अत एव इन्द्रः सुरेन्द्रः सुरैः सह भूयोऽपि पुनरपि सुरलोकं स्वर्गं भुनक्तु पालयतु॥ आशिषि लोट्॥

इत्युदीर्य भगवांस्तमात्मजं घोरसंगरमहोत्सवोत्सुकम् ।
नन्दनं हि जहि देवविद्विषं संयतीति निजगाद शंकरः ॥५७॥

इतीति ॥ शंकरः शंकरसंज्ञको भगवानिति पूर्वोक्तमुदीर्योच्चार्य घोरो भीमः॥ " घोरं भीमं भयानकम् " इत्यमरः ॥ यः संगरः सङ्ग्रामः स एव महोत्सवो महानानन्दस्तत्रोत्सुकमुत्कण्ठितमत एव नन्दनमानन्दकरम् ॥ " नन्दिग्रहि– " इति ल्युः ॥ तमात्मजं कुमारम् " हे पुत्र, संयति सङ्ग्रामे देवानामिन्द्रादीनां विद्विषं विशेषेण द्वेष्टारं तारकं जहि " ॥" हन्तेर्जः" इति हनो जादेशः ॥ इति निजगादोक्तवान्हि ॥ रथोद्धतावृत्तम् ॥

शासनं पशुपतेः स कुमारः स्वीचकार शिरसावनतेन ।
सर्वथैव पितृभक्तिरतानामेष एव परमः खलु धर्मः ॥ ५८ ॥

शासनमिति ॥ स कुमारः कार्तिकेयः पशुपतेः पितुर्हरस्य शासनमाज्ञामवनतेन नम्रीकृतेन शिरसा स्वीचकार । स्वीयं चकारेत्यर्थः ॥ " कृभ्वस्तियोगे" इति च्विः । " अस्य च्वौ " इतीकारः । " च्वौ च " इति दीर्घः ॥ तथाहि । सर्वथैव सर्वप्रकारेणैव पितृभक्तौ जनकश्रद्धायां रतानां सक्तानां खल्वेष एव परमो धर्मः । यदाज्ञां झटित्येव स्वीकुर्वन्तीति ॥ स्वागतावृत्तम् ॥

असुरयुद्धविधौ विबुधेश्वरे पशुपतौ वदतीति तमात्मजम् ।
गिरिजया मुमुदे सुतविक्रमे सति न नन्दति का खलु वीरसूः ॥५९॥

असुरेति ॥ विबुधेश्वरे सकलदेवस्वामिनि पशुपतौ हरे । असुरस्य तारकस्य यो युद्धविधिः सङ्ग्रामकरणं तत्र । उक्तमिति शेषः । तमात्मजं पुत्रमिति वदति सति । गिरिजया पार्वत्या मुमुदे प्रसदे । तथा हि । खलु निश्चये। सुतविक्रमे सति का वीरसूर्वीरप्रसूतिः स्त्री न नन्दति । अपि तु सर्वापि स्वर्धः । पुत्रविषये पराक्रमसत्त्वं परममुत्कारणं वीरसूनां भवतीति भाव विलम्बितं वृत्तम्—" द्रुतविलम्बितमाह नभौ भरौ " इति लक्षणम् ॥

---

१ स्वम्. २ नन्दनेहि.३ वय.४ देवविद्विषः.५ तु.६ विबुधेश्वरः.७ वदति प्रियमात्मजं, प्रियपुत्रकम्; वदति प्रियमातृकम्. ८ न किमु. ९ संयति.

स्तस्या हेतुः कारणम् । तत्कर्तेत्यर्थः । तथा समरोत्सवस्य सङ्ग्रामरूपस्योत्सवस्य ॥ "मह उद्धव उत्सवः" इत्यमरः ॥ इयं कर्मणि षष्ठी । संबन्धमात्रविवक्षितत्वात् । इह षष्ठ्यन्तस्य वृत्तिगतेनापि श्रद्धाशब्देन नित्यसंबन्धवशात्संबन्धं कृत्वा कथोगलक्षणा षष्ठी समर्थनीया ॥ केचित्तु "समरोत्सवे सः" इति विषयलक्षणसप्तम्यन्तत्वमङ्गीकृत्य पठन्ति । तत्रापि समासवृत्तिगतस्य श्रद्धालुशब्दस्य संबन्धो दुर्घट इत्यलम् ॥ श्रद्धालुर्भक्तिशीलं चेतो यस्य । सङ्ग्रामश्रद्धाधायक इत्यर्थः । एवंभूतः कुमारो भक्त्या भक्तिपूर्वकं गिरिजागिरीशौ पितरावापृच्छ्य । मया गम्यत इत्युक्त्वेत्यर्थः । दिवमभि मनस्थे चचाल ॥ "समवप्रवि-" इत्यात्मनेपदम् ॥

देवं महेशं गिरिजां च देवीं ततः प्रणम्य त्रिदिवौकसोऽपि ।

प्रदक्षिणीकृत्य च नाकनाथपूर्वाः समस्तास्तमथानुजग्मुः ॥ ६ ॥

देवमिति ॥ ततोऽनन्तरम् । नाकनाथपूर्वा इन्द्रप्रमुखाः समस्तास्त्रिदिवौकसो देवा अपि ॥ पूर्वोक्तकुमारप्रस्थानसमुच्चायकोऽपिशब्दः । "अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये" इति विश्वः ॥ महेशं देवं गिरिजां देवीं च प्रणम्य । अथ प्रदक्षिणीकृत्य । प्रदक्षिणौ परिक्रमणवशात्सव्यभागस्थौ कृत्वेत्यर्थः ॥ "ऊर्यादिच्विडाचश्च" इति गतिसंज्ञकतया "कुगतिप्रादयः" इति समासत्वात् "समासेऽनञ्पूर्वे-" इति क्त्वो ल्यबादेशः ॥ तं कुमारमनु पश्चाज्जग्मुरित्यर्थः ॥

अथ व्रजद्भिस्त्रिदशैरशेषैः स्फुरत्प्रभाभासुरमण्डलैस्तैः ।

नभो बभासे परितो विकीर्णं दिवापि नक्षत्रगणैरिवोग्रैः ॥ ७ ॥

अथेति ॥ अथानन्तरं व्रजद्भिर्गच्छद्भिरत एव स्फुरत्प्रसरत्प्रभायाः कान्त्याः संबन्धि भासुरं दीप्यमानं मण्डलं चक्रवालं येषाम् ॥ "चक्रवालं तु मण्डलम्" इत्यमरः ॥ तैरशेषैः संपूर्णैस्त्रिदशैर्देवैर्विकीर्णं व्याप्तं नभोऽन्तरिक्षं दिवापि दिनेऽपि । उग्रैर्भासुरैर्नक्षत्रगणैर्विकीर्णमिव । बभासे ॥ भासुरत्वरूपसाधारणधर्मेण त्रिदशादिकिरणविशिष्टे नभसि नक्षत्रकिरणविशिष्टत्वोत्प्रेक्षणादुत्प्रेक्षालंकारः ॥ ननु "उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे" इति कोशोक्त्योत्कटवाचिनोऽप्युग्रशब्दस्य कथं भासुरवाचकत्वेति चेत् । सत्यम् । अत्रौत्कट्यं केनचिद्धर्मेण विवक्षितं न तु तेजस्त्वेव । कान्त्या तापेन वा सौन्दर्यादिना वोत्कटोऽधिक इत्यर्थवर्णनात्मकत्वे समाधेयम् ॥

---

१ सुरप्रमुख्याः सुराः. २ अभिसस्रुः. ३ सदोषैः. ४ मण्डलभासुरैः. ५ दशः. ६ दिनेश्वराणाः.

जाहीति ॥ प्रणमन्तं नमस्कुर्वन्तं तं कुमारमीशौ हरौ मुदा प्रीता मूर्धन्युपाघ्राय गन्धमुपादाय "हे वीर हे वत्स । समरे युधीन्द्रनष्टं तारकं जहि मारय । अथामरेशपदमिन्द्रपदं स्वर्गं स्थिरत्वं स्थैर्यं नय प्रापय" ॥ उभयत्राप्याशिषि लोट् ॥ इत्येवंभूतयाशिषाशीर्वादेनाभ्यनन्दत्सौषीत् ॥

प्रहीभवन्नम्रतरेण मूर्ध्ना नमश्चकाराङ्घ्रियुगं स्वमातुः ।
तस्याः प्रमोदाश्रुपयःप्रवृष्टिस्तस्याभवद्वीरवराभिषेकः ॥ ३ ॥

प्रहीति ॥ स कुमारः प्रहीभवन्नम्रीभवन्नम्रतरेण मूर्ध्ना ॥ अत्र प्रहीभवन्नित्यनेनैव मूर्ध्नो नम्रत्वे सिद्धे पुनर्विशेषणोपादानं सामान्यतोऽन्येषामङ्गानां नम्रत्वोक्तयपेक्षया मूर्ध्नि क्रियातिशयद्योतनार्थम् । पुनरुपादानेन तरप्प्रहणाल्लिङ्गाच ॥ स्वमातुरङ्घ्रियुगं चरणद्वन्द्वं नमश्चकार । तस्याः पार्वत्याः संबन्धीनि यानि प्रमोदाश्रुपयांसि तेषां प्रवृष्टिर्वर्षणं तस्य कुमारस्य वीरेषु वरस्य श्रेयसः। सेनापतेरित्यर्थः । तस्याभिषेक इव योऽभिषेकः सोऽभवत् । तस्य यादृगभिषेको भवति स मात्रश्रुपयोवृष्टिरा शिरश्चरणनखपर्यन्तं स्रावयन्त्यभूदिति भावः ॥

तमङ्कमारोप्य सुता हिमाद्रेराश्लिष्य गाढं सुतवत्सला सा ।
शिरस्युपाघ्राय जगाद शत्रुं जित्वा कृतार्थीकुरु वीरसूं माम् ४

तामिति ॥ सुते पुत्रे वत्सला कृपावती सा हिमाद्रेः सुता पार्वती तं पुत्रम् ॥ अस्य ल्यबन्तत्रयेण संबन्धो विधेयः ॥ अङ्कमुत्सङ्गम् ॥ "अङ्को रूपकभेदाङ्कचिह्ने रेखाजिभूषणे । रूपकाण्डान्तिकोत्सङ्गस्थानेऽङ्कं पापदुःखयोः" इति मेदिनी ॥ आरोप्य संस्थाप्य । तथा गाढं दृढं यथा तथा ॥ "प्रगाढः कृच्छ्रदृढयोः" इति मेदिनी ॥ मेति त्रित्वसंधातनिवेशनायैव । एवं विना तदलाभात् ॥ आश्लिष्यालिङ्गच । तथा शिरस्युपाघ्राय च । "हे वत्स । त्वं शत्रुं तारकं जित्वा वीरं सूते सा वीरसूस्तथोक्तां मां कृतार्थीकुरु" इति जगाद । एवंविधे महति कार्ये भवता प्रतिपादिते सति त्रैलोक्यं प्रसृतिशीलेन यशसा धवलीकृतं सत् "एष यदीयः पुत्रः सा कृतार्थैव" इति वर्णयिष्यतीत्यतो मत्कृतार्थत्वं सिद्धमेवेति भावः॥

उद्दामदैत्येशविपत्तिहेतुः श्रद्धालुचेताः समरोत्सवस्य ।
आपृच्छ्य भक्त्या गिरिजागिरीशौ ततः प्रतस्थेऽभि दिवं कुमारः ५

उद्दामेति ॥ ततोऽनन्तरमुद्दाम उद्भटो यो दैत्येशस्तारकस्तस्य विपत्तिर्मृत्यु-

---

[illegible]

१ युगं सः; युगाय

६ दैतेय. ७ समरोद्धुर

स्तस्या हेतुः कारणम् । तत्कर्तेत्यर्थः । तथा समरोत्सवस्य सङ्ग्रामरूपस्योत्सवस्य ॥ “ मह उद्धव उत्सवः ” इत्यमरः ॥ इयं कर्मणि षष्ठी । संबन्धमात्रविवक्षितत्वात् । इह षष्ठ्यन्तस्य वृत्तिगतेनापि श्रद्धाशब्देन नित्यसंबन्धवशात्संबन्धं कृत्वा कृयोगलक्षणा षष्ठी समर्थनीया ॥ केचित्तु “ समरोत्सवे सः ” इति विषयलक्षणसप्तम्यन्तत्वमङ्गीकृत्य पठन्ति । तत्रापि समासवृत्तिगतस्य श्रद्धालुशब्दस्य संबन्धो दुर्घट इत्यलम् ॥ श्रद्धालुर्भक्तिशीलं चेतो यस्य । सङ्ग्रामश्रद्धाधायक इत्यर्थः । एवंभूतः कुमारो भक्त्या भक्तिपूर्वकं गिरिजागिरीशौ पितरावापृच्छ्य । मया गम्यत इत्युक्त्वेत्यर्थः । दिवमभि प्रतस्थे चचाल ॥ “ समवप्रवि–” इत्यात्मनेपदम् ॥

देवं महेशं गिरिजां च देवीं ततः प्रणम्य त्रिदिवौकसोऽपि ।

प्रदक्षिणीकृत्य च नाकनाथपूर्वाः समस्तास्तमथानुजग्मुः ॥ ६ ॥

देवमिति ॥ ततोऽनन्तरम् । नाकनाथपूर्वा इन्द्रप्रमुखाः समस्तास्त्रिदिवौकसो देवा अपि ॥ पूर्वोक्तकुमारप्रस्थानसमुच्चायकोऽपिशब्दः । “ अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये ” इति विश्वः ॥ महेशं देवं गिरिजां देवीं च प्रणम्य । अथ प्रदक्षिणीकृत्य । प्रदक्षिणौ परिक्रमणवशाद्दक्षिणभागस्थौ कृत्वेत्यर्थः ॥ “ऊर्यादिच्विडाचश्च ” इति गतिसंज्ञकतया “ कुगतिप्रादयः ” इति समासत्वात् “ समासेऽनञ्पूर्वे–” इति क्त्वो ल्यबादेशः ॥ तं कुमारमनु पश्चादनुजग्मुः ॥

रराज तेषां व्रजतां सुराणां मध्ये कुमारोऽधिककान्तिकान्तः ।
नक्षत्रताराग्रहमण्डलानामिव त्रियामारमणो नभोऽन्ते ॥ ८ ॥

रराजेति ॥ नभोऽन्तेऽन्तरिक्षमध्ये व्रजतां गच्छतां तेषां सुराणां मध्ये कुमारः कार्तिकेयः ॥ अग्रेऽपि नभोऽन्त इत्यस्य संबन्धः कार्यः ॥ नक्षत्राण्यश्विन्यादीनि, ताराः सप्तविंशतिव्यतिरिक्ताः, ग्रहाः सूर्यादयो नव, तेषां मण्डलानां गोलानां मध्ये त्रियामारमणश्चन्द्र इव । रराज । यतोऽधिककान्त्या कान्तो मनोहरः । नक्षत्राणां मध्ये यथा चन्द्र एव शोभते तथा देवानां मध्ये कुमार एव शुशुभ इत्यर्थः ॥ पूर्णोपमालंकारः ॥

गिरीशगौरीतनयेन सार्धं पुलोमपुत्रीदयितादयस्ते ।
उत्तीर्य नक्षत्रपथं मुहूर्तात्प्रपेदिरे लोकमथात्मनीनम् ॥ ९ ॥

गिरीशेति ॥ अथ पुलोमपुत्री शची तस्या दयित इन्द्रः स आदिर्येषां तथाभूतास्ते देवा गिरीशगौरीतनयेन ॥ ननु गिरीशगौर्योरेकतरेण सिद्धिरिति चेत् । सत्यम् । उभयगतवीर्याश्रयीभूतत्वेन कुमारवीर्याधिक्यस्य द्योतनार्थमुभयोर्ग्रहणमिति समाधातव्यम् ॥ सार्धं मुहूर्तात्क्षणमात्रेणैव नक्षत्रपथमाकाशमुत्तीर्योल्लङ्घ्यात्मनीनमात्मने हितम् ॥ "तस्मै हितम्" इत्यधिकारस्थेन "आत्मन्विश्वजन—" इत्यादिना खः ॥ तथाभूतं लोकं स्वर्गं प्रपेदिरे प्रापुः ॥ "लोकस्तु भुवने जने" इत्यमरः ॥

ते स्वर्गलोकं चिरकालदृष्टं महासुरत्रासवशंवदत्वात् ।
सद्यः प्रवेष्टुं न विषेहिरे तत्क्षणं व्यलम्बन्त सुराः समग्राः १०

त इति ॥ ते समग्राः सुरा महासुरात्तारकाख्यात्त्रासो भयं तस्य वशंवदत्वादधीनत्वाद्धेतोः । चिरकालेन बहुसमयेन दृष्टं स्वर्गलोकं सद्यः सहसा प्रवेष्टुं न विषेहिरे न शेकुः । तर्हि तु क्षणं व्यलम्बन्त । कालं चिक्षिपुरित्यर्थः । अन्योऽपि सभये स्वगृहेऽपि सद्यः प्रवेष्टुं न शक्नोति किं तु विलम्बते तद्वदिति भावः ॥

पुरो भव त्वं न पुरो भवामि नाहं पुरोगोऽस्मि पुरःसरस्त्वम् ।
इत्थं सुरास्तत्क्षणमेव भीताः स्वर्गं प्रवेष्टुं कलहं वितेनुः ॥ ११ ॥

पुर इति ॥ तत्क्षणम् ॥ "कालाध्वनोः—" इति द्वितीया ॥ प्रवेशसमय इ-

---

१ –धिककान्तिः. २ दयितः. ३ अन्तः. ४ मुहूर्तम्. ५ अथो मुनीनाम्. ६ तम्. ७ तम्. पे स्वर्गं;

सर्थः । भीता अतस्तारकावस्थानशङ्कया सभयाः सुराः स्वर्गं प्रवेष्टुम् “ त्वं पुरोऽग्रे भव । अहं पुरो न भवामि, किं तु त्वमेव भव । अहं पुरोगो नास्मि न भवामि । त्वं पुरःसरो भव ” इत्थमेवंभूतं कलहं विग्रहं वितेनुः । चक्रुरित्यर्थः ॥ अस्मीत्यहमर्थकमव्ययम् । सर्वेषां त्रिधाभूततया न कोऽप्यन्तः प्रवेष्टुं शशाक । किं तु तत्रैव कलहायमानास्तस्थुरिति भावः ॥

सुरालयालोकनकौतुकेन मुदा शुचिस्मेरविलोचनास्ते ।
दधुः कुमारस्य मुखारविन्दे दृष्टिं द्विपत्साध्वसकातरान्ताम् १२

सुरालयेति ॥ सुरालयस्य स्वर्गस्य यदालोकनं तेन यत्कौतुकमानन्दस्तेन निमित्तेन शुचीनि शुद्धानि स्मेराणि मन्दहासानि च विलोचनानि येषां तथाभूतास्ते देवा द्विपत्साध्वसेन तारकशत्रुभयेन कातरान्तां भीतमान्ताम् । भयचिह्नतरलत्वादियुतामित्यर्थः । तथाभूतां दृष्टिं नेत्रं मुदा प्रीत्या । प्रमादेनेति यावत् । उपलक्षिते कुमारस्य मुखारविन्दे वदनकमले दधुः । दुर्घटप्रवेशोपायोपदेशापेक्षयेति भावः ॥ कुमारो बालोऽपि सन्न भीत इति मुदेति विशेषणेन व्यज्यते ॥

सहेलहासच्छुरिताननेन्दुस्ततः कुमारः पुरतो भविष्णुः ।
स तारकापातमपेक्षमाणो रणप्रवीरो हि सुरानवोचत् ॥ १३ ॥

सहेलेति ॥ ततो दृष्टिपातानन्तरं रणे प्रकृष्टो वीरोऽत एव तारकस्यापातं युद्धार्थमागमनमपेक्षते सोऽपेक्षमाणः । प्रतीक्षमाण इत्यर्थः । अत एव पुरतोऽग्रतो भविष्णुः स कुमारः कार्तिकेयः सहेलः सक्रीडो यो हासस्तेन च्छुरिताननेन्दुर्मिश्रितमुखचन्द्रः सन् । किंचिद्धसन्नित्यर्थः । हि निश्चितम् । सुरानवोचदजगाद ॥

भीत्यालमद्य त्रिदिवौकसोऽमी स्वर्गं भवन्तः प्रविशन्तु सद्यः ।
अत्रैव मे दृक्पथमेतु शत्रुर्महासुरो वः खलु दृष्टपूर्वः ॥ १४ ॥

भीत्येति ॥ भो त्रिदिवौकसो देवाः । अद्य संप्रति भीत्या भयेनालम् । न भेतव्यमित्यर्थः । किं त्वमी भवन्तः सद्यः सपद्येव स्वर्गं प्रविशन्तु । स्वर्गप्रवेशे भयहेतुको विलम्बो न विधेय इति तात्पर्यम् । सद्यः सपदि । तत्कालमित्यर्थः । अथ कोपादाह—पूर्वं दृष्टो दृष्टपूर्वः ॥ “ राजदन्तादिषु ” इति [illegible] पूर्वशब्दस्य परः प्रयोगः ॥ [illegible] ॥ ननु च इत्यनेनैव [illegible] । “ [illegible]– ” इति [illegible] ॥ तथा वो युष्माकं शत्रु-

---

१ [illegible]. २ [illegible], [illegible]. ३ [illegible], [illegible]. ४ [illegible]; [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible]. ८ [illegible]. ९ [illegible].

रराज तेषां व्रजतां सुराणां मध्ये कुमारोऽधिककान्तिकान्तः।
नक्षत्रताराग्रहमण्डलानामिव त्रियामारमणो नभोऽन्ते ॥८॥

ररजेति ॥ नभोऽन्तेऽन्तरिक्षमध्ये व्रजतां गच्छतां तेषां सुराणां मध्ये कुमारः कार्तिकेयः ॥ अग्रेऽपि नभोऽन्त इत्यस्य संबन्धः कार्यः ॥ नक्षत्राण्याश्विन्यादीनि, ताराः सप्तविंशतिव्यतिरिक्ताः, ग्रहाः सूर्यादयो नव, तेषां मण्डलानां गोलानां मध्ये त्रियामारमणश्चन्द्र इव । रराज । यतोऽधिककान्त्या कान्तो मनोहरः । नक्षत्राणां मध्ये यथा चन्द्र एव शोभते तथा देवानां मध्ये कुमार एव शुशुभ इत्यर्थः ॥ पूर्णोपमालंकारः ॥

गिरीशगौरीतनयेन सार्धं पुलोमपुत्रीदयितादयस्ते ।
उत्तीर्य नक्षत्रपथं मुहूर्तात्प्रपेदिरे लोकमथात्मनीनम् ॥ ९ ॥

गिरीशेति ॥ अथ पुलोमपुत्री शची तस्या दयित इन्द्रः स आदिर्येषां तथाभूतास्ते देवा गिरीशगौरीतनयेन ॥ ननु गिरीशगौर्योरेकतरेण सिद्धिरिति चेत् । सत्यम् । उभयगतवीर्याश्रयीभूतत्वेन कुमारवीर्याधिक्यस्य द्योतनार्थमुभयोर्ग्रहणमिति समाधातव्यम् ॥ सार्धं मुहूर्तात्क्षणमात्रेणैव नक्षत्रपथमाकाशमुत्तीर्योल्लङ्घ्यात्मनीनमात्मने हितम् ॥ "तस्मै हितम्" इत्यधिकारस्थेन "आत्मन्विश्वजन–" इत्यादिना खः ॥ तथाभूतं लोकं स्वर्गं प्रपेदिरे प्रापुः ॥ "लोकस्तु भुवने जने" इत्यमरः ॥

ते स्वर्गलोकं चिरकालदृष्टं महासुरत्रासवशंवदत्वात् ।
सद्यः प्रवेष्टुं न विषेहिरे तत्क्षणं व्यलम्बन्त सुराः समग्राः १०

त इति ॥ ते समग्राः सुरा महासुरात्तारकाद्यस्त्रासो भयं तस्य वशंवदत्वादधीनत्वाद्धेतोः । चिरकालेन बहुसमयेन दृष्टं स्वर्गलोकं सद्यः सहसा प्रवेष्टुं न विषेहिरे न शेकुः । तर्हि किं तु क्षणं व्यलम्बन्त । कालं चिक्षिपुरित्यर्थः । अन्योऽपि सभये स्वगृहेऽपि सद्यः प्रवेष्टुं न शक्नोति किं तु विलम्बते तद्वदिति भावः ॥

पुरो भव त्वं न पुरो भवामि नाहं पुरोगोऽस्मि पुरःसरस्त्वम्।
इत्थं सुरास्तत्क्षणमेव भीताः स्वर्गं प्रवेष्टुं कलहं वितेनुः ॥११॥

पुर इति ॥ तत्क्षणम् ॥ "कालाध्वनोः–" इति द्वितीया ॥ प्रवेशसमय इ-

---

१ अधिककान्तकान्तिः. २ दयितः. ३ अन्तः. ४ मुहूर्तम्. ५ अथो मुनीनाम्. ६ तम्. ७ तम्. ८ समस्ताः. ९ पुरोऽस्तु तत्त्वम्. १० वः. ११ पुरः सर त्वम्. १२ द्विषा वेन कृते स्ववश्ये स्वर्गे;

गन्धके" इति मेदिनी ॥ तथा सर्वेष्वङ्गेषु संफुल्लानि सहस्रनेत्राणि यस्य । यतः । सहस्राक्षस्तथाभूतः शक्र इन्द्रस्तस्य कुमारस्योत्तरीयेण संव्यानेन ॥ "संव्यानमुत्तरीयं स्यात्" इत्यमरः ॥ तथा निजाम्बरेण निरुच्छनं परिवर्तनं चारु चकार । भ्रातृभावायान्योन्यवस्त्रग्रहणं चक्रतुरित्यर्थः । तदुक्तं मेदिन्याम्—"निरुच्छनं बन्धुतायै वाससः परिवर्तनम्" इति । लोकेऽपि भ्रातृतायै परस्परस्योष्णिग्बन्धनव्यवहारस्तद्वदत्रापीति । अनुशासने सामान्यतो वासोग्रहणेन प्रकृत उत्तरीयग्रहणं संगच्छते । लोकव्यवहारस्तु संप्रदायसिद्धः । उर्ण्णाद विशेषश्रेष्ठ्योपलम्भ एव व्यवहारमूलमिति मन्तव्यम् ॥

घनप्रमोदाश्रुतरंगिताक्षैर्मुखैश्चतुर्भिः प्रचुरप्रसादैः ।
अथो अचुम्बद्विधिरादिवृद्धः षडाननं षट्सु शिरःसु चित्रम् ॥ १९ ॥

घनेति ॥ अथो अनन्तरमाद्योर्हरिहरयोर्वृद्धो महान्विधिर्ब्रह्मा । घनः सान्द्रः ॥ "घनं स्यात्कांस्यतालादिवाद्यमध्यमनृत्तयोः । ना मुस्तादौ घनाद्येषु विस्तारे लोहमुद्गरे । त्रिषु सान्द्रे च दृढार्थे" इति मेदिनी ॥ यः प्रमोदो हर्षस्तेन निमित्तेन यदश्रु नेत्रपयस्तेन तरंगितानि संजाततरंगाणि ॥ "तारकादिभ्य इतच्" ॥ अक्षीणि नेत्राणि येषां तैः । हर्षवशादुद्गताश्रुभिरित्यर्थः । तथा प्रचुरप्रसादैरधिकप्रसन्नतायुक्तैश्चतुर्भिर्मुखैः षट्सु शिरःसु मध्ये षडाननं कुमारं चुचुम्बे पस्पर्श । इति चित्रं विस्मयः । चतुर्भिर्मुखैः षण्णां मुखानां यौगपद्येन स्पर्शासंभवात् । परिहारस्तु प्रत्येकं षट्सु चतुर्भिश्चुम्बनेन संधेयः ॥

तं साधु साध्वित्यभितः प्रशस्य मुदा कुमारं त्रिपुरासुरारेः ।
आनन्दयन्वीर जयेति वाचा गन्धर्वविद्याधरसिद्धसंघाः ॥ २० ॥

तमिति ॥ गन्धर्वा देवगायकाः, विद्याधराः, सिद्धाश्च देवविशेषाः, एषां संघाः समुदायाः ॥ कर्तारः ॥ तं त्रिपुरासुरस्यारेः शिवस्य कुमारं पुत्रं मुदा प्रीत्या निमित्तेन साधु साध्वित्यभितः संमुखत्वेन प्रशस्य स्तुत्वा "हे वीर, त्वं जय शत्रोः सकाशाज्जयं प्राप्नुहि" इत्येवंभूतया वाचानन्दयन्नानन्दितमकुर्वन् ॥

दिव्यर्षयः शत्रुविजेष्यमाणं तमभ्यनन्दन्किल नारदाद्याः ।
निरुञ्छनं चक्रुरथोत्तरीयैश्चामीकरीयैर्निजवल्कलैश्च ॥ २१ ॥

दिव्यर्षय इति ॥ नारदाद्या नारदप्रमुखा दिव्या दिवि भवा ऋषयः ॥

१ दीर्घ्(?)श्वातैः. २ प्रमोदः. ३ व्यमात्वसुवे. ४ मुखेषु. ५ हर्षेन्. ६ सुतम्. ७ नाय इत्यो ... र्थम्. ८ समभ्यनन्दन्; तदभ्यनन्दन्. ९ निरुञ्छनं; निरुञ्जनम्. १० नारदस्य.

दृष्टो महासुरस्तारकोऽत्रैव स्वर्ग एव मे मम दृक्पथं दृग्गोचरत्वमेतु प्राप्नोतु ॥ दृक्पथमिति "ऋक्पूरब्धूः–" इति समासान्तोऽप्रत्ययः ॥

स्वर्लोकलक्ष्मीकचकर्पणाय दोर्मण्डलं वल्गति यस्य चण्डम् ।
इहैव तच्छोणितपानकेलिमह्नाय कुर्वन्तु शरा ममैते ॥ १५ ॥

स्वर्लोकेति ॥ स्वर्लोकस्य लक्ष्म्याः कचाः केशास्तेषां कर्षणाय । लक्ष्मीकेशानां हरणं कर्तुमित्यर्थः ॥ "तुमर्थात्" इति चतुर्थी ॥ चण्डं प्रचण्डं यस्य तारकस्य दोर्मण्डलं भुजमण्डलं वल्गति चलति । तस्य तारकस्य यच्छोणितं रुधिरं तस्य पानं तदेव केलिः क्रीडा तां कर्मभूतामेते मम शरा अह्नाय झटिति ॥ "द्राग्झटित्यञ्जसाह्नाय" इत्यमरः ॥ इहैव कुर्वन्तु । तं विनाशयन्त्वित्यर्थः ॥

शक्तिर्ममासावहतप्रचारा प्रभावसारा सुमहःप्रसारा ।
स्वर्लोकलक्ष्म्या विपदावहारेः शिरो हरन्ती दिशतान्मुदं वः १६

शक्तिरिति ॥ अहतप्रचाराविघ्नितगतिः । तथा प्रभावः सामर्थ्यं स एव सारो यस्याः । सुतरां महसस्तेजसः प्रसारो मण्डलं यस्याः । अतितेजस्विनीत्यर्थः । स्वर्लोकलक्ष्म्या या विपदा तस्या अवहा । किं तु सुखदेत्यर्थः । तथारेः प्रतिकूलस्य शिरः शीर्षं हरन्ती । असौ मम शक्तिरायुधं वो युष्माकं मुदं प्रीतिं दिशताद्दत्तात् ॥ आशिषि लोट् ॥

इत्यन्धकारातिसुतस्य दैत्यवधाय युद्धोत्सुकमानसस्य ।
सर्वं शुचिस्मेरमुखारविन्दं गीर्वाणवृन्दं वचसाननन्द ॥ १७ ॥

इतीति ॥ दैत्यवधाय दैत्यवधं कर्तुं युद्ध उत्सुकमानसस्योत्कण्ठितचेतसोऽन्धकारातिसुतस्य शिवपुत्रस्य कुमारस्य संबन्धिना । इति पूर्वोक्तेन वचसा सर्वं गीर्वाणवृन्दं देवसमूहः शुचि शुद्धं स्मेरं मयन्दहासं मुखारविन्दं मुखकमलं यस्य तथाभूतं सदाननन्द जहर्ष ॥

सान्द्रप्रमोदात्पुलकोपगूढः सर्वाङ्गसंफुल्लसहस्रनेत्रः ।
तस्योत्तरीयेण निजाम्बरेण निरुञ्छनं चारु चकार शक्रः ॥ १८ ॥

सान्द्रेति ॥ सान्द्रप्रमोदाद्घनानन्दाद्धेतोः पुलकै रोमाञ्चैरुपगूढ आश्लिष्टः ॥ "पुलकः कृमिभेदेऽश्मभेदे च मणिदोषके । रोमाञ्चे हरिताले गजान्नपिण्डे च

१ स्वर्लोकलक्ष्मी. २ यस्य बलानिचण्डम्. ३ सुमहाप्रसारा. ४ लक्ष्मी. ५ सहारिशिरः; सहारेः शिरः. ६ दिशतां मुदम्. ७ वद्धोत्सवमानसस्य. ८ शुचिस्मेर. ९ ननन्द. १० सान्द्रप्रमोदः. [illegible] निरुञ्छनम्; निरुञ्छनम्.

अथ चतुर्भिस्तामेव विशिनष्टि—दिग्दन्तिनामित्यादिभिः ॥

दिग्दन्तिनां वारिविहारभाजां कराहतैर्भीमतरैस्तरंगैः ।
आप्लावयन्तीं मुहुरालवालश्रेणीं तरूणां निजतीरजानाम् २५

तत्र दिग्दन्तीति ॥ किंभूतां स्वर्गधुनीम् । वारिणि विहारभाजां क्रीडतां दिग्दन्तिनामैरावतादीनां करैः शुण्डादण्डैः ॥ "करो वर्षोपले पाणौ रश्मौ प्रत्यय-शुण्डयोः" इति मेदिनी ॥ आहतैस्ताडितैरत एव भीमतरैरतिशयभयानकैस्तरंगैः कल्लोलैः कृत्वा निजतीरजानामात्मीयतटोत्पन्नानां तरूणां वृक्षाणां संबन्धिनीमालवालानां मूलस्थलीनां श्रेणिम् ॥ "श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समाने शिल्पिसंहतौ" इति मेदिनी ॥ मुहुर्वारंवारम् ॥ "मुहुः पुनः पुनः शश्वत्" इत्यमरः ॥ आप्लावयन्तीं सेचयन्तीम् ॥

लीलारसाभिः सुरकन्यकाभिर्हिरण्मयीभिः सिकताभिरुच्चैः ।
माणिक्यगर्भाभिरुपाहिताभिः प्रकीर्णतीरां वरवेदिकाभिः॥२६॥

लीलेति ॥ पुनः किंभूताम् । लीलायां क्रीडायां रसः प्रीतिर्यासां ताभिः सुराणां कन्यकाभिः पुत्रीभिः । तथा हिरण्मयीभिः सौवर्णीभिः सिकताभिर्वालुकाभिः । तथा माणिक्यगर्भाभिर्माणिक्यखचितमध्याभिः । तथोपाहिताभिर्निर्मिताभिः । न स्वकृत्रिमाभिः । तथोच्चैर्महतीभिर्वराः श्रेयस्यो या वेदिकास्ताभिश्च प्रकीर्णतीरां व्याप्तसैकताम् ॥

सौरभ्यलुब्धभ्रमरोपगीतैर्हिरण्यहंसावलिकेलिलोलैः ।
चामीकरीयैः कमलैर्विनिद्रैश्च्युतैः परागैः परिपिङ्गतोयाम् ॥२७॥

सौरभ्येति ॥ पुनः किंभूताम् । सौरभ्ये सौगन्ध्ये लुब्धा लम्पटा ये भ्रमरा द्विरेफास्तैरुपगीतैः । गुञ्जारवैरित्यर्थः । हिरण्यस्य सुवर्णस्य ये हंसा मरालास्तेषामावल्यः पङ्क्तयस्तासां केलिः क्रीडा तया निमित्तेन लोलैश्चञ्चलैश्चामीकरीयैः सौवर्णैर्विनिद्रैर्विदलितैः कमलैरुपलक्षिताम् । अत एव च्युतैः कमलेभ्यो भ्रष्टैः परागैः सुमनोरजोभिः ॥ "परागः सुमनोरजः" इत्यमरः ॥ परिपिङ्गं परितः पीतं तोयं जलं यस्यास्तथोक्ताम् ॥

---

१ विहारलोलाम्. २ भीमतराहतदण्डैः । आनंदमन्थरसमीरचलितपुष्कर [illegible] दूरं [illegible] । [illegible] [illegible] [illegible] हिरण्यहंसावलिकेलिलोलैस्तरंगैः. ३ श्रेणीः; श्रेणीम्. ४ पुष्करनारम्. ५ लोला-[illegible]. ६ हिरण्यहंसावलिकलाभिः हिरण्मयाभिः सिकताभिः. ७ [illegible]. ८ भवनैः. ९ परिपिङ्गतोयाम्.

“शुभागमायुदर्कः” इति मत् ॥ सर्वे नाकं विजेतुमपाणं अभ्युन्नतं तं कुमारमभिनन्द्य तुष्टुवुः किल । अथानन्तरं नाकीकरीर्धः गीर्वाणकनारीनिकरैः । तथा निर्गेलतर्देश निरुञ्छनं मङ्गलार्थं गात्रःपरिवर्तनं चक्रुः ॥ निरुञ्छनं पूर्वमेव निर्णीतम् ॥

ततः सुराः शक्तिधरस्य तस्यावष्टम्भतः साध्वसमुत्सृजन्तः ।
उत्सेहिरे स्वर्गमनन्तशक्तेर्गन्तुं वनं यूथपतेरिवेभाः ॥ २२ ॥

तत इति ॥ ततोऽनन्तरं शक्तिरायुधविशेषस्तां धरतीति तथोक्तस्य तस्य कुमारस्य ॥ “शक्तिरस्त्रान्तरे शौर्ये उत्साहादौ बले स्त्रियाम्” इति मेदिनी ॥ अवष्टम्भत आश्रयतः ॥ “अवष्टम्भः सुवर्णे च स्तम्भमारम्भयोरपि” इति मेदिनी ॥ अथ स्तम्भशब्देनाश्रयो लक्षितः । स्तम्भस्याश्रयमिति तत्त्वात् ॥ साध्वसं भयम् ॥ “भीतिर्भीः साध्वसं भयम्” इत्यमरः ॥ उत्सृजन्तस्त्यजन्तः सुरा देवाः । अनन्तशक्तेरपारशौर्यस्य यूथपतेर्गजराजस्यावष्टम्भत इभा गजा वनमिव । स्वर्गं गन्तुं प्रवेष्टुमुत्सेहिरे उत्साहं चक्रुः ॥ अनन्तशक्तेरिति विशेषणं कुमारेऽपि योजनीयम् ॥

अथाभिपृष्ठं गिरिजासुतस्य पुरंदरारातिवधं चिकीर्षोः ।
सुरा निरीयुस्त्रिपुरं दिधक्षोरिव स्मरारेः प्रमथाः समन्तात् ॥ २३ ॥

अथेति ॥ अथोत्साहानन्तरं सुराः पुरंदरस्येन्द्रस्यारातेस्तारकस्य वधं मृत्युं चिकीर्षोः कर्तुमिच्छोर्गिरिजासुतस्य कुमारस्याभिपृष्ठं पृष्ठसंमुखं त्रिपुरं दैत्यं दिधक्षोर्दग्धुमिच्छोः ॥ “दह भस्मीकरणे” धातोः “इच्छार्थे सनि सन्यङोः” इति द्वित्वे “सनाशंसभिक्ष उः” इत्युप्रत्ययः ॥ स्मरारेः शिवस्याभिपृष्ठं प्रमथा इव स्थिताः समन्तान्निरीयुर्निर्जग्मुः । अन्तर्विविशुरित्यर्थः ॥

सुराङ्गणानां जलकेलिभाजां प्रक्षालितैः संततमङ्गरागैः ।
प्रपेदिरे पिञ्जरवारिपूरां स्वर्गौकसः स्वर्गधुनीं पुरस्तात् ॥ २४ ॥

सुराङ्गणानामिति ॥ स्वर्गौकसो देवाः पुरस्तादग्रे जलकेलिभाजां ... डासक्तानां सुराङ्गणानामप्सरसां संततं निरन्तरं प्रक्षालितैरङ्गरागैः कुङ्कुमचर्चितैः पिञ्जरवारिपूरां पीतजलप्रवाहां स्वर्गधुनीं मन्दाकिनीं प्रपेदिरे ॥ सुराङ्गणानामिति “क्षुभ्नादिषु च” इति णत्वम् ॥

---

१ उत्यजन्तः. २ अनन्तशक्त्ये. ३ अभिपृष्ठे. ४ जयम्. ५ सुराङ्गनानाम्.

प्रणर्तितस्मेरसरोजराजिः पुरः परीरम्भमिलन्महोर्मिः ।
कपोलपालिश्रमवारिहारी भेजे गुहं तं सरितः समीरः॥ ३२॥

प्रणर्तितेति ॥ प्रणर्तिता कम्पिता स्मेरसरोजानां विकसितकमलानां राजि- लिा येन । अनेन सौगन्ध्योक्तिः । तथा परीरम्भेणाश्लेषेण मिलन्त आत्मनि श्रीभवन्तो महोर्मयो यस्य । अनेन शैत्योक्तिः । कपोलपाल्याः । कपोलरूप- तताग्रस्येत्यर्थः ॥ "पालिः कर्णे लताग्रेऽश्री" इति विश्वः ॥ श्रमेण यद्वारि स्वे- स्तस्य हारी । अनेन मान्द्योक्तिः । अन्यथा श्रमहृतेरसंभवः । एवंभूतः सरि ो मन्दाकिन्याः समीरः पवनः पुरोऽग्रे स्थितं तं गुहं स्वामिकार्तिकम् । यद्वा । पुरोऽग्रे भेजे सिषेवे ॥

ततो व्रजन्नन्दननामधेयं लीलावनं जम्भजितः पुरस्तात् ।
विभिन्नभग्नोद्धृतशालसंघं प्रेक्षांचकार स्मरशत्रुसूनुः ॥ ३३ ॥

तत इति ॥ ततो गङ्गावलोकनानन्तरं व्रजंश्चलन्स्मरशत्रुसूनुः कुमारः पुर- स्तादग्रे विभिन्नो विदारितः । बाणैः शतरन्ध्रीकृत इति तात्पर्यार्थः । तथा भग्न आमर्दितो मूलं विनोपर्येव शतशकलीकृत उद्धृत उत्पाटितश्च शालसंघो यस्य तत् ॥ "शालो हाले मत्स्यभेदे शालकस्तरुभेदयोः । शालद्रुस्कन्धशाखायां शालेति परिकीर्तिता" इति मेदिनी ॥ नन्दननामधेयं नन्दनसंज्ञकम् ॥ "न- न्दनं वनम्" इत्यमरः ॥ जम्भजित इन्द्रस्य लीलावनमुपवनं प्रेक्षांचकार ददर्श ॥ इजादेश्चेत्याम् ॥

सुरद्विपोपप्लुतमेवमेतद्वनं वलस्य द्विषतो गतश्रि ।
इत्थं विचिन्त्यारुणलोचनोऽभूद्भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात्॥३४

सुरद्विपेति ॥ स कुमारः । एतत्पुरोवर्ति वलस्य द्विषत इन्द्रस्य ॥ अत्र "नलोक-" इत्यादिना षष्ठीनिषेधेऽपि "द्विषः शतुर्वा" इति विकल्पात्षष्ठी ॥ वनमुपवनं सुरद्विपा तारकेणैव न केनापि । यथा तारकेणोपद्रुतं तथा न केना- पीत्यवधारणार्थैवकारेण ध्वन्यते ॥ "एव प्रकारोपमयोरङ्गीकारावधारणे" इति विश्वः ॥ अभितः सर्वतः । उपप्लुतमुपद्रुतमत एव गतश्रि नष्टशोभमित्थं विचिन्त्य कोपादरुणे लोचने यस्य तथा भ्रूभङ्गेन दुष्प्रेक्ष्यं दुर्दर्शं मुखं यस्य त- थोक्तश्चाभूत् । मदग्रे सति स्वामिन्परदुःखं महादुःखातरं भवतीति भावः ॥

---

१ प्रणादित. २ रसार्पितः. ३ व्रजन्. ४ बलभूतः. ५ उभयत्रापि. ६ एत. ७ दुष्प्रेक्ष्य- मुखः. ८ प.

कुतूहलाद्द्रष्टुमुपागताभिस्तीरे[1]स्थिताभिः सुर[2]सुन्दरीभिः ।
अ[3]भ्यूर्मिराजि प्रतिबिम्बिताभिर्मुदं दिशन्तीं व्रजतां जनानाम् ॥ २८ ॥

कुतूहलादिति ॥ द्रष्टुं कुतूहलात्कौतुकात् । आनन्दादिति यावत् । उपागताभिरागताभिः । अत एव तीरस्थिताभिः । अत एवाभ्यूर्मिराजि । ऊर्मिराजावित्यभ्यूर्मिराजि तरङ्गमध्ये प्रतिबिम्बिताभिः सुरसुन्दरीभिर्देवाङ्गनाभिर्निमित्तेन व्रजतां गच्छतामपि जनानां मुदं दिशन्तीं ददतीम् । एकासामप्यप्सरसां प्रतिबिम्बवशादनेकधा दृश्यमानत्वादुक्ता प्रीतिजनकतेति भावः ॥

ननन्द स[5]द्यश्चिरकालदृष्टां विलोक्य शक्र[4]ः सुरदीर्घिकां ताम् ।
अदर्शयत्सादरमद्रिपुत्रीमहेशपुत्राय त[6]तः पुरो[7]गः ॥ २९ ॥

ननन्देति ॥ शक्र इन्द्रश्चिरकालेन बहुकालेन दृष्टां तां सुरदीर्घिकां मन्दाकिनीं विलोक्य सद्यो झटिति ननन्द जहर्ष । अतिरमणीयं वस्तु चिरकालदृष्टं सद्बहुप्रीतिजनकं भवतीति भावः । ततोऽनन्तरमद्रिपुत्रीमहेशयोः पुत्राय कुमाराय सादरं यथा तथा पुरोगः सन्नदर्शयत् ॥

स कार्तिकेयः पुरतः परीतः सुरैः समस्तैः सुरनिम्नगां ताम् ।
अपूर्वदृष्टाम[8]वलोकमानः स[9]विस्मयः स्मेरविलोचनोऽभूत् ॥ ३० ॥

स इति ॥ समस्तैः सुरैः परीतो व्याप्तः स कार्तिकेयः कुमारः । अपूर्वदृष्टाम् । अधुनैव दृष्टामित्यर्थः । तां सुरनिम्नगां पुरतोऽग्रेऽवलोकमानः सन्सविस्मयः साश्चर्यः स्मेरविलोचनः समन्दहासनेत्रश्चाभूत् ॥

उपेत्य तां त[10]त्र किरीटकोटिन्यस्ताञ्जलिर्भक्तिपरः कुमारः ।
गीर्वाणवृन्दैः प्र[11]णुतां प्रणुत्य नम्रेण मूर्ध्ना मु[12]दितो ववन्दे ॥ ३१ ॥

उपेत्येति ॥ भक्तिपरो भक्तिप्रवीणः कुमारः कार्तिकेयो गीर्वाणवृन्दैर्देवसमूहैः प्रणुतां प्रकर्षेण स्तुताम् ॥ "णु स्तुतौ" इति धातोः कर्मणि क्तः ॥ तां मन्दाकिनीं तत्रोपेत्य । तत्समीपं गत्वेत्यर्थः । किरीटकोटौ मुकुटाग्रे ॥ "कोटिः स्त्री धनुषोऽग्रेऽस्रौ" इति मेदिनी ॥ अत्राग्रशब्दस्य धनुःशब्दोपलक्षिततया सर्वेषामग्रवाचकत्वं बोध्यम् ॥ न्यस्तोऽञ्जलिर्येन तथाभूतः सन् । प्रणुत्येडयित्वा मुदितो मुमुदे ॥ इदं कृदन्तरूपं क्रियापदम् ॥ तथा नम्रेण मूर्ध्ना शिरसा ववन्दे नमश्चक्रे ॥

---

१ तीरे स्थिताभिः. २ सुरकन्यकाभिः. ३ अभ्यूर्मिराशौ; अत्यूर्मिराजि. ४ शक्रः. ५ सद्यः. ६ पुरः. ७ पुरोगः. ८ इव लोकमानः. ९ सविस्मय. १० रत्नकिरीट. ११ प्रणताम्. १२ नमितः; प्रणतः.

निर्लूनलीलोपवनामपश्यद्दुःसंचरीभूतविमानमार्गाम् ।
विध्वस्तसौधप्रचयां कुमारो विश्वैकसाराममरावतीं सः ॥ ३५ ॥

निर्लूनेति ॥ स कुमारः कार्तिकेयः निर्लूनानि कर्तितानि लीलायाः क्रीडाया उपवनानि यस्याम् । तथा दुःखेन संचरः संचारो येषु तथाभूता विमानमार्गा विमानसंचारपथा यस्याम् । तथा विध्वस्ताः खण्डिताः । स्फोटिता इति यावत् । सौधप्रचया राजसदनसमूहा यस्याम् ॥ "सौधोऽस्त्री राजसदनम्" इत्यमरः ॥ तथा विश्वस्मिन्नेकैव सारां तत्त्वभूतांताममरावतीमिन्द्रपुरीमपश्यत् ॥ "नगरी त्वमरावती" इत्यमरः ॥

गतश्रियं वैरिवराभिभूतां दशां सुदीनाममितो दधानाम् ।
नारीमवीरामिव तामवेक्ष्य स बाढमन्तः करुणापरोऽभूत् ॥ ३६ ॥

गतश्रियमिति ॥ स कुमारः वैरिवरेण तारकेणाभिभूतां पूर्वोक्तविधिना पराभूताम् । पराभवोऽत्र विध्वंसनक्रियानुकूलो व्यापारो ग्राह्यः । अत एव गतश्रियं भ्रष्टशोभाम् । अत एव सुतरां दीनां कृपणाम् । अनुकम्प्यामिति यावत् ॥ दशामवस्थामभितो दधानाम् । अत एवावीरां नपुंसकभर्तृकां नारीमिव स्थितांताममरावतीमवेक्ष्यान्तर्मनसि बाढं बहु यथातथा करुणायां पर आसक्तोऽभूत् ॥

दुश्चेष्टिते देवरिपौ सरोपस्तस्याविषण्णः समराय चोत्कः ।
तथाविधां तां स विवेश पश्यन्सुरैः सुराधीश्वरराजधानीम् ॥ ३७ ॥

दुश्चेष्टित इति ॥ दुश्चेष्टिते दुष्कर्मणि देवरिपौ तारके विषये सरोषः सक्रोधः । तथा तस्य तत्कर्तृकाय समराय समरं युद्धं कर्तुमुत्कश्च तथाविषण्णोऽनलसः स कुमारः । तथाविधां पूर्वोक्तप्रकारां तां सुराधीश्वरस्येन्द्रस्य राजधानीं पुरीं पश्यन्सन् । विवेश । तदन्तरिति शेषः ॥

दैतेयदन्त्यावलिदन्तघातैः क्षुण्णान्तराः स्फाटिकहर्म्यपङ्क्तीः ।
महाहिनिर्मोकपिनद्धजालाः स वीक्ष्य तस्यां विपसाद सद्यः ३८

दैतेयेति ॥ दैतेयानां दैत्यानां दन्त्यावलिर्गजावलिस्तस्यास्तत्कर्तृका ये दन्त-

१ असंचरो. २ सौरव्यप्रचयाम्. ३ समृद्धविश्वैकसाराम्; समृद्धविश्वीकसाराम्; समृद्धवानैकसाराम्. ४ गर्वभिषन्. ५ वैरिवराभिभूताम्. ६ स गाढम्; सवाष्पम्. ७ तस्या विषण्णः. ८ प. ९ दैतेयदन्त्यावल; दैत्यदन्त्यावल. १० क्षुण्णान्तर. ११ संवीक्ष्य.

घाता रदनताडितानि तैः क्षुण्णान्तराः क्षोदितमध्या अत एव महाहीनां महासर्पाणां निर्मोकाः कञ्चुकाः ॥ "समौ कञ्चुकनिर्मोकौ" इत्यमरः ॥ तैः पिनद्धानि जालानि सौधजालानि यासु ताः स्फाटिकहर्म्यपङ्क्तीः स्फटिकनिर्मितसौधनिचयान्वीक्ष्य स सद्यः तस्यां विषसाद । खिद्यति स्मेत्यर्थः ॥ "सद्यः सपदि तत्क्षणे" इत्यमरः ॥

अथ युग्मेनाह—

उत्कीर्णचामीकरपङ्कजानां दिग्दन्तिदानद्रवदूषितानाम् ।
हिरण्यहंसव्रजवर्जितानां विदीर्णवैदूर्यमहाशिलानाम् ॥ ३९ ॥
आविर्भवद्बालतृणाञ्चितानां तदीयलीलागृहदीर्घिकाणाम् ।
स दुर्दशां वीक्ष्य विरोधिजातां विषादवैलक्ष्यभरं बभार ॥ ४० ॥

उत्कीर्णेति । आविर्भवदिति च ॥ स कुमारः । उत्कीर्णान्युत्खनितानि चामीकरस्य सुवर्णस्य पङ्कजानि कमलानि यासाम् । उत्खनितसुवर्णकमलानामित्यर्थः । तथा दिग्दन्तिनामैरावतादीनां दानाः खण्डनाः । तज्जेतारस्तारकगजाः ॥ कर्तरि ल्युट् ॥ तेषां द्रवो मदजलं तेन दूषितानां म्लानीकृतानाम् । तारककुम्भीन्द्रमदकलुषीकृतजलानामित्यर्थः । हिरण्यप्रचुरा ये हंसास्तेषां व्रजेन वर्जितानां रहितानाम् । दैत्योपद्रवादिति भावः । तथा विदीर्णाः स्फोटिता वैदूर्याणां रत्नविशेषाणां महत्यः शिला यासाम् । तथाविर्भवन्त्युदयमानानि यानि बालतृणानि शष्पाणि तैरञ्चितानां व्याप्तानाम् । तदीया ऐन्द्रयो या लीलार्थं गृहदीर्घिका गृहवापिकास्तासां संबन्धिनीम् । विरोधिभ्योऽरिभ्यो जातां दुर्दशां दुष्टावस्थां वीक्ष्य विषादवैलक्ष्ययोः खेदलज्जयोर्भरम् । बहुत्वं विषादलज्जे इत्यर्थः । बभार । दुर्दशादर्शनजनितकरुणाबीजं दुःखं मयि सत्यपि सुदुर्दशेति लज्जाहेतुरित्यर्थः ॥

तद्दन्तिदन्तक्षतहेमभित्ति सुतन्तुजालाकुलरत्नजालम् ।
निन्ये सुरेन्द्रेण पुरोगतेन स वैजयन्ताभिधमात्मसौधम् ॥ ४१ ॥

तद्दन्तीति ॥ स कुमारः । सुरेन्द्रेणेन्द्रेण पुरोगतेनाग्रण्या सता तस्य तारकस्य दन्तिनां गजानां दन्तैः क्षताः क्षुण्णा हैम्यो भित्तयः कुड्यानि यस्मिन्यस्य वा । सुतन्तवो लूतानां शोभनानि सूत्राणि तेषां जालेनाकुलं व्याकुलं रत्नजालं रत्नसमूहो यस्मिन् । तथा वैजयन्ताभिधं वैजयन्तसंज्ञकम् ॥ "स्यात्प्रासादो वैजयन्तः" इत्यमरः ॥ आत्मसौधं स्वराजसदनं निन्ये प्रापितः ॥ कर्मणि लिट् ॥

१ तदीय. २ तृणाङ्कितानाम्. ३ सुदुर्दशानाम्. ४ विरोधिना ताम्. ५ हेमभित्तिं; हेमभित्ति.

निर्लूनलीलोपवनामपश्यद्दुःसंचरीभूतविमानमार्गाम् ।
विध्वस्तसौधप्रचयां कुमारो विश्वैकसाराममरावतीं सः ॥ ३५॥

निर्लूनेति ॥ स कुमारः कार्तिकेयः निर्लूनानि कर्तितानि लीलायाः क्रीडाया उपवनानि यस्याम् । तथा दुःखेन संचरः संचारो येषु तथाभूता विमानमार्गा विमानसंचारपथा यस्याम् । तथा विध्वस्ताः खण्डिताः । स्फोटिता इति यावत् । सौधप्रचया राजसदनसमूहा यस्याम् ॥ "सौधोऽस्त्री राजसदनम्" इत्यमरः ॥ तथा विश्वस्मिन्नेकैव सारां तत्त्वभूतांताममरावतीमिन्द्रपुरीमपश्यत् ॥ "नगरी त्वमरावती" इत्यमरः ॥

गतश्रियं वैरिवैराभिभूतां दशां सुदीनामभितो दधानाम् ।
नारीमवीरामिव तामवेक्ष्य स वाढमन्तःकरुणापरोऽभूत् ॥३६॥

गतश्रियमिति ॥ स कुमारः वैरिवरेण तारकेणाभिभूतां पूर्वोक्तविधिना पराभूताम् । पराभवोऽत्र विध्वंसनक्रियानुकूलो व्यापारो ग्राह्यः । अत एव गतश्रियं भ्रष्टशोभाम् । अत एव सुतरां दीनां कृपणाम् । अनुकम्प्यामिति यावत् ॥ दशामवस्थामभितो दधानाम् । अत एवावीरां नपुंसकभर्तृकां नारीमिव स्थितांताममरावतीमवेक्ष्यान्तर्मनसि वाढं बहु यथातथा करुणायां पर आसक्तोऽभूत् ॥

दुश्चेष्टिते देवरिपौ सरोषस्तस्याविषण्णः समराय चोत्कः ।
तथाविधां तां स विवेश पश्यन्सुरैः सुराधीश्वरराजधानीम् ॥३७॥

दुश्चेष्टित इति ॥ दुश्चेष्टिते दुष्कर्मणि देवरिपौ तारके विषये सरोषः सक्रोधः । तथा तस्य तत्कर्तृकाय समराय समरं युद्धं कर्तुमुत्कश्च तथाविषण्णोऽनलसः स कुमारः । तथाविधां पूर्वोक्तप्रकारां तां सुराधीश्वरस्येन्द्रस्य राजधानीं पुरीं पश्यन्सन् । विवेश । तदन्तरिति शेषः ॥

दैतेयदन्त्यावलिदन्तघातैः क्षुण्णान्तराः स्फाटिकहर्म्यपङ्क्तीः ।
महाहिनिर्मोकपिनद्धजालाः स वीक्ष्य तस्यां विषसाद सद्यः ३८

दैतेयेति ॥ दैतेयानां दैत्यानां दन्त्यावलिर्गजावलिस्तस्यास्तत्कर्तृका ये दन्त-

१ असंचरी. २ सौख्यप्रचयाम्. ३ प्रमृष्टविश्वैकसाराम्; प्रमृष्टविश्वौकसाराम्; प्रमृष्टवास्तेकसाराम्. ४ गर्भश्रियम्. ५ वैरिपराभिभूताम्. ६ स गाढम्; सबाष्पम्. ७ तस्यां विषण्णः. ८ च. ९ दैत्येन्द्रदन्तावल; दैतेयदन्तावल. १० क्षुण्णान्तर. ११ सवीक्ष्य.

एकवन्द्यो केवलनमस्करणीयौ पादौ तथैव मुनिनमस्कारप्रकारेणैव कामं यथायोग्यं प्रणनाम नमश्चक्रे ॥

स कश्यपः सा जननी सुराणां तमेधयामासतुराशिषा द्वौ ।
तया यया नैकजगज्जिगीषुं जेता मृधे तारकमुग्रवीर्यम् ॥२६॥

स इति ॥ स कश्यपो मुनिः, सा सुराणां जनन्यदितिः, एतौ द्वौ तं कुमारं तयाशिषाशीर्वादेनैधयामासतुर्वर्धयतः स्म । ययाशिषा निमित्तेनोग्रवीर्यमत एव नैकजगन्त्यनेकसर्गान्ति । त्रीणि जगन्तीत्यर्थः । जिगीषुं जेतुमिच्छुम् ॥ " न लोक–"इति षष्ठीनिषेधः ॥ तारकं दैत्यं मृधे संगरे जेता । जेष्यतीत्यर्थः॥ कर्तरि लुट्॥

स्वदर्शनार्थं समुपेयुषीणां सुदेवतानामदितिश्रितानाम् ।
पादौ ववन्दे पतिदेवतास्तमाशीर्वचोभिः पुनरभ्यनन्दन् ॥२७॥

स्वेति ॥ स कुमारः । स्वदर्शनार्थं स्वावलोकनार्थं समुपेयुषीणां प्राप्नुवतीनाम् । तथादितिं देवमातरं श्रितानाम् । देवमातृसंश्रयेण जीवन्तीनामित्यर्थः । शोभनाः सौभाग्यवत्यो या देवतास्तासां पादौ चरणौ ववन्दे प्रणनाम । अथ च पतिरेव देवता यासां ताः पतिव्रतास्ता देवतास्त्वाशीर्वचोभिः " त्वं जय " इत्यादिभिः पुनस्तं कुमारमभ्यनन्दन् । अस्तुवन्नित्यर्थः ॥

पुलोमपुत्रीं विबुधाधिभर्तुस्ततः शचीं नाम कलत्रमेषः ।
ननाम स्मरशत्रुसूनुस्तमाशिषा सा समुपाचरच्च ॥ २८ ॥

पुलोमपुत्रीमिति ॥ ततोऽनन्तरम् ॥ नामेति प्रसिद्धार्थद्योतकमव्ययम् । अव्ययानामनेकार्थत्वात् ॥ ततश्च प्रणामकर्तृत्वयोग्य इत्यर्थः । न च पुलोमपुत्र्या एव प्रणामार्हत्वविवक्षाया विशेषणता स्यादिति वाच्यम् । विबुधाधिभर्तृकलत्रोपादानेनैव ध्वनितत्वात् । एष स्मरशत्रुसूनुः कुमारो विबुधानां देवानामधिभर्तुरिन्द्रस्य कलत्रं पत्नीभूतां शचीं शचीमितिप्रसिद्धां पुलोमपुत्रीं ननाम । अथ च सेन्द्राण्याशिषाशीर्वादेन तं कुमारं समुपाचरत् । अपूजयदित्यर्थः ॥

अथादितेरिन्द्रप्रमदाः समेताः तां मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमते महेशपुत्राय तस्मै ददुराशिषः प्राक् ॥२९॥

[illegible]

निर्दिष्टवर्त्मा विबुधेश्वरेण सुरैः समग्रैरनुगम्यमानः ।
स प्राविशत्तं विविधाश्मरश्मिच्छिन्नेन सोपानपथेन सौधम् ॥१२

निर्दिष्टेति ॥ स कुमारः । विबुधेश्वरेणेन्द्रेण ॥ कर्त्रा ॥ निर्दिष्टवर्त्मा गमनं विधेयमित्युक्तिपूर्वकप्रदर्शितमार्गः । तथा समग्रैः सुरैर्देवैरनुगम्यमानोऽनुस्रियमाणः सन् । विविधा अनेकवर्णा येऽश्मानो रत्नानि तेषां रश्मिभिः किरणैश्छिन्नेन भिन्नेन । रञ्जितेनेति यावत् । तारतम्येन सोपानपङ्क्तिनिरन्तरोत्पादनादिति भावः । सोपानपथेनारोहणमार्गेण ॥ "आरोहणं स्यात्सोपानम्" इत्यमरः ॥ तं सौधं प्राविशत् ॥

निसर्गकल्पद्रुमतोरणं तं सं पारिजातप्रसवस्त्रगाढ्यम् ।
दिव्यैः कृतस्वस्त्ययनं मुनीन्द्रैरन्तःप्रविष्टप्रमदं प्रपेदे ॥ १३ ॥

निसर्गेति ॥ स कुमारः । निसर्गेण स्वभावेन । अनायासेनेति यावत् ॥ "निसर्गः शीलसर्गयोः" इति विश्वः ॥ कल्पद्रुमा एव तोरणानि यत्र । तथा पारिजातस्य देववृक्षविशेषस्य प्रसवानां पत्रपुष्पाणां स्रजा माल्याढ्यं युक्तम् । पूजनार्थमनेकपत्रपुष्पसहितमित्यर्थः । तथा दिव्यैः स्वर्गीयैर्मुनीन्द्रैः कश्यपादिभिः कृतस्वस्त्ययनं विहितस्वस्तिवाचनम् । तथान्तः प्रविष्टा मध्यं प्रविश्य स्थिताः प्रमदाः स्त्रियो यत्र तं सौधं प्रपेदे प्राप ॥

पादौ महर्षेः किल कश्यपस्य कुलादिवृद्धस्य सुरासुराणाम् ।
प्रदक्षिणीकृत्य कृताञ्जलिः सन्नुपाङ्गैः शिरोभिः स नतैर्ववन्दे ॥१४

पादाविति ॥ स कुमारः । सुरासुराणां देवदैत्यानां कुल आदिवृद्धस्य कश्यपस्य महर्षेः पादौ चरणौ ॥ कर्मभूतौ ॥ प्रदक्षिणीकृत्य कृताञ्जलिः सन् । नतैः नम्रैः शिरोभिर्ववन्दे नमश्चक्रे । किलेत्यैतिह्ये ॥

स देवमातुर्जगदेकवन्द्यौ पादौ तथैव प्रणनाम कामम् ।
मुनेः कलत्रस्य च तस्य भक्त्या प्रह्वीभवञ्शैलसुतातनूजः ॥१५

स इति ॥ स शैलसुतातनूजः पार्वतीनन्दनो भक्त्या निमित्तेन प्रह्वीभवन्नम्रीभवन्सन् । मुनेश्च तस्य कलत्रस्य पत्न्याश्च देवानां मातुर्जनन्या अदितेः । जग

१ तद्विविधात्मरश्मिच्छन्नेन; तं विविधेन रत्नाच्छन्नेन. २ तोरणाङ्कम्; तोरणान्तम्. ३ सुपारिजात. ४ स्रजाढ्यम्. ५ कृतस्वस्त्ययनः. ६ कुमारः; प्रविश्य. ७ सः. ८ विनतैः.

एकवन्द्यो केवलनमस्करणीयौ पादौ तथैव मुनिनमस्कारप्रकारेणैव कामं यथायोग्यं प्रणनाम नमश्चक्रे ॥

स कश्यपः सा जननी सुराणां तमेधयामासतुराशिषा द्वौ ।
तथा यया नैकजगज्जिगीषुं जेता मृधे तारकमुग्रवीर्यम् ॥४६॥

स इति ॥ ॥ कश्यपो मुनिः, सा सुराणां जनन्यदितिः, एतौ द्वौ तं कुमारं तयाशिषाशीर्वादेनैधयामासतुर्वर्धयतः स्म । ययाशिषा निमित्तेनोग्रवीर्यमत एव नैकजगन्त्यनेकजगन्ति । त्रीणि जगन्तीत्यर्थः । जिगीषुं जेतुमिच्छुम् ॥ "न लोक–" इति षष्ठीनिषेधः ॥ तारकं दैत्यं मृधे संगरे जेता । जेष्यतीत्यर्थः ॥ कर्तरि लुट् ॥

स्वदर्शनार्थं समुपेयुषीणां सुदेवतानामदितिश्रितानाम् ।
पादौ ववन्दे पतिदेवतास्तमाशीर्वचोभिः पुनरभ्यनन्दन् ॥४७॥

स्वेति ॥ स कुमारः । स्वदर्शनार्थं स्वावलोकनार्थं समुपेयुषीणां प्राप्नुवतीनाम् । तथादितिं देवमातरं श्रितानाम् । देवमातुराश्रयेण जीवन्तीनामित्यर्थः । शोभनाः सौभाग्यवत्यो या देवतास्तासां पादौ चरणौ ववन्दे प्रणनाम । अथ च पतिरेव देवता यासां ताः पतिव्रतास्ता देवतास्त्वाशीर्वचोभिः "त्वं जय" इत्यादिभिः पुनस्तं कुमारमभ्यनन्दन् । अस्तुवन्नित्यर्थः ॥

पुलोमपुत्रीं विबुधाधिभर्तुस्ततः शचीं नाम कलत्रमेषः ।
नमश्चकार स्मरशत्रुसूनुस्तमाशिषा सा समुपाचरच्च ॥४८॥

पुलोमपुत्रीमिति ॥ ततोऽनन्तरम् ॥ नामेति योग्यताप्रतिपादकमव्ययम् । अव्ययानामनेकार्थत्वात् ॥ ततश्च प्रणामकर्तव्ययोग्य इत्यर्थः । न च पुलोमपुत्र्या एव प्रणामार्हत्वविवक्षाया विशेषणता स्यादिति वाच्यम् । विबुधाधिभर्तृसंबन्धोद्घाटनेनैव ध्वनितत्वात् । एष स्मरशत्रुसूनुः कुमारो विबुधानां देवानामधिभर्तुरिन्द्रस्य कलत्रं स्त्रीभूतां शचीं शचीमंशिकां पुलोमपुत्रीं नमश्चकार । अथ च सेन्द्राण्याशिषाशीर्वादेन तं कुमारं समुपाचरत् । असंभावयदित्यर्थः ॥

अथादितीन्द्रप्रमदाः समेताः तौ मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमते महेशपुत्राय तस्मै ददुराशिषः प्राक् ॥४९॥

---

१ द. २ यथा; नया. ३ अनया; यया. ४ उग्रवीर्यः. ५ तद्दर्शनार्थं. ६ स देवतानाम्. ७ अदितेः सुतानाम्. ८ दिवेदेवताः. ९ पुत्रम्. १० शची. ११ सत्र. १२ समुपाचरत्. १३ अदितिमातृमुखाः समेताः; अदितीन्द्रप्रमदासमेताः; अदितीन्द्रमुखाः समेताः. १४ ताः; तत्र. १५ मातृकाः. १६ नमति. १७ स्त महेशपुत्राय. १८ ताः.

चतुर्दशः सर्गः ।

रणोत्सुकेनान्धकशत्रुसूनुना समं प्रयुक्तैस्त्रिदशैर्जिगीषुणा ।
महासुरं तारकसंज्ञकं द्विषं प्रसह्य हन्तुं समनह्यत द्रुतम् ॥ १ ॥

रणोत्ति ॥ जेतुमिच्छति जिगीषति । जिगीषतीति जिगीषुस्तेन जिगीषुणा ॥ सन्नन्ताज्जयतेः "सनाशंसभिक्ष उः" इत्युप्रत्ययः ॥ अत एव रणे समरे ॥ "रंणः कोणे क्वणे पुंसि समरे पुंनपुंसकम्" इति मेदिनी ॥ उत्सुकेनोत्कण्ठितेनान्धकशत्रोः शिवस्य सूनुना कुमारेण ॥ कर्त्रा ॥ प्रयुक्तैः प्रेरितैः । संनहनार्थमिति शेषः । त्रिदशैर्देवैरिन्द्रादिभिः समं सार्धं तारकसंज्ञकं द्विषं शत्रुं महासुरं दैत्यं प्रसह्य बलाद्धन्तुं मारयितुं द्रुतं शीघ्रम् ॥ "लघु क्षिप्रमरं द्रुतम्" इत्यमरः ॥ समनह्यत संनद्धम् ॥ नह्यतेर्भावे लङ् ॥ सर्गेऽस्मिन्नपि वृत्तमुपजातिरेव ॥

इतः परं "सः" इत्यादिभिस्त्रिभिः कुमारसंनहनमाह—

स दुर्निवारं मनसोऽतिवेगिनं जयश्रियः संनयनं सुदुःसहम् ।
विजित्वरं नाम तदा महारथं धनुर्धरः शक्तिधरोऽध्यरोहयत् ॥२॥

तत्र स इति ॥ स गुहः कार्तिकेयो धनुर्धरस्तथा शक्तिधरश्च सन्दुर्निवारं दुःखेन निवारयितुं प्रतिरोद्धुं शक्यम् । अप्रतिरुद्धगतिकमित्यर्थः ॥ मनसः सकाशादप्यतिवेगिनम् । बहुगतिजववन्तमित्यर्थः ॥ इहातिनाम बहुश्वार्थो जयश्च । स विद्यते यस्येति कृते "न कर्मधारयान्मत्वर्थीयः" इति निषेधप्रसक्त्या मत्वर्थीयो न स्यात् । अतोऽनीत्यस्य क्रियाविशेषणतामाश्रित्य समर्थनीयम् ॥ केचित्पुनः "मनसोऽपि" इति पठित्वा व्याचक्षते ॥ तथा जयश्रियो विजयलक्ष्म्याः संनयनं सम्यक्प्राप्तिसाधनम् । यमारुह्य गच्छन्तो वीराः प्राप्तलक्ष्मीका एव भवन्तीति भावः । सुतरां दुःसहम् । दुःसहता चैतद्दर्शनविषयिणी बोध्या । एतद्दर्शनेनैव शत्रवः पराजिता भवन्ति । अतो युक्तमेव जयश्रीसंनयनत्वम् । अत एव विजित्वरम् । विजित्वरेत्यानुपूर्वीकं नाम । नामत्वं च व्यक्तिबोधजनकतावच्छेदकसंकेतत्वम् । दधानमिति शेषः । तथाभूतं महारथं महान्तं स्यन्दनम् ॥ "रथः पुमानवयवे स्यन्दने वेतसेऽपि च" इति मेदिनी ॥ तदाध्यरोहयदारूढः ॥

---

१ रणदग्. २ ध्वेतुना. ३ तारकसंज्ञितं द्विषम्; तारकाख्यमरातिम्. ४ संनह्यत; समनह्यत. ५ ततः ६ अध्यरोहत.

सुरालयश्रीविपदां निवारणं सुरारिसंपत्परितापकारणम्।
केनापि दध्रेऽस्य विरोधिदारणं सुचारु चामीकरघर्मवारणम्॥३॥

सुरालयेति ॥ विरोधिनं तारकं दारयति मारयति तद्विरोधिदारणम् ॥ णिजन्तप्रयोगं कुर्वता कविना छत्रस्य जडत्वात्स्वातन्त्र्येण दारणक्रियोपयोगित्वासंभवात्तदीयधारणप्रभावेण वीरोऽप्यसौ कुमारस्तारकं जेष्यतीति सूचितम्। "ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः" इति न्यायादिति भावः॥ अत एव सुरालयस्य स्वर्गस्य श्रियो लक्ष्म्या विपदामापदां निवारणं नाशकम्। अत एव सुरारेस्तारकस्य संपदां परितापस्य संतापस्य कारणम् ॥ कर्तृ ॥ सर्वत्र कर्तरि ल्युट् ॥ सुचारु सुतरां मनोहरं चामीकरस्य हेम्नो घर्मवारणं छत्रम्। अस्य कुमारस्योपरि केनापि देवेन दध्रे धृतम् ॥ कर्मणि लिट् ॥

शरच्चरच्चन्द्रमरीचिपाण्डुरैः स वीज्यमानो वरचारुचामरैः।
पुरःसरैः किंनरसिद्धचारणै रणेच्छुरस्तूयत वाग्भिरुल्बणैः ॥ ४ ॥

शरदिति ॥ शरदि घनात्यये चरतो भ्रमतश्चन्द्रस्य मरीचयो मयूखास्तद्वत्पाण्डुरैः शुभ्रैः॥ "शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः" इत्यमरः ॥ चरत इति विशेषणं चामराणामपि वीजनवशेन चलत्वादन्वर्थमिति बोध्यम्। तथाभूतैर्वरैः श्रेष्ठैः॥ "वरो जामातरि वृतौ देवतादेरभीप्सिते। खिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्" इति मेदिनी ॥ चारुभिर्मनोहरैश्च चामरैर्वीज्यमानः। तथा रणेच्छुः संग्रामाभिलाषुकः स कुमार उल्बणैरुद्भटैः किंनराः किंपुरुषाः ॥ "स्यात्किंनरः किंपुरुषः" इत्यमरः ॥ सिद्धा देवविशेषाश्चारणाश्च तैः॥ कर्तृभिः ॥ पुरःसरैः सद्भिर्वाग्भिः कुमारस्तूयतेडितः ॥ "ष्टु स्तुतौ" इत्यतः कर्मणि लङ् ॥

इदानीमिन्द्रादीनामष्टानामनुप्रयाणमाह—

प्रयाणकालोचितचारुवेषभृद्वज्रं वहन्पर्वतपक्षदारणम्।
ऐरावतं स्फाटिकशैलसोदरं ततोऽधिरुह्य द्युपतिस्तमन्वगात्॥५॥

प्रयाणेति ॥ ततोऽनन्तरं द्युपतिरिन्द्रः प्रयाणकाले प्रस्थानसमय उचितं योग्यं चारु मनोहरं च वेषं बिभर्ति धरति तथोक्तः। तथा पर्वतपक्षाणां दारणं छेदनम् ॥ करणे ल्युट् ॥ वज्रं स्वायुधं वहन्। करेणेति शेषः। तथा स्फाटिकशैलः कैलासस्तस्य सोदरं सदृशमैरावतं गजमधिरुह्यास्थाय तं कुमारमन्वगात्। अनुय-

१ संगत. २ वारणम्. ३ गिरिपक्षदारणम्. ४ शारदम्. ५ रोचिभिः. ६ सुवीज्यमानः. ७ रणोत्सुकः; ८ दनुजः. ९ उत्कटैः. ९ वेषः. १० ऐरावतम्.

पावित्यर्थः। "अभ्यगात्" इति पाठस्त्वसाधुः। सेनानीत्वेन छतत्वादतिश्रेयः-कुमारापेक्षयान्येपामिन्द्रादीनामपि गौणत्वात्पुरतो गमनानौचित्यात् ॥

तमन्वगच्छद्गिरिशृङ्गसोदरं मदोद्धतं मेपमधिष्ठितः शिखी।
विरोधिविद्वेपरुषाधिकं ज्वलन्महोमहीयस्तरमायुधं दधत् ॥ ६ ॥

तमिति ॥ विरोधिनस्तारकस्य विद्वेषेण वैरेण हेतुना या रुट् क्रोधस्तया निमित्तेनाधिकं ज्वलन्मदीप्यमानः शिख्यग्निर्गिरेः शृङ्गस्य सोदरं सदृशम्। तद्वद्विशालमित्यर्थः। तथा मदेन गर्वेण ॥ "मदो रेतसि कस्तूर्यां गर्वे हर्पभदानयोः" इति मेदिनी ॥ उद्धतं मेपं पशुविशेषं लोके "मेंढा" इति ख्यातमधिष्ठितोऽधिरूढः। तथा महसा तेजसा महीयस्तरमतिशयं महदायुधं शस्त्रं दधत्॥ अथवा "महो महीयस्तरम्" इति छेदः। महस्तेजोरूपं महीयस्तरमायुधमिति व्याख्यातव्यम् ॥ दधत्सन्। तं कुमारमन्वगच्छदनुगतवान्। अत्राप्यभ्यगच्छदित्यसाधु बोध्यम् ॥

अथेन्द्रनीलाचलचण्डविग्रहं विपाणविध्वस्तमहापयोधरम्।
अधिष्ठितः कासरमुद्धरं मुदा वैवस्वतो दण्डधरस्तमन्वगात् ॥७॥

अथेति ॥ अथानन्तरं वैवस्वतो यमः ॥ "कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः" इत्यमरः ॥ इन्द्रनीलानां नीलमणीनामचलः पर्वतस्तद्वच्चण्डविग्रहं प्रचण्डदेहम्। कालत्वाद्भयानकमित्यर्थः। तथा विपाणाभ्यां शृङ्गाभ्यां विध्वस्ता अधःपातिता महापयोधरा बृहन्मेघा येन तथा। उद्धरमुद्भटं कासरं महिषम् ॥ "लुलायो महिषो वाहद्विषत्कासरसैरिभाः" इत्यमरः ॥ अधिष्ठितोऽधिरूढः। तथा दण्डं धरतीति तथाभूतश्च सन्। मुदा प्रीत्या तं कुमारमन्वगादनुजगाम ॥

मदोद्धतं प्रेतमथाधिरूढवांस्तमन्धकद्वेपितनूजमन्वगात्।
महासुरद्वेपविशेपभीपणः सुरोपणश्चण्डरणाय नैर्ऋतः ॥ ८ ॥

मदोद्धतमिति ॥ अथानन्तरं महासुरद्वेषेण तारकासुरवैरेण विशेषमधिकं यथा तथा भीपणो भयानकः ॥ "भीषणं रसशङ्करयोर्ना गाढे दारुणेऽपि च"

१ महोद्धुरम्; महोद्धतम्. २ महानहोऽस्तरका सुखेदधे; महो महीयस्तरमादधद्युधि. ३ नभिन्द्र-नीलपल्वलदविग्रहे; मवेन्द्रनीलोच्चितचण्डविग्रहम्. ४ छिन्नोद्धुरे. ५ सिद्धोऽधिकमे महिषेऽग्रभीषणः; अधिष्ठितः कासरमुद्धतं मुदा. ६ स्तोमुद्धः. ७ अन्वगात्. ८ मदोद्धतः मेघरथाधिरोहणः; मदोद्धतमेघरथाधिरूढः. ९ अन्वगात्.

सुरालयश्रीविपदां निवारणं सुरारिसंपत्परितापकारणम् ।
केनापि दध्रेऽस्य विरोधिदारणं सुचारु चामीकरघर्मवारणम् ॥३॥

सुरालयेति ॥ विरोधिनं तारकं दारयति मारयति तद्विरोधिदारणम् ॥ णिजन्तप्रयोगं कुर्वता कविना छत्रस्य जडत्वात्स्वातन्त्र्येण दारणक्रियोपयोगित्वासंभवात्तदीयधारणप्रभावेण वीरोऽप्यसौ कुमारस्तारकं जेष्यतीति सूचितम् । "ओजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः" इति न्यायादिति भावः ॥ अत एव सुरालयस्य स्वर्गस्य श्रियो लक्ष्म्या विपदामापदां निवारणं नाशकम् । अत एव सुरारेस्तारकस्य संपदां परितापस्य संतापस्य कारणम् ॥ कर्तृ ॥ सर्वत्र कर्तरि ल्युट् ॥ सुचारु सुतरां मनोहरं चामीकरस्य हेम्नो घर्मवारणं छत्रम् । अस्य कुमारस्योपरि केनापि देवेन दध्रे धृतम् ॥ कर्मणि लिट् ॥

शरच्चरच्चन्द्रमरीचिपाण्डुरैः स वीज्यमानो वरचारुचामरैः ।
पुरःसरैः किंनरसिद्धचारणै रणेच्छुरस्तूयत वाग्भिरुल्बणैः ॥ ४ ॥

शरदिति ॥ शरदि घनात्यये चरतो भ्रमतश्चन्द्रस्य मरीचयो मयूखास्तद्वत्पाण्डुरैः शुभ्रैः ॥ "शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः" इत्यमरः ॥ चरत इति विशेषणं चामराणामपि वीजनवशेन चलत्वादन्वर्थमिति बोध्यम् । तथाभूतैर्वरैः श्रेष्ठैः ॥ "वरो जामातरि वृतौ देवतादेरभीप्सिते । षिद्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्" इति मेदिनी ॥ चारुभिर्मनोहरैश्च चामरैर्वीज्यमानः । तथा रणेच्छुः संग्रामाभिलाषुकः स कुमार उल्बणैरुद्भटैः किंनराः किंपुरुषाः ॥ "स्यात्किंनरः किंपुरुषः" इत्यमरः ॥ सिद्धा देवविशेषाश्चारणाश्च तैः ॥ कर्तृभिः ॥ पुरःसरैः साग्रयायिभिः कसास्तूयतेतितः ॥ "ष्टु स्तुतौ" इत्यतः कर्मणि लङ् ॥

इदानीमिन्द्रादीनामष्टानामनुप्रयाणमाह—

प्रयाणकालोचितचारुवेषभृद्वज्रं वहन्पर्वतपक्षदारणम् ।
ऐरावतं स्फाटिकशैलसोदरं ततोऽधिरुह्य सुपतिस्तमन्वगात् ॥५॥

प्रयाणेति ॥ ततोऽनन्तरं सुपर्वाणामिन्द्रः प्रयाणकाले प्रस्थानसमये उचितं योग्यं चारु मनोहरं च वेषं बिभर्ति धरतीति तथोक्तः । तथा पर्वतपक्षाणां दारणं छेदनम् ॥ कर्तरि ल्युट् ॥ वज्रं कुलिशं वहन् । [illegible] । तथा स्फाटिकशैलः [illegible] ऐरावतं [illegible] कुमारमन्वगात् । अनुग·

[illegible]

यान्नित्यर्थः । "अभ्यगात्" इति पाठस्त्वसाधुः । सेनानीत्वेन छत्रत्वादतिश्रेयः- कुमारापेक्षयान्येषामिन्द्रादीनामपि गौणत्वात्पुरतो गमनानौचित्यात् ॥

तमन्वगच्छद्गिरिशृङ्गसोदरं मदोद्धतं मेषमधिष्ठितः शिखी ।
विरोधिविद्वेषरुषाधिकं ज्वलन्महोमहीयस्तरमायुधं दधत् ॥ ६ ॥

तमिति ॥ विरोधिनस्तारकस्य विद्वेषेण वैरेण हेतुना या रुट् क्रोधस्तया निमित्तेनाधिकं ज्वलन्प्रदीप्यमानः शिख्यग्निर्गिरेः शृङ्गस्य सोदरं सदृशम् । तद्वद्विशालमित्यर्थः । तथा मदेन गर्वेण ॥ "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः" इति मेदिनी ॥ उद्धतं मेषं पशुविशेषं लोके "मेंढा" इति ख्यातमधिष्ठितोऽधिरूढः । तथा महसा तेजसा महीयस्तरमतिशयं महदायुधं शस्त्रं दधत् ॥ अथवा "महो महीयस्तरम्" इति छेदः । महस्तेजोरूपं महीयस्तरमायुधमिति व्याख्यातव्यम् ॥ दधत्सन् । तं कुमारमन्वगच्छदनुगतवान् । अत्राप्यभ्यगच्छदित्यसाधु बोध्यम् ॥

अथेन्द्रनीलाचलचण्डविग्रहं विषाणविध्वस्तमहापयोधरम् ।
अधिष्ठितः कासरमुद्धरं मुदा वैवस्वतो दण्डधरस्तमन्वगात् ॥७॥

अथेति ॥ अथानन्तरं वैवस्वतो यमः ॥ "कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः" इत्यमरः ॥ इन्द्रनीलानां नीलमणीनामचलः पर्वतस्तद्वच्चण्डविग्रहं प्रचण्डदेहम् । कालत्वाद्भयानकमित्यर्थः । तथा विषाणाभ्यां शृङ्गाभ्यां विध्वस्ता अधःपातिता महापयोधरा बृहन्मेघा येन तथा । उद्धरमुद्धतं कासरं महिषम् ॥ "लुलायो [illegible] वाहद्विषत्कासरसैरिभाः" इत्यमरः ॥ अधिष्ठितोऽधिरूढः । तथा [illegible] न् । मुदा प्रीत्या तं कुमारमन्वगात्-

[illegible] न्धरुद्दीपिततनूजमन्वगात् ।
[illegible] सुरारिभङ्गकरणाय नन्दनः ॥ ८ ॥

[illegible]

इति मेदिनी ॥ तथा पुनरपि रोषणः कोपनो गर्वितो गाढगर्वितो नै
मदेन गर्वेणोद्धतं मते पिशाचमपि स्वस्थानात्प्रस्थानमन्वगात् । पन्न
कर्तुं तमन्यकर्तोषणो दरस्य तनूजं पुत्रं कुमारमन्वगादन्वियाय ॥

नवोदयद्भ्भोधरघोरदर्शने युद्धाय रुद्धो मकरे महा
दुर्वारपाशो वरुणो रणोल्बणस्तमन्वियाय त्रिपुरान्त

नवेति ॥ रणे युद्धे उल्बण उद्भटो वरुणः प्रचेताः ॥ "वरुणस्तत
शापनावपि" इति मेदिनी ॥ नवो नव्यः ॥ "नवो नव्ये स्तुत
नी ॥ उदयदुद्गच्छन् योऽम्भोधरो मेघस्तद्वद्घोरदर्शने भयानक
भीमं भयानकम्" इत्यमरः ॥ तथा मकरे जलचरविशेषे मकरे ना
दुर्वारः पाशः आयुधविशेषो यस्य । पाशधरः सन्नित्यर्थः । युद्धा
त्रिपुरान्तकस्य शिवस्यात्मजं पुत्रं कुमारमन्वियायान्वगच्छत् ॥

दिगम्बराधिक्रमणोल्बणं क्षणान्मृगं महीयांसमरुद्ध
अधिष्ठितः संगरकेलिलालसो मरुन्महेशात्मजमन्व

दिगिति ॥ संगरकेलौ सङ्ग्रामक्रीडायां लालसा कामो यस्य
त्सुक्यतृष्णातिरेकयाञ्चासु च द्वयोः" इति मेदिनी ॥ तथाभूतो
युकोणाधीशः क्षणान्मुहूर्तमात्रेणैव ॥ "क्षणः पर्वोत्सवे च स्यात्तथ
सि" इति मेदिनी ॥ दिशामम्बरस्य च ॥ "अम्बरं वाससि व्योम्नि
दिनी । अधिक्रमण आक्रमण उल्बणमुद्भटं महीयांसं महत्तरम् ।
द्धो विक्रमो विवल्पादक्षेपो यस्य तथाभूतं मृगं हरिण
पशौ कुरङ्गे च करिनक्षत्रभेदयोः" इति मेदिनी ॥ अधिष्ठितः सन्
जं कुमारं द्रुतं सत्वरमन्वगादनुजगाम ॥

विरोधिनां [1]शोणितपारणैषिणीं गदामनूनां नरवाहन
महाहवाम्भोधिविगाहनोद्धतं यियासुर्[2]मन्वागमदीशन

विरोधिनामिति ॥ नरवाहनः कुबेरः ॥ "पौलस्त्यो नरवाह
रः ॥ विरोधिनां शत्रूणां संबन्धि शोणितं रुधिरं तेन या पारणा भ
च्छति तथाभूतामनूनामन्यूनसारां गदायायुधविशेषं वहन्धारयन्सन्

1 नवोदयाम्भोधरघोरदर्शनः; नवोदयस्तोरणघोरदर्शनम्; नवोदयास्तोरणघोरदर्शन

महारणः स एवाम्भोधिः समुद्रस्तस्य विगाहन उद्धतमुद्धटम् । समर्थमिति यावत् । अत एव पियासुं जिगमिषुमीशनन्दनं शिवपुत्रं कुमारमन्वागमत् । अनुगच्छति स्मेत्यर्थः ॥

महाहिनिर्बद्धजटाकलापिनो ज्वलत्त्रिशूलप्रबलायुधा युधे ।
रुद्रास्तुषाराद्रिसखं महावृषं ततोऽधिरूढास्तमयुः पिनाकिनः १२

महाहीति ॥ ततोऽनन्तरं पिनाकिनः पिनाकवन्तो रुद्रा ईशानकोणाधीशाः । महाहिभिर्महद्भिः सर्पैः कृत्वा निर्बद्धो यो जटाकलापः सोऽस्ति येषाम् । अथवा । महाहिभिर्निर्बद्धा जटा येषाम् ॥ "शेषाद्विभाषा" इति कप् ॥ तथा लापिन इदानीं तारकं जेष्याम इत्युद्धतवादिनश्च ॥ ततो विशेषणसमासः ॥ केचित्तु "जटाभरावराः" इति पाठं कल्पयन्ति । यथास्थितव्याख्याने तु "न कर्मधारयान्मत्वर्थीयः" इति मत्वर्थीयासङ्गो दुर्वार इत्यलम् ॥ तथा ज्वलद्दीप्यमानं त्रिशूलमेव प्रबलं सबलमायुधं येषाम् ॥ तथा तुषाराद्रेर्हिमवतः सखं सखायम् । तद्वच्छुभ्रमित्यर्थः । महावृषम् ॥ जातावेकवचनम् ॥ अधिरूढाश्च सन्तः । युधे युद्धाय तं कुमारमयुः । अन्वयुरित्यर्थः ॥

अन्येऽपि संनह्य महारणोत्सवश्रद्धालवः स्वर्गिगणास्तमन्वयुः ।
स्ववाहनानि प्रबलान्यधिष्ठिताः प्रमोदविस्मेरमुखाम्बुजश्रियः १३

अन्येऽपीति ॥ अन्येऽप्युक्तातिरिक्ता अपि स्वर्गिगणा देवगणाः प्रमोदेन रणानन्देन विस्मेरा विशेषेण समन्दहासा मुखाम्बुजश्रीर्येषाम् । अत एव महति रणोत्सवे श्रद्धालवः श्रद्धाशीला अत एव प्रबलानि स्ववाहनान्यधिष्ठिताः । तथा कवचादिना संनह्य संनद्धा भूत्वा तं कुमारमन्वयुः । अनुजग्मुरित्यर्थः ॥

अथ युग्मेनाह—

उद्दण्डहेमध्वजदण्डसंकुलार्श्वद्विचित्रातपवारणोज्ज्वलाः ।
चलद्घनस्यन्दनघोषभीषणाः करीन्द्रघण्टारवचण्डचील्कृताः ॥१४

स्फुरद्विचित्रायुधकान्तिमण्डलैरुदद्योतिताशावलयाम्बरान्तराः ।
दिवौकसां सोऽनुवहन्महाचमूः पिनाकपाणेस्तनयस्ततो ययौ १५

उद्दण्डेति । स्फुरदिति च ॥ ततः सर्वसंनहनानन्तरं स पिनाकपाणेरस्य तनयः कार्तिकेय उद्दण्डा उत्थानाद्दण्डा ये हेमध्वजाः सुवर्णरचितध्वजा-

१ निबद्ध. २ महाप्रवृषाः. ३ त्रिशि. ४ स्वाः. ५ मनस्त्र. ६ महामहोत्सव; महामहा मराः. ७ मरर्षाणि. ८ घण्ट. ९ उद्दण्डाः. १० दशाननाः. ११ चौक. १२ कन्दैः. १३ अम्बरा वराः.

प्रमथ्यमानाम्बुधिगर्जितर्जनैः सुरारिनारीगणगर्भपातनैः ।
नभश्चमूधूलिकुलैरिवाकुलं ररास गाढं पटहप्रतिस्वनैः ॥ १८ ॥

प्रमथ्यमानेति ॥ चमूनां धूलिकुलं रेणुसमूहः ॥ "कुलं जनपदे गोत्रे सजातीयगणेऽपि च" इति मेदिनी ॥ आकुलं व्याप्तं पीडितं नभः प्रमथ्यमानोऽवलोड्यमानो योऽम्बुधिस्तस्य गर्जो गर्जनं तस्य तर्जना जेतारः । ततोऽप्यधिकगर्जनैरित्यर्थः । अत एव सुरारेस्तारकस्य यो नारीगणः स्त्रीसमूहस्तस्य यो गर्भस्तस्य पातनैः पातनकारिभिः ॥ अतिगर्जनभयादिति भावः । पटहप्रतिस्वनैरानकप्रतिघोषैः कृत्वा गाढं दृढं यथा तथा ररासेव रुरोदेव । उत्प्रेक्षालंकारः । आर्तानां रोदनमेवैकं शरणं भवतीति भावः ॥

क्षुण्णं रथैर्वाजिभिराहतं खुरैः करीन्द्रकर्णैः परितः प्रसारितम् ।
धुतं ध्वजैः काञ्चनशैलजं रजो वातैर्हृतं व्योम समारुहत्क्रमात् १९

क्षुण्णमिति ॥ रथैः स्यन्दनैः क्षुण्णमुत्खातितम् । तथा काञ्चनशैलजं सुमेरुपर्वतजनितम् । इदं विशेषणं पीतत्वद्योतनार्थम् । रजो धूलिः । वाजिभिरश्वैः ॥ कर्तृभिः ॥ खुरैः ॥ करणैः ॥ कृत्वाहतं चूर्णीकृतम् । पिष्टीकृतमपि यावत् । तथा करीन्द्राणां मत्तगजानां कर्णैः श्रवणैः परितः सर्वतः प्रसारितं विस्तृतम् । तथा ध्वजैः धुतं कम्पितम् । एतेन सघनता द्योतिता । तथा वातैः पवनैर्हृतं स्पृष्टम् । एतेन पवनस्योपरि रंहःप्राप्ता साधकतोक्ता । क्रमाद्यथाक्रमं व्योम ॥ कर्म ॥ समारुहत् । आकाशमारूढमित्यर्थः ॥ अत्र रुहेर्भौवादिकत्वाल्लङि गुणप्रसङ्गः, लुङि चाङ्-स्यात्तत्प्रसङ्गः, णिजन्तत्वे लङि पकारश्रवणप्रसङ्ग इत्यतोऽयं प्रयोगोऽशुद्ध इति प्रतिभाति । यद्वा तु व्योम्न्याकाशे सम्यगारोहणमिति समारोहः, इगुपधलक्षणः कः, तत आचारार्थे क्विपि अल्लोपे धातुत्वाल्लङि तिपि अल्लोपस्य स्थानिवत्त्वाद्गुणाभावे च रूपमिति समादध्महे ॥

न केवलं व्योमन्यारूढं किन्तु दिगन्तेष्वपि तथेत्याह—

खातं खुरै रथ्यतुरंगपुंगवैरुत्पत्य काहाटकमेदिनीरजः ।
गतं दिगन्तान्मुखरैः समीरणैः सुविभ्रमं भूरि बभार भूयसा ॥ २०

खातमिति ॥ रथं वहन्ति ते रथ्याः ॥ "तद्वहति रथयुगप्रासङ्गम्" इति यत् । तथोक्ता ये तुरंगपुंगवा अश्वश्रेष्ठास्तैः ॥ कर्तृभिः ॥ खुरैः कृत्वा खातं क्षुण्णम् ।

---

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible]

स्तेषां दण्डैर्नालदण्डैः संकुला व्याप्ताः । अनेकध्वजदण्डवत्य इत्यर्थः । च अन्ति दीप्यमानानि तथा विचित्राणि हरितपीतादिवर्णयुक्तानि च यान्यातपत्रा रणानि च्छत्राणि तैरुज्ज्वलाः । कान्तिमत्य इत्यर्थः । चलन्तो ये घना मेघास्त इ ये स्यन्दना रथास्तेषां घोषेणारवेण भीषणा भयानकाः । तथा करीन्द्राणां मद द्विपानां संबन्धीनि घण्टारवाः, चण्डानि भीषणानि चीत्कृतानि च यासु । चीत्कृतेति शब्दानुकृतिः । तथा स्फुरन्ति सर्वतः प्रसरन्ति विचित्राण्यनेकवर्णान्यायुधसंबन्धि नीनां कान्तीनां द्युतीनां मण्डलानि वलयानि तैः कृत्वोद्द्योतितमुद्भेः शोभितमाशा वलयं दिङ्मण्डलमम्बरान्तरमाकाशमध्यं च याभिः । "अम्बरमवकाशावधि परिधा नान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनावहिरवसरमध्येऽन्तरात्मनि च" इति मेदिनी॥ एवंविधा दिवौकसां देवानां महाचमूर्महतीः सेना अनु पश्चाद्वहन्सन् । ययौ । ज गामेत्यर्थः ॥

कोलाहलेनोच्चलतां दिवौकसां महाचमूनां गुरुभिर्ध्वजव्रजैः ।
घनैर्निरुच्छ्वासमभूदनन्तरं दिङ्मण्डलं व्योमतलं महीतलम् १६

कोलाहलेनेति ॥ उत्कुत्योड्डीय चलताम् । रोषवशादिति भावः । दिवौक सां देवानां कोलाहलेन घोरघोषेण । तथा महाचमूनां गुरुभिर्विशालैर्घनैः सघनैः । पुष्टैरिति यावत् । ध्वजव्रजैर्ध्वजसमूहैश्च कृत्वा निरुच्छ्वासं निरुद्धश्वासं निरोधहेतु कव्याप्तिमद्दिशां मण्डलं व्योमतलं महीतलमनन्तरमनुच्छ्वासमानभेदमभूत् । "एकमे वाद्वितीयं ब्रह्म" इत्यद्वैतवादिनां ब्रह्मणोऽद्वैतत्वप्रतिपादने निदर्शनमभूदिति भावः ॥

सुरारिलक्ष्मीपरिकम्पहेतवो दिक्चक्रवालप्रतिनादमेदुराः ।
नभोन्तकुक्षिंभरयो घनाः स्वना निहन्यमानैः पटहैर्वितेनिरे १७

सुरारीति ॥ निहन्यमानैस्ताड्यमानैः पटहैः ॥ कर्तृभिः ॥ " पटहो ना समार म्भे आनके पुंनपुंसकम्" इति मेदिनी ॥ "आनकः पटहोऽस्त्री स्यात्" इत्यमरश्च ॥ सुरारिलक्ष्म्यास्तारकसंपदः संबन्धिनि परिकम्पे हेतवो निदानम् । दिशां चक्रवाले मण्डले ॥ "चक्रवालं तु मण्डलम्" इत्यमरः ॥ यः प्रतिनादः प्रतिध्वनिस्तेन मेदुराः पुष्टाः । तथा नभोन्तेनाकाशप्रान्तेन । प्रान्तपर्यन्तेनेत्यर्थः । कुक्षिं भरन्ति पिपुर न्ति नभोन्तकुक्षिंभरयः । सर्वं नभो व्याप्नुवन्त इत्यर्थः ॥ "फलेग्रहिरात्मंभरिश्च" इत्यत्र चात्कुक्षेरपि समावेशात्कुक्षिंभरिरिति सिद्धम् ॥ तथा घनाः सान्द्राः स्वनाः शब्दा वितेनिरे । वितस्तारिर इत्यर्थः ॥

---

१ उच्छ्वता. २ ध्वजाग्रैः. ३ अनंतरम्. ४ घनस्वनाः.

प्रमथ्यमानाम्बुधिगर्जितर्जनैः सुरारिनारीगणगर्भपातनैः।
नभश्चमूधूलिकुलैरिवाकुलं ररास गाढं पटहप्रतिस्वनैः॥ १८॥

प्रमथ्यमानेति॥ चमूनां धूलिकुलं रेणुसमूहैः॥ "कुलं जनपदे गोत्रे सजातीयगणेऽपि च" इति मेदिनी॥ आकुलं व्याप्तं पीडितं नभः प्रमथ्यमानोऽवलोड्यमानो योऽम्बुधिस्तस्य गर्जो गर्जनं तस्य तर्जना जेतारः। ततोऽप्यधिकगर्जनैरित्यर्थः। अत एव सुरारेस्तारकस्य यो नारीगणः स्त्रीसमूहस्तस्य यो गर्भस्तस्य पातनैः पातनकारिभिः॥ अतिगर्जनभयादिति भावः। पटहप्रतिस्वनैरानकप्रतिघोषैः कृत्वा गाढं दृढं यथा तथा ररासेव रुरोदेव। उत्प्रेक्षालंकारः। आर्तानां रोदनमेवैकं शरणं भवतीति भावः॥

क्षुण्णं रथैर्वाजिभिराहतं खुरैः करीन्द्रकर्णैः परितः प्रसारितम्।
धुतं ध्वजैः काञ्चनशैलजं रजो वातैर्हृतं व्योम समारुहत्क्रमात्॥ १९॥

क्षुण्णमिति॥ रथैः स्यन्दनैः क्षुण्णमुत्खनितम्। तथा काञ्चनशैलजं सुमेरुपर्वतजनितम्। इदं विशेषणं पीतत्वद्योतनार्थम्। रजो धूलिः। वाजिभिरश्वैः॥ कर्तृभिः॥ खुरैः॥ करणैः॥ कृत्वाहतं चूर्णीकृतम्। पिष्टीकृतमिति यावत्। तथा करीन्द्राणां मत्तगजानां कर्णैः श्रवणैः परितः सर्वतः प्रसारितं विस्तृतम्। तथा ध्वजैर्धुतं कम्पितम्। एतेन सघनता द्योतिता। तथा वातैः पवनैर्हृतं स्पृष्टम्। एतेन पवनस्योपरि रंहःप्राप्तौ साधकतोक्ता। क्रमाद्यथाक्रमं व्योम॥ कर्म॥ समारुहत्। आकाशमारूढमित्यर्थः॥ अत्र रुहेर्भौवादिकत्वाल्लुङि गुणप्रसङ्गः, लुङि शलन्तत्वात्क्सप्रसङ्गः, णिजन्तत्वे लङि पकारश्रवणप्रसङ्ग इत्यतोऽयं प्रयोगश्चिन्त्य इति पद्यः। वयं तु व्योम्न्याकाशे सम्यगारोहतीति समारोहः, इगुपधलक्षणः कः, तत आचारार्थे क्विपि अल्लोपे धातुत्वाल्लङि शपि अल्लोपस्य स्थानिवत्त्वाद्गुणाभावे च रूपसिद्धिरिति समादध्महे॥

न केवलं व्योमन्यारूढं किंतु दिगन्तेष्वपि नयेत्याह—

खातं खुरै रथ्यतुरंगपुंगवैरुपत्यकाहाटकमेदिनीरजः।
गतं दिगन्तान्मुखरैः समीरणैः सुविभ्रमं भूरि बभार भूयसा॥ २०॥

खातमिति॥ रथं वहन्ति ते रथ्याः॥ "तद्वहति रथयुगप्रासङ्गम्" इति यत्। तथोक्ता ये तुरंगपुंगवा अश्वश्रेष्ठास्तैः॥ कर्तृभिः॥ खुरैः कृत्वा खातं क्षुण्णम्।

१ अर्णवगर्जितस्वनैः. २ बतारि. ३ आकुलैः. ४ छिन्नं. ५ धूतं घनैः. ६ प्रकार बभुः समारुरुहः. ७ क्षमाद्. ८ उपत्यकानां कनकप्रकीर्णरजः. ९ मरुद्भिः. १० तदर्थवत्.

उपत्यकाद्रेरासन्ना या हाटकमेदिनी सुवर्णभूमिः ॥ अद्रेः पर्वतस्यासन्नभूमिरिति वा स्वर्थः॥ "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इत्यासन्नार्थे त्यकन्प्रत्ययः ॥ तस्याः संबन्धि । रजः ॥ कर्तृ ॥ भूरि बहलं सुवर्णैः शब्दायमानैः समीरणैः पवनैर्दिगन्तान्दिक्प्रान्तानागतम् । गमितमित्यर्थः ॥ अन्तर्भावितणिजर्थोऽयं धातुः॥ तथापि सत् । भूयसातिशयेन शोभमानं विभ्रमं विलासम् । शोभामिति यावत् । बभार धृतवान् । अत्यन्तं शुशुभ इत्यर्थः ॥ "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः ॥

अधस्तथोर्ध्वं पुरतोऽथ पृष्ठतोऽभितोऽपि चामीकररेणुरुच्चकैः।
चमूषु सर्पन्मरुदाहतोऽहरन्नवीनसूर्यस्य च कान्तिवैभवम् ॥२१॥

अध इति ॥ चमूषु सेनासु मरुता पवनेनाहत उत्पादितः । अत एवाधो नीचैः । तथोर्ध्वमूर्ध्वभागे । तथा पुरतोऽग्रभागे । अथ पृष्ठतः पृष्ठभागे । तथाभितोऽपीतस्ततश्च सर्पन्प्रसरन् । चामीकररेणुः सुवर्णरजः । सुवर्णपर्वतोद्भूतत्वादिति भावः । नवीनसूर्यस्योपस्यसूर्यस्य कान्तिवैभवं द्युतिसंपदमहरत् । ततोऽप्यधिकं शुशुभ इत्यर्थः ॥

बलोद्धृतं काञ्चनभूमिजं रजो बभौ दिगन्तेषु नभःस्थले स्थितम्।
अकालसंध्याघनरागपिङ्गलं घनं घनानामिव वृन्दमुद्यतम्॥२२॥

बलोद्धृतमिति ॥ काञ्चनस्य भूमौ जातं रजो धूलिर्बलोद्धृतं सैन्येनोत्पादितमत एव दिगन्तेषु दिक्प्रान्तेषु तथा नभःस्थल आकाशदेशे स्थितं च सत् । अकाले या संध्या तस्या यो घनः सान्द्रो रागो लौहित्यं तेन पिङ्गलं पिशङ्गम् ॥ "पिशङ्गौ कद्रुपिङ्गलौ" इत्यमरः ॥ तथा घनं सान्द्रमुद्यतमुत्पन्नम् । पर्वतेभ्य इति शेषः । घनानां मेघानां वृन्दं समूह इव । बभौ । अकालसंध्यालिप्तो मेघो यथा भाति तद्वत्सुवर्णभूमिजमपि रजो बभावित्यर्थः ॥ अत्र पूर्णोपमालंकारः । ननु भानाश्रयीभूते रजसि घनवृन्दत्वेनोत्प्रेक्षासंभवात्संभावनैवास्त्विति चेत् । सत्यम् । क्रियाप्राधान्यमते रजःकर्तृकशोभायां घनवृन्दत्वोत्प्रेक्षापत्तेः ॥

हेमावनीषु प्रतिबिम्बमात्मनो मुहुर्विलोक्याभिमुखं महागजाः।
रसातलोत्तीर्णगजभ्रमात्क्रुधा दन्तप्रकाण्डैः प्रहृतानि तेनिरे॥२३॥

मात्मनः प्रतिबिम्बमभिमुखं विलोक्य रसातलात्पातालात् ॥ "अधोभुवनपाताल-र्वालसद्मरसातलम्" इत्यमरः ॥ उत्तीर्णा उत्थिता ये गजास्तेषां भ्रमाद्भ्रान्त्या निमित्तेन । जातयेति शेषः । क्रुधा क्रोधेन ॥ "प्रतिघा रुट्क्रुधौ स्त्रियाँ" इत्यमरः ॥ मुहुरसकृदेवं दन्ता एव प्रकाण्डाः स्तम्भाः ॥ "काण्डं स्तम्बे तरुस्कन्धे वाणेऽवसरनीरयोः" इति मेदिनी ॥ तैस्तत्कर्मकानि प्रहृतानि प्रहारान् ॥ भावे निष्ठा ॥ तेनिरे वितस्तारिरे ॥ कर्तरि लिट् ॥ "अत एकहल्मध्ये नादे:-" इत्येत्वाभ्यासलोपौ ॥ पृथिव्यामात्मप्रतिबिम्बदर्शनेनान्यगजभ्रमवतां गजानां युक्तमेव प्रहारकरणमिति भावः ॥ "नान्यस्य गन्धमपि मानभृतः सहन्ते" इति गन्धस्यापि दुःसहत्वात् । किं पुनः साक्षाद्दर्शनस्य । तद्दर्शनं तद्वति तत्प्रकारकमतद्वति तत्प्रकारकं वा । तत्र तेषां नातीव निग्रहः । मानान्धतायाः प्राधान्यात् ॥

सुजातसिन्दूरपरागपिञ्जरैः कलं चलद्भिः सुरसैन्यसिन्धुरैः ।
शुद्धासु चामीकरशैलभूमिषु नादृश्यत स्वं प्रतिबिम्बमग्रतः॥२४

सुजातेति ॥ सुजातः शोभनो यः सिन्दूरस्य परागो रजस्तेन पिञ्जरैः पीतैः। तथा कलं मन्द्रं यथा तथा चलद्भिर्गच्छद्भिः सुराणां देवानां सैन्यस्य सिन्धुरैर्गजैः ॥ कर्तृभिः ॥ शुद्धासु निर्मलास्वपि चामीकरशैलस्य सुमेरुपर्वतस्य भूमिष्वग्रतः पतितमपि स्वं प्रतिबिम्बं नादृश्यत नालोकि ॥ कर्मणि लङ् ॥ आधाराधेययोरेकवर्णतया पृथग्भागमानलक्षितेति भावः ॥ "सिन्दूरस्तरुभेदे स्यात्सिन्दूरं रक्तचूर्णके" इति मेदिनी ॥

इति क्रमेणामरराजवाहिनी महाहवाम्भोधिविलासलालसा ।
अवातरत्काञ्चनशैलतो द्रुतं कोलाहलाक्रान्तविधूनकन्दरा॥२५॥

इतीति ॥ महानाहवः संग्रामः स एवाम्भोधिः समुद्रस्तत्र यो विलासो लीला । क्रीडेति यावत् ॥ "विलासो हावभेदे स्याल्लीलायामपि पुंस्ययम्" इति मेदिनी ॥ तत्र लालसमतिस्पृहं यस्याः । तथा कोलाहलेन कलकलेन ॥ "कोलाहलः कलकलः" इत्यमरः ॥ आक्रान्ता व्याप्ता अत एव विधूताः कम्पिताः कन्दरा दर्यो यया ॥ "कन्दरस्त्वङ्कुशे दरि गुहायां न नपुंसकम्" इति मेदिनी ॥ एवंभूतामरराजवाहिनीन्द्रसेना ॥ "वाहिनी स्यात्सरिद्भेदे सेनायां [illegible]" इति मेदिनी ॥ इति क्रमेण पूर्वोक्तक्रमेण काञ्चनशैलतः सुमेरोः [illegible] अवातरत् ॥ [illegible] ॥

१ [illegible]

उपत्यकाद्रेरासन्ना या हाटकमेदिनी सुवर्णभूमिः ॥ अद्रेः सौवर्णासन्नभूमिरिति ता त्पर्यार्थः॥ "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इत्यासन्नार्थे त्यकन्प्रत्ययः ॥ तस्याः संबन्धि । रजः ॥ कर्तृ ॥ भूरि बहुलं सुपर्वैः प्रम्लानपर्णैः समीरणैः पवनैर्दिगन्तरान्दिगन्तान्व्याप्तम् । गमितमित्यर्थः ॥ अन्तर्भावितणिजर्थोऽत्र धातुः ॥ तथाच सत् । भूयसातिशयेन शोभमानं विभ्रमं विलासम् । शोभामिति यावत् । ब भार धृतवान् । अत्यन्तं शुशुभ इत्यर्थः ॥ "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः ॥

अधस्तथोर्ध्वं पुरतोऽथ पृष्ठतोऽभितोऽपि चामीकररेणुरुच्चकैः ।
चमूषु सर्पन्मरुदाहतोऽहरन्नवीनसूर्यस्य च कान्तिवैभवम् ॥२१॥

अध इति ॥ चमूषु सेनासु मरुता पवनेनाहत उत्पादितः । अत एवाधो नीचैः । तथोर्ध्वमूर्ध्वभागे । तथा पुरतोऽग्रभागे । अथ पृष्ठतः पृष्ठभागे । तथाभितोऽपीतस्ततश्च सर्पन्प्रसरन् । चामीकररेणुः सुवर्णरजः । सुवर्णपर्वतोद्भूतत्वादिति भावः । नवीनसूर्यस्योपस्पृष्टसूर्यस्य कान्तिवैभवं द्युतिसंपदमहरत् । ततोऽप्यधिकं शुशुभ इत्यर्थः ॥

बलोद्धतं काञ्चनभूमिजं रजो बभौ दिगन्तेषु नभःस्थले स्थितम् ।
अकालसंध्याघनरागपिङ्गलं घनं घनानामिव वृन्दमुद्यतम् ॥२२॥

बलोद्धतमिति ॥ काञ्चनस्य भूमौ जातं रजो धूलिर्बलोद्धतं सैन्येनोत्पातितमत एव दिगन्तेषु दिक्प्रान्तेषु तथा नभःस्थल आकाशदेशे स्थितं च सत् । अकाले या संध्या तस्या यो घनः सान्द्रो रागो लौहित्यं तेन पिङ्गलं पिशङ्गम् ॥ "पिशङ्गौ कद्रुपिङ्गलौ" इत्यमरः ॥ तथा घनं सान्द्रमुद्यतमुत्पन्नम् । पर्वतेभ्य इति शेषः । घनानां मेघानां वृन्दं समूह इव । बभौ । अकालसंध्यालिप्तो मेघो यथा भाति तद्वत्सुवर्णभूमिजमपि रजो बभावित्यर्थः ॥ अत्र पूर्णोपमालंकारः । ननु भानाश्रयीभूते रजसि घनवृन्दत्वेनोत्प्रेक्षासंभवात्संभावनैवास्त्विति चेत् । सत्यम् । क्रियाप्राधान्यमते रजःकर्तृकशोभायां घनवृन्दत्वोत्प्रेक्षापत्तेः ॥

हेमावनीषु प्रतिबिम्बमात्मनो मुहुर्विलोक्याभिमुखं महागजाः ।
रसातलोत्तीर्णगजभ्रमात्क्रुधा दन्तप्रकाण्डप्रहृतानि तेनिरे ॥२३॥

हेमेति ॥ महागजा महान्तो दन्तिनो हेम्नः सुवर्णस्यावनीषु पृथ्वीषु पतित-

१ तत्कालबालातपवैभवं बहु; तत्कालबालारुणवैभवं बहु. २ वातोद्धतम्; बलोद्धतम्. ३ नभस्तले. ४ पिङ्गिमम्. ५ दण्डम्. ६ हैमावनीषु. ७ गजभ्रमेण तो. ८ प्रहृतानि; प्रकृतानि.

समुत्थितेनेति ॥ समुत्थितेन समुदितेनात एवाद्रेः सुमेरोस्तटान्तानां शृङ्गमध्यानाम् ॥ "तटं नपुंसकं क्षेत्रे प्रतीरे तु तटी त्रिषु" इति मेदिनी । "प्रपातस्त्वतटो भृगुः" इत्यमरश्च ॥ दारिणा विदारकेण । अतिघोषेण महान्तः पर्वतभृगवोऽपि विदीर्णा बभूवुरित्यर्थः ॥ अत्र शब्दकर्तृकपर्वततटविदारणस्यायोगेऽपि तद्योगकल्पनात्संबन्धातिशयोक्तिरलंकारः ॥ त्रिदिवौकसां देवानां संबन्धिन्यो या महाचम्वो महत्यः सेनाः ॥ "चमूः सेनाविशेषेऽपि सेनामात्रे च योषिति" इति मेदिनी॥ तासां रवेण ध्वनिना निमित्तेन केसरिणः सिंहाः ॥ कर्तारः ॥ स्वस्य वीर्यं पराक्रम एव लक्ष्मीः शोभा यस्याः । आत्मपराक्रमशालिनीत्यर्थः ॥ तथाभूता । या मृगराजता हरिणाधिपत्यं तस्या वशादायत्तत्वात् ॥ "वशो जनस्पृहायत्तेष्वायतत्वप्रभुत्वयोः" इति मेदिनी ॥ अधिकं बहु मदं गर्वं प्रपेदिरे ॥ कर्तरि लिट् ॥ भयानकोऽपि चमूरवः । प्रत्युत सिंहानामधिकमदकारक एव जात इति भावः ॥

भिया सुरानीकविमर्दजन्मना विदुद्रुवुर्दूरतरं द्रुतं मृगाः ।
गुहागृहान्ताद्बहिरेत्य हेलया तस्थुर्विशङ्कं नितरां मृगाधिपाः २९

भियेति ॥ मृगा हरिणाः ॥ "मृगः पशौ कुरङ्गे च" इति मेदिनी ॥ सुराणां देवानामनीकस्य सैन्यस्य ॥ "अनीकोऽस्त्री रणे सैन्ये" इति मेदिनी ॥ यो विमर्दः प्राणापहारि मर्दनं तज्जन्मना । ततो जनितयेत्यर्थः । भिया भयेन निमित्तेन द्रुतं सत्वरं दूरतरं विदुद्रुवुः । पलायांचक्रिर इत्यर्थः । भयशीलत्वादिति भावः । अथ च मृगाधिपाः सिंहा हेलया क्रीडया । सहर्षमेवेत्यर्थः । गुहागृहस्य गह्वररूपस्य सद्मनोऽन्तान्मध्याद्बहिरेत्य ॥ "अपपरिबहिः" इति समासविधानाज्ज्ञापकात्पञ्चमी ॥ नितरां विशङ्कं निर्भयं यथा तथा तस्थुः ॥

विलोकिताः कौतुकिनामरावतीजनेन जुष्टप्रमदेन दूरतः ।
सुराचलप्रान्तभुवः प्रपेदिरे सुविस्तृतायाः प्रसरं सुसैनिकाः॥३०॥

विलोकिता इति ॥ कौतुकिना । सैनिकदर्शने कौतुकाविष्टेनेत्यर्थः । जुष्टप्रमदेन सेवितकलत्रेण । कलत्रसहितं वर्तमानेनेति फलितोऽर्थः । अमरावतीजनेन सुरेन्द्रनगरीलोकेन दूरतो दूरात् ॥ "दूरान्तिकार्थेभ्यो द्वितीया च" इति पञ्चमी ॥ "पञ्चम्यास्–" इति तसिल् ॥ विलोकिता दृष्टाः सुसैनिकाः शोभनाः सेनास्थलोकाः ॥ कर्तारः ॥ सुतरां विस्तृतायाः सुराचलस्य सुमेरोर्याः प्रान्तभूस्तस्याः प्रसरं प्रदेशं प्रपेदिरे प्रापुः ॥ सुमेरोरवकाशः व्याप्त इति भावः ॥

---

१ अभिमुख. २ लीलया. ३ सिंह-मयुराः. ४ विलोकिता. ५ ज्ञातमदेन; दृष्ट प्रमदेन. ६ -णि. ७ सुविस्तृतायाः. ८ न सैनिकाः.

महाचमूस्यन्दनचण्डचीत्कृतैर्विलोलघण्टेभपतेश्च बृंहितैः ।
सुरेन्द्रशैलेन्द्रमहागुहाशयाः सिंहा महत्स्वप्नसुखं न तत्यजुः ॥२६

महेति ॥ सुरेन्द्रस्येन्द्रस्य शैलेन्द्रे मेरौ या महागुहा महागह्वराणि तासु शेरते स्वपन्ति । गुहासु निद्रां कुर्वन्त इत्यर्थः । तथाभूताः सिंहा मृगेन्द्रा महाचमूषु महतीषु सेनासु ये स्यन्दना रथास्तेषां चण्डैः प्रचण्डैः । तीव्रैरिति यावत् ॥ "चण्डो धनहरी शङ्खपुष्पाख्यित्यतिकोपने । तीव्रेऽपि चूडावडभौ शिखायां बहुभूषणे" इति मेदिनी ॥ चीत्कृतैः शब्दविशेषैः । इयं च शब्दानुकृतिः । तथा विलोलघण्टोऽतिचपलघण्टो य इभपतिर्गजराजस्तस्य ॥ जातावेकवचनम् ॥ बृंहितैर्गर्जितैश्च ॥ "बृंहितं करिगर्जितम्" इत्यमरः ॥ महद्दीर्घं स्वप्ने निद्रायां यत्सुखम् ॥ "सुखं शर्मणि ना नाके" इति मेदिनी ॥ "स्वपो नन्" इति नन्प्रत्ययः ॥ न तत्यजुर्न जहुः ॥ अत्र निद्राप्रतिबन्धाश्रयीभूतबहुविधकोलाहलरूपे सत्यपि निदाने निद्राभङ्गरूपकार्योत्पत्त्यभावाद्विशेषोक्तिरलंकारः । "कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे" इति लक्षणात् ॥ "शयवासवासिष्वकालात्" इति सूत्रे हलदन्तादेवेति नियमाद्गुहाशय इत्यत्र तदभावान्नालुक् ॥

गम्भीरभेरीध्वनितैर्भयंकरैर्महागुहान्तप्रतिनादमेदुरैः ।
महारथानां गुरुनेमिनिःस्वनैरनाकुलैस्तैर्मृगराजताजनि ॥२७॥

गम्भीरेति ॥ महान्तः परिणाहिनो ये गुहान्ता गह्वरमध्यानि तेषु यः प्रतिनादः प्रतिध्वनिस्तेन मेदुरैः पुष्टैः । अत एव भयंकरैर्विभीषकैः ॥ "मेघर्तिभयेषु कृञः" इति खश् ॥ गम्भीराणि मन्द्राणि यानि भेरीध्वनितानि दुन्दुभिशब्दाः ॥ "भेरी स्त्री दुन्दुभिः पुमान्" इत्यमरः ॥ तैः । तथा महारथानां महतां स्यन्दनानां संबन्धिन्यो या गुरुनेमयो महत्यश्चक्रधाराः ॥ "चक्रधारा प्रधिर्नेमिः" इत्यमरः ॥ तासां निःस्वनैः शब्दैश्चापि ॥ निमित्तभूतैरित्यर्थः । अनाकुलैराकुलत्वाभाववद्भिस्तैः सिंहैर्निमित्तैर्मृगराजता मृगाधिपत्यम् । अन्वर्थेति शेषः । सार्थाजनि जाता ॥ राज्ञामयमेव परमो धर्मः प्रतिकर्तुमशक्तैरपि यदरिभ्यो न भेतव्यमिति । तदेभिर्मृगराजत्वधारिभिः कथंचिदपि न भीतम् । अतो युक्तमेषां खलु मृगराज इत्यभिधानमित्यभिप्रायः ॥ अत्रापि विशेषोक्तिरलंकारः ॥

समुत्थितेन त्रिदिवौकसां महाचमूरवेणाद्रितटान्तदारिणा ।
प्रपेदिरे केसरिणोऽधिकं मदं स्ववीर्यलक्ष्मीमृगराजतावशात् २८

१ महाचमूनां कारिचण्ड. २ घण्टाकरिणोपबृंहितैः. ३ महासुखम. ४ मृगेन्द्रान्तः. ५ गुरुनादनिःस्वनैः. ६ भारि हिन. ७ समुच्छ्रितेन. ८ चमरवेण तेन. ९ रवीर्यलक्ष्मी.

महासुराणामवरोधयोषितां कचाक्षिपक्ष्मस्तनमण्डलेषु च।
ध्वजेषु नागेषु रथेषु वाजिषु क्षणेन तस्थौ सुरसैन्यजं रजः॥३४॥

महासुराणामिति ॥ महासुराणां तारकादीनां संबन्धिनीनामवरोधयोषिता-मन्तःपुरस्त्रीणाम् ॥ "शुद्धान्तश्चावरोधश्च" इत्यमरः ॥ संबन्धीनि कचाश्च, अक्षिपक्ष्माणि च, स्तनमण्डलानि च, तस्मिन् ॥ "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति प्राण्यङ्गत्वादेकवद्भावः ॥ तथा ध्वजेषु नागेषु हस्तिषु रथेषु वाजिषु च घनं सान्द्रं सुरसैन्यजं रजो धूलिः क्षणेन तस्थौ। अनेन तेषां शत्रूणामशुभमुक्तमिति ध्वनिः॥

घनैर्विलोक्य स्थगितार्कमण्डलैश्चमूरजोभिर्निचितं नभःस्थलम्।
अयायि हंसैरभि मानसं घनभ्रमेण सानन्दमनर्ति केकिभिः॥३५॥

घनैरिति ॥ घनैः सान्द्रैरत एव स्थगितार्कमण्डलैराच्छादितसूर्यबिम्बैश्चमूर-जोभिः सेनाधूलिभिर्निचितं व्याप्तं नभःस्थलं व्योमदेशं विलोक्य घनभ्रमेण मेघ-भ्रान्त्या हंसैर्मरालैर्मानसं सरोऽभि संमुखमयायि गतम् ॥ भावे लुङ् ॥ तेषां वर्षासमगत्वादिति भावः। अथ च केकिभिर्मयूरैः सानन्दं सहर्षमनर्ति नृत्यम-कारि ॥ अत्रापि भावे लुङ्॥

सान्द्रैः सुरानीकरजोभिरम्बरे नवाम्बुदानीकनिभैरभिश्रिते।
चकासिरे स्वर्णमया महाध्वजाः परिस्फुरन्तस्तडितां गणा इव ३६

सान्द्रैरिति ॥ अम्बरे नभसि ॥ "अम्बरं वाससि व्योम्नि कार्पासे च सुग-न्धके" इति मेदिनी ॥ नवो नूतनः। वार्षिक इति यावत्। योऽम्बुदो मेघस्तस्या-नीकं समूहस्तन्निभैस्तत्सदृशैः ॥ "निभस्तु कथितो व्याजे पुंलिङ्गः सदृशे त्रिषु" इति मेदिनी ॥ तथा सान्द्रैः सघनैः ॥ "सान्द्रं चले वापि घने मृदौ च" इति मे-दिनी ॥ सुराणामनीकस्य सैन्यस्य रजोभी रेणुभिः ॥ "रजो रेणौ परागे स्या-दार्तवे च गुणान्तरे" इति मेदिनी ॥ अभिश्रिते आवृते सति स्वर्णमया हेममया महाध्वजा महान्तो ध्वजाः ॥ "ध्वजः स्याच्छौण्डिके पुमान्। न स्त्रियां तु पताका-यां खट्वाङ्गे मेढ्रचिह्नयोः" इति मेदिनी ॥ परिस्फुरन्तः परितः स्फुरन्तः प्रकाशमा-नास्तडितां विद्युताम् ॥ "तडित्सौदामनी विद्युत्" इत्यमरः ॥ गणाः समूहा इव चकासिरे शुशुभिरे ॥

---

१ घनम्. २ घनैः. ३ नभस्तलम्. ४ अयासि; अयाति. ५ सान्द्रैः. ६ निभाभिनिभैः; निभैः; निभैरभिष्टैः. ७ स्वर्णमयध्वजाः; स्वर्णमया ध्वजवाहाः.

पीतासितारक्तसितैः सुराचलप्रान्तस्थितैर्धातुरजोभिरम्बरम् ।
अयत्नगन्धर्वपुरोदयभ्रमं बभार भूम्नोत्पतितैरितस्ततः ॥ ३१ ॥

पीतासितेति ॥ अम्बरं नभः ॥ कर्तृ ॥ इतस्ततः । सर्वत्रेत्यर्थः । भूम्ना बाहुल्येनोत्पतितैरुद्भूतैरत एव सुराचलस्य सुमेरोः प्रान्तेषु स्थितैः । प्रान्ततं पूर्वंदैशिकमवगन्तव्यम् । तथा पीतानि चासितानि चारक्तानि च सितानि च तैर्धातुरजोभिर्गैरिकादिधूलीभिर्निमित्तेन । अयत्नेन यत्नाभावेन । अनायासेनेति यावत् । यो गन्धर्वपुरस्य देवगायननगरस्योदय उत्पत्तिस्तस्य भ्रमं बभार धृतवत् ॥ अन्तर्भावितणिजर्थः ॥ गन्धर्वपुरस्य ह्यनेकवर्णपरिमण्डलतत्तद्रूपसामान्यधर्मेण नभसो योपमा तन्मूलिका भ्रान्तिः । अत उपमोत्थापितोऽयं भ्रान्तिमानलंकारः । तेनोभयोरङ्गाङ्गिभावेन संकरः ॥

महास्वनः सैन्यविमर्दसंभवः कर्णान्तकूलंकषतामुपेयिवान् ।
पयोनिधेः क्षुब्धतरस्य वर्द्धनो बभूव भूम्ना भुवनोदरंभरिः ॥ ३२ ॥

महास्वन इति ॥ कर्णान्तः श्रवणमध्यं स एव कूलं तटम् ॥ "अथ कूलं तटे सूर्ये सैन्यपृष्ठतडागयोः" इति मेदिनी ॥ तत्कपत्युन्मार्ष्टि तस्य भावस्तत्ताम् ॥ "सर्वकूलाभ्रकरीषेषु कषः" इति खश् । "अरुर्द्विषत्–" इति मुम् ॥ उपेयिवान्प्राप्तवान् । कर्णान्तं स्फोटयन्नित्यर्थः । क्षुब्धतरस्यात्यन्तसंचलितस्य । वेलामतिक्रान्तस्येत्यर्थः । पयोनिधेः समुद्रस्य वर्द्धनः ॥ कर्तरि ल्युट् ॥ तथा भुवनैः कृत्स्नोदरं भरतीति तथोक्तः । आवृतसकलब्रह्माण्डस्थभुवनानां मध्यपाती युक्त इति भावः । एवंभूतः सैन्यविमर्दसंभवः सेनासंघट्टनोत्पन्नो महास्वनो भूम्ना बाहुल्येन युक्तो बभूव । अतिमहत्त्वविशिष्टो जात इत्यर्थः ॥

महागजानां गुरुबृंहितैस्ततैः सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनै रथानां गुरुचण्डचीत्कृतैस्तिरोहितोऽभूत्पटहस्य निःस्वनः ३३

महागजानामिति ॥ महागजानां महतां दन्तिनां संबन्धिभिर्गुरुबृंहितैर्गुरूणि गम्भीराणि यानि बृंहितानि ध्वनितानि तैः । तथा ततैर्विस्तृतैः । तथ घोरतरैरसन्तभयंकरैर्वाजिनां सुहेषितैः शोभनहेषणैः । तथा घनैर्गम्भीरै रथानां संबन्धिभिर्गुरूणि महान्ति चण्डानि भयानकानि च यानि चीत्कृतानि तैश्च पटहस्य निःस्वनो स्वनस्तिरोहितोऽन्तर्हितः । अप्रकाशित इति यावत् । अभूत् ॥

१ पीतासितं रक्तसितम्. २ प्रान्तोत्थितैः. ३ अखर्वं. ४ सुतराम्; नितराम्. ५ रवं.प्रगल्भाहतभेरिसंभवः. ६ मूलंकषताम्. ७ मन्थनः. ८ घनैः; स तैः. ९ स्वनैः.

महासुराणामवरोधयोपितां कचाक्षिपक्ष्मस्तनमण्डलेपु च ।
ध्वजेपु नागेपु रथेपु वाजिपु क्षणेन तस्थौ सुरसैन्यजं रजः॥३४॥

महासुराणामिति ॥ महासुराणां तारकादीनां संवन्धिनीनामवरोधयोपिता-मन्तःपुरस्त्रीणाम् ॥ "शुद्धान्तश्चावरोधश्च" इत्यमरः ॥ संवन्धीनि कचाश्च, अक्षि-पक्ष्माणि च, स्तनमण्डलानि च, तस्मिन् ॥ "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति प्राण्यङ्गत्वादेकवद्भावः ॥ तथा ध्वजेपु नागेपु हस्तिपु रथेपु वाजिपु च घनं सान्द्रं सुरसैन्यजं रजो धूलिः क्षणेन तस्थौ । अनेन तेषां शत्रूणामशुभमुक्तमिति ध्वनिः॥

घनैर्विलोक्य स्थगितार्कमण्डलैश्चमूरजोभिर्निचितं नभःस्थलम् ।
अयायि हंसैरभि मानसं घनभ्रमेण सानन्दमनर्ति केकिभिः॥३५॥

घनैरिति ॥ घनैः सान्द्रैरत एव स्थगितार्कमण्डलैराच्छादितसूर्यबिम्बैश्चमूर-जोभिः सेनाधूलिभिर्निचितं व्याप्तं नभःस्थलं व्योमदेशं विलोक्य घनभ्रमेण मेघ-भ्रान्त्या हंसैर्मरालैर्मानसं सरोऽभि संमुखमयायि गतम् ॥ भावे लुङ् ॥ तेषां वर्षासमयत्वभसादिति भावः । अथ च केकिभिर्मयूरैः सानन्दं सहर्षमनर्ति नृत्यम-कारि ॥ अत्रापि भावे लुङ् ॥

विलोक्य धूलीपटलैर्भृशं भृतं द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्ध्वतोऽधः किमधस्त ऊर्ध्वतो रजोऽभ्युपैतीति जनैरतर्क्यत ३७

विलोक्येति ॥ जनैर्लोकैर्द्यावापृथिव्योर्द्यौश्च पृथिवी च तयोः ॥ "दिवश्च पृथिव्याम्" इत्यत्र चकाराद्द्यावादेशः ॥ महद्विशालमन्तरमवकाशो धूलीपटलै रजोनिचयैर्भृशं बहु यथा तथा भृतं पूर्णं विलोक्य रज ऊर्ध्वतः सकाशादध उपैति । किंवाधस्तः सकाशादूर्ध्वत ऊर्ध्वभागे ॥ सार्वविभक्तिकस्तसिः ॥ अभ्युपैति किमिसलं पर्याप्तमतर्क्यत तर्कितम् ॥ भावे लङ् ॥ सर्वतो रजोव्याप्त्या कुत आगच्छतीति निश्चयाभावादिति भावः ॥

नोर्ध्वं न चाधो न पुरो न पृष्ठतो न पार्श्वतोऽभूत्खलु चक्षुषोर्गतिः ।
सूच्यग्रभेद्यैः पृतनारजश्चयैराच्छादिता प्राणिगणस्य सर्वतः ॥३८॥

नोर्ध्वमिति ॥ सूच्यग्रेण सीवनद्रव्यपुरोभागेन ॥ "सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे" इति मेदिनी ॥ भेद्यैर्भेत्तुं योग्यैः ॥ "ऋहलोः—" इति ण्यत् ॥ अनेनातिसघस्ता द्योतिता । तथाभूतैः पृतनायाः सेनायाः ॥ "पृतना तु स्त्रियां सेनामात्रसेनाविशेषयोः" इति मेदिनी ॥ रजसां चयैः समूहैः ॥ "चयः समूहे प्राकारमूलबन्धे समाहृतौ" इति मेदिनी ॥ सर्वत आच्छादितावृता प्राणिगणस्य जन्तुसमूहस्य चक्षुषोर्नेत्रयोः ॥ "लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी" इत्यमरः ॥ गतिः प्रसरणमूर्ध्वं नाभूत्, अधश्च नाभूत्, पुरो नाभूत्, पृष्ठतो नाभूत्, पार्श्वतोऽप्युभयतो नाभूत् । खलु निश्चयेन ॥

दिगन्तदन्त्यावलिदानहारिभिर्विमानरन्ध्रप्रतिनादमेदुरैः ।
अनेकवाद्यध्वनितैरनारतैर्जगर्ज गाढं गुरुभिर्नभस्तलम् ॥ ३९ ॥

दिगन्तेति ॥ दिगन्तेषु या दन्त्यावलिर्गजपङ्क्तिस्तस्या दानं मदजलं तस्य हारिभिः शोषकैः । घोरध्वनितश्रवणजनितभयवशाद्दिगन्तदन्तिनोऽपि शुष्कमदजला जाता इति भावः । तथा विमानानां देवस्यन्दनानां रन्ध्रेषु जालेषु यः प्रतिनादः प्रतिध्वनिस्तेन मेदुरैः पुष्टैर्गुरुभिर्दीर्घैरनारतैरविद्यमानक्षणिकविरामैरनेकवाद्यानां मृदङ्गादीनां ध्वनितैर्घोषैः कृत्वा नभस्तलम् ॥ कर्तृ ॥ गाढं दृढं जगर्ज । प्रतिननादेत्यर्थः । अन्योऽपि कांस्मश्चित्कर्णकटुरवकारिणि सति तदृशोऽपि प्रतिन-

---

१ अथमत. २ चक्षुषः. ३ सूच्यग्रभिन्नैः. ४ रजोभरैः; रजोभिः. ५ गुनिर्भरत्; गुनिर्भरैः.

इति तद्वत् ॥ समासोक्तिरलंकार— " समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य यत् " इति लक्षणात् ॥

भुवं विगाह्य प्रययौ महाचमूः क्वचिन्न मान्ती महतीं दिवं खलु।
सुसंकुलायामपि तत्र निर्भरात्किं कांदिशीकत्वमवाप नाकुला ४०

भुवमिति ॥ महाचमूर्महती सेना भुवं विगाह्य व्याप्य क्वचिदपि भूमिस्थले न मान्त्यसमाविशन्ती सती महतीं विशालां दिवं स्वर्गं प्रययौ प्राप ॥ खलु निश्चयेन ॥ अथ च निर्भरादधिकात्प्रभाराद्धेतोस्तत्रापि दिव्यपि सुतरां संकुलायां व्याप्तायां सत्यामाकुला व्याकुला सती कांदिशीकत्वं भयद्रुतत्वम् ॥ " कांदिशीको भयद्रुतः " इत्यमरः ॥ किं नावाप । अपि त्ववापैवेत्यर्थः । परस्परपेषणभिया व्याकुलत्वाद्दुद्रुवुरित्यर्थः । अत्र द्रवणं द्रवणेच्छामात्रपरं द्रवणं कर्तुमैच्छदिति तात्पर्यार्थः । अन्यथा व्याप्तेः प्रतिबन्धकत्वेन द्रवणासंभवाद्द्रवणोक्तेरफलत्वापत्तिः ॥

उद्दामदानद्विपवृन्दबृंहितैर्नितान्तमुत्तुङ्गतुरंगहेषितैः ।
चलद्घनस्यन्दननेमिनिस्वनैरभून्निरुच्छ्वासमिवाकुलं जगत् ॥२१

उद्दामेति ॥ उद्दामदाना उत्कटमदा ये द्विपा गजास्तेषां वृन्दस्य समूहस्य बृंहितैः शब्दैः । तथोत्तुङ्गा उन्नता ये तुरंगा अश्वास्तेषां हेषितैर्हेषाभिः । तथा नितान्तमत्यन्तं चलन्तो घना इव स्यन्दना रथास्तेषां या नेमयश्चक्रधारास्तासां निस्वनैश्च नितरामाकुलं व्याकुलं जगन्निरुच्छ्वासमिव निरुद्धश्वासमिवाभूत् ॥ आकुलत्वसाधारणधर्मेण निरुद्धश्वासत्वमुत्प्रेक्षत इत्युत्प्रेक्षालंकारः ॥

महागजानां गुरुभिस्तु गर्जितैर्विलोलघण्टारणितै रणोल्बणैः।
वीरैप्रणादैः प्रमदप्रमेदुरैर्वाचालतामादधिरेतरां दिशः ॥ २२ ॥

महागजानामिति ॥ महागजानां गन्धान्धगजानां गुरुभिर्गर्जितैर्गर्जनैः रणोल्बणैर्विलोला या घण्टास्तासां रणितैश्च प्रमदेनोन्मादेन निमित्तेन प्रमेदुरैः प्रकर्षेण पुष्टैर्वीरप्रणादैर्वीराणां शब्दैश्च दिशः काष्ठाः ॥ कर्त्र्यः ॥ वाचालतां मुखरतामादधिरेतरामतिशयेन धृतवत्यः ॥ तरापि " किमेत्तिङ्–" इत्याम् ॥

---

१ वाः. २ द्विपमददानतः. ३ निर्भरा त्रिदिवीकत्वम्. ४ द्विपबृंहितैः रवैः. ५ चण्डुह. ६ मद. ७ नभः; शर. ८ रणोल्बणैः. ९ वीरनेदैः.

विलोक्य धूलीपटलैर्भृशं भृतं द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्ध्वतोऽधः किमधस्त ऊर्ध्वतो रजोऽभ्युपैतीति जनैरतर्क्यत ३७

विलोक्येति ॥ जनैर्लोकैर्द्यावापृथिव्योर्द्यौश्च पृथिवी च तयोः ॥ "दिवश्च पृथिव्याम्" इत्यत्र चकाराद्द्यावादेशः ॥ महद्विशालमन्तरमवकाशो धूलीपटलै रजोनिचयैर्भृशं बहु यथा तथा भृतं पूर्णं विलोक्य रज ऊर्ध्वतः सकाशादध उपैति । किंवाधस्तः सकाशादूर्ध्वत ऊर्ध्वभागे ॥ सार्वविभक्तिकस्तसिः ॥ अभ्युपैति किमित्यलं पर्याप्तमतर्क्यत तर्कितम् ॥ भावे लङ् ॥ सर्वतो रजोव्याप्त्या कुत आगच्छतीति निश्चयाभावादिति भावः ॥

नोर्ध्वं न चाधो न पुरो न पृष्ठतो न पार्श्वतोऽभूत्खलु चक्षुषोर्गतिः ।
सूच्यग्रभेद्यैः पृतनारजश्चयैराच्छादिता प्राणिगणस्य सर्वतः ॥३८॥

नोर्ध्वमिति ॥ सूच्यग्रेण सीवनद्रव्यपुरोभागेन ॥ "सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे" इति मेदिनी ॥ भेद्यैर्भेत्तुं योग्यैः ॥ "ऋहलोः–" इति ण्यत् ॥ अनेनातिसघनता द्योतिता । तथाभूतैः पृतनायाः सेनायाः ॥ "पृतना तु स्त्रियां सेनामात्रसेनाविशेषयोः" इति मेदिनी ॥ रजसां चयैः समूहैः ॥ "चयः समूहे प्राकारमूलबन्धे समाहृतौ" इति मेदिनी ॥ सर्वत आच्छादिताऽऽवृता प्राणिगणस्य जन्तुसमूहस्य चक्षुषोर्नेत्रयोः ॥ "लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी" इत्यमरः ॥ गतिः प्रसरणमूर्ध्वं नाभूत्, अधश्च नाभूत्, पुरो नाभूत्, पृष्ठतो नाभूत्, पार्श्वतोऽप्युभयतो नाभूत् । खलु निश्चयेन ॥

दिगन्तदन्त्यावलिदानहारिभिर्विमानरन्ध्रप्रतिनादमेदुरैः ।
अनेकवाद्यध्वनितैरनारतैर्जगर्ज गाढं गुरुभिर्नभस्तलम् ॥ ३९ ॥

दिगन्तेति ॥ दिगन्तेषु या दन्त्यावलिर्गजपङ्क्तिस्तस्या दानं मदजलं तस्य हारिभिः शोषकैः । घोरध्वानिश्रवणजनितभयप्रसराद्दिगन्तदन्तिनोऽपि शुष्कमदजला जाता इति भावः । तथा विमानानां देवस्यन्दनानां रन्ध्रेषु गर्तेषु यः प्रतिनादः प्रतिध्वनिस्तेन मेदुरैः पुष्टैर्गुरुभिर्दीर्घैरनारतैर्निरन्तरं [illegible] अनेकवाद्यानां मृदङ्गादीनां ध्वनितैर्ध्वनिभिः कृत्वा नभस्तलम् ॥ कर्तृ ॥ गाढं दृढं जगर्ज । प्रतिनादेत्यर्थः । अन्योऽपि [illegible] गर्जति [illegible] प्रतिनादेत्यर्थः ।

---

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible]

दति तद्वत् ॥ समासोक्तिरलंकार— "समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य यत्" इति लक्षणात् ॥

भुवं विगाह्य प्रययौ महाचमूः क्वचिन्न मान्ती महतीं दिवं खलु।
सुसंकुलायामपि तत्र निर्भरात्किं कांदिशीकत्वमवाप नाकुला १०

भुवमिति ॥ महाचमूर्महती सेना भुवं विगाह्य व्याप्य क्वचिदपि भूमिस्थले न मान्त्यसमाविशन्ती सती महतीं विशालां दिवं स्वर्गं प्रययौ प्राप ॥ खलु निश्चयेन ॥ अथ च निर्भरादधिकात्सभाराद्धेतोस्तत्रापि दिव्यपि सुतरां संकुलायां व्याप्तायां सत्यामाकुला व्याकुला सती कांदिशीकत्वं भयद्रुतत्वम् ॥ "कांदिशीको भयद्रुतः" इत्यमरः ॥ किं नावाप । अपि त्ववापेवेत्यर्थः । परस्परपेषणभिया व्याकुलत्वादुद्द्रुवुरित्यर्थः । अत्र द्रवणं द्रवणेच्छामात्रपरं द्रवणं कर्तुमैच्छदिति तात्पर्यार्थः । अन्यथा व्याप्तेः प्रतिबन्धकत्वेन द्रवणासंभवाद्द्रवणोक्तेरफलत्वापत्तिः ॥

दन्तीन्द्रदानद्रववारिवीचिभिः सद्योऽपि नद्यो बहुधा पुपूरिरे।
धरा रजोभिस्तुरगैः क्षतैर्भृता याः पङ्कतामेत्य रथैः स्थलीकृताः॥१३

दन्तीन्द्रेति ॥ दन्तीन्द्राणां गजेन्द्राणां ये दानद्रवा , मदस्रुतयस्तेषां वारीणि जलानि तेषां वीचिभिस्तरङ्गैः॥ कर्तृभिः ॥ नद्यो वाहिन्योऽपि सद्यो बहुधा पुपूरिरे पूरिताः ॥ कर्मणि लिट् ॥ ग्रीष्मसंतापेन शुष्का अपि नद्यो जलपूर्णा आसन्नित्यर्थः । अथ या नद्यस्तुरगैः क्षतैः क्षुण्णै रजोभिर्भृताः पूर्णा अतएव पङ्कतां कर्दमतामेत्य स्थिताः। ता रथैः ॥ कर्तृभिः ॥ धाराश्चक्रधारा भ्रामयित्वा स्थलीकृताः॥

निम्नाः प्रदेशाः स्थलतामुपागमन्निम्नत्वमुच्चैरपि सर्वतश्च ते ।
तुरंगमाणां व्रजतां खुरैः क्षता रथैर्गजेन्द्रैः परितः समीकृताः॥१४

निम्ना इति ॥ निम्ना नीचाः प्रदेशा भूमयः स्थलतां समानभूमित्वमुपागमन्प्रापुः । सर्वत उच्चैरप्युन्नता अपि ते प्रदेशा निम्नत्वमुपागमन् । निम्नमुच्चैरभवत्, अन्यप्रदेशोत्थापितधूलिपूरितत्वात् । उच्चैर्निम्नमभवत्, आत्मधूलीनामन्यत्र पतितत्वादिति भावः । अथ च ते प्रदेशा व्रजतां गच्छतां तुरंगमाणां खुरैः क्षताश्चुक्षुदिरे। अत एव रथैर्गजेन्द्रैश्च परितो निम्नोन्नतेषु समीकृताः । समार्थाकृता इत्यर्थः॥

नभोदिगन्तप्रतिघोषभीषणैर्महामहीभृत्तटदारणोल्बणैः ।
पयोधिनिर्धूननकेलिभिर्जगद्बभूव भेरीध्वनितैः समाकुलम्॥१५॥

नभ इति ॥ नभसि व्योम्नि दिगन्तेषु च यः प्रतिघोषः प्रतिध्वनिस्तेन भीषणैर्भयानकैः । महान्ति यानि महीभृतां पर्वतानां तटानि भृगवस्तेषां दारणे भेदन उल्बणैरुग्रैः । समर्थैरिति यावत् । तथा पयोधेः समुद्रस्य निर्धूननं कम्पनं केलिः क्रीडा येषाम् । पयोधिमपि कम्पयद्भिरित्यर्थः । भेरीध्वनितैर्वेदनैर्वाद्यमानभेरी[illegible] [illegible] जगत्समाकुलं व्याकुलं बभूव ॥

इतस्ततो वातविधूतचञ्चलैर्निरन्धिताशागमनैर्ध्वजांशुकैः ।
[illegible] धूलीजलधौ नभोगते॥१६

इत इति ॥ [illegible]

[illegible]

कपर्धैरित्यर्थः । क्वणद्रणत्काञ्चनकिङ्किणीनां सौवर्णनूपुराणां कुलं जालं येषां मान्तभागेषु । शोभार्थं प्रतिबद्धनूपुरजालैरित्यर्थः । लक्षैर्लक्षसंख्यैः ॥ "लक्षं शरव्ये संख्यायाम्" इति मेदिनी ॥ ध्वजांशुकैर्ध्वजपटैः ॥ "अंशुकं शुक्लवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः" इति मेदिनी ॥ नभसि गते मरुते धूलीजलधौ रजोऽम्बुधावमज्जि मज्जितम् ॥ भावे लुङ् ॥ सर्वाणि ध्वजांशुकानि धूलीभिरलक्षितानि बभूवुरित्यर्थः ॥

घण्टारवै रौद्रतरैर्निरन्तरं विसृत्वरैर्गर्जरवैः सुभैरवैः ।
मत्तद्विपानां प्रथयांबभूविरे न वाहिनीनां पटहस्य निःस्वनाः ॥४७

घण्टारवैरिति ॥ मत्तद्विपानां संबन्धिभिर्निरन्तरं विसृत्वरैः प्रसृमरैः सुतरां भैरवैर्भीषणैः ॥ "भैरवः पुंसि शम्बरे । भीषणेऽपि च" इति मेदिनी ॥ गर्जरवैर्गर्जनारूपघोषैः । रौद्रतरैरत्युग्रैः ॥ "रौद्रं तूग्रममी त्रिषु" इत्यमरः ॥ घण्टारवैश्च । वाहिनीनां सेनानां संबन्धिनः पटहस्यानकाख्यवाद्यविशेषस्य निःस्वना शब्दा न प्रथयांबभूविरे न प्रकटीचक्रिरे ॥

करालवाचालमुखाश्चमूस्वनैर्ध्वस्ताम्बरा वीक्ष्य दिशो रजस्वलाः ।
तिरोबभूवे गहनैर्दिनेश्वरो रजोन्धकारैः परितः कुतोऽप्यसौ ॥४८

करालेति ॥ चमूस्वनैः सेनाघोषैः करालानि वाचालानि च मुखानि प्रारम्भाः ॥ "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति मेदिनी ॥ तथा ध्वस्तं रजोव्याप्तमम्बरं यासाम् । तथा रजस्वला रजोयुक्ता दिशो वीक्ष्य परितो गहनैः सघनैः रजोन्धकारैः ॥ कर्तृभिः ॥ असौ दिनेश्वरः सूर्यः कुतोऽपि कुत्रापि तिरोबभूवे तिरोगमितः । अन्तर्हित इत्यर्थः ॥ "भूङ् गतौ" इत्यतो लिट् । "भू प्राप्तौ" इत्यतो वा ॥ वीक्ष्येवेति गम्योत्प्रेक्षा ॥ अथ द्वितीयपक्षे—रजस्वला आर्तववतीः । अतएव कराला भीषणा वाचां वाणीप्रक्रान्त्यग्रघ्नन्ति मुखानि यासाम् ॥ ततो विशेषणसमासः ॥ मौनव्रतधारिणीरित्यर्थः । तथा ध्वस्ताम्बराः स्रस्तशाटिकाः । नग्ना इत्यर्थः । एवंभूता चमूर्योषितः ॥ "चमूः सेनाविशेषे च सेनामात्रे च योषिति" इति मेदिनी ॥ वीक्ष्य रजस्यार्तवविषयेऽन्धकारोऽन्धवत्कारः कृतिः । क्रिया इति यावत् ॥ भावे घञ् ॥ आर्तवमपश्यद्भिरित्यर्थः । रजस्वलादर्शननिषेधात् । गहनैर्गहनमनोभिः । सद्भिरित्यर्थः । दिनेश्वरः कश्चित्पुरुषः कुतोऽपि कुत्रापि तिरोभूयते । कश्चिदुत्तमपुरुषो रजस्वलां पश्यन्नपि सद्भिः करुणया पटादिभिस्तिरोधीयते तद्वदित्यर्थः ॥

---

१ निरन्तरैः. २ कराल्लितानान्. ३ मुखे; रैः. ४ चमूरैः. ५ ध्वस्ताम्बराः; स्रस्ता यान्. ६ गहनैः; गहनैः.

दन्तीन्द्रदानद्रववारिवीचिभिः सद्योऽपि नद्यो बहुधा पुपूरिरे।
धारा रजोभिस्तुरगैः क्षतैर्भृता याः पङ्कतामेत्य रथैः स्थलीकृताः१

दन्तीन्द्रेति ॥ दन्तीन्द्राणां गजेन्द्राणां ये दानद्रवा, मदस्रुतयस्तेषां वारीणि जलानि तेषां वीचिभिस्तरङ्गैः ॥ कर्तृभिः ॥ नद्यो वाहिन्योऽपि सद्यो बहुधा पुपूरिरे पूरिताः ॥ कर्मणि लिट् ॥ ग्रीष्मसंतापेन शुष्का अपि नद्यो जलपूर्णा आसन्नित्यर्थः । अथ या नद्यस्तुरगैः क्षतैः क्षुण्णै रजोभिर्भृताः पूर्णा अतएव पङ्कतां कर्दमतामेत्य स्थिताः। ता रथैः ॥ कर्तृभिः ॥ धाराश्चक्रधारा भ्रामयित्वा स्थलीकृताः ॥

निम्नाः प्रदेशाः स्थलतामुपागमन्निम्नत्वमुच्चैरपि सर्वतश्च ते ।
तुरंगमाणां व्रजतां खुरैः क्षता रथैर्गजेन्द्रैः परितः समीकृताः॥१४

निम्ना इति ॥ निम्ना नीचाः प्रदेशा भूमयः स्थलतां समानभूमित्वमुपागमन्नापुः । सर्वत उच्चैरप्युन्नता अपि ते प्रदेशा निम्नत्वमुपागमन् । निम्नमुच्चैरभवत्, अन्यप्रदेशोत्थापितधूलिपूरितत्वात् । उच्चैर्निम्नमभवत्, आत्मधूलीनामन्यत्र पतितत्वादिति भावः । अथ च ते प्रदेशा व्रजतां गच्छतां तुरंगमाणां खुरैः क्षताः क्षुदिरे। अत एव रथैर्गजेन्द्रैश्च परितो निम्नोन्नतेषु समीकृताः । समाश्चक्रिर इत्यर्थः॥

नभोदिगन्तप्रतिघोषभीषणैर्महामहीभृत्तटदारणोल्बणैः ।
पयोधिनिर्धूननकेलिभिर्जगद्बभूव भेरीध्वनितैः समाकुलम्॥१५॥

नभ इति ॥ नभसि व्योम्नि दिगन्तेषु च यः प्रतिघोषः प्रतिध्वनिस्तेन भीषणैर्भयानकैः । महान्ति यानि महीभृतां पर्वतानां तटानि भृगवस्तेषां दारणे भेदन उल्बणैरुद्भटैः । समर्थैरिति यावत् । तथा पयोधेः समुद्रस्य निर्धूनने कम्पने केलिः [illegible] येषाम् । पयोधिमपि कम्पयद्भिरित्यर्थः । भेरीध्वनितैर्बहुलकवाद्यमानवाद्य[illegible] [illegible]परवर्तिनामर्तर्नेर्जगत्समाकुलं व्याकुलं बभूव ॥

ततस्ततो वातविधूतचञ्चलैर्निरन्ध्रिताशागमनैर्ध्वजांशुकैः ।
[illegible]दैः क्वणत्काञ्चनकिङ्किणीकुलैरमज्जि धूलीजलधौ नभोगते॥१६

[illegible] इति ॥ ततस्ततो वातविधूतानि पवनकम्पितान्यत एव चञ्चलानि च तैः। [illegible]निरन्ध्रितं निरवकाशीकृतमाशासु दिक्षु गमनं यैः । आत्मव्याप्त्या रुद्धपथ·

[illegible]

[illegible]

[illegible]

[illegible]

कपर्थैरित्यर्थः। क्वणद्रणत्काञ्चनकिङ्किणीनां सौवर्णनूपुराणां कुलं जालं येषां मान्तभागेषु। शोभार्थं प्रतिबद्धनूपुरजालैरित्यर्थः। लक्षैर्लक्षसंख्यैः॥ "लक्षं शरव्ये संख्यायाम्" इति मेदिनी॥ ध्वजांशुकैर्ध्वजपटैः॥ "अंशुकं शुक्लवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः" इति मेदिनी॥ नभसि गते प्रसृते धूलीजलधौ रजोऽम्बुधावमज्जि मज्जितम्॥ भावे लुङ्॥ सर्वाणि ध्वजांशुकानि धूलीभिरलक्षितानि बभूवुरित्यर्थः॥

घण्टारवै रौद्रतरैर्निरन्तरं विसृत्वरैर्गर्जरवैः सुभैरवैः।
मत्तद्विपानां प्रथयांबभूविरे न वाहिनीनां पटहस्य निःस्वनाः॥४७

घण्टारवैरिति॥ मत्तद्विपानां संबन्धिभिर्निरन्तरं विसृत्वरैः प्रसमरैः सुतरां भैरवैर्भीषणैः॥ "भैरवः पुंसि शम्बरे। भीषणेऽपि च" इति मेदिनी॥ गर्जरवैर्गर्जनाख्यघोषैः। रौद्रतरैरत्युग्रैः॥ "रौद्रं तूग्रममी त्रिषु" इत्यमरः॥ घण्टारवैश्च। वाहिनीनां सेनानां संबन्धिनः पटहस्यानकाख्यवाद्यविशेषस्य निःस्वना शब्दा न प्रथयांबभूविरे न प्रकटीचक्रिरे॥

करालवाचालमुखाश्चमूस्वनैर्ध्वस्ताम्बरा वीक्ष्य दिशो रजस्वलाः।
तिरोबभूवे गहनैर्दिनेश्वरो रजोन्धकारैः परितः कुतोऽप्यसौ॥४८

करालेति॥ चमूस्वनैः सेनाघोषैः करालानि वाचालानि च मुखानि प्रारम्भाः॥ "मुखं निःसरणे वक्त्रे प्रारम्भोपायपोरपि" इति मेदिनी॥ तथा ध्वस्तं रजोव्याप्तमम्बरं यासाम्। तथा रजस्वला रजोयुक्ता दिशो वीक्ष्य परितो गहनैः सघनै रजोन्धकारैः॥ कर्तृभिः॥ असौ दिनेश्वरः सूर्यः कुतोऽपि कुत्रापि तिरोबभूवे तिरोगमितः। अन्तर्हित इत्यर्थः॥ "भू गतौ" इत्यतो लिट्। "भू प्राप्तौ" इत्यतो वा॥ वीक्ष्येवेति गम्योत्प्रेक्षा॥ अथ द्वितीयपक्षे—रजस्वला आर्तववतीः। अतएव कराला भीषणा वाचा वाणीमत्यन्तस्पृशन्ति मुखानि यासाम्॥ नञो विशेषणसमासः॥ मौनव्रतधारिणीरित्यर्थः। तथा ध्वस्ताम्बराः सस्तशाटिकाः। नग्ना इत्यर्थः। एवंभूता चमूर्योषितः॥ "चमूः सेनाविशेषे च सेनामात्रे च योषिति" इति मेदिनी॥ वीक्ष्य रजस्यार्तवविषयेऽन्धकारोऽन्धत्वकारः कृतिः। क्रिया इति यावत्॥ भावे घञ्॥ आर्तवमपश्यद्भिरित्यर्थः। रजसस्तद्दर्शननिषेधात्। गहनैर्गहनमनोभिः। सद्भिरित्यर्थः। दिनेश्वरः कश्चित्पुरुषः कुतोऽपि कुत्रापि निरोधूयते। कश्चिदमन्दपुरुषो रजस्त्वां पश्यन्नपि सद्भिः करुणया पर्यादाभिस्तिरोधीयते तद्वदित्यर्थः॥

१ निरन्तरैः. २ मदान्धानाम्. ३ मुखैः; रवैः. ४ चमूरवैः. ५ ध्वस्ताम्बराः; स्रस्ता यथा. ६ दन्तैः; गहनैः.

दन्तीन्द्रदानद्रववारिवीचिभिः सद्योऽपि नद्यो बहुधा पुपूरिरे।
धारा रजोभिस्तुरगैः क्षतैर्भृता याः पङ्कतामेत्य रथैः स्थलीकृताः॥१३॥

दन्तीन्द्रेति॥ दन्तीन्द्राणां गजेन्द्राणां ये दानद्रवा मदस्रुतयस्तेषां वारीणि जलानि तेषां वीचिभिस्तरङ्गैः॥ कर्तृभिः॥ नद्यो वाहिन्योऽपि सद्यो बहुधा पुपूरिरे पूरिताः॥ कर्मणि लिट्॥ ग्रीष्मसंतापेन शुष्का अपि नद्यो जलपूर्णा आसन्नित्यर्थः। अथ या नद्यस्तुरगैः क्षतैः क्षुण्णै रजोभिर्भृताः पूर्णा अतएव पङ्कतां कर्दमतामेत्य स्थिताः। ता रथैः॥ कर्तृभिः॥ धाराश्चक्रधारा भ्रामयित्वा स्थलीकृताः॥

निम्नाः प्रदेशाः स्थलतामुपागमन्निम्नत्वमुच्चैरपि सर्वतश्च ते।
तुरंगमाणां व्रजतां खुरैः क्षता रथैर्गजेन्द्रैः परितः समीकृताः॥१४॥

निम्ना इति॥ निम्ना नीचाः प्रदेशा भूमयः स्थलतां समानभूमितामुपागमन्नापुः। एवं उच्चैरप्युन्नता अपि ते प्रदेशा निम्नत्वमुपागमन्। निम्नमुपरभरणात् अन्यप्रदेशोत्थापितधूलिपूरितत्वात्। उच्चैर्निम्नमभवत्, आत्मधूलीनामन्यत्र पातनादिति भावः। अथ च ते प्रदेशा व्रजतां गच्छतां तुरंगमाणां खुरैः क्षताः क्षुण्णाः सन्तः। अत एव रथैर्गजेन्द्रैश्च परितो निम्नोन्नतेषु समीकृताः। समा अभवन् इत्यर्थः॥

नभोदिगन्तप्रतियोग्य[illegible]रणैर्महामही[illegible]रणोत्थणैः।

पञ्चदशः सर्गः ।

सेनापतिं नन्दनमन्धकद्विषो युधे पुरस्कृत्य वलस्य शात्रवः ।
सैन्यैरुपैतीति सुरद्विषां पुरोऽभूत्किंवदन्ती हृदयप्रकम्पिनी ॥१॥

सेनापतिमिति ॥ वलस्य वलनामकराक्षसस्य शात्रवः । शत्रुरेव शात्रवः ॥ प्रज्ञादित्वात्स्वार्थेऽण् ॥ इन्द्रः । सेनापतिं पृतनाधिपम् । अन्धकद्विषो हरस्य नन्दनं पुत्रं कार्त्तिकेयं पुरस्कृत्याग्रे कृत्वा सैन्यैः सह युधे युद्धाय । युद्धं कर्तुमिति यावत् ॥ "क्रियार्थ–" इत्यादिना चतुर्थी ॥ उपैत्यायाति । इत्येवंभूता हृदयप्रकम्पिनी हृदयं वेपयन्ती किंवदन्ती जनश्रुतिः ॥ "किंवदन्ती जनश्रुतिः" इत्यमरः ॥ सुरद्विषां दैत्यानां तारकनगरनिवासिनां पुरोऽग्रेऽभूत् ॥ सर्गेऽस्मिन्निन्द्रवंशोपजातिवृत्ते ॥

चमूप्रभुं मन्मथमर्दनात्मजं विजित्वरीभिर्विजयश्रिया श्रितम् ।
श्रुत्वा सुराणां पृतनाभिरागतं चित्ते चिरं चुक्षुभिरे महासुराः ॥२॥

चमूप्रभुमिति ॥ महासुरास्तारकनगरनिवासिनो दैत्या विजयश्रिया विजयलक्ष्म्या श्रितं सेवितम् । एतेनास्य कादाचित्कोऽपि पराभवो न भवतीति ध्वनितम् । अतएव चमूप्रभुं सेनाधिपं मन्मथमर्दनस्य शिवस्यात्मजम् ॥ अनेन यदीयः पिता सकलभुवनजेतुर्मकरध्वजस्यापि शासिता, अतोऽस्य किं वक्तव्यम् । "कार्यं निदानाद्धि गुणानधीते", "प्रवर्तितो दीप इव प्रदीपात्" इत्यादिन्यायेन तारकेणाप्ययं दुर्जय इति ध्वनितम् ॥ तं कार्त्तिकेयं विजित्वरीभिर्जयशीलाभिः । जयतेः "इण्नशजिसर्तिभ्यः क्वरप्" इति क्वरपि परे "ह्रस्वस्य पिति" इति तुकि कृते "टिड्ढा–" इत्यनेन ङीप् ॥ सुराणां देवानां पृतनाभिः सेनाभिः सहागतमायातं श्रुत्वा चिरं बहुकालपर्यन्तं चित्ते मनसि चुक्षुभिरे संचेलुः । विस्मृतिरित्यर्थः ॥ "क्षुभ संचलने"। कर्तरि लिट् ॥ अत्र वाच्यापेक्षया व्यङ्ग्यार्थस्याधिकचमत्कृतिजनकत्वाद्ध्वनिः ॥

समेत्य दैत्याधिपतेः पुरे स्थिताः किरीटबद्धाञ्जलयः प्रणम्य ते ।
न्यवेदयन्मन्मथशत्रुसूनुना युयुत्सुना जम्भजितं सहागतम् ॥३॥

समेत्येति ॥ दैत्याधिपतेस्तारकस्य पुरे नगरे स्थितास्ते महासुराः समेत्य

१ युधे. २ हृदयप्र कम्पनी. [illegible]

आक्रान्तपूर्वा रभसेन सैनिकैर्दिगङ्गना व्योम रजोभिदूषिता ।
भेरीरवाणां प्रतिशब्दितैर्घनैर्जगर्ज गाढं घनमत्सरादिव ॥ ४९ ॥

आक्रान्तपूर्वेति ॥ सैनिकैः सेनाजनै रभसेन वेगेनाक्रान्तपूर्वा पूर्वमाक्रान्ता दिगङ्गना दिग्रूपा नायिका रजसा धूल्या । आर्तवेन च ॥ "रजो रेणौ परागे स्त्रीदार्तवे च गुणान्तरे" इति मेदिनी ॥ अभिदूषिता कृता । वीक्ष्येति शेषः । अतो घनमत्सरादिव गाढद्वेषादिव व्योम ॥ कर्तृ ॥ भेरीरवाणां घनैः प्रतिशब्दितैः कृत्वा गाढं जगर्ज । अन्योऽप्यात्मपत्नीमन्यसंगमेन रजोयुक्तां वीक्ष्य गर्जति ॥

गुरुसमीरसमीरितभूधरा इव गजा गगनं विजगाहिरे ।
गुरुतरा इव वारिधरा रथा भुवमितीह विवर्त इवाभवत् ॥५०॥

गुरुसमीरेति ॥ गुरुणा महता समीरेण वातेन समीरिता उपरि क्षिप्ता भूधराः पर्वता इवेत्युत्प्रेक्षा । गजा गगनं विजगाहिरे । अवगाहितवन्त इत्यर्थः । गुरुतरा अपि महान्तो वारिधरा मेघा इवेत्युत्प्रेक्षा । रथा भुवं विजगाहिरे । इह गहर इत्येवं विवर्त इव व्यत्यय इवाभवत् । गगनपृथिव्यवगाहने स्यन्दननागयोर्भूधरसंभवात् । उत्प्रेक्षितं च तत्सादृश्यदर्शनात् ॥ द्रुतविलम्बितं वृत्तम् ॥

चलवदनुगलोकानल्पकल्पान्तकाले
निरवधय इवाम्भोराशयो घोरघोषाः ।
गुरुतरपरिमलाद्भूतो देवसेना
वसुधुरपि सुपूर्णा व्योमभूम्यन्तराले ॥ ५१ ॥

चलवदिति ॥ [illegible] सुराणां [illegible] ॥ [illegible] पूर्णा अपि । [illegible] ॥ [illegible] ॥

पञ्चदशः सर्गः ।

सेनापतिं नन्दनमन्धकद्विपो युधे पुरस्कृत्य बलस्य शात्रवः ।
सैन्यैरुपैतीति सुरद्विपां पुरोऽभूत्किंवदन्ती हृदयप्रकम्पिनी ॥१॥

सेनापतिमिति ॥ बलस्य बलनामकराक्षसस्य शात्रवः । शत्रुरेव शात्रवः ॥ प्रज्ञादित्वात्स्वार्थेऽण् ॥ इन्द्रः । सेनापतिं पृतनाधिपम् । अन्धकद्विपो हरस्य नन्दनं पुत्रं कार्तिकेयं पुरस्कृत्याग्रे कृत्वा सैन्यैः सह युधे युद्धाय । युद्धं कर्तुमिति यावत् ॥ "क्रियार्थ–" इत्यादिना चतुर्थी ॥ उपैत्यायाति । इत्येवंभूता हृदयप्रकम्पिनी हृदयं वेपयन्ती किंवदन्ती जनश्रुतिः ॥ "किंवदन्ती जनश्रुतिः" इत्यमरः ॥ सुरद्विपां दैत्यानां तारकनगरनिवासिनां पुरोऽग्रेऽभूत् ॥ सर्गेऽस्मिन्निन्द्रवंशोपजातिवृत्तं ॥

चमूप्रभुं मन्मथमर्दनात्मजं विजित्वरीभिर्विजयश्रिया श्रितम् ।
श्रुत्वा सुराणां पृतनाभिरागतं चित्ते चिरं चुक्षुभिरे महासुराः॥२॥

चमूप्रभुमिति ॥ महासुरास्तारकनगरनिवासिनो दैत्या विजयश्रिया विजयलक्ष्म्या श्रितं सेवितम् । एतेनास्य कादाचित्कोऽपि पराभवो न भवतीति ध्वनितम् । अतएव चमूप्रभुं सेनाधिपं मन्मथमर्दनस्य शिवस्यात्मजम् ॥ अनेन यदीयः पिता सकलभुवनजेतुर्मकरध्वजस्यापि शास्ता, अतोऽस्य किं वक्तव्यम् । "कार्यं निदानाद्धि गुणानधीते", "प्रवर्तितो दीप इव प्रदीपात्" इत्यादिन्यायेन तारकेणाप्ययं दुर्जय इति ध्वनितम् ॥ तं कार्तिकेयं विजित्वरीभिर्जयशीलाभिः । जयतेः "इण्नशजिसर्तिभ्यः क्वरप्" इति क्वरपि परे "ह्रस्वस्य पिति" इति तुकि कृते "टिड्ढा–" इत्यनेन ङीप् ॥ सुराणां देवानां पृतनाभिः सेनाभिः सहागतमायातं श्रुत्वा चिरं बहुकालपर्यन्तं चित्ते मनसि चुक्षुभिरे संचेलुः । विभ्युरित्यर्थः ॥ "क्षुभ संचलने" । कर्तरि लिट् ॥ अत्र वाच्यापेक्षया व्यङ्ग्यार्थस्याधिकचमत्कृतिजनकत्वाद्ध्वनिः ॥

समुदित्य । संघीभूयेति यावत् । तथा किरीटेषु मुकुटेषु बद्धोऽञ्जलिर्यैस्तथा सन्तः प्रणम्य युयुत्सुना योद्धुमिच्छुना मन्मथशत्रोः शिवस्य सूनुना पुत्रेण कुमारेण सहागतं जम्भजितमिन्द्रं न्यवेदयन् । स शंभुपुत्रो महेन्द्र आगत इति निवेदितवन्त इत्यर्थः ॥

दासीकृताशेषजगत्त्रयं न मां जिगाय युद्धे कतिशः शचीपतिः।
गिरीशपुत्रस्य बलेन सांप्रतं ध्रुवं विजेतेति स काकुतोऽहसत् ॥४॥

दासीकृतेति ॥ दासीकृतं भृत्यीकृतम् ॥ "दासो भृत्ये च शूद्रे च" इति मेदिनी ॥ अशेषजगत्त्रयं समस्तलोकत्रितयं येन तथाभूतं मां शचीपतिरिन्द्रः कतिशः कतिवारं युद्धे न जिगाय जयति स्म । अपि त्वनेकवारं जिगायेति काकुः । जयनिषेधस्य काकाश्रितत्वाज्जयनिषेध एव ध्वन्यते । सांप्रतं वर्तमानकाले गिरीशपुत्रस्य कुमारस्य बलेन वीर्येण । तदाश्रयेणेत्यर्थः । ध्रुवं निश्चयेन विजेता विजेष्यते । इति स तारकः काकुतः काकाहसज्जहास । कदाचिदपि न विजेष्यत इति ध्वन्यते ॥

ततः क्रुधा विस्फुरितोंधराधरः स तारको दर्पितदोर्बलोद्धतान् ।
युधे त्रिलोकीजयकेलिलालसः सेनापतीन्संनहनार्थमादिशत् ॥५

तत इति ॥ ततोऽनन्तरं क्रुधा क्रोधेन निमित्तेन विस्फुरित उच्छ्वसितोऽधरोऽनूर्द्ध्व ओष्ठो यस्य । प्रसिद्धं चैतत्क्रोधवशादधरविस्फुरणम् । तथाधरो हीनः। नीच इति यावत् ॥ "अधरस्तु पुमानोष्ठे हीनेऽनूर्द्ध्वे च वाच्यवत्" इति मेदिनी ॥ विस्फुरिताधरश्चासावधरश्चेति विशेषणसमासः ॥ तथा त्रिलोक्या जय एव केलिः क्रीडा तस्यां लालसेच्छा यस्य। अनायासेनैव त्रिलोकीं जेष्यामीत्यभिमानवानित्यर्थः । एवंभूतः स तारकोऽसुरो दर्पिताः संजातदर्पास्तथा दोर्बलेन भुजबलेनोद्धतान्प्रगल्भान्सेनापतीन्सेनाधिपान्युधे युद्धाय । युद्धं कर्तुमित्यर्थः । संनहनार्थं संनद्धीभवनार्थं चादिशदाज्ञप्तवान् ॥ "युद्धे" इति पाठे युद्धे विषये त्रिलोकीजयकेलिलालस इत्यन्वयः कर्तव्यः ॥

महाचमूनामधिपाः समन्ततः संनह्य सद्यः सुतरामुदायुधाः ।
तस्थुर्घनध्वानिनिपातसंकुले तदङ्गनद्वारवरप्रकोष्ठके ॥ ६ ॥

महेति ॥ उदायुधा उद्गतान्यायुधानि शस्त्राणि येषां ते एवंभूता महाचमूनां महतीनां

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ युद्धे [illegible]
[illegible]

सेनानामधिपाः स्वामिनः सद्यस्त्वरितं सुतरां संनह्य संनद्धा भूत्वा विनम्रा ये क्षितिपाला राजानस्तैः संकुले व्याप्ते तस्य तारकस्य यदङ्गनद्वारं चत्वरप्रवेशद्वारं तस्य वरः श्रेष्ठो यः प्रकोष्ठकोऽन्तरम् । मध्यमिति यावत् ॥ "प्रकोष्ठो मणिबन्धे स्यात्कूर्परस्यान्तरेऽपि च । भूपकक्षान्तरेऽपि स्यात्" इति मेदिनी ॥ तत्र समन्ततः सर्वतस्तस्थुः । नृपं प्रतीक्षमाणा इति शेषः ॥ "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः ॥

स द्वारपालेन पुरः प्रदर्शितान्कृतानतीन्बाहुवरानधिष्ठितान् ।
महाहवाम्भोधिविधूननोद्धतान्ददर्श राजा पृतनाधिपान्बहून् ॥ ७ ॥

स इति ॥ स राजा तारकः पुरोऽग्रे द्वारपालेन प्रदर्शितान्कृतानतीन्बाहुवरान्बाहवो वराः श्रेष्ठा येषां तथोक्तानधिष्ठितान् । द्वार इति शेषः । महाहवरूपिणोऽम्भोधेः समुद्रस्य विधूनने कम्पने उद्धतान्प्रगल्भान् । महावीरानित्यर्थः ॥ "संग्रामाभ्यागमाहवाः" इत्यमरः ॥ बहून्पृतनाधिपान्सेनापतीन्ददर्श दृष्टवान् ॥ "अदभ्रं बहुलं बहु" इत्यमरः ॥

बली बलारातिबलातिशातनं दिग्दन्तिनादद्रवनाशनस्वनम् ।
महीधराम्भोधिनवारितक्रमं ययौ रथं घोरमथाधिरुह्य सः ॥ ८ ॥

बलीति ॥ अथानन्तरं बली वीर्यवान्स तारको बलारातेरिन्द्रस्य संबन्धिनो बलस्य सैन्यस्य ॥ "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः" इति मेदिनी ॥ अतिशातनं तनूकर्तारम् । हन्तारमित्यर्थः । दिग्दन्तिनामैरावतादीनां नादद्रवयोर्घोषमदयोर्नाशनो नाशकः स्वनो घोषो यस्य तम् । यदीयघोषश्रवणाद्दिग्दन्तिनोऽपि तूष्णीं शुष्कमदाश्च भवन्तीति भावः । महीधरेषु पर्वतेष्वम्भोधिषु च नवारितक्रमम् अनिवारितसंचारम् ॥ नशब्देन सह "सुप्सुपा" इति समासः ॥ घोरं भीमं रथमधिरुह्य ययौ जगाम । प्रतस्थे इति यावत् ॥

युगक्षयक्षुब्धपयोधिनिःस्वनाश्चलत्पताकाकुलवारितातपाः ।
धरारजोग्रस्तदिगन्तभास्कराः पतिं प्रयान्तं पृतनास्तमन्वयुः ॥ ९ ॥

युगेति ॥ युगक्षये प्रलयकाले क्षुब्धः संचलितो यः पयोधिः समुद्रस्तस्य निःस्वन इव निःस्वनो यासाम् । प्रलयकालक्षोभितसमुद्रघोषतुल्यघोषा इत्यर्थः । चलन्तीनां पताकानां वैजयन्तीनाम् ॥ "पताका वैजयन्ती स्यात्केतनं

१ बाहुवरान्. २ समरु. ३ दैत्य; दानव. ४ [illegible]. ५ विधून्. ६ [illegible]. ७ [illegible] [illegible]. ८ [illegible]. ९ [illegible].

समुदित्य । संधीभूयेति यावत् । तथा किरीटेपु मुकुटेपु बद्धोऽञ्जलिर्यैस्तथा सन्तः प्रणम्य युयुत्सुना योद्धुमिच्छुना मन्मथशत्रोः शिवस्य सूनुना पुत्रेण कुमारेण सहागतं जम्भजितमिन्द्रं न्यवेदयन् । स शंभुपुत्रो महेन्द्र आगत इति निवेदितवन्त इत्यर्थः ॥

दासीकृताशेषजगत्त्रयं न मां जिगाय युद्धे कतिशः शचीपतिः।
गिरिशपुत्रस्य बलेन सांप्रतं ध्रुवं विजेतेति स काकुतोऽहसत् ॥४॥

दासीकृतेति ॥ दासीकृतं भृत्यीकृतम् ॥ "दासो भृत्ये च शूद्रे च" इति मेदिनी ॥ अशेषजगत्त्रयं समस्तलोकत्रितयं येन तथाभूतं मां शचीपतिरिन्द्रः कतिशः कतिवारं युद्धे न जिगाय जयति स्म । अपि त्वनेकवारं जिगायेति काकुः । जयनिषेधस्य काकाश्रितत्वाज्जयनिषेध एव ध्वन्यते । सांप्रतं वर्तमानकाले गिरीशपुत्रस्य कुमारस्य बलेन वीर्येण । तदाश्रयेणेत्यर्थः । ध्रुवं निश्चयेन विजेता विजेष्येत । इति स तारकः काकुतः काकाहसज्जहास । कदाचिदपि न विजेष्यत इति ध्वन्यते ॥

ततः क्रुधा विस्फुरितोधराधरः स तारको दर्पितदोर्बलोद्धतान् ।
युधे त्रिलोकीजयकेलिलालसः सेनापतीन्संनहनार्थमादिशत्॥५

तत इति ॥ ततोऽनन्तरं क्रुधा क्रोधेन निमित्तेन विस्फुरित उच्छ्वसितोऽधरोऽनूर्ध्व ओष्ठो यस्य । प्रसिद्धं चैतद्यत्क्रोधवशादधरविस्फुरणम् । तथाधरो हीनः । नीच इति यावत् ॥ "अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वे च वाच्यवत्" इति मेदिनी ॥ विस्फुरिताधरश्चासावधरश्चेति विशेषणसमासः ॥ तथा त्रिलोक्या जय एव केलिः क्रीडा तस्यां लालसेच्छा यस्य । अनायासेनैव त्रिलोकीं जेष्यामीत्यभिमानवानित्यर्थः । एवंभूतः स तारकोऽसुरो दर्पिताः संजातदर्पास्तथा दोर्बलेन भुजबलेनोद्धतान्प्रगल्भान्सेनापतीन्सेनाधिपान्युधे युद्धाय । युद्धं कर्तुमित्यर्थः । संनहनार्थं संनद्धीभवनार्थं चादिशदाज्ञप्त ॥ "युद्धे" इति पाठे युद्धे विषये त्रिलोकीजयके विलास इत्यन्वयितव्यम् ॥

महाचमूनामधिपाः समन्ततः संनह्य सद्यः सुतरामुदायुधाः ।
तस्थुर्विनम्रक्षितिपालसंकुले तदङ्गनद्वारवरप्रकोष्ठके ॥ ६ ॥

महेति ॥ उदायुधा उद्धतान्यायुधानि शस्त्राणि यैरेवंभूता महाचमूनां महतीनां

१ तु; नु. २ इव; एव. ३ सदाकु सोऽहसत्. ४ अधरच्छदः. ५ बलात्; निभान्. ६ युद्धे. ७ तदङ्गणद्वारि वरिष्ठकोष्ठके; तदङ्गणद्वारवरिष्ठकोष्ठके.

सेनानामधिपाः स्वामिनः सद्यस्त्वरितं सुतरां संनह्य संनद्धा भूत्वा विनम्रा ये क्षितिपाला राजानस्तैः संकुले व्याप्ते तस्य तारकस्य यदङ्गनद्वारं चत्वरप्रवेशद्वारं तस्य वरः श्रेष्ठो यः प्रकोष्ठकोऽन्तरम् । मध्यमिति यावत् ॥ " प्रकोष्ठो मणिबन्धे स्यात्कूर्परस्यान्तरेऽपि च । भूपकक्षान्तरेऽपि स्यात् " इति मेदिनी ॥ तत्र समन्ततः सर्वतस्तस्थुः । नृपं प्रतीक्षमाणा इति शेषः ॥ " समन्ततस्तु परितः सर्वतो विष्वगित्यपि " इत्यमरः ॥

स द्वारपालेन पुरः प्रदर्शितान्कृतानतीन्बाहुवरानधिष्ठितान् ।
महाहवाम्भोधिविधूननोद्धतान्ददर्श राजा पृतनाधिपान्बहून् ॥ ७ ॥

स इति ॥ स राजा तारकः पुरोऽग्रे द्वारपालेन प्रदर्शितान्कृतानतीन्बाहुवरान्बाहवो वराः श्रेष्ठा येषां तथोक्तानधिष्ठितान् । द्वार इति शेषः । महाहवरूपिणोऽम्भोधेः समुद्रस्य विधूनने कम्पने उद्धतान्प्रगल्भान् । महावीरानित्यर्थः ॥ " सङ्ग्रामाभ्यागमाहवाः " इत्यमरः ॥ बहून्पृतनाधिपान्सेनापतीन्ददर्श दृष्टवान् ॥ " अदभ्रं बहुलं बहु " इत्यमरः ॥

बली बलारातिबलातिशातनं दिग्दन्तिनादद्रवनाशनस्वनम् ।
महीधराम्भोधिनिवारितक्रमं ययौ रथं घोरमथाधिरुह्य सः ॥ ८ ॥

बलीति ॥ अथानन्तरं बली वीर्यवान्स तारको बलारातेरिन्द्रस्य संबन्धिनो बलस्य सैन्यस्य ॥ " बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः " इति मेदिनी ॥ अतिशातनं तनूकर्तारम् । हन्तारमित्यर्थः । दिग्दन्तिनामैरावतादीनां नादद्रवयोर्घोषमदयोर्नाशनो नाशकः स्वनो घोषो यस्य तम् । यद्घोषोपरमाद्दिग्दन्तिनोऽपि तूष्णीं शुष्कमदाश्च भवन्तीति भावः । महीधरेषु पर्वतेष्वम्भोधिषु च नवारितक्रममनिवारितसंचारम् ॥ नञर्थेन सह " सुप्सुपा " इति समासः ॥ घोरं भीमं रथमधिरुह्य ययौ जगाम । प्रतस्थ इति यावत् ॥

युगक्षयक्षुब्धपयोधिनिःस्वनाश्चलत्पताकाकुलवारितातपाः ।
धरारजोग्रस्तदिगन्तभास्कराः पतिं प्रयान्तं पृतनास्तमन्वयुः ॥ ९ ॥

युगेति ॥ युगक्षये कल्पकाले क्षुब्धः संचलितो यः पयोधिः समुद्रस्तस्य निःस्वन इव निःस्वनो यासाम् । कल्पवातैः [illegible]दुर्घोषा इत्यर्थः । चलन्तीनां पताकानां वैजयन्तीनाम् ॥ " पताका वैजयन्ती स्यात्केतनं

१ बाहुवरान्. २ नवरं. ३ दैत्यः; [illegible]. ४ [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible]. ८ [illegible]. ९ [illegible].

नाटकाङ्कयोः" इति मेदिनी ॥ कुलेन समूहेन वारितातपा दूरीकृतघर्मा परागा भूमे रजोभिर्ग्रस्ता दिगन्तानि दिवमान्तानि भास्करश्च याभिस्तथाभूताः पृतनाः सेनाः ॥ कर्थ्यः ॥ प्रयान्तं प्रतिष्ठमानं तं पतिं तारकासुरमन्वयुः । अनुजग्मुरित्यर्थः ॥

चमूरजः प्राप दिगन्तदन्तिनां महासुरस्याभिमुखं प्रसर्पिणः ।
दन्तप्रकाण्डेषु सितेषु शुभ्रतां कुम्भेषु दानाम्बुघनेषु पङ्कताम् ॥१०॥

चमूरज इति ॥ अभिमुखं सुरसंमुखं प्रसर्पिणः प्रतिष्ठमानस्य महासुरस्य तारकस्य संबन्धिनीनां चमूनां रजो रेणुः । दिगन्तदन्तिनामैरावतादीनां सितेषु शुभ्रेषु दन्तप्रकाण्डेषु । दन्तरूपासु शाखास्वित्यर्थः ॥ "प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तयोः" इति मेदिनी ॥ शुभ्रतां पाण्डुतां दानाम्बुना मदजलेन घनेषु सघनेषु कुम्भेषु मूर्धान्तरेषु । गण्डस्थलेष्विति यावत् ॥ "कुम्भो राश्यन्तरे हस्तिमूर्धान्ते राक्षसान्तरे" इति मेदिनी ॥ पङ्कतां कर्दमताम् ॥ "पङ्कोऽस्त्री कर्दमे पापे" इति मेदिनी ॥ प्राप । धवलिमाश्रयीभूतसंबन्धेन शुक्लं हि धवलत्वमिति भावः । अन्यत्स्फुटम् ॥

महीभृतां कन्दरदारणोल्बणैस्तद्वाहिनीनां पटहस्वनैर्घनैः ।
उद्वेलिताश्चुक्षुभिरे महार्णवा नभःस्रवन्ती सहसाभ्यवर्द्धत ॥११॥

महीभृतामिति ॥ महीभृतां पर्वतानां संबन्धिनो ये कन्दरा दर्यः ॥ "दरी तु कन्दरो वा स्त्री" इत्यमरः ॥ तेषां दारणे स्फोटन उल्बणैरुद्भटैः । आत्मव्याप्तिवशात्स्फोटयद्भिरिवेति भासमानैरित्यर्थः । तथा घनैर्दृढैः । कठोरैरिति यावत् ॥ "घनं स्यात्कांस्यतालादिवाद्यमध्यमनृत्तयोः । ना मुस्तादौ घनाघेषु विस्तारे लोहमुद्गरे । त्रिषु सान्द्रे दृढे च" इति मेदिनी ॥ तद्वाहिनीनां तारकसेनानां संबन्धिनो ये पटहा आनकाः ॥ "पटहो ना समारम्भ आनके पुंनपुंसकम्" इति मेदिनी ॥ तेषां स्वनैः ॥ कर्तृभिः ॥ उद्वेलिता वेलामतिक्रामिता महार्णवा महान्तः समुद्राश्चुक्षुभिरे संचेलुः । पटहध्वनिजनितभयादिति भावः । तथा नभःस्रवन्त्याकाशगङ्गा च सहसाकस्मादभ्यवर्द्धत । अतिवेला बभूवेत्यर्थः ॥

सुरारिनाथस्य महाचमूस्वनैर्विगाह्यमाना तुमुलैः सुरापगा ।
अभ्युच्छ्रितैरूर्मिशतैश्च वारिजैरक्षालयन्नाकनिकेतनावलीम् ॥१२॥

सुरारिनाथस्येति ॥ तुमुलैः संकुलैः ॥ "तुमुलः [illegible] ना तुमुलं रणसंकुले" इति मेदिनी ॥ सुरारिरेव नाथो राजा तस्य

१ प्रसर्पिणः. २ दानाम्बुधरेषु. ३ उद्वेलिताः. ४ [illegible]

जा तस्य । संबन्धिनीनां महाचमूनां स्वनैः शब्दैर्विगाह्यमाना व्याप्यमाना सुरापगा मन्दाकिनी । अभ्युच्छ्रितैरभ्युत्पतितैर्वारिजैर्वारिजानि कमलानि विद्यन्ते येषु तैः । कमलसहितैरित्यर्थः ॥ "अर्शआदिभ्यः–" इत्यच् ॥ ऊर्मिशतैस्तरङ्गशतैश्च ॥ "भङ्गस्तरङ्ग ऊर्मिर्वा" इत्यमरः ॥ नाकनिकेतनावलीं स्वर्गवेश्मपङ्क्तिमक्षालयन्ममार्ज ॥

अथ प्रयाणाभिमुखस्य नाकिनां द्विषः पुरस्तादशुभोपदेशिनी ।
अगाधदुःखाम्बुधिमध्यमज्जनं बभूव चोत्पातपरम्परा तव ॥१३

अथेति ॥ अथानन्तरं प्रयाणाभिमुखस्य प्रस्थानसंमुखस्य नाकिनां देवानां द्विषो वैरिणस्तारकस्य पुरस्तादग्रे "भो तारक, तव स्वस्कर्मकम् । अगाधोऽतलस्पर्शः ॥ "अगाधमतलस्पर्शे त्रिषु श्वभ्रे नपुंसकम्" इति मेदिनी ॥ यो दुःखाम्बुधिर्दुःखसमुद्रस्तन्मध्ये मज्जनं भविष्यति" इत्येवमशुभोपदेशिन्यशुभवादिन्युत्पातपरम्परा दुःशकुनपङ्क्तिर्बभूव ॥

इतः परम् "आगामि–" इत्यादिभिरेकादशभिरुत्पातपरम्परामेव प्रपञ्चयति—

आगामिदैत्याशनकेलिकाङ्क्षिणी कुपक्षिणां घोरतरा परम्परा ।
दधौ पदं व्योम्नि सुरारिवाहिनीरुपर्युपर्यत्यनिवारितातपा॥१४॥

तत्र आगामीति ॥ घोरतरातिशयभयानका कुपक्षिणां गृध्रादीनां कपोतादीनां वा परम्परा । आगामि भविष्यद्दैत्यस्याशनकेलिर्भोजनक्रीडा तत्काङ्क्षतीति तथाभूता । तथा सुरारिवाहिनीस्तारकसेना उपर्युपरि ॥ "उपर्यध्यधसः सामीप्ये" इति द्विर्भावः । तद्योगे द्वितीया । तदुक्तं वामनेन—"उपर्यादिषु सामीप्ये द्विरुक्तेषु द्वितीयया" इति ॥ अनिवारितातपा न निवारितघर्मा च सती व्योम्न्याकाशे पदं स्थानं दधौ धृतवती । अनेन पद्येन प्रयाणानौचित्यद्योतकमुत्पातद्वयं वर्णितम् । तथाहि—आकस्मिकोपरि स्थितिः, आतपानिवृत्तिश्च । तस्मात्सबंधवास्य मरणं भविष्यतीति सूच्यते ॥

मुहुर्विभग्नातपवारणध्वजश्चलद्धराधूलिकुलाकुलेक्षणः ।
धुताश्वमातङ्गमहारथाकरानवेक्षणोऽभूत्प्रसभं प्रभञ्जनः ॥ १५॥

मुहुरिति ॥ विभग्ना त्रोटिता आतपवारणमहिता ध्वजा येन । चलन्त्यो

१ द्विषः पुरस्तादशुभोपदेशिनी; दुर्वादिनी मन्दसुरेश्वरस्य हि. २ अगाधदुःखाम्बुधिमध्यमज्जनं बभूव घोरातवर्णिर्विनिश्चवी; मुहुर्महाहितपरम्परा परा प्रयाणसूचनदायिनी. ३ आगामिदैत्याशनकेलिकाङ्क्षिणी. ४ दुर्वारितातप. ५ विनिघ. ६ धुताश्वमातङ्गमहारथस्योऽनवेक्षणोऽभूत्; मनाश्वमातङ्गमहारथस्यानवेक्षणः.

त्विषामिति ॥ त्विषां तेजसामधीशस्य रवेरधिमण्डलम् । मण्डल इत्यर्थः ॥ विभक्त्यर्थेऽव्ययीभावः ॥ समेताः समुदिताः शिवाः क्रोष्ट्रयः ॥ "शिवा ह्यामलौपधी । अभयामलकीगौरीक्रोष्ट्रीशक्रफलासु च" इति विश्वः ॥ सुरारिराजस्य तारकस्य संबन्धिनि रणान्ते सङ्ग्रामसमीपे यच्छोणितं रक्तं द्रुतं शीघ्रं प्रसह्य बलात्पातुं पानं कर्तुमुत्सुका इव परुषं कठोरं यथा तथा ववासिरे चुक्रुशुः॥ अत्रोत्पातद्वयम् । मार्तण्डमण्डलाधिकरणकं शिवासमुदितत्वं तत्कर्तृककठोररुदितं चेति ॥ षष्ठसप्तमावेतावुत्पातौ ॥

दिवापि तारास्तरलास्तरस्विनीः परापतन्तीः परितोऽथ वाहिनीः ।
विलोक्य लोको मनसा व्यचिन्तयत्प्राणव्ययान्तं व्यसनं सुरद्विपः॥

दिवापीति ॥ अथ दिवापि दिनेऽपि तरलाश्चञ्चलाः तरस्विनीर्वेगवतीः ॥ "रंहस्तरसी तु रयः स्यदः" इत्यमरः ॥ तारा नक्षत्राणि, वाहिनीः परितः ॥ "अभितःपरितःसमया-" इत्यादिना द्वितीया ॥ परापतन्तीर्विलोक्य लोको मनसा सुरद्विपः संबन्धि प्राणव्ययान्तं प्राणनाशावधि व्यसनं व्यचिन्तयत् । प्राणनाशावधि राज्ञो दुःखं भविष्यतीति चिन्तयामासेत्यर्थः ॥ अष्टमोऽयमुत्पातः॥

ज्वलद्भिरुच्चैरभितः प्रभाभरैरुद्भासिताशेषदिगन्तराम्बरम् ।
रवेण रौद्रेण हृदन्तदारणं पपात वज्रं नभसो निरम्बुदात् ॥ २०॥

ज्वलद्भिरिति ॥ निरम्बुदादनुद्गतमेघान्नभसो व्योम्नः सकाशादभितो ज्वलद्भिः मरुत्स्फुरद्भिः प्रभाभरैः कान्तिसमूहैः कृत्वा । उच्चैरतिशयितं यथा तथोद्भासितानि प्रकाशितान्यशेषदिगन्तराम्बराणि समस्तदिशाप्रान्तगगनानि येन । तथा रौद्रेण भयानकेन रवेण घोषेण हृदन्तस्योरोमध्यस्य दारणं विदारकं वज्रं स्फूर्जथुः पपात ॥ "स्फूर्जथुर्वज्रनिर्घोषे" इत्यमरः ॥ अत्राप्युत्पातद्वयम् । अम्बुदसंनिधानाभावेऽपि वज्रदर्शनं तत्पातश्चेति ॥ एवं नवमदशमावुत्पातावुक्तौ ॥

ज्वलद्भिरङ्गारचयैर्नभस्तलं ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्त्यो व्यसृजन्मुखे रजो दधुर्दिशो रासभकण्ठधूसरम्॥२१

ज्वलद्भिरिति ॥ नभस्तलम् । निरम्बुदं गदितं शेषः । ज्वलद्भिरङ्गारचयैः काष्ठनलसमूहैः । तथा शोणितास्थिभिश्च सह गाढं दृढम् । वर्दितं यावत् । ववर्ष । ज्वलदङ्गाररुधिरास्थिगर्भितं जलं ववर्षेत्यर्थः ॥ अम्बुदसंनिधानाभावेऽपि

---

१ तदानिधन. २ भनिशाटनीम. ३ रोदाः. ४ व्यचिन्तयत्. ५ प्राणव्ययान्तं व्यसनम्. ६ ज्वलद्भिः ७ दिगन्तराम्बरम्. ८ भङ्गारभरैः. ९ धूमम्. १० मुखे.

विगलन्तो या धराप्लुताः पृथिवीगतानि यानि कुड्येन मापनीभूतेनाश्यानि व्याकुलीकृतानीक्षणानि लोचनवर्त्मानि येन । तथा धूलस्य करम्भस्य । नवांग भौमिनश्योति यावत् । अभ्राणां मेघानां महाघनानां आकरस्य निकरस्य ॥ " आकरो निकरे रत्नस्थाने श्रेष्ठे न कथ्यते " इति मेदिनी ॥ अनवच्छिन्नमर्दनं येन । आच्छादितगगनमेनाङ्गः प्रभञ्जनो वायुः ॥ " पवमानप्रभञ्जनाः " इत्यमरः ॥ अभ्रदुरसः । " मुहुः " " मगमम् " इत्यस्य विशेषणत्वयेऽपि संबन्धः ॥ अयं तृतीय उत्पातः ॥

सद्योविभिन्नाञ्जनपुञ्जतेजसो मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा भयंकराकारभृतो भृशं ययुः ॥ १६ ॥

सद्य इति ॥ सद्योविभिन्नं तत्क्षणपतितं यदञ्जनं कज्जलम् ॥ " अञ्जनं कज्जले चार्क्षौ सौवीरे च रसान्तरे " इति मेदिनी ॥ तस्य पुञ्ज इव निकर इव तेजो धाम येषाम् । नूतनपतितकज्जलसमूहश्यामभास इत्यर्थः । उच्चकैर्महान्तः ॥ विस्तीर्णा इति यावत् । तथा भृशं भयंकराकारभृतः । अतिभीषणस्वरूपधारिण इत्यर्थः । महाभुजंगमा महान्तः सर्पाः पुरोऽग्रे विषाग्निं गरलरूपमग्निम् ॥ " क्ष्वेडस्तु गरलं विषम् " इत्यमरः ॥ विकिरन्तो विक्षिपन्तः सन्तः पथः सैन्यगन्तव्यमार्गानतीत्य पूर्वविहितात्मसंबन्धेन वियोज्य ययुः ॥ चतुर्थोऽयमुत्पातः ॥

मिलन्महाभीमभुजंगभीषणं प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽतिमत्सरादिवान्तमासूचयितुं भयंकरः ॥ १७ ॥

मिलदिति ॥ दिनानां प्रभुः सूर्यो द्विषतः शत्रुभूतस्य ॥ " द्विषद्द्वेषणदुर्हृदः " इत्यमरः ॥ महासुरस्य तारकस्यान्तं विनाशम् । मरणमिति यावत् ॥ " अन्तः स्वरूपे नाशे ना स्त्री शेषे चान्तिके त्रिषु " इति मेदिनी ॥ आसूचयितुं ज्ञापयितुं मिलन्तः संयुजन्तः । तथा महाभीमा अतिभयंकरा ये भुजंगाः सर्पास्तैर्भीषणं भयदं परिवेषं परिधिं कुण्डलाकारम् ॥ " परिवेषस्तु परिधिरुपसूर्यकमण्डले " इत्यमरः ॥ अतिमत्सरादिवादधौ धृतवान् । विनाशरूपफलसूचकपरिवेषाधाने मत्सरस्य हेतुत्वाभावेऽपि हेतुत्वकल्पनाद्धेतूत्प्रेक्षा । अत एव भयंकरो विभीषकः ॥ " मेघर्ति– " इति खश् ॥ पञ्चमोऽयमुत्पातः ॥

त्विषामधीशस्य पुरोऽधिमण्डलं शिवाः समेताः परुषं ववासिरे ।
सुरारिराजस्य रणान्तशोणितं प्रसह्य पातुं द्रुतमुत्सुका इव ॥ १८ ॥

---

१ संनिभाः. २ परोत्पात. ३ नु मत्सरात्; न मत्सरात्. ४ आत्तभास्यं भयतुर्भयंकरम्; आत्तभास्वभयतुर्भयंकराः. ५ अभिमण्डलम्. ६ सुराधिराजस्य.

त्विषामिति ॥ त्विषां तेजसामधीशस्य रवेरधिमण्डलम् । मण्डल इत्यर्थः ॥ विभक्त्यर्थेऽव्ययीभावः ॥ समेताः समुदिताः शिवाः क्रोष्टुयः ॥ "शिवा ह्यामलैपथ्यौ । अभयामलकीगौरीक्रोष्टीशक्रफलासु च" इति विश्वः ॥ सुरारिराजस्य तारकस्य संबन्धिनि रणान्ते सङ्ग्रामसमीपे यच्छोणितं रक्तं द्रुतं शीघ्रं सह्य बलात्पातुं पानं कर्तुमुत्सुका इव परुषं कठोरं यथा तथा ववासिरे चुक्रुशुः ॥ अत्रोत्पातद्वयम् । मार्तण्डमण्डलाधिकरणकं शिवासमुदितत्वं तत्कर्तृककठोररुदितं चेति ॥ पष्ठसप्तमावेतावुत्पातौ ॥

दिवापि तारास्तरलास्तरस्विनीः परापतन्तीः परितोऽर्थ वाहिनीः ।
विलोक्य लोको मनसा व्यचिन्तयत्प्राणव्ययान्तं व्यसनं सुरद्विपः॥

दिवापीति ॥ अथ दिवापि दिनेऽपि तरलाश्चञ्चलाः तरस्विनीर्वेगवतीः ॥ "रंहस्तरसी तु रयः स्यदः" इत्यमरः ॥ तारा नक्षत्राणि, वाहिनीः परितः ॥ "अभितःपरितःसमया–" इत्यादिना द्वितीया ॥ परापतन्तीर्विलोक्य लोको मनसा सुरद्विपः संबन्धि प्राणव्ययान्तं प्राणनाशावधि व्यसनं व्यचिन्तयत् । प्राणनाशावधि राज्ञो दुःखं भविष्यतीति चिन्तयामासेत्यर्थः ॥ अष्टमोऽयमुत्पातः॥

ज्वलद्भिरुच्चैरभितः प्रभाभरैरुद्भासिताशेषदिगन्तराम्बरम् ।
रवेण रौद्रेण हृदन्तदारणं पपात वज्रं नभसो निरम्बुदात् ॥ २०॥

ज्वलद्भिरिति ॥ निरम्बुदादनुद्गतमेघान्नभसो व्योम्नः सकाशादभितो ज्वलद्भिः भास्वद्भिः प्रभाभरैः कान्तिसमूहैः कृत्वा । उच्चैरतिशयितं यथा तथोद्भासितानि प्रकाशितान्यशेषदिगन्तराम्बराणि समस्तदिशाप्रान्तगगनानि येन । तथा रौद्रेण भयानकेन रवेण घोषेण हृदन्तस्योरोमध्यस्य दारणं विदारकं वज्रं स्फूर्जथुः पपात ॥ "स्फूर्जथुर्वज्रनिर्घोषे" इत्यमरः ॥ अत्राप्युत्पातद्वयम् । अम्बुदसांनिध्याभावेऽपि वज्रदर्शनं तत्पातश्चेति ॥ एवं नवमदशमावुत्पातावुक्तौ ॥

ज्वलद्भिरङ्गारचयैर्नभस्तलं ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्त्यो व्यसृजन्मुखे रजो दधुर्दिशो रासभकण्ठधूसरम्॥२१

ज्वलद्भिरिति ॥ नभस्तलम् । निरम्बुदं यदीति शेषः । ज्वलद्भिरङ्गारचयैः काष्ठनकलसमूहैः । तथा शोणितास्थिभिश्च सह गाढं दृढम् । वर्षति यावत् । ववर्ष । ज्वलदङ्गाररुधिरास्थिमिश्रितं जलं ववर्षेत्यर्थः ॥ अम्बुदसांनिध्याभावेऽपि

---

१ हृदन्तिदारं. २ अभिसादितौम. ३ घोराः. ४ व्यचिन्तयत्. ५ प्राणात्ययान्तं व्यसनम्. ६ ज्वलद्भिः. ७ दिगन्तरान्तरम्. ८ अङ्गारचयैः. ९ धूमम्. १० मुखे.

विसरन्तो वा पवमानाः पृथिवीरजांसि तासां पुञ्जेन साधनीभूतेनाकुलानि व्याकुलीकृतानीक्षणानि लोचनानि येन । तथा पुनरुग्र कम्पितस्य । नभोऽपि भ्रमितमेवेति यावत् । अभ्राणां सान्द्राणां मेघखण्डानां चाकरस्य निकरस्य ॥ " आकरो निकरे रत्नस्थाने श्रेष्ठे च कथ्यते " इति मेदिनी ॥ अनवेक्षणमदर्शनं येन । आच्छादितजगत्त्वेनाङ्गः प्रभञ्जनो वायुः ॥ " पवमानप्रभञ्जनाः " इत्यमरः ॥ अभूदुत्पातः । " मुहुः " " सशब्दम् " इत्यस्य विशेषणत्रयेऽपि संबन्धः ॥ अयं तृतीय उत्पातः ॥

सद्योविभिन्नाञ्जनपुञ्जतेजसो मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा भयंकराकारभृतो भृशं ययुः॥१६॥

सद्य इति ॥ सद्योविभिन्नं तत्क्षणपतितं यदञ्जनं कज्जलम् ॥ " अञ्जनं क- ज्जले चाक्तौ सौवीरे च रसान्तरे " इति मेदिनी ॥ तस्य पुञ्ज इव निकर इव तेजो धाम येषाम् । नूतनपातितकज्जलसमूहश्यामभास इत्यर्थः । उच्चकैर्महान्तः ॥ विस्तीर्णा इति यावत् । तथा भृशं भयंकराकारभृतः । अतिभीषणस्वरूपधारिण इत्यर्थः । महाभुजंगमा महान्तः सर्पाः पुरोऽग्रे विषाग्निं गरलरूपमग्निम् ॥ " क्ष्वे- डस्तु गरलं विषम् " इत्यमरः ॥ विकिरन्तो विक्षिपन्तः सन्तः पथः सैन्यगन्त- व्यमार्गानतीत्य पूर्वविहितात्मसंबन्धेन वियोज्य ययुः ॥ चतुर्थोऽयमुत्पातः ॥

मिलन्महाभीमभुजंगभीषणं प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विपतोऽतिमत्सरादिवान्तमासूचयितुं भयंकरः॥१७॥

मिलदिति ॥ दिनानां प्रभुः सूर्यो द्विपतः शत्रुभूतस्य ॥ " द्विपद्द्वेपणदुर्हृदाः " इत्यमरः ॥ महासुरस्य तारकस्यान्तं विनाशम् । मरणमिति यावत् ॥ " अन्तः स्वरूपे नाशे ना स्त्री शेषे चान्तिके त्रिषु " इति मेदिनी ॥ आसूचयितुं ज्ञाप- यितुं मिलन्तः संयुजन्तः । तथा महाभीमा अतिभयंकरा ये भुजंगाः सर्पास्तैर्भी- षणं भयदं परिवेषं परिधिं कुण्डलाकारम् ॥ " परिवेषस्तु परिधिरुपसूर्यकमण्ड- ले " इत्यमरः ॥ अतिमत्सरादिवादधौ धृतवान् । विनाशरूपफलसूचकपरिवे- षाधाने मत्सरस्य हेतुत्वाभावेऽपि हेतुत्वकल्पनाद्धेतूत्प्रेक्षा । अत एव भयंकरो वि- भीषकः ॥ " मेघाति– " इति खश् ॥ पञ्चमोऽयमुत्पातः ॥

त्विषामधीशस्य पुरोऽधिमण्डलं शिवाः समेताः परुषं ववासिरे ।
सुरारिराजस्य रणान्तशोणितं प्रसह्य पातुं द्रुतमुत्सुका इव॥१८॥

१ संनिभाः. २ परोत्पात. ३ नु मत्सरात्; न मत्सरात्. ४ आत्तमास्यं मयतुभयंकरम्; आत्त- मास्यमयतुर्भयंकराः. ५ अभिमण्डलम्. ६ सुराधिराजस्य.

त्विषामिति ॥ त्विषां तेजसामधीशस्य रवेरधिमण्डलम् । मण्डल इत्यर्थः ॥ विभक्त्यर्थेऽव्ययीभावः ॥ समेताः समुदिताः शिवाः क्रोष्ट्र्यः ॥ "शिवा ह्यादामलक्यर्थी । अभयामलकीगौरीक्रोष्ट्रीशक्रफलासु च" इति विश्वः ॥ सुरारिराजस्य तारकस्य संबन्धिनि रणान्ते सङ्ग्रामसमीपे यच्छोणितं रक्तं द्रुतं शीघ्रं प्रसह्य बलात्पातुं पानं कर्तुमुत्सुका इव परुषं कठोरं यथा तथा ववाशिरे चुक्रुशुः ॥ अत्रोत्पातद्वयम् । मार्तण्डमण्डलाधिकरणकं शिवासमुदितत्वं तत्कर्तृककठोररुदितं चेति ॥ षष्ठसप्तमावेतावुत्पातौ ॥

दिवापि तारास्तरलास्तरस्विनीः परापतन्तीः परितोऽथ वाहिनीः ।
विलोक्य लोको मनसा व्यचिन्तयत्प्राणव्ययान्तं व्यसनं सुरद्विपः ॥

दिवापीति ॥ अथ दिवापि दिनेऽपि तरलाश्चञ्चलाः तरस्विनीर्वेगवतीः ॥ "रंहस्तरसी तु रयः स्यदः" इत्यमरः ॥ तारा नक्षत्राणि, वाहिनीः परितः ॥ "अभितःपरितःसमया-" इत्यादिना द्वितीया ॥ परापतन्तीर्विलोक्य लोको मनसा सुरद्विपः संबन्धि प्राणव्ययान्तं प्राणनाशावधि व्यसनं व्यचिन्तयत् । प्राणनाशावधि राज्ञो दुःखं भविष्यतीति चिन्तयामासेत्यर्थः ॥ अष्टमोऽयमुत्पातः ॥

ज्वलद्भिरुच्चैरभितः प्रभाभरैरुद्भासिताशेषदिगन्तराम्बरम् ।
रवेण रौद्रेण हृदन्तदारणं पपात वज्रं नभसो निरम्बुदात् ॥ २० ॥

ज्वलद्भिरिति ॥ निरम्बुदादनुद्गतमेघान्नभसो व्योम्नः सकाशादभितो ज्वलद्भिः प्रस्फुरद्भिः प्रभाभरैः कान्तिसमूहैः कृत्वा । उच्चैरतिशयितं यथा तथोद्भासितानि प्रकाशितान्यशेषदिगन्तराम्बराणि समस्तदिशामन्तगगनानि येन । तथा रौद्रेण भयानकेन रवेण घोषेण हृदन्तस्योरोमध्यस्य दारणं विदारकं वज्रं स्फूर्जथुः पपात ॥ "स्फूर्जथुर्वज्रनिर्घोषे" इत्यमरः ॥ अत्राप्युत्पातद्वयम् । अम्बुदसांनिध्याभावेऽपि वज्रदर्शनं तत्पातश्चेति ॥ एवं नवमदशमावुत्पातावुक्तौ ॥

ज्वलद्भिरङ्गारचयैर्नभस्तलं ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्त्यो व्यसृजन्मुखे रजो दधुर्दिशो रासभकण्ठधूसरम् ॥ २१

ज्वलद्भिरिति ॥ नभस्तलम् । निरम्बुदं भवतीति शेषः । ज्वलद्भिरङ्गारचयैः काष्ठशकलसमूहैः । तथा शोणितास्थिभिश्च सह गाढं दृढम् । यावदिति यावत् । ववर्ष । ज्वलदङ्गाररुधिरास्थिगर्भितं जलं ववर्षेत्यर्थः ॥ अम्बुदसांनिध्याभावेऽपि

---

१ सदानिशम्. २ अभितोदिशम्. ३ लोकाः. ४ व्यचिन्तयत्. ५ प्राणात्ययान्तं व्यसनम्. ६ ज्वलद्भिः. ७ दिगन्तराम्बरम्. ८ अङ्गारचयैः. ९ धूमम्. १० मुखे.

विसरन्तो वा भराकृतयः पृथिवीरजांसि नाना कुलेन गाम्भीर्ययुक्तेनाहृतानि व्याकुलीकृतानीक्षणानि लोकनेत्राणि येन । तथा घनस्य कठिनस्य । नर्माणि भाविनश्येति यावत् । अश्मानां पाषाणानां महाशिलानां चाकरस्य निकरस्य ॥ "आकरो निकरे रत्नस्थाने श्रेष्ठे च कथ्यते" इति मेदिनी ॥ अनवेक्षणप्रदर्शनं येन । आस्फालितनगकम्पेनाढ्यः प्रभञ्जनो वायुः ॥ "पवमानप्रभञ्जनाः" इत्यमरः ॥ अभ्युदयपक्षः । "मुहुः" "घनाभम्" इत्यस्य विशेषणत्रयेऽपि संबन्धः ॥ अयं तृतीय उत्पातः ॥

सद्योविभिन्नाञ्जनपुञ्जतेजसो मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा भयंकराकारभृतो भृशं ययुः॥१६॥

सद्य इति ॥ सद्योविभिन्नं तत्क्षणपातितं यदञ्जनं कज्जलम् ॥ "अञ्जनं कज्जले चाक्तौ सौवीरे च रसान्तरे" इति मेदिनी ॥ तस्य पुञ्ज इव निकर इव तेजो धाम येषाम् । नूतनपातितकज्जलसमूहश्यामभास इत्यर्थः । उच्चकैर्महान्तः ॥ विस्तीर्णा इति यावत् । तथा भृशं भयंकराकारभृतः । अतिभीषणस्वरूपधारिण इत्यर्थः । महाभुजंगमा महान्तः सर्पाः पुरोऽग्रे विषाग्निं गरलरूपमग्निम् ॥ "क्ष्वेडस्तु गरलं विषम्" इत्यमरः ॥ विकिरन्तो विक्षिपन्तः सन्तः पथः सैन्यगन्तव्यमार्गानतीत्य पूर्वविहितात्मसंबन्धेन वियोज्य ययुः ॥ चतुर्थोऽयमुत्पातः ॥

मिलन्महाभीमभुजंगभीषणं प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽतिमत्सरादिवान्तमासूचयितुं भयंकरः॥१७॥

मिलदिति ॥ दिनानां प्रभुः सूर्यो द्विषतः शत्रुभूतस्य ॥ "द्विषद्द्वेषणदुर्हृदाः" इत्यमरः ॥ महासुरस्य तारकस्यान्तं विनाशम् । मरणमिति यावत् ॥ "अन्तः स्वरूपे नाशे ना स्त्री शेषे चान्तिके त्रिषु" इति मेदिनी ॥ आसूचयितुं ज्ञापयितुं मिलन्तः संयुजन्तः । तथा महाभीमा अतिभयंकरा ये भुजंगाः सर्पास्तैर्भीषणं भयदं परिवेषं परिधिं कुण्डलाकारम् ॥ "परिवेषस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः ॥ अतिमत्सरादिवादधौ धृतवान् । विनाशरूपफलसूचकपरिवेषाधाने मत्सरस्य हेतुत्वाभावेऽपि हेतुत्वकल्पनाद्धेतूत्प्रेक्षा । अत एव भयंकरो विभीषकः ॥ "मेघर्ति–" इति खश् ॥ पञ्चमोऽयमुत्पातः ॥

त्विषामधीशस्य पुरोऽधिमण्डलं शिवाः समेताः परुषं ववाशिरे ।
सुरारिराजस्य रणान्तशोणितं प्रसह्य पातुं द्रुतमुत्सुका इव॥१८॥

१ संनिभाः. २ परोत्पात. ३ नु मत्सरात; न मत्सरात. ४ आत्तमास्यं मर्यदुभयंकरम्; आत्तमास्यमयदुर्भयंकराः. ५ अभिमण्डलम्. ६ सुराधिराजस्य.

त्विषामिति ॥ त्विषां तेजसामधीशस्य रवेरधिमण्डलम् । मण्डल इत्यर्थः ॥ विभक्त्यर्थेऽव्ययीभावः ॥ समेताः समुदिताः शिवाः क्रोष्ट्र्यः ॥ "शिवा ह्यादामलौपधौ । अभयामलकीगौरीक्रोष्ट्रीशक्रफलासु च" इति विश्वः ॥ सुरारिराजस्य तारकस्य संबन्धिनि रणान्ते सङ्ग्रामसमीपे यच्छोणितं रक्तं द्रुतं शीघ्रं प्रसह्य बलात्पातुं पानं कर्तुमुत्सुका इव परुषं कठोरं यथा तथा वत्रासिरे चुक्रुशुः ॥ अत्रोत्पातद्वयम् । मार्तण्डमण्डलाधिकरणकं शिवासमुदितत्वं तत्कर्तृककठोररुदितं चेति ॥ षष्ठसप्तमावेतावुत्पातौ ॥

दिवापि तारास्तरलास्तरस्विनीः परापतन्तीः परितोऽथ वाहिनीः ।
विलोक्य लोको मनसा व्यचिन्तयत्प्राणव्ययान्तं व्यसनं सुरद्विपः ॥

दिवापीति ॥ अथ दिवापि दिनेऽपि तरलाश्चञ्चलाः तरस्विनीर्वेगवतीः ॥ "रंहस्तरसी तु रयः स्यदः" इत्यमरः ॥ तारा नक्षत्राणि, वाहिनीः परितः ॥ "अभितःपरितःसमया-" इत्यादिना द्वितीया ॥ परापतन्तीर्विलोक्य लोको मनसा सुरद्विपः संबन्धि प्राणव्ययान्तं प्राणनाशावधि व्यसनं व्यचिन्तयत् । प्राणनाशावधि राज्ञो दुःखं भविष्यतीति चिन्तयामासेत्यर्थः ॥ अष्टमोऽयमुत्पातः ॥

ज्वलद्भिरुच्चैरभितः प्रभाभरैरुद्भासिताशेषदिगन्तराम्बरम् ।
रवेण रौद्रेण हृदन्तदारणं पपात वज्रं नभसो निरम्बुदात् ॥ २० ॥

ज्वलद्भिरिति ॥ निरम्बुदादनुद्गतमेघान्नभसो व्योम्नः सकाशादभितो ज्वलद्भिः प्रस्फुरद्भिः प्रभाभरैः कान्तिसमूहैः कृत्वा । उच्चैरतिशयितं यथा तथोद्भासितानि प्रकाशितान्यशेषदिगन्तराम्बराणि समस्तदिशामान्तगगनानि येन । तथा रौद्रेण भयानकेन रवेण घोषेण हृदन्तस्योरोमध्यस्य दारणं विदारकं वज्रं स्फूर्जथुः पपात ॥ "स्फूर्जथुर्वज्रनिर्घोषः" इत्यमरः ॥ अत्राप्युत्पातद्वयम् । अम्बुदगर्जिनिरभ्राभावेऽपि वज्रदर्शनं तत्पातश्चेति ॥ एवं नवमदशमावुत्पातावुक्तौ ॥

ज्वलद्भिरङ्गारचयैर्नभस्तलं ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्त्यो व्यसृजन्मुखे रजो दधुर्दिशो रासभकण्ठधूसरम् ॥ २१ ॥

ज्वलद्भिरिति ॥ नभस्तलम् । निरम्बुदं मादिनि शेषः । ज्वलद्भिरङ्गारचयैः काष्ठनकल्पसमूहैः । तथा शोणितास्थिभिश्च सह गाढं दृढम् । वांदिनि यावत् । ववर्ष । ज्वलदङ्गाररुधिरास्थिगर्भितं जलं ववर्षेत्यर्थः ॥ अम्बुदगर्जिनिरभ्राभावेऽपि

---

१ तदानिशम्. २ अभिशादिनीः. ३ शोणाः. ४ व्यचिन्तयत्. ५ प्राणान्तमतं व्यसनम्. ६ ज्वलद्भिः. ७ दिगन्तरान्तम्. ८ अङ्गारभरैः. ९ धूमम्. १० मुखे.

विसरन्तो या पराभृतः धूलिजालानि मार्गा धूल्येन साधनीभूतेनान्ध्यानि व्याकुलीकृतानीक्षणानि सैन्यनेत्राणि येन । तथा भूतस्य कम्पितस्य । नमति भग्निमगोचर यावत् । भूधानां मानहानां महाशत्रूनां चाकरस्य निकरस्य ॥ " आकरो निकरे रत्नस्थाने श्रेष्ठे च कथ्यते " इति मेदिनी ॥ अनेकशणमर्दनं येन । आस्फालितसकलगिरिनाद्रः प्रभञ्जनो वायुः ॥ " पवमानप्रभञ्जनाः " इत्यमरः ॥ अभूदुत्पातः । " मुहुः " " भयभम् " इत्यस्य विशेषणत्रयेऽपि संबन्धः ॥ अयं तृतीय उत्पातः ॥

सद्योविभिन्नाञ्जनपुञ्जतेजसो मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा भयंकराकारभृतो भृशं ययुः ॥१६॥

सद्य इति ॥ सद्योविभिन्नं तत्क्षणपतितं यदञ्जनं कज्जलम् ॥ " अञ्जनं कज्जले चाक्तौ सौवीरे च रसान्तरे " इति मेदिनी ॥ तस्य पुञ्ज इव निकर इव तेजो धाम येषाम् । नूतनपातितकज्जलसमूहश्यामभास इत्यर्थः । उच्चकैर्महान्तः ॥ विस्तीर्णा इति यावत् । तथा भृशं भयंकराकारभृतः । अतिभीषणस्वरूपधारिण इत्यर्थः । महाभुजंगमा महान्तः सर्पाः पुरोऽग्रे विषाग्निं गरलरूपमग्निम् ॥ " क्ष्वेडस्तु गरलं विषम् " इत्यमरः ॥ विकिरन्तो विक्षिपन्तः सन्तः पथः सैन्यगन्तव्यमार्गानतीत्य पूर्वोक्तिहितात्मसंबन्धेन वियोज्य ययुः ॥ चतुर्थोऽयमुत्पातः ॥

मिलन्महाभीमभुजंगभीषणं प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽतिमत्सरादिवान्तमासूचयितुं भयंकरः॥

मिलदिति ॥ दिनानां प्रभुः सूर्यो द्विषतः शत्रुभूतस्य ॥ " द्विषद्वेषणदुर्हृद् " इत्यमरः ॥ महासुरस्य तारकस्यान्तं विनाशम् । मरणमिति यावत् ॥ " अन्तः स्वरूपे नाशे ना स्त्री शेषे चान्तिके त्रिषु " इति मेदिनी ॥ आसूचयितुं ज्ञापयितुं मिलन्तः संयुजन्तः । तथा महाभीमा अतिभयंकरा ये भुजंगाः सर्पास्तैर्भीषणं भयदं परिवेषं परिधिं कुण्डलाकारम् ॥ " परिवेषस्तु परिधिरुपसूर्यकमण्डले " इत्यमरः ॥ अतिमत्सरादिवादधौ धृतवान् । विनाशरूपफलसूचकपरिवेषाधाने मत्सरस्य हेतुत्वाभावेऽपि हेतुत्वकल्पनाद्धेतूत्प्रेक्षा । अत एव भयंकरो भीषकः ॥ " मेघाति- " इति खश् ॥ पञ्चमोऽयमुत्पातः ॥

त्विषामधीशस्य पुरोऽधिमण्डलं शिवाः समेताः परुषं ववासिरे ।
सुरारिराजस्य रणान्तशोणितं प्रसह्य पातुं द्रुतमुत्सुका इव॥१८॥

१ संनिभाः. २ परीत्य. ३ नु मत्सरात्; न मत्सरात्. ४ आत्तमास्यं मयतुभयंकरम्; आत्त

अपीति पश्यन्परिणामदारुणां महत्तमां गाढमरिष्टसंततिम् ।
दुर्दैवदष्टो न खलु न्यवर्तत क्रुधा प्रयाणव्यवसायतोऽसुरः ॥२५

अपीति ॥ गाढं दृढं यथा तथा परिणाम उत्तरकाले दारुणां भयप्रदां महत्त-
तिशयमहतीमरिष्टसंततिमुत्पातपरम्परां पश्यन्नप्यसुरस्तारकः क्रुधामर्षेण प्र-
व्यवसायतः प्रस्थानोद्योगान्न न्यवर्तत न निवृत्तः खलु। यतो दुर्दैवेन दुरदृष्टेन
हतः । " विनाशकाले विपरीतबुद्धिः " इति न्यायादिति भावः ॥

अरिष्टमाशङ्क्य विपाकदारुणं निवार्यमाणोऽपि बुधैर्महासुरः ।
पुरः प्रतस्थे महतां वृथा भवेदसद्ग्रहान्धस्य हितोपदेशनम् ॥२६

अरिष्टेति ॥ महासुरस्तारकोऽरिष्टं विपाक उत्तरकाले दारुणं भयदमाशङ्क्य
यित्वा निवार्यमाणो निषिध्यमानोऽपि पुर एव प्रतस्थे न तु पश्चान्निववृते ।
हि । महतां महता कृतमसद्ग्रहेणान्धस्याविवेकिनः संबन्धिनो हितस्योपदेशनं
व्यर्थं भवेत् । दुराग्रहशीलस्य सम्यगुपदेशोऽपि तदमततया व्यर्थः स्यादिति
: ॥

इदानीं पञ्चभिः पञ्चमहोत्पातानाह—

क्षितौ निरस्तं प्रतिकूलवायुना तदीयचामीकरघर्मवारणम् ।
रराज मृत्योरिव पारणाविधौ प्रकल्पितं हाटकभाजनं महत्॥२७

क्षिताविति ॥ प्रतिकूलवायुना प्रतीपपवनेन क्षितौ पृथिव्यां निरस्तं निः-
प्तम् ॥ " असु क्षेपणे " इत्यतः कर्मणि निष्ठा ॥ तदीयं तारकसंबन्धि चामीक-
र हेम्नः ॥ " चामीकरं जातरूपं महारजतकाञ्चने " इत्यमरः ॥ घर्मवारणं छत्रं
र्यमस्य संबन्धिनि पारणाविधौ । भोजनक्रियानिमित्तमित्यर्थः ॥ " निमि-
त्तकर्मयोगे " इति सप्तमी ॥ योगोऽत्र संयोगः । प्रकल्पितं निर्मितं महद्विशालं
टकभाजनं सुवर्णपात्रमिवेत्युत्प्रेक्षा । रराज शुशुभे ॥

विजानता भावि शिरोनिकृन्तनं प्रज्ञेन शोकादिव तस्य मौलिना।
मुहुर्गलद्भिस्तरलैरलंतरामरोदि मुक्ताफलबाष्पबिन्दुभिः ॥ २८॥

विजानतेति ॥ प्रज्ञेन बुधेन ॥ " प्रज्ञस्तु पण्डिते वाच्यलिङ्गो बुद्धौ तु यो-

१ इति प्रपश्यन्. २ महत्तराम्. ३ दृष्टः. ४ खलः. ५ निवर्तते. ६ निवार्यमाणैः. ७ विबुधैः;
विधैः. ८ महासुरैः. ९ हितोपदेशना; हितोपदेशिता. १० रात्रपानभाजनम्. ११ विकर्तनम्.
२ स्वसेन; प्रश्नेन.

दृष्टिरेकादशतमोऽयमुत्पातः । साप्यङ्गारादिमिश्रितेति द्वादशतमः ॥ अत एव ज्वलन्त्यो दिशो रासभकण्ठधूसरं खरगलसदृशधूसरवर्णम् ॥ " रासभो गर्दभे क्षुद्रजन्तुरोगप्रभेदयोः " इति मेदिनी ॥ धूयं धूम्ररूपं रजो रेणुं मुखैः प्रारम्भप्रदेशैर्व्यसृजंस्तत्यजुः ॥ त्रयोदशतमोऽयमुत्पातः ॥

निर्घातघोषो गिरिशृङ्गशातनो घनोऽम्बराशाकुहरोदरंभरिः ।
बभूव भूम्ना श्रुतिभित्तिभेदनः प्रकोपिकालार्जितगर्जितर्जनः॥२२

निर्घातेति ॥ प्रकोपिना प्रकृष्टरोषेण कालेन यमेनार्जितोत्पादिता गर्जिणी गर्जनां कुर्वती तर्जनापकारणीर्यत्र । अतएवाम्बरस्याशानां च कुहरेणान्तरेणोदरंभरिरत एव गिरीणां शृङ्गस्य शातनो भेदकः । तथा घनः सान्द्रो निर्घातश्चासौ घोषश्च स भूम्ना बाहुल्येन श्रुतिभित्तिभेदनः कर्णकुड्यताडनो बभूव ॥ चतुर्दशतमोऽयमुत्पातः ॥

स्खलन्महेभं प्रपतत्तुरंगमं परस्पराश्लिष्टजनं समन्ततः ।
प्रक्षुभ्यदम्भोधिविभिन्नभूधराद्बलं द्विपोऽभूदवनिप्रकम्पात् ॥ २३॥

स्खलदिति ॥ द्विपस्तारकस्य बलं सैन्यम् ॥ " बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः " इति विश्वः ॥ प्रक्षुभ्यद्भिरुन्मथ्यमानैरम्भोधिभिर्विभिन्ना विदीर्णा भूधराः पर्वता यत्र । प्रोत्पद्यमानविकटतरधरणिकम्पप्रोच्छलत्समुद्वेलजलधिघोरतरप्रवाहस्फुटन्तो धराधरा बभूवुरिति भावः । एवं भूतादवनिप्रकम्पाद्भूकम्पाद्धेतोः स्खलन्महेभं मूर्च्छद्बृहत्करीन्द्रं प्रपतत्तुरंगमं प्रकृष्टपतद्वाजिराजं परस्पराश्लिष्टो भयवदन्योन्यासंसक्ताननो यत्र तथाभूतं बभूव ॥ पञ्चदशतमोऽयमुत्पातः ॥

ऊर्ध्वीकृतास्या रविदत्तदृष्टयः समेत्य सर्वे सुरविद्विपः पुरः ।
श्वानः स्वरेण श्रवणान्तशातिना मिथो रुदन्तः करुणेन निर्ययुः२४

ऊर्ध्वीकृतास्या इति ॥ सर्वे श्वानः समेत्य सम्भूयोर्ध्वीकृतास्या ऊर्ध्वदिशाविहितवदनाः । तथा रविदत्तदृष्टयः सूर्यनिबद्धलोचनाः । तथा करुणेन करुणरसपूरितेनात एव श्रवणान्तशातिना कर्णमध्यतनूकारिणा स्वरेण शब्देन कृत्वा रुदन्तः क्रोशन्तः सन्तः सुरविद्विपस्तारकस्य पुरोऽग्रे निर्ययुर्निरगच्छन् ॥ षोडशतमोऽयमुत्पातः ॥

---

१ गिरिशृङ्गशातनः; गिरिशृङ्गशातनैः. २ घनोऽम्बराशाकुहरोदरंभरिः; घनैरम्बराशाकुहरोदरंभरिः. ३ भूम्ना. ४ गर्जिततर्जनः; गर्जनतर्जनः. ५ प्रपतत्. ६ प्रपतत्तुरंगमम्. ७ प्रक्षुभ्यत्. ८ भूधरम्. ९ पुरः. १० प्रकम्पनम्; प्रकम्पनः. ११ शातिना.

चण्डतरोऽतिशयप्रचण्डो हुताशनोऽग्निः । रथाश्वसंबन्धिनी या केशावलिः कर्णचामराणि च तेषां समाहारस्तत् ॥ प्राण्यङ्गत्वादेकवद्भावः ॥ तथा बाणासनं बाणक्षेपक्रियासाधनम् ॥ करणे ल्युट् ॥ धनुर्बाणाः । बाणधिस्तूणीरश्चेत्येतानित्यर्थः । ददाह ॥ अयमपि महोत्पातः ॥

इत्याद्यरिष्टैरशुभोपदेशिभिर्विहन्यमानोऽप्यसुरः पुनः पुनः ।
यदा मदान्धो न गताव्यवर्तताम्बरात्तदाभून्मरुतां सरस्वती॥३२

इत्याद्येति ॥ मदान्धोऽसुरस्तारकोऽशुभोपदेशिभिरमङ्गलसूचकैरित्याद्यरिष्टैः पूर्वोक्तमहोत्पातैः पुनःपुनर्विहन्यमानोऽपि विघ्नितः क्रियमाणोऽपि यदा गताद्गमनात् ॥ भावे निष्ठा ॥ न व्यवर्तत न निवृत्तः । तदाम्बराद्व्योम्नः सकाशान्मरुतां देवानां सरस्वती वाण्यभूत् ॥

मदान्ध मा गा भुजदण्डचण्डिमावलेपतो मन्मथहन्तृसूनुना ।
सुरैः सनाथेन पुरंदरादिभिः समं समन्तात्समरं विजित्वरैः॥३३॥

मदान्धेति ॥ भो मदान्ध, भुजदण्डयोश्चण्डिमा प्रचण्डत्वं तेन योऽवलेपो गर्वः ॥ "अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च" इति मेदिनी । विभक्ति ॥ तस्मात् ॥ पञ्चम्यास्तसिल् ॥ हेत्वर्थे पञ्चमी ॥ विजित्वरैर्जयनशीलैः पुरंदरादिभिः सुरैः समन्तात्परितः सनाथेन सहितेन मन्मथहन्तृसूनुना गिरिपुत्रेण समं सह समरं युद्धम् । कर्तुमिति शेषः । मा गा मा याहि ॥

अथ "गुहः—" इत्यादिभिः षड्भिः कुमारविषये तारककर्तृकमपराजितत्वमेव दर्शयति—

गुहोऽसुरैः षड्दिनजातमात्रको निदाघधामेव निशातमोभरैः ।
विपद्यते नाभिमुखो हि संगरे कुतस्त्वया तस्य समं विरोधिता॥३४

अथ गुहेति ॥ भो मदान्ध, संगरे युद्धेऽभिमुखः संमुखः षड्दिनानि जातानि व्यतीतानि यस्य । जन्मदिनादारभ्यातिक्रान्तषड्दिनमात्र इत्यर्थः । गुहः सेनानीः ॥ "गुहः षाण्मातुरे गुहे" इति मेदिनी ॥ असुरैर्दैत्यैः ॥ कर्तृभिः ॥ निशातमोभरैः गाढध्वान्तसमूहैर्निदाघधामा उष्णांशुः सूर्य इव न हि नैव विपद्यते विहन्यते ।

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible]
५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible]
९ [illegible] १० [illegible] ११ [illegible] १२ [illegible]

पिति" इति मेदिनी ॥ अत एव भावि भविष्यच्छिरोनिकृन्तनं मस्तकच्छेदनं विजानता बुध्यमानेन तस्य तारकस्य मौलिना किरीटेन ॥ "मौलिः किरीटे शृङ्गारे धम्मिल्ले द्रुमचूडयोः" इति विश्वः ॥ शोकाद्धेतोर्मुहुर्गलद्भिर्निःसरद्भिस्तरलैः श्चलैः ॥ "तरले चञ्चले चिह्ने हारमध्यमणावपि" इति विश्वः ॥ मुक्ताफलान्येव बाष्पबिन्दवोऽश्रुबिन्दवः ॥ "बिन्दुस्तु दन्तनाले स्यात्तथा वेदिर्गविप्रुषोः" इति विश्वः ॥ तैः कृत्वालंतरामतिशयपर्याप्तं यथा तथा ॥ "अलं भूषणपर्याप्तिवारणेषु निरर्थके" इति विश्वः ॥ अरोदीव रुदितमिवेत्युत्प्रेक्षा ॥ मुकुटखचितमणिनिचयसाहसिकभूपतनरूप उत्पातोऽयमिति भावः ॥

निवार्यमाणैरभितोऽनुयायिभिर्ग्रहीतुकामैरिव तं मुहुर्मुहुः ।
अपाति गृध्रैरभि मौलिमाकुलैर्भविष्यदेतन्मरणोपदेशिभिः॥२९

निवार्यमाणैरिति ॥ भविष्यत एतस्य तारकस्य मरणमुपदिशन्ति बोधयन्ति तथाभूतैः । तथाकुलैर्भक्षणक्रियासंभ्रमितैर्गृध्रैः पक्षिविशेषैः ॥ "गृध्रः खगान्तरे गृध्री वाच्यवच्चाथ लुब्धके" इति विश्वः ॥ अभितः सर्वतोऽनुयायिभिरनुगच्छद्भिः । अत एवोत्प्रेक्षते—मुहुर्मुहुरनेकवेलं निवार्यमाणैरपि तं ग्रहीतुकामैरिव मौलिं किरीटमभि संमुखमपाति पतितम् ॥ भावे लुङ् ॥ पुनःपुनर्निवार्यमाणा अपि तद्बुभुक्षया मौलिमुद्दिश्यैव पेतुरिति भावः ॥ अयमपि महोत्पातः ॥

सद्योनिकृत्ताञ्जनसोदरद्युतिं फणामणिप्रज्वलदंशुमण्डलम् ।
निर्यद्विषोल्कानलगर्भफूत्कृतं ध्वजे जनस्तस्य महाहिमैक्षत॥३०

सद्य इति ॥ जनो लोकस्तस्य तारकस्य ध्वजे । तदुपरीत्यर्थः ॥ सद्योनिकृत्तस्य तत्कालपातितस्याञ्जनस्य कज्जलस्य सोदरा समाना द्युतिः शोभा यस्य । अञ्जनसदृशश्यामलमित्यर्थः । तथा फणामणिभिः फणरत्नैः प्रज्वलदधिकीभवदंशुमण्डलं यस्य । निर्यद्विषमेवोल्कानलः स गर्भे मध्ये येषां तादृशानि फूत्कृतानि यस्य तथाभूतं महाहिं महान्तं सर्पमैक्षत ददर्श ॥ अयमपि महोत्पातः ॥

रथाश्वकेशावलिकर्णचामरं ददाह बाणासनबाणबाणधीन् ।
अकाण्डतश्चण्डतरो हुताशनस्तस्यातनुस्यन्दनधूर्यगोचरः॥३१॥

रथेति ॥ अकाण्डतोऽसमये ॥ सार्वविभक्तिकस्तसिल् ॥ तस्य तारकस्य संबन्धी योऽतनुस्यन्दनो महान्रथस्तस्य धुर्योऽग्रभागस्तस्य गोचरः । तद्गत इत्यर्थः ।

१ अभिमौलि चाकुलैः. २ वरमानुच्छायमपायदर्शिभिः. ३ सोदरं क्वचित्. ४ उल्कानल. ५ रथस्य. ६ चामरान्. ७ बालवालधीन. ८ अतण्डतः. ९ धुर्यगोचरः.

चण्डतरोऽतिशयप्रचण्डो हुताशनोऽग्निः । रथाश्वसंबन्धिनी या केशावलिः कर्णचामराणि च तेषां समाहारस्तत् ॥ प्राण्यङ्गत्वादेकवद्भावः ॥ तथा बाणासनं बाणक्षेपक्रियासाधनम् ॥ करणे ल्युट् ॥ धनुर्बाणाः । बाणधिस्तूणीरश्चेत्येतानित्यर्थः । ददाह ॥ अयमपि महोत्पातः ॥

इत्याद्यरिष्टैरशुभोपदेशिभिर्विहन्यमानोऽप्यसुरः पुनः पुनः ।
यदा मदान्धो न गताद्व्यवर्तताम्बरात्तदाभून्मरुतां सरस्वती॥३२

इत्याद्येति ॥ मदान्धोऽसुरस्तारकोऽशुभोपदेशिभिरमङ्गलसूचकैरित्याद्यरिष्टैः पूर्वोक्तमहोत्पातैः पुनःपुनर्विहन्यमानोऽपि विघ्नितः क्रियमाणोऽपि यदा गताद्गमनात् ॥ भावे निष्ठा ॥ न व्यवर्तत न निवृत्तः । तदाम्बराद्व्योम्नः सकाशान्मरुतां देवानां सरस्वती वाण्यभूत् ॥

मदान्ध मा गा भुजदण्डचण्डिमावलेपतो मन्मथहन्तृसूनुना ।
सुरैः सनाथेन पुरंदरादिभिः समं समन्तात्समरं विजित्वरैः॥३३॥

मदान्धेति ॥ भो मदान्ध, भुजदण्डयोश्चण्डिमा प्रचण्डत्वं तेन योऽवलेपो गर्वः ॥ "अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च" इति मेदिनी । तेन हेतुना ॥ समरात् ॥ पञ्चम्यास्तसिल् ॥ हेत्वर्थे पञ्चमी ॥ विजितवरैर्जयनशीलैः पुरंदरादिभिः सुरैः समन्तात्परितः सनाथेन सहितेन मन्मथहन्तृसूनुना शिवपुत्रेण समं सह समरं युद्धम् । कर्तुमिति शेषः । मा गा मा यासीः ॥

अथ "गुहः–" इत्यादिभिश्चतुर्भिः कुमारविषये तारककर्तृकगमनानौचित्यमेव दर्शयति—

गुहोऽसुरः षड्दिनजातमात्रको निदाघधामेव निशातमोभरैः ।
विपद्यते नाभिमुखो हि संगरे कुतस्त्वया तस्य समं विरोधिता॥३४

अथ गुहेति ॥ भो मदान्ध, संगरे युद्धेऽभिमुखः संमुखः षड्दिनानि मात्रा [illegible] । जन्मदिनादारभ्य [illegible] । गुहः सेनानीः॥ "गुहः षाण्मातुरे गुहे" इति मेदिनी ॥ [illegible] निदाघधामा सूर्य इव न हि नैव विपद्यते विपन्नो भवति ।

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible]

त्वया समं सह तस्य संबन्धिनी विरोधिता वैरं कुतः कारणात्स्यात् । कुमारविषयकभवत्कर्तृकवैरनिमित्तसमरोऽनुचित एवेति भावः ॥

अभ्रंलिहैः शृङ्गशतैः समन्ततो दिक्चक्रवालैः स्थगितस्य भूभृतः।
क्रौञ्चस्य रन्ध्रं विशिखेन निर्ममे येनाहवस्तस्य सह त्वया कुतः॥३५

अभ्रंलिहैरिति ॥ भो मदान्ध, येन सेनान्या ॥ कर्त्रा ॥ अभ्रंलिहैराकाशस्पृग्भिः शृङ्गशतैः सानुशतैः । तथा दिक्चक्रवालैः काष्ठामण्डलैः ॥ "चक्रवालं तु मण्डलम्" इत्यमरः ॥ समन्ततः परितः स्थगितस्याच्छादितस्य क्रौञ्चस्य क्रौञ्चसंज्ञकस्य भूभृतः पर्वतस्य संबन्धि रन्ध्रं छिद्रम् ॥ जातावेकवचनम् ॥ विशिखेन बाणेन निर्ममे निर्मितम् ॥ कर्मणि लिट् ॥ तस्याहवः सङ्ग्रामस्त्वया सह कुतः कारणात्स्यात् । अपि तु नेदमुचितमिति भावः ॥

अथ युग्मेनाह—

लब्ध्वा धनुर्वेदमनङ्गविद्विषस्त्रिःसप्तकृत्वः समरे महीभुजाम्।
कृत्वाभिषेकं रुधिराम्बुभिर्घनैः स्वक्रोधवह्निं शमयांबभूव यः ३६

लब्ध्वेति ॥ यो जामदग्न्यः परशुरामोऽनङ्गविद्विषो हरसकाशाद्धनुर्वेदं लब्ध्वा प्राप्य । अधीत्येति यावत् । अतः समरे युधि महीभुजां राज्ञां संबन्धिभी रुधिराम्बुभिः शोणितजलैस्त्रिःसप्तकृत्वस्त्रिगुणसप्तवारम् । एकविंशतिवारमिति यावत् अभिषेकं स्नानं कृत्वा स्वक्रोधवह्निमात्मीयकोपाग्निं शमयांबभूव । एकविंशतिवारं क्षत्रियान्हत्वा शान्तोऽभूदिति भावः ॥

न जामदग्न्यः क्षयकालरात्रिकृत्स क्षत्रियाणां समराय वल्गति।
येन त्रिलोकीसुभटेन तेन ते कुतोऽवकाशः सह विग्रहग्रहे॥३७॥

नेति ॥ क्षत्रियाणाम् ॥ "क्षत्राद्घः" इति घप्रत्ययः । "आयनेयी–" इति तस्येयादेशः ॥ क्षयसंबन्धिनीं कालरात्रिं करोति यः स जामदग्न्यो जमदग्नेरपत्यं रामस्त्रिलोक्यां सुभटेन सुतरां योद्धा येन सेनान्या सहसमराय समरं कर्तुं न वल्गति न चलति । नैवोद्युङ्क्त इत्यर्थः । तेन सकलराजकुलजियत्सङ्ग्रामविमीपकेण सेनान्या सह तव त्वत्कर्तृके विग्रहग्रहे रणग्रहणे ॥ "विग्रहः कायविस्तारविभागे ना रणे स्त्रियाम्" इति मेदिनी ॥ कुतः कस्मादवकाशोऽवसरः स्यात् । अपि तु न स्यादिति काका व्याख्येयम् । अतः सर्वथामुना सह त्वया न योद्धव्यं किंतु निवर्तनीयमेवेति भावः ॥

---

१ दिक्चक्रवालस्थगितस्य; दिक्चक्रवालस्थगतस्य. २ स्वशरैर्विनिर्ममे येनाहवे तेन कुतः समो भवान्. ३ कृताभिषेकः. ४ निलकेन. ५ अवकाशो; अवकेशी. ६ विग्रहमदः.

ननु निवर्तने पुनरपि वधशङ्केति चेत्तत्राह—

त्यजाशु गर्वं मदमूढ मा स्म गाः स्मरारिसूनोर्वरशक्तिगोचरम्।
तमेव नूनं शरणं व्रजाधुना जगत्सुवीरं स चिराय जीव तत्॥३८

त्यजेति ॥ भो मदमूढ उन्मादमूर्ख, आशु शीघ्रं गर्वमभिमानं त्यज । स्मरारिसूनोः सेनान्याः संबन्धिनी या वरा श्रेष्ठा शक्तिरायुधं तस्या गोचरं विषयं मा स्म गा मा स्म याहि ॥ तर्हि किं कर्तव्यमित्याह— अधुनेदानीं नूनमेव निश्चयेनैव ॥ "नूनमवश्यं निश्चये द्वयम्" इत्यमरः ॥ शरणं रक्षितारम् ॥ "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी ॥ तं जगत्सुवीरं सेनान्यं व्रज गच्छ। तत्तस्माद्गमनाद्धेतोः स त्वं चिराय जीव बहुकालं प्राणान्धारय । कुमारगमनं विना न तवान्यज्जीवातुरिति भावः ॥

श्रुत्वेति वाचं वियतो गरीयसीं क्रोधादहंकारपरो महासुरः।
प्रकम्पिताशेषजगत्त्रयोऽपि सन्नकम्पतोच्चैर्दिवमभ्यधाच्च सः॥३९

श्रुत्वेति ॥ वियत आकाशस्येत्येवंभूतां गरीयसीमतिशयगुर्वीं वाचं श्रुत्वा क्रोधाद्धेतोरहंकारेऽभिमाने ॥ "गर्वोऽभिमानोऽहंकारः" इत्यमरः ॥ परः सक्तः ॥ "परः श्रेष्ठादिदूरान्योत्तरे क्लीबं तु केवले" इति मेदिनी ॥ आदिशब्दसंगृहीतत्वेन सक्तिवाचकत्वं विवेचनीयम्। सोऽसुरस्तारकः प्रकर्षेण कम्पितं वेपितमशेषं समस्तं जगतां त्रयं येन तथाभूतः सन्नप्यकम्पत चकम्पे। भारत्या अत्यासन्नत्वादिति भावः। अथ च दिवं स्वर्गमुच्चैरुच्चैःस्वरेणाभ्यधादचकथत् ॥

अथ "किम्" इत्यादिभिस्त्रिभिस्तदुक्तिमाह—

किं ब्रूथ रे व्योमचरा महासुराः स्मरारिसूनुप्रतिपक्षवर्तिनः।
मदीयबाणव्रणवेदना हि साधुना कथं विस्मृतिगोचरीकृता॥४०

किमिति ॥ रे व्योमचराः। रे इति नीचसंबोधने। महासुरा महान्तः सुरा यूयं स्मरारिसूनोः कुमारस्य प्रतिपक्षे कोटौ वर्तन्ते तथाभूताः सन्तः किं ब्रूथ वदथ। नेदं वाच्यमिति ध्वनिः। ननु वादे त्वया किं कृतमित्याह—सा पूर्वतरा मदीयानां बाणानां संबन्धिनां व्रणानां रन्ध्राणां वेदना पीडाधुना इदानीमेव कथं केन प्रकारेण विस्मृतिगोचरीकृता विस्मरणविषयीकृता। अपि त्विदानीमपि सैव स्मर्तव्या, अग्रे भोक्ष्यमाणत्वात् ॥

---

१ दर्पम्. २ जगत्प्रवीरम्. ३ सुचिराय. ४ गरीयसीम्. ५ सः. ६ नाकम्पत; प्राकम्पत. ७ अभ्यधात्ततः; अभ्यगात्ततः. ८ हे. ९ मखारि. १० वेदनामहोऽधुनैव. ११ विस्मृत्य गताः स्वपृष्ठतः.

त्वया समं सह तस्य संबन्धिनी विरोधिता वैरं कुतः कारणात्स्यात् । कुमारीयकभवत्कृतवैरनिमित्तसमरोऽनुचित एवेति भावः ॥

अभ्रंलिहैः शृङ्गशतैः समन्ततो दिक्चक्रवालैः स्थगितस्य भूभृतः।
क्रौञ्चस्य रन्ध्रं विशिखेन निर्ममे येनाहवस्तस्य सह त्वया कुतः३५

अभ्रंलिहैरिति ॥ भो मदान्ध, येन सेनान्या ॥ कर्त्रा ॥ अभ्रंलिहैराशस्पृग्भिः शृङ्गशतैः सानुशतैः । तथा दिक्चक्रवालैः काष्ठामण्डलैः ॥ "चक्रवालं तु मण्डलम्" इत्यमरः ॥ समन्ततः परितः स्थगितस्याच्छादितस्य क्रौञ्चस्य क्रौञ्चसंज्ञकस्य भूभृतः पर्वतस्य संबन्धि रन्ध्रं छिद्रम् ॥ जातावेकवचनम् ॥ विशिखेन बाणेन निर्ममे निर्मितम् ॥ कर्मणि लिट् ॥ तस्याहवः सङ्ग्रामस्त्वया सह कुतः कारणात्स्यात् । अपि तु नेदमुचितमिति भावः ॥

अथ युग्मेनाह—

लब्ध्वा धनुर्वेदमनङ्गविद्विषस्त्रिःसप्तकृत्वः समरे महीभुजाम्।
कृत्वाभिषेकं रुधिराम्बुभिर्घनैः स्वक्रोधवह्निं शमयांबभूव यः ३६

लब्ध्वेति ॥ यो जामदग्न्यः परशुरामोऽनङ्गविद्विषो हरसकाशाद्धनुर्वेदं लब्ध्वा प्राप्य । अधीत्येति यावत् । अतः समरे युधि महीभुजां राज्ञां संबन्धिभी रुधिराम्बुभिः शोणितजलैस्त्रिःसप्तकृत्वस्त्रिगुणसप्तवारम् । एकविंशतिवारमिति यावत् । अभिषेकं स्नानं कृत्वा स्वक्रोधवह्निमात्मीयकोपाग्निं शमयांबभूव । एकविंशतिवारं क्षत्रियान्हत्वा शान्तोऽभूदिति भावः ॥

कटुस्वरैः प्रालपथाम्बरस्थिताः शिशोर्बलात्षड्दिनजातकस्य किम्।
श्वानः प्रमत्ता इव कार्तिके निशि स्वैरं वनान्ते मृगधूर्तका इव॥४१॥

कटुस्वरैरिति ॥ भो देवाः, यूयमम्बरस्थिता आकाशवर्तिनः सन्तः षड्दिनजातकस्य षड्दिनजन्मनः शिशोर्बालस्य बलाद्वीर्याद्धेतोः कार्तिके बाहुले मासि प्रमत्ता उन्मत्ताः श्वान इव निशि वनान्ते वनमध्ये मृगधूर्तका मृगा एव धूर्तकास्त इव किं किं मालपथ प्रलापं कुरुथ। अपि तु मदपेक्षया निर्वीर्यैर्भवद्भिः प्रलापो न विधेय इति भावः ॥

सङ्गेन वो गर्भतपस्विनः शिशुर्वराक एषोऽन्तमवाप्स्यति ध्रुवम्।
अतस्करस्तस्करसङ्गतो यथा तद्वो निहन्मि प्रथमं ततोऽप्यमुम्४२

सङ्गेनेति ॥ भो देवाः, वो युष्माकं सङ्गेन संबन्धेन निमित्तेन वराकोऽतिकृपणत्वाच्छोचनीयः ॥ " वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत् " इति मेदिनी ॥ एष पुरोवर्ती गर्भतपस्विनः, अत्र गर्भशब्देन गर्भत्वं तदस्यास्तीति गर्भः ॥ अर्शआद्यच् ॥ ततो गर्भत्ववानिति निष्पन्नम् ॥ गर्भत्वं चात्र बालत्वम् ॥ " गर्भो भ्रूणेऽर्भके कुक्षौ " इति मेदिनी ॥ एवं च बाल इति निष्कर्षः। स चासौ तपस्वी च। बालत्वेऽपि तपस्वित्वकथनाद्वार्धक्ये त्वर्थात्सिद्धम्। एवं च बालत्वमारभ्य तपस्वित्वेन निष्किंचनस्येति तात्पर्यार्थः। अथवा गर्भत्वादिति ल्यब्लोपनिका या पञ्चमी तदन्तेन तपस्विशब्दस्य समासो विधेयः। गर्भत्वं बालत्वमारभ्य तपस्वीत्यर्थः। तथाभूतस्य शिवस्य शिशुर्बालः कुमारः। तस्करसङ्गतश्चौरसङ्गेनातस्करो यथा चौर इव। ध्रुवं निश्चयेनान्तं मरणमवाप्स्यति प्राप्स्यति। तत्तस्माद्वो युष्मान्प्रथमं प्राक् निहन्मि ॥ " वर्तमानसामीप्ये वर्तमानवद्वा " इति भविष्यकालेऽपि वर्तमानप्रयोगः ॥ ततो भवद्धननानन्तरममुं कुमारमपि निहन्मि निहनिष्यामि ॥

इतीरयत्युग्रतरं महासुरे महाकृपाणं कलयत्यलं क्रुधा।
परस्परोत्पीडितजानवो भयान्नभश्चरा दूरतरं विदुद्रुवुः ॥ ४३ ॥

इतीति ॥ इति पूर्वोक्तमीरयति वदति महासुरे तारके क्रुधा हेतुनोग्रतरमत्यन्तभयानकं महाकृपाणं महान्तं खड्गम्। अलं पर्याप्तत्वेन। अनेन प्रथमं स्पर्शमात्र एवेति व्यज्यते ॥ " अलं भूषणपर्याप्तिवारणेषु निरर्थके " इति विश्वः ॥

१ कटुस्वरैरारटथ; कटुस्वरैरीरयथ. २ प्रवृत्ताः. ३ कार्त्तिकीनिशि. ४ गर्भतपस्विनः. ५ अतस्करम्. ६. तु ७ ध्रुवम्.

जे । वीणादिवादनोपायेऽप्येकदेशे गृहस्य च" इति विश्वः ॥ अत्र गृह
क्रोण इत्यविवक्षितम् । किंत्वन्यसाधारणत्वेन भक्त्व इष्टसिद्ध्यर्थमुपलक्षित
गमनीय इत्यलम् ॥ भटा योद्धारो मम्रुः समाविविशुः ॥

द्विपद्दलत्रासविभीपिताश्चमूर्दिवौकसामन्धकशत्रुनन्दनः ।
अपश्यदुद्दिश्य महारणोत्सवं प्रसादपीयूपधरेण चक्षुपा ॥५

द्विपदिति ॥ महारणोत्सवमुद्दिश्य स्थितोऽन्धकशत्रुनन्दनः कार्तिकेयो
पद्दलत्रासेन तारकसैन्यशासनेन विभीपिता भीता दिवौकसां देवानां चमू
नाः ॥ कर्म ॥ प्रसादोऽनुग्रहः स एव पीयूपममृतं तद्धरति तथाभूतेन चक्षु
पश्यद्ददर्श । अनेन यूयं मा भैष्ट, प्रसन्ना भवत, निःशङ्कं युध्यध्वं चेति व्यज्य

उत्साहिताः शक्तिधरस्य दर्शनान्मृधे महेन्द्रप्रमुखा मखाशन
अहं मृधे जेतुमरीनरीरमन्न कस्य वीर्याय वरस्य संगतिः॥५

उत्साहिता इति ॥ शक्तिधरस्यायुधविशेषधारिणः ॥ "शक्तिर्बले प्रभा
शक्तिः प्रहरणान्तरे" इति विश्वः ॥ अत एव मृधे सङ्ग्ये ॥ "मृधमास्क
सत्यम्" इत्यमरः॥ तस्य कुमारस्य दर्शनाद्धेतोरुत्साहिता उत्साहं प्राप्ता महेन्द्रप्र
इन्द्रपूर्वा मखाशना यज्ञहविर्भोक्तारो देवा मृधे संगरे "अहमेवारीञ्शत्रूञ्जेतुं प्र
ऽस्मि नान्यः" इति वदन्तः सन्तोऽरीरमन्रेमिरे ॥ तथाहि । वरस्य श्रेष्ठस्य सं
संबन्धः कस्य पुरुपस्य वीर्याय वीर्यं कर्तुं न भवति । अपि तु सर्वस्यापीत्यर्थः
तवीर्यस्य वीर्यकरणे महदाश्रय एव निदानं नान्यदिति काका ध्वन्यते ॥

परस्परं वज्रधरस्य सैनिका द्विपोऽपि योद्धुं स्वकरोद्धृतायुध
वैतालिकश्रावितसारविक्रमाभिधानमीयुर्विजयैपिणो रणे ॥५

परस्परमिति ॥ रणे युद्धे विजयैपिणो विजयं प्राप्तुमिच्छवः । अत एव
युद्धं कर्तुं स्वकरैरात्मीयपाणिभिरुद्धृतानि गृहीतान्यायुधानि खड्गादीनि यैस्त
भूता वज्रधरस्येन्द्रस्य द्विपोऽपि तारकस्य च । अपिरत्र समुच्चयार्थः ॥ "
संभावनाप्रश्नशङ्कागर्हासमुच्चये" इति विश्वः ॥ सैनिकाः सेनाचराः ॥ "च
इति टक् ॥ वैतालिकैर्बन्दिभिः श्रावितान्याकर्णितानि सार उत्कर्षो विक्रमोऽभि

१ विपद्दलो दलन्. २ महाहवोत्सवम्; महाहवे रणम्. ३ हर्पादितः. ४ मुखादितः. ५
हूत; भवन्तः. ६ स्वकरोद्धृतायुधाः; स्वगोत्रद्धृतायुधाः. ७ वैतालिकैः श्रावितसारविक्रमाभि

तंतो महेन्द्रस्य चराश्चमूचरा रणान्तलीलारभसेन भूयसा।
पुरः प्रचेलुर्मनसोऽतिवेगिनो युयुत्सुभिः किं समरे विलम्ब्यते ४७

तत इति ॥ ततोऽनन्तरं मनसः सकाशादप्यतिवेगिनोऽत्यन्तजववन्तः । तथा भूयसातिशयेन रणान्ते सङ्ग्राममध्ये या लीला विलासः । विलासोऽत्र समराङ्गणाधिकरणकमात्मीयभुजदण्डगतपराक्रमचमत्कृतिदर्शनम् । तत्र रभसेन वेगेन ॥ "लीलां विदुः केलिविलासखेलाश्टङ्गारभावप्रभवक्रियासु" इति विश्वः ॥ चम्वां सेनायां चरन्तीति विग्रहे "चरेष्टः" इति टप्रत्ययः ॥ तथाभूता महेन्द्रस्येन्द्रस्य चराश्चाराः । दूता इति यावत् ॥ "चरो द्यूतप्रबन्धे स्याच्चारजङ्गमयोश्चले" इति विश्वः ॥ समरे सङ्ग्रामे युयुत्सुभिर्योद्धुमिच्छुभिः । भवद्भिरित्यर्थः । किं विलम्ब्यते किं विलम्बः क्रियते । अपि तु सत्वरमेव युध्यतामिति प्रतिपक्षान् । वक्तुमित्यपि शेषः । पुरोऽग्रे प्रचेलुः ॥

पुरःस्थितं देवरिपोश्चमूचरा बलद्विपः सैन्यसमुद्रमभ्ययुः ।
भुजं समुत्क्षिप्य परेभ्य आत्मनोऽभिधानमुच्चैरभितो न्यवेदयन्॥

पुर इति ॥ देवरिपोस्तारकस्य चमूचराः सेनाचराः पुरस्थितमग्रस्थितं बलद्विष इन्द्रस्य संबन्धिनं सैन्यसमुद्रं सेनासागरमभ्ययुः संमुखत्वेन जग्मुः । अथ चाभितः संमुखम् ॥ "अभितः शीघ्रसाकल्यसंमुखोभयतोऽन्तिके" इति विश्वः ॥ भुजं बाहुं समुत्क्षिप्योत्थाप्य । आत्मनोऽभिधानं नाम ॥ "आख्याह्वे अभिधानं च नामधेयं च नाम च" इत्यमरः ॥ उच्चैः स्वरेण परेभ्यः शत्रुभ्यो न्यवेदयन्वयममुकनामानो वयममुकनामान इति निवेदितवन्तः ॥

पुरोगतं दैत्यचमूमहार्णवं दृष्ट्वा परं चुक्षुभिरे महासुराः ।
पुरारिसूनोर्नयनैककोणके मेमुर्भटा तस्य रणेऽवहेलया ॥४९॥

पुर इति ॥ महासुरा महान्तः सुरा इन्द्रादयः पुरोगतमग्रे प्राप्तं दैत्यस्य तारकस्य चमूरेव महानर्णवः समुद्रस्तं दृष्ट्वा परं केवलम् ॥ "परमव्ययमिच्छन्ति" इति विश्वः ॥ चुक्षुभिरे संचेलुः । विव्यथुरिति यावत् । रणे संगरेऽवहेलया मदपेक्षया कियं वराकिका सेनेत्यनादरेणोपलक्षितस्य तस्य पुरारिसूनोः शिवपुत्रस्य नयनैककोणके नेत्रैकदेश एव ॥ "कोणो वादनभेदे स्यात्कोणोऽस्त्री लगुडेऽर्के

१ महेन्द्रानुचराः; सुरेन्द्रस्य चराः. २ दूतवराः. ३ सुरद्विषः. ४ अभ्ययुः. ५ सदैवमनाननः. ६ अभितः. ७ अभितस्तः सुराः; अभितस्ततः सु. ८ स्मरारिसूनोः. ९ सभी. १० महा; सुराः. ११ भाविते दिवेहन्न; भाविरणेऽवहेलया.

जे। वीणादिवादनोपायेऽप्येकदेशे गृहस्य च" इति विश्वः ॥ अत्र गृहस्यैव कोण इत्यविवक्षितम् । किंत्वन्यसाधारणत्वेन प्रकृत इष्टसिद्ध्यर्थमुपलक्षितत्वेन गमनीय इत्यलम् ॥ भटा योद्धारो मम्रुः समाविविशुः ॥

द्विपद्दलत्रासविभीपिताश्चमूर्दिवौकसामन्धकशत्रुनन्दनः ।
अपश्यदुद्दिश्य महारणोत्सवं प्रसादपीयूषधरेण चक्षुषा ॥५०॥

द्विपदिति ॥ महारणोत्सवमुद्दिश्य स्थितोऽन्धकशत्रुनन्दनः कार्तिकेयो द्विपद्दलत्रासेन तारकसैन्यशासनेन विभीपिता भीता दिवौकसां देवानां चमूः सेनाः ॥ कर्म ॥ प्रसादोऽनुग्रहः स एव पीयूषममृतं तद्धरति तथाभूतेन चक्षुषापश्यद्ददर्श । अनेन यूयं मा भैष्ट, प्रसन्ना भवत, निःशङ्कं युध्यध्वं चेति व्यज्यते ॥

उत्साहिताः शक्तिधरस्य दर्शनान्मृधे महेन्द्रप्रमुखा मखाशनाः।
अहं मृधे जेतुमरीनरीरमन्न कस्य वीर्याय वरस्य संगतिः॥५१॥

उत्साहिता इति ॥ शक्तिधरस्यायुधविशेषधारिणः ॥ "शक्तिर्बले प्रभावादौ शक्तिः प्रहरणान्तरे" इति विश्वः ॥ अत एव मृधे सङ्ख्ये ॥ "मृधमास्कन्दनं सङ्ख्यम्" इत्यमरः॥ तस्य कुमारस्य दर्शनाद्धेतोरुत्साहिता उत्साहं प्राप्ता महेन्द्रप्रमुखा इन्द्रपूर्वा मखाशना यज्ञहविर्भोक्तारो देवा मृधे संगरे " अहमेवारीञ्शत्रूञ्जेतुं समर्थोऽस्मि नान्यः " इति वदन्तः सन्तोऽरीरमन्रेमिरे ॥ तथाहि । वरस्य श्रेष्ठस्य संगतिः संबन्धः कस्य पुरुषस्य वीर्याय वीर्यं कर्तुं न भवति। अपि तु सर्वस्यापीत्यर्थः । गतवीर्यस्य वीर्यकरणे महदाश्रय एव निदानं नान्यदिति काका ध्वन्यते ॥

परस्परं वज्रधरस्य सैनिका द्विपोऽपि योद्धुं स्वकरोद्धृतायुधाः।
वैतालिकश्रावितताराविक्रमाभिधानमीयुर्विजयैषिणो रणे ॥५२॥

परस्परमिति ॥ रणे युद्धे विजयैषिणो विजयं प्राप्तुमिच्छवः। अत एव योद्धुं युद्धं कर्तुं स्वकरैरात्मीयपाणिभिरुद्धृतानि गृहीतान्यायुधानि गदादीनि यैस्तथाभूता वज्रधरस्येन्द्रस्य द्विपोऽपि तारकस्य च । अपिरत्र समुच्चयार्थः ॥ "अपि संभावनाप्रश्नगर्हासमुच्चये" इति विश्वः ॥ सैनिकाः सेनाचराः ॥ "चरति" इति ठक् ॥ वैतालिकैर्बन्दिभिः श्रावितान्याकर्णितानि तार उच्चैर्विक्रमोऽभिधा-

1 [illegible] 2 महारणोत्सवम्; महाहवे रणम्. 3 [illegible] 4 [illegible] 5 [illegible] 6 स्वकरोद्धृतायुधाः; स्वकरोद्यतायुधाः. 7 वैतालिकैः श्रावितताराविक्रमाभिधानम्; वैतालिकैः श्रावितवीरविक्रमाः [illegible]; वैतालिकश्रावितताराविक्रमाभिधानम्.

ततो महेन्द्रस्य चराश्चमूचरा रणान्तलीलारभसेन भूयसा।
पुरः प्रचेलुर्मनसोऽतिवेगिनो युयुत्सुभिः किं समरे विलम्ब्यते॥२७॥

तत इति ॥ ततोऽनन्तरं मनसः सकाशादप्यतिवेगिनोऽत्यन्तजववन्तः। तथा भूयसातिशयेन रणान्ते सङ्ग्राममध्ये या लीला विलासः। विलासोऽत्र समराङ्गणाधिकरणकमात्मीयभुजदण्डगतपराक्रमचमत्कृतिदर्शनम्। तत्र रभसेन वेगेन ॥ "लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु" इति विश्वः॥ चम्वां सेनायां चरन्तीति विग्रहे "चरेष्टः" इति टप्रत्ययः ॥ तथाभूता महेन्द्रस्येन्द्रस्य चराश्चाराः। दूता इति यावत् ॥ "चरो द्यूतप्रबन्धे स्याच्चारजङ्गमयोश्चले" इति विश्वः ॥ समरे सङ्ग्रामे युयुत्सुभिर्योद्धुमिच्छुभिः। भवद्भिरित्यर्थः। किं विलम्ब्यते किं विलम्बः क्रियते। अपि तु सत्वरमेव युध्यतामिति प्रतिपक्षान्। वक्तुमित्यपि शेषः। पुरोऽग्रे प्रचेलुः ॥

पुरःस्थितं देवरिपोश्चमूचरा बलद्विषः सैन्यसमुद्रमभ्ययुः।
भुजं समुत्क्षिप्य परेभ्य आत्मनोऽभिधानमुच्चैरभितो न्यवेदयन्॥

पुर इति ॥ देवरिपोस्तारकस्य चमूचराः सेनाचराः पुरस्थितमग्रस्थितं बलद्विष इन्द्रस्य संबन्धिनं सैन्यसमुद्रं सेनासागरमभ्ययुः संमुखत्वेन जग्मुः। अथ चाभितः संमुखम् ॥ "अभितः शीघ्रसाकल्यसंमुखोभयतोऽन्तिके" इति विश्वः ॥ भुजं बाहुं समुत्क्षिप्योत्थाप्य। आत्मनोऽभिधानं नाम ॥ "आख्याह्वे अभिधानं च नामधेयं च नाम च" इत्यमरः ॥ उच्चैः स्वरेण परेभ्यः शत्रुभ्यो न्यवेदयन्वयममुकनामानो वयममुकनामान इति निवेदितवन्तः ॥

पुरोगतं दैत्यचमूमहार्णवं दृष्ट्वा परं चुक्षुभिरे महासुराः।
पुरारिसूनोर्नयनैककोणके ममुर्भटास्तस्य रणेऽवहेलया ॥२९॥

पुर इति ॥ महासुरा महान्तः सुरा इन्द्रादयः पुरोगतमग्रे प्राप्तं दैत्यस्य तारकस्य चमूरेव महानर्णवः समुद्रस्तं दृष्ट्वा परं केवलम् ॥ "परमव्ययमिच्छन्ति" इति विश्वः ॥ चुक्षुभिरे संचेलुः। विव्यथुरिति यावत्। रणे संगरेऽवहेलया मदपेक्षया केयं वराकिका सेनेत्यनादरेणोपलक्षितस्य तस्य पुरारिसूनोः शिवपुत्रस्य नयनैककोणके नेत्रैकदेश एव ॥ "कोणो वाद्यप्रभेदे स्यात्कोणोऽस्त्रौ लगुडेऽर्क-

---

१ असुरेन्द्रानुचराः; सुरेन्द्रस्य चराः. २ पुरःसराः. ३ गुरुद्विषः. ४ आययुः. ५ सहेलमात्मनः. ६ अमितः. ७ अखिलाः सुराः; अखिलाः स तु. ८ स्मरारिसूनोः. ... भटाः; पुरः. ११ भाविरणे हि हेलया; भाति रणेऽवहेलया.

षोडशः सर्गः ।

अथान्योन्यं विमुक्तास्त्रशस्त्रजालैर्भयंकरैः ।
युद्धमासीत्सुनासीरसुरारिबलयोर्महत् ॥ १ ॥

अथेति ॥ अथ सुरासुरसंमेलनानन्तरम् । भयंकरैर्भयमुत्पादयद्भिः । अन्योन्यं परस्परं विमुक्तानि महर्तुं विसृष्टान्यस्त्रशस्त्राणां शरादिमोहनादीनां जालानि समूहास्तैः कृत्वा । सुनासीर इन्द्रः, सुरारिस्तारकः, तयोर्बले सैन्ये तयोः ॥ "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः" इति विश्वः ॥ महद्घोरं युद्धं सङ्ग्राम आसीद्बभूव ॥ सर्गेऽस्मिन्नुष्टुप्छन्दः ॥

पत्तिः पत्तिमभीयाय रणाय रथिनं रथी ।
तुरंगस्थं तुरंगस्थो दन्तिस्थं दन्तिनि स्थितः ॥ २ ॥

पत्तिरिति ॥ पत्तिः पादचारी पत्तिं पादचारिणम्, रथी रथारूढो रथिनं रथारूढम्, तुरंगस्थोऽश्ववाहस्तुरंगस्थमश्ववाहम्, दन्तिनि गजे स्थितो दन्तिस्थं गजारोहम्, रणाय रणं कर्तुमभीयाय संमुखमगमत् ॥ अत्र प्रत्येकं क्रियासंबन्धो विधेयः । अन्यथा बहुत्वप्रसङ्गः ॥

युद्धाय धावतां धीरं वीराणामितरेतरम् ।
वैतालिकाः कुलाधीशा नामान्यलमुदाहरन् ॥ ३ ॥

युद्धायेति ॥ इतरेतरं परस्परं युद्धाय युद्धं कर्तुं धीरं गम्भीरं यथा तथा धावतां विद्रवतां वीराणां योद्धृणां नामानि कुलाधीशाः कुलस्वामिनः । कुलप्रदीपा इति यावत् । अनेन स्वात्मविषयाभिमानप्रावीण्यं व्यज्यते । वैतालिका वन्दिनः । अलं भूषणम् । शोभितं यावत् । यथा स्यात्तथोदाहरन्नूचुः । अयममुकसंज्ञको वीरो धावति, अयममुकसंज्ञको वीरो धावतीत्येवमूचुरित्यर्थः । आत्मपराक्रमबोधार्थमिति भावः ॥

पठतां वन्दिवृन्दानां प्रवीरा विक्रमावलीम् ।
क्षणं विलम्ब्य चित्तानि ददुर्युद्धोत्सुकाः पुरः ॥ ४ ॥

---

१ भयौघ. २ भयंकर. ३ रथे. ४ कुलाधीशनामानि. ५ [illegible] वन्दिभिः श्रुत्वा [illegible]

नानि नामानि च यस्मिन्कर्मणि यथा तथा परस्परमन्योन्यमीयुः प्रापुः। मिलुरिति यावत् ॥

संङ्ग्रामं प्रलयाय संनिपततो वेलामतिक्रामतो
वृन्दारासुरसैन्यसागरयुगस्याशेषदिग्व्यापिनः।
कालातिथ्यभुजो बभूव बहलः कोलाहलः क्रोपणः
शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिंभरिः ॥ ५३

सङ्ग्राममिति ॥ प्रलयाय नष्टचेष्टतायै। तां कर्तुमित्यर्थः। सङ्ग्रामं समरं सं पततः समुदितवतः। अन्यत्र प्रलयाय लोकसंहाराय संनिपततो वर्द्धमानस्य। एव वेलां मर्यादाम्। एकत्र न्याय्याचरणम्, अन्यत्रावधिम्। सीमानमिति वत् ॥ "वेला काले च जलधौ तीरे नीरविकारयोः। क्लिष्टरसने रोगे च सी वाचि बुधि स्त्रियाम्" इति विश्वः ॥ अतिक्रामत उल्लङ्घयतः। निर्मर्याद युध्यमानस्य सीमानमुल्लङ्घ्य चलत इत्यर्थः। अत एवाशेषासु दिक्षु व्यापि व्याप्नुवतः। उभयथापि समानमेतत्। तथा कालस्य यमस्य संबन्ध्यातिथ्यम ध्युचितसत्कारं भुनक्ति भोक्ष्यति तथोक्तस्य ॥ "वर्तमानसामीप्ये–" इति ल अन्यत्र कालं कृष्णमातिथ्यमतिथिसत्कारं भुनक्ति भोजयति ॥ अन्तर्भावि जर्थः ॥ प्रलये वर्द्धमानसमुद्रनीरे केवलं तस्यैव वर्तमानत्वात्। वृन्दारकाणां दे नामसुराणां च ये सैन्ये ते एव सागरौ समुद्रौ तयोर्युगस्य युग्मस्य ॥ "युग्मं युगलं युगम्" इत्यमरः ॥ तत्संबन्धी क्रोपणो मुखरः कोलाहलः कलकलो लः। अत एव शैलसंबन्धिनीनामुत्ताला उच्चतालवृक्षसहिता यास्तस्य सैक नि। शृङ्गाणीति यावत्। तासां विघट्टने स्फोटने पटुः समर्थः। अत एव ब्रह्माण्डे स कुक्षिं भरति तथोक्तश्च बभूव ॥ शार्दूलविक्रीडितं वृत्तम्—"सूर्याश्वै मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीनृसिंहभट्टात्मजसमस्तागमधुरंधरश्रीसीतारामकवि-
विरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ
कुमारसंभवे महाकाव्ये सुरासुरसैन्यसंघट्टो नाम पञ्चदशः सर्गः।

---

१ [illegible] २ [illegible] ३ कालातिथ्य[illegible] ४ [illegible]

. सुभटैः शोभनयोद्धृभिर्विसृष्टा विमुक्ताः शरा बाणाः सु-
न्तो मुञ्चन्तः । अत एव भीमा भयानका भुजंगमा इ-
॥ व्यानशिरे व्यापुः ॥ अत्र सुभटकर्तृकविसर्जनव्या-
गाम्भाविताविशिष्टशत्रुविग्रहभेदनं ध्वन्यते । अन्यथा
नक्षितत्वेन व्यापृतेर्व्यर्थत्वमुद्भाव्येत । तेनात्र वस्तुना व-

निर्भिद्य धन्विनां निघ्नतां मिथः ।
मुखा भूमिं प्राविशन्दूरमाशुगाः ॥ ९ ॥

ऽन्योन्यं दूरमतिशयेन निघ्नतां प्रहरतां धन्विनां धनुर्धा-
नं बाढं गाढम् । दृढमिति यावत् । निर्भिद्याप्यशोणितमुखाः
स्यवन्ति मुखान्यग्राणि येषां त आशुगा बाणा भूमिं प्राविशन्प्र-
का अप्यशोणितमुखा इति विरोधाभासालंकारेण बाणानाम-
वस्तुध्वनिः । न च शीघ्रमेव व्यञ्जनीयमिति वाच्यम् । आशुगा
दतत्वात् ॥

र दन्तिनः पूर्वं पातयामासुराशुगाः ।
प्रवरयोधानां भीतानामाहवोत्सवे ॥ १० ॥

॥ आहवोत्सवे संग्रामरूपोत्सवे भीतानां प्रवरयोधानामतिश्रेष्ठ
न आशुगा बाणा दन्तिनो गजानभिद्य भेदयित्वा पूर्वं पातया-
स्स्वयमपि पेतुः ॥ अत्र वाक्यार्थरूपवस्तुना प्राणापहारकं तेषामति-
व्यन्यत इति वस्तुना वस्तुध्वनिः ॥

ज्वलदग्निमुखैर्बाणैर्नीरन्ध्रैरितरेतरम् ।
उच्चैर्वैमानिका व्योम्नि कीर्णे दूरमपासरन् ॥ ११ ॥

दिति ॥ ज्वलदग्निमुखैः प्रज्वलदग्निसदृशाग्रैः । इतरेतरं परस्परं नीर-
वकाशैः । परस्परसंघर्षैरिति भावार्थः । बाणैः शरैः । उच्चैरतिश-
त तथा कीर्णे व्याप्ते व्योम्नि वैमानिका विमानचारिणो देवा विध्यादि-
नामरन्दुद्रुवुः । आत्मशरीरसंबन्धशङ्काकुलत्वादिति भावः ॥

विभिन्नं धन्विनां बाणैर्व्यथार्तमिव विह्वलम् ।
ररास विरसं व्योम श्येनप्रतिरवच्छलात् ॥ १२ ॥

१ दाहद. २ निर्भेद. ३ कीर्णे. ४ स्वर्गैनिव विमन्द; वेस्मत्ता व विमन्द; विमान दर
गे. ५ देवानिरवच्छला; देवानीति चत्वार.

पठतामिति ॥ प्रवीराः प्रकृष्टयोद्धारो विक्रमावलीं पराक्रमसमाहारं पठत स्तुवताम् " साधु पराक्रान्तम्, साधु पराक्रान्तम् " इति वदतां वन्दिवृन्दानां वै तालिकसमूहानां पुरोऽग्रे चित्तानि मनांसि क्षणं विलम्ब्य ददुः । यतो युद्धोत्सु काः समरोत्कण्ठिताः । समरोत्कण्ठितमनोदानाभावो न श्रवणेन्द्रियस्य केवल स्यैवार्थबोधासंभवात् ॥

सङ्ग्रामानन्दवर्धिष्णौ विग्रहे पुलकाञ्चिते ।
आसीत्कवचविच्छेदो वीराणां मिलतां मिथः ॥ ५ ॥

सङ्ग्रामेति ॥ सङ्ग्रामानन्देन समरोत्साहेन वर्धिष्णौ वृद्धिशीले अत एव पु लकाञ्चिते रोमाञ्चव्याप्ते मिथो मिलतां संगच्छमानानां वीराणां योद्धॄणां विग्रहे शरीरे ॥ जातावेकवचनम् ॥ कवचानां वारणानां विच्छेदो विभेद आसीत् ॥

निर्दयं खड्गभिन्नेभ्यः कवचेभ्यः समुत्थितैः ।
आसन्व्योमदिशस्तूलैः पलितैरिव पाण्डुराः ॥ ६ ॥

निर्दयमिति ॥ निर्दयं निष्कृपं खड्गभिन्नेभ्यः करवालविदीर्णेभ्यः कवचेभ्यः सकाशात्समुत्थितैरुड्डयितैस्तूलैः कार्पासैः ॥ "तूलः पिचौ भवेत्तूलं ब्रह्मदारुवि- हायसोः" इति विश्वः ॥ पलितैरिव जराजनितशुक्लत्वैरिव ॥ "पलितं जरसा शौक्ल्यम्" इत्यमरः ॥ व्योमसहिता दिशः पाण्डुराः श्वेता आसन् । उत्प्रेक्षया कवचविच्छेदेऽपि वीराणां युद्धविषयक उत्साहो न विच्छिन्न इति ध्वन्यते । अतोऽलंकारेण वस्तुध्वनिः ॥

खड्गा रुधिरसंलिप्ताश्चण्डांशुकरभासुराः ।
इतस्ततोऽपि वीराणां विद्युतां वैभवं दधुः ॥ ७ ॥

खड्गा इति ॥ रुधिरेण संलिप्ताः । तथेतस्ततश्चण्डांशुकरैः सूर्यकिरणव्यति- करैर्भासुराश्चमत्कुर्वन्तो वीराणां खड्गा विद्युतां तडितां वैभवं सादृश्यं दधुः । तडिल्लु- शुभिर इत्यर्थः ॥ अत्रोपमया खड्गानां वीरकरसंपर्कजनितपरिकम्पचमत्कारकारित्वं ध्वन्यते । अतोऽत्राप्यलंकारेण वस्तुध्वनिः । तथा वीरकरसंपर्कजनितपरिकम्पचम- त्कारकारित्वरूपव्यङ्ग्येन भीतिद्वन्द्वविदलनजनितादिगुणोत्साहवत्त्वं च व्यज्यते ॥

विसृजन्तो मुखैर्ज्वाला भीमा इव भुजंगमाः ।
विसृष्टाः सुभटैः रुष्टैर्व्योम व्यानशिरे शराः ॥ ८ ॥

---

१ दुग्धाद्रि. २ धीरानाद. ३ समुच्चूरोः. ४ स्तूनेः. ५ दीर्णैः. ६ मता:. ७ वैगुण्य; ११. युद्धः. ८ द्रुतैः; द्रुद्धा:. ९ भुजगाः.

ते लेलिहानाः। आस्वादयन्त इत्यर्थः॥ लिहेर्यङन्ताच्छानच्॥ यमस्य जिह्वाभोगा रसनारूपयन्त्राणीव ॥ "आभोगो वरुणच्छत्रे पूर्णतायन्त्रयोरपि" इति विश्वः॥ चकाशिरे दिद्युतिरे ॥

प्रज्वलत्कान्तिचक्राणि चक्राणि वरचक्रिणाम् ।
चण्डांशुमण्डलश्रीणि रणव्योमनि बभ्रमुः ॥ १७ ॥

प्रज्वलदिति ॥ प्रज्वलत्प्रदीप्यमानं कान्तिचक्रं द्युतिमण्डलं येषां तानि । तथा चण्डांशुमण्डलस्य सूर्यमण्डलस्य श्रीरिव श्रीः शोभा येषां तानि । वराः श्रेष्ठा ये चक्रिणो योधास्तेषां संबन्धीनि चक्राण्यायुधविशेषाः ॥ "चक्री गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः । ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि" इति विश्वः॥ रणव्योमनि सङ्ग्रामरूपगगने बभ्रमुः ॥ "वा जृभ्रमुत्रसाम्" इत्येत्वाभ्यासलोपयोर्विकल्पः ॥ अथ व्याख्यानान्तरम्— वरचक्रिणां वराणां वीराणां ये चक्रिणो रथास्तेषां चक्राण्यङ्गानि रणव्योमनि बभ्रमुः ॥ विशेषणद्वयमुभयत्रापि समानम् ॥

केचिद्धीरैः प्रणादैर्वै वीराणामभ्युपेयुषाम् ।
निपेतुः क्षोभतो वाहादपरे मुमुहुर्मदात् ॥ १८ ॥

केचिदिति ॥ अभ्युपेयुषां संमुखमागतवतां वीराणां धीरैर्गम्भीरैः प्रणादैर्गर्जितैः केचिद्वीराः क्षोभतश्चित्तसंचलनाद्धेतोर्वाहादश्वान्निपेतुर्मुमूर्छुः । अपरे केचिन्मदाद्गर्वान्मुमुहुः । चेतनाविरहिता बभूवुरित्यर्थः ॥

कश्चिदभ्यागते वीरे जिघांसौ मुदमादधौ ।
परावृत्य गते क्षुब्धे विषसादाहवप्रियः ॥ १९ ॥

कश्चिदिति ॥ कश्चिद्वीरो जिघांसौ हन्तुमिच्छौ वीरेऽभ्यागते संमुखमागते सति । मुदमादधौ प्रससाद । अथ च क्षुब्ध एतदीयप्रहारक्षुभितेऽत एव परावृत्य गते तु विषसाद खिन्नोऽभूत् । यत आहवप्रियः सङ्ग्रामप्रियः । वीराणां प्रतिद्वन्द्विसंमुखागमनमेव प्रीतिजनकं भवतीति भावः ॥

बहुभिः सह युद्ध्वा वा परिभ्रम्य रणोल्बणाः ।
उद्दिश्य तानुपेयुः केऽपि ये पूर्ववृता रणे ॥ २० ॥

---

१ चक्राणि. २ चण्डेशुमण्डल. ३ धीरैः. ४ तु. ५ वाहा न. ६ क्षुब्धः; क्षुद्रे. ७ सहयुध्वानः.

वेभिन्नमिति ॥ धन्विनां बाणैर्विभिन्नं विदीर्णम् । अत एव व्यथार्तं पी·
दुःखितम् । अत एव :विह्वलम् । इतिकर्तव्यताविस्मरणाश्रयमित्यर्थः ।
: नभः श्येनप्रतिरवस्य पक्षिविशेषप्रतिध्वनेश्छलान्मिषेण विरसं कठोरं
तथा रुरासेव रुरोदेवेत्युत्प्रेक्षालंकारः ॥

चापैराकर्णमाकृष्टैर्विमुक्ता दूरमाशुगाः ।
अधावन्रुधिरास्वादलुब्धा इव रणैषिणाम् ॥ १३ ॥

ापैरिति ॥ आकर्ण कर्णपर्यन्तमाकृष्टैः रणैषिणां योद्धृणां संबन्धिभिश्चा·
भिर्विमुक्ता विसृष्टा आशुगाः शरा रुधिरास्वादे लुब्धा लम्पटा इव दूरमधा·
द्रुताः । लम्पटोऽपि भोजनास्वादाय द्रुतं पलायते तद्वत् ॥

गृहीताः पाणिभिर्वीरैर्विकोशाः खड्गराजयः ।
कान्तिजालच्छलादाजौ व्यहसन्संमदादिव ॥ १४ ॥

ृहीता इति ॥ आजौ सङ्ग्रामे वीरैः । कर्तृभिः । पाणिभिर्गृहीताः । तथा विको·
ोशारहिताः ॥ "कोशोऽस्त्री कुड्मले पात्रे दिव्यखड्गपिधानके" इति मेदिनी ॥
जयः करवालपङ्क्तयः कान्तिजालच्छलाद्द्युतिसमूहकैतवेन संमदाद्वीराणाम·
त्रुविघातसाधने वयमेव यथोचितास्तथा नान्य इति प्रमोदाद्व्यहसन्निव ज·
वेत्युत्प्रेक्षा ॥

खड्गाः शोणितसंदिग्धा नृत्यन्तो वीरपाणिषु ।
रजोघने रणेऽनन्ते विद्युतां वैभवं दधुः ॥ १५ ॥

ड्गा इति ॥ शोणितसंदिग्धा रुधिरसंलिप्ताः । तथा वीरपाणिषु नृत्यन्तः
। रजसा घने सान्द्रे । तथानन्तेऽपारे रणे विद्युतां वैभवं दधुः । तद्वच्छु·
: इत्यर्थः ॥ अत्र पदार्थवृत्तिनिदर्शनालंकारः ॥

कुन्ताश्चक्राशिरे चण्डमुल्लसन्तो रणार्थिनाम् ।
जिह्वाभोगा यमस्येव लेलिहाना रणाङ्गणे ॥ १६ ॥

न्ता इति ॥ रणाङ्गणे सङ्ग्रामचत्वरे चण्डं प्रचण्डं यथा तथोल्लसन्तो
माना: कुन्ताः प्रासाः । भल्ला इति यावत् ॥ "कुन्तः प्रासे चण्डभावे क्षुद्र·
ाजन्तुके" इति विश्वः ॥ लेलिहानाः पुनःपुनरतिशयेन वा लिहन्ति

[illegible]
[illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ विद्युताम्. ६ [illegible]
[illegible]

ते लेलिहानाः। आस्वादयन्त इत्यर्थः॥ लिहेर्यङन्ताच्छानच्॥ यमस्य जिह्वाभोगा रसनारूपयन्त्राणीव॥ "आभोगो वरुणच्छत्रे पूर्णतायन्त्रयोरपि" इति विश्वः॥ चकाशिरे दिद्युतिरे॥

प्रज्वलत्कान्तिचक्राणि चक्राणि वरचक्रिणाम्।
चण्डांशुमण्डलश्रीणि रणव्योमनि बभ्रमुः॥ १७॥

प्रज्वलदिति॥ प्रज्वलत्प्रदीप्यमानं कान्तिचक्रं द्युतिमण्डलं येषां तानि। तथा चण्डांशुमण्डलस्य सूर्यमण्डलस्य श्रीरिव श्रीः शोभा येषां तानि। वराः श्रेष्ठा ये चक्रिणो योधास्तेषां संबन्धीनि चक्राण्यायुधविशेषाः॥ "चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः। ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि" इति विश्वः॥ रणव्योमनि सङ्ग्रामरूपगगने बभ्रमुः॥ "वा जृभ्रमुत्रसाम्" इत्येत्वाभ्यासलोपयोर्विकल्पः॥ अथ व्याख्यानान्तरम्— वरचक्रिणां वराणां वीराणां ये चक्रिणो रथास्तेषां चक्राण्यङ्गानि रणव्योमनि बभ्रमुः॥ विशेषणद्वयमुभयत्रापि समानम्॥

केचिद्धीरैः प्रणादैश्च वीराणामभ्युपेयुषाम्।
निपेतुः क्षोभतो वाहादपरे मुमुहुर्मदात्॥ १८॥

केचिदिति॥ अभ्युपेयुषां संमुखमागतवतां वीराणां धीरैर्गम्भीरैः प्रणादैर्गर्जितैः केचिद्वीराः क्षोभतश्चित्तसंचलनाद्धेतोर्वाहाद्श्वान्निपेतुर्मुमूर्छुः। अपरे केचिन्मदाद्दर्पान्मुमुहुः। चेतनाविरहिता बभूवुरित्यर्थः॥

कश्चिदभ्यागते वीरे जिघांसौ मुदमादधौ।
परावृत्य गते क्षुब्धे विषसादाहवप्रियः॥ १९॥

कश्चिदिति॥ कश्चिद्वीरो जिघांसौ हन्तुमिच्छौ वीरेऽभ्यागते संमुखमागते सति। मुदमादधौ प्रममाद। अथ च क्षुब्ध एतदीयप्रहारक्षुभितेऽत एव परावृत्य गते तु विषसाद खिन्नोऽभूत्। यत आहवप्रियः सङ्ग्रामप्रियः। वीराणां प्रतिद्वन्द्विसंमुखागमनमेव प्रीतिजनकं भवतीति भावः॥

बहुभिः सह युद्ध्वा वा परिभ्रम्य रणोल्बणाः।
उद्दिश्य तानुपेयुः केऽपि ये पूर्वकृता रणे॥ २०॥

---

१ ख्याति. २ प्रज्वलत्क. ३ धीरैः. ४ तु. ५ वाहात् न. ६ मुमुहुः; मुहे. ७ गदद्युतानः.

वह्णुभिरिति ॥ रण उल्बणा उद्भटाः केऽपि योधा रणे सङ्ग्रामे बहुभिः सह युक्ता परिभ्रम्य वा तानुद्दिश्योपेयुर्युद्धार्थमभिजग्मुः । ये पूर्वं हृता अङ्गीकृताः । यैः सह पूर्वमयोधि पुनरपि तैरेव सह योद्धुं जग्मुरित्यर्थः ॥

अभितोऽभ्यागतान्योद्धुं वीरान्रणमदोद्धतान् ।
प्रत्यनन्दन्भुजादण्डरोमोद्गमभृतो भटाः ॥ २१ ॥

अभित इति ॥ भुजादण्डेषु यो रोम्णामुद्गमस्तं बिभ्रति तथाभूता भटा योधाः ॥ कर्तारः ॥ रणस्य सङ्ग्रामस्य मदेनोद्धतान् । अत एव योद्धुमभितोऽभ्यागतान्वीरान् । आलोक्येति शेषः । प्रत्यनन्दन्नहृष्यन् ॥

शस्त्रभिन्नेभकुम्भेभ्यो मौक्तिकानि च्युतान्यथः ।
अध्याहवक्षेत्रमुप्तकीर्तिबीजाङ्कुरश्रियम् ॥ २२ ॥

शस्त्रेति ॥ शस्त्रैर्भिन्ना विदीर्णा ये इभकुम्भा गजगण्डस्थलानि ॥ "कुम्भः स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे । राशिभेदे द्विपाङ्गे च" इति विश्वः ॥ तेभ्योऽधश्च्युतानि मौक्तिकानि ॥ कर्तृणि ॥ अध्याहवक्षेत्रमधिसङ्ग्रामकेदारम् । उप्तम् ॥ "टुवप् बीजसंताने" इत्यतो निष्ठा ॥ यत्कीर्तिबीजं यशोरूपमहीरुहबीजं तस्याङ्कुरस्तस्य श्रियं शोभाम् । दधुरिति शेषः ॥

वीराणां विषमैर्योधैर्विद्रुता वारणा रणे ।
शास्यमाना अपि त्रासाद्भेजुर्धूताङ्कुशा दिशः ॥ २३ ॥

वीराणामिति ॥ रणे विषमैर्दुःसहैर्वीराणां योधैर्विद्रुताः पलायिता वारणा गजाः शास्यमानाः शिक्ष्यमाणा अपि । यन्तृभिरिति शेषः । धूताङ्कुशा अवमानिताङ्कुशाः सन्तस्त्रासाद्दिशो भेजुः ॥ "तॄफलभज-" इत्येत्वाभ्यासलोपौ ॥ [illegible] ॥

रणे बाणगणैर्भिन्ना भ्रमन्तो भिन्नयोधिनः ।
निममज्जुर्मिलद्रक्तनिम्नगासु महागजाः ॥ २४ ॥

रण इति ॥ रणे सङ्ग्रामे बाणगणैः शत्रुशरनिकरैर्भिन्नयोधिनो विदीर्णयन्ता-[illegible] भिन्ना अत एव भ्रमन्तो महागजा [illegible] संयुक्ते [illegible] निम्नगा नद्यस्तासु निममज्जुः ॥

[illegible]

अपारेऽसृक्सरित्पूरे रथेषूच्चैस्तरेष्वपि ।
रथिनोऽभिरिपुं क्रुद्धा हुंकृतैर्व्यसृजञ्शरान् ॥ २५ ॥

अपार इति ॥ उच्चैस्तरेष्वपि रथेष्वपारेऽगाधेऽसृक्सरित्पूरे रुधिरनदीप्रवाहे मज्जत्सु सत्सु रथिनो रथारोहाः क्रुद्धाः । अत एव हुंकृतैः । भीषयन्त इति शेषः । अभिरिपुं शत्रुसंमुखं शरान्व्यसृजंस्तत्यजुः ॥

खड्गनिर्लूनमूर्धानो व्यापतन्तोऽपि वाजिनः ।
प्रथमं पातयामासुरसिना दारितानरीन् ॥ २६ ॥

खड्गेति ॥ खड्गनिर्लूनमूर्धानः करवालकृत्तशिरसः । अत एव वाजिनोऽश्वा व्यापतन्तोऽप्यसिना खड्गेन दारितान्विदीर्णानरीन्प्रथमं पातयामासुः । पुनः स्वयं पेतुरिति शेषः ॥ अत्र "दारयित्वासिना रिपून्" इति पाठः साधीयान् ॥

वीराणां शस्त्रभिन्नानि शिरांसि निपतन्त्यपि ।
अधावन्दन्तदष्टोष्ठभीमान्यभिरिपुं क्रुधा ॥ २७ ॥

वीराणामिति ॥ शस्त्रभिन्नान्यत एव निपतन्त्यपि दन्तैर्दष्टाः पीडिता य ओष्ठा अधरास्तैर्भीषणानि घोराणि वीराणां शिरांसि क्रुधाभिरिपुं वैरिसंमुखमधावन् ॥

शिरांसि वरयोधानामर्धचन्द्रहृतान्यलम् ।
आदधाना भृशं पादैः श्येना व्यानशिरे नभः ॥ २८ ॥

शिरांसीति ॥ अर्धचन्द्रहृतान्यर्धचन्द्राकारबाणकर्तितानि वरयोधानां शिरांसि पादैरादधाना गृह्णन्तः श्येनाः पक्षिविशेषा भृशमतिशयेन नभो व्यानशिरे व्यापुः । सर्वस्मिन्नेव नभसि श्येननीतमस्तकान्येव जातानीति भावः ॥

क्रोधादभ्यापतद्दन्तिदन्तारूढाः पदातयः ।
अश्वारोहा गजारोहप्राणान्प्रासैरपाहरन् ॥ २९ ॥

क्रोधादिति ॥ पदातयः पत्तयोऽश्वारोहाश्च क्रोधाद्वेगेनाभ्यापततां संमुखमागच्छतां दन्तिनां दन्तेष्वारूढाः सन्तः प्रासैः कुन्तैर्गजारोहाणामसूनपाहरन् ॥

---

१ अपारेऽसृक्सरित्पूरे. २ अभिरिपुं क्रुद्धा हुंकृ ; अभिक्रुद्धा [illegible] ३ [illegible] ४ निप- [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible]

यन्तृभिरिति ॥ रण उल्वणा उद्धताः केऽपि योधा रणे सङ्ग्रामे यन्तृभिः सह युद्धा परिभ्रम्य वा तानुद्दिश्योपेयुर्युद्धार्थमभिजग्मुः । ये पूर्वं हृता अङ्गीकृताः । यैः सह पूर्वमयोधि पुनरपि तैरेव सह योद्धुं जग्मुरित्यर्थः ॥

अभितोऽभ्यागतान्योद्धुं वीरान्रणमदोद्धतान् ।
प्रत्यनन्दन्भुजादण्डरोमोद्गमभृतो भटाः ॥ २१ ॥

अभित इति ॥ भुजादण्डेषु यो रोम्णामुद्गमस्तं बिभ्रति तथाभूता भटा योधाः ॥ कर्तारः ॥ रणस्य सङ्ग्रामस्य मदेनोद्धतान् । अत एव योद्धुमभितोऽभ्यागतान्वीरान् । आलोक्येति शेषः । प्रत्यनन्दन्प्रहृष्यन् ॥

शस्त्रभिन्नेभकुम्भेभ्यो मौक्तिकानि च्युतान्यधः ।
अध्याहवक्षेत्रमुप्तकीर्तिबीजाङ्कुरश्रियम् ॥ २२ ॥

शस्त्रेति ॥ शस्त्रैर्भिन्ना विदीर्णा य इभकुम्भा गजगण्डस्थलानि ॥ "कुम्भः स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे । राशिभेदे द्विपाङ्गे च" इति विश्वः ॥ तेभ्योऽधश्च्युतानि मौक्तिकानि ॥ कर्तृणि ॥ अध्याहवक्षेत्रमधिसङ्ग्रामकेदारम् । उप्तम् ॥ "टुवप् बीजसंताने" इत्यस्तो निष्ठा ॥ यत्कीर्तिबीजं यशोरूपमहीरुहबीजं तस्याङ्कुरस्तस्य श्रियं शोभाम् । दधुरिति शेषः ॥

वीराणां विषमैर्घोषैर्विद्रुता वारणा रणे ।
शास्यमाना अपि त्रासाद्भेजुर्धूताङ्कुशा दिशः ॥ २३ ॥

वीराणामिति ॥ रणे विषमैर्दुःसहैर्वीराणां घोषैर्विद्रुताः पलायिता वारणा गजाः शास्यमानाः शिष्यमाणा अपि । यन्तृभिरिति शेषः । धूताङ्कुशा अपमानिताङ्कुशाः सन्तस्त्रासाद्दिशो भेजुः ॥ "तृफलभज–" इत्येत्वाभ्यासलोपौ ॥ दिशः प्रति पलायांचक्रिरे ॥

रणे बाणगणैर्भिन्ना भ्रमन्तो भिन्नयोधिनः ।
निममज्जुर्मिलद्रक्तनिम्नगासु महागजाः ॥ २४ ॥

रण इति ॥ रणे सङ्ग्रामे बाणगणैः शत्रुशरनिकरैर्भिन्नयोधिनो विदीर्णयन्तारः । अत एव स्वयमपि भिन्ना अत एव भ्रमन्तो महागजा मिलन्त्यः संयुजन्त्यो या रक्तस्य निम्नगा नद्यस्तासु निममज्जुः ॥

---

१ अभ्यागतान्. २ योधाः. ३ वीरोल्बणान्; मदोद्धताः. ४ प्रत्यनन्दन्भुजादण्डे रोमोद्गमभृतो भटाः. ५ अधः. ६ आहवक्षेत्रमभ्युप्तकीर्तिबीजाङ्कुरश्रियम्. ७ गजाः. ८ निमग्नाः सुमहागजाः.

अपारेऽसृक्सरित्पूरे रथेषूच्चैस्तरेष्वपि ।
रथिनोऽभिरिपुं क्रुद्धा हुंकृतैर्व्यसृजञ्शरान् ॥ २५ ॥

अपार इति ॥ उच्चैस्तरेष्वपि रथेष्वपारेऽगाधेऽसृक्सरित्पूरे रुधिरनदीमवाहे मज्जत्सु सत्सु रथिनो रथारोहाः क्रुद्धाः । अत एव हुंकृतैः । भीषयन्त इति शेषः । अभिरिपुं शत्रुसंमुखं शरान्व्यसृजंस्तत्यजुः ॥

खड्गनिर्लूनमूर्धानो व्यापतन्तोऽपि वाजिनः ।
प्रथमं पातयामासुरसिना दारितानरीन् ॥ २६ ॥

खड्गेति ॥ खड्गनिर्लूनमूर्धानः करवालकृत्तशिरसः । अत एव वाजिनोऽश्वाद्व्यापतन्तोऽप्यसिना खड्गेन दारितान्विदीर्णानरीन्प्रथमं पातयामासुः । पुनः स्वयं पेतुरिति शेषः ॥ अत्र "दारयित्वासिना रिपून्" इति पाठः साधीयान् ॥

वीराणां शस्त्रभिन्नानि शिरांसि निपतन्त्यपि ।
अधावन्दन्तदष्टोष्ठभीमान्यभिरिपुं क्रुधा ॥ २७ ॥

वीराणामिति ॥ शस्त्रभिन्नान्यत एव निपतन्त्यपि दन्तैर्दष्टाः पीडिता य ओष्ठा अधरास्तैर्भीमानि घोराणि शिरांसि क्रुधाभिरिपुं वैरिसंमुख-

शस्त्रच्छिन्नगजारोहा विभ्रमन्त इतस्ततः ।
युगान्तवातचलिताः शैला इव गजा बभुः ॥ ३० ॥

शस्त्रेति ॥ शस्त्रैश्छिन्ना गजारोहा येषामत एवेतस्ततो विभ्रमन्तो गजाः युगान्तवातैः प्रलयप्रभञ्जनैश्चलिता उत्पातिताः शैला इव । बभुः शुशुभिरे ॥

मिलितेषु मिथो योद्धुं दन्तिषु प्रसभं भटाः ।
अगृह्णन्युद्ध्यमानाश्च शस्त्रैः प्राणान्परस्परम् ॥ ३१ ॥

मिलितेष्विति ॥ योद्धुं मिलितेषु दन्तिषु । आरूढा इति शेषः । भटा मिथोऽन्योन्यं युद्ध्यमानाः प्रसभं बलाच्छस्त्रैः कृत्वा परस्परं प्राणानगृह्णन् ॥

रुषा मिथो मिलद्दन्तिदन्तसंघर्षजोऽनलः ।
योधाञ्शस्त्रहृतप्राणानदहत्सहसारिभिः ॥ ३२ ॥

रुषेति ॥ रुषा क्रोधेन मिथोऽन्योन्यं मिलतां दन्तिनां ये दन्तास्तेषां संघर्षाज्जातोऽनलोऽग्निररिभिर्वैरिभिः शस्त्रैर्हृताः प्राणा येषां तान्योधान्सहसाकस्माददहत्प्लुप्लोष ॥

आक्षिप्ता अपि दन्तीन्द्रैः कोपनैः पत्तयः परम् ।
तैदसूनहरन्खड्गघातैः स्वस्य पुरः प्रभोः ॥ ३३ ॥

आक्षिप्ता इति ॥ परमतिशयितं कोपनैः क्रुद्धैर्दन्तीन्द्रैराक्षिप्ता अपि । आक्षेप्तुं शुण्डेन गृहीता अपीत्यर्थः । पत्तयः पादचारिणः स्वस्य प्रभोः पुरः खड्गघातैस्तदसूनहरन्[illegible] ॥

[illegible] योधिनां दिवि ।
प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्मही ॥ ३४ ॥

उत्क्षिप्येति ॥ करिभिरुत्क्षिप्योत्थाप्य दिवि दूरान्मुक्तानां योधिनां जीवात्मभिर्जीवैः । प्राणैरिति यावत् । दिव्या स्वर्गीया गतिः प्रापि । विग्रहैर्देहैर्मही वा प्रापि प्राप्ता ॥ कर्मणि लुङ् ॥

खड्गैर्धवलधारालैर्निहत्य करिणां करान् ।
तैर्भुवापि समं विद्धांन्संतोषं न भटा ययुः ॥ ३५ ॥

१ महयुध्वानः. २ गजारूढान्. ३ सह सादिभिः. ४ उत्क्षिप्ताः. ५ हस्तीन्द्रैः. ६ करैः. ७ ते रिपूनहनन्; तद्रिपूनहरन्. ८ खड्गपातैः. ९ दूरम्. १० दिवः. ११ दिव्याङ्गनाकण्ठपरिग्रहः; दिव्या- [illegible] विग्रहैर्मही. १२ [illegible]ः. १३ वृद्धं यशसा तान्पत्तयोऽहरन्.

खड्गैरिति ॥ भटा योधा धवलधारालैर्धवलां धारां लान्ति गृह्णन्ति तैः । शुभ्रधारैरित्यर्थः । अद्वितीयैः खड्गैः कृत्वा भुवा पृथिव्या समं विद्धान्महतान्करिणां कराञ्शुण्डादण्डान्निहत्यापि लवित्वापि संतोषं तृप्तिं न ययुः । अन्यानपि निहन्मीति बुद्धिमन्तो बभूवुरित्यर्थः ॥

आक्षिप्याभिदिवं नीताः पत्तयः करिभिः करैः ।
दिव्याङ्गनाभिरादातुं रक्ताभिर्द्रुतमीषिरे ॥ ३६ ॥

आक्षिप्येति । करिभिः ॥ करिभिः ॥ करैर्दण्डैः कृत्वाक्षिप्योत्थाप्याभिदिवमाकाशसंमुखं नीताः प्रापिताः पत्तयः पादचारिणो रक्ताभिरनुरक्ताभिर्दिव्याङ्गनाभिर्द्रुतं शीघ्रमादातुं गृहीतुमीषिरे इष्टा बभूवुः । अहमेतान्गृहीष्यामि, अहमेतान्गृहीष्यामीति त्वरिता बभूवुः ॥

धन्विनस्तुरगारूढा गजारोहाञ्शरैः क्षतान् ।
प्रत्यैच्छन्मूर्छितान्भूयो योद्धुमाश्वसतश्चिरम् ॥ ३७ ॥

धन्विन इति ॥ तुरगारूढा धन्विनो धनुर्धारिणो योधाः शरैः क्षतान् । अत एव मूर्छितान्गजारोहान्यन्तॄन्भूयोऽपि पुनरपि योद्धुमाश्वसतो जीवत एतादृशांश्चिरं प्रत्यैच्छन् । प्रतीक्षन्ते स्मेत्यर्थः ॥

क्रुद्धस्य दन्तिनः पत्तिर्जिघृक्षोरसिना करम् ।
निर्भिद्य दन्तमुसलावारुरोह जिघृक्षया ॥ ३८ ॥

क्रुद्धस्येति ॥ पत्तिः पादचारी कश्चिद्योधः क्रुद्धस्यात एव जिघृक्षोर्ग्रहीतुमिच्छोर्दन्तिनः करं दन्तयोरधोभागम् । असिना निर्भिद्य छित्त्वा जिघृक्षया प्रत्युत तस्यैव गृहीतुमिच्छया दन्तमुसलावारुरोहाऽऽरूढवान् ॥

खड्गेन मूलतो हत्वा दन्तिनो रदनद्वयम् ।
प्रातिपक्ष्ये प्रविष्टोऽपि पदातिर्निरगाद्द्रुतम् ॥ ३९ ॥

खड्गेनेति ॥ प्रातिपक्ष्ये शत्रुसंबन्धिनि सैन्ये प्रविष्टोऽपि पदातिः पादचारी दन्तिनो गजस्य रदनद्वयं दन्तद्वयं खड्गेन कृत्वा मूलतो मूलाद्धत्वा छित्त्वा द्रुतं निरगान्निष्क्राम । शत्रुसैन्यमध्यप्रविष्टस्य मरणमेव ध्रुवम्, तदस्य विपरीतमभूदित्यनेन द्योत्यते ॥

करेण करिणा वीरः सुगृहीतोऽपि कोपिना ।
असिनासृक्प्रहाराग्रे तस्यैव स्वयमस्ततः ॥ ४० ॥

---

१ आक्षिप्य. २ द्रुतमग्रहीत्; द्रुतमग्रहीत्. ३ मूर्छितान्. ४ करिणः. ५ दन्तमुसलम्; दन्तमु-सले. ६ भ्रामतः. ७ प्रतिपक्षस्य. ८ ग्रहीत्.

शस्त्रैश्छिन्नगजारोहा विभ्रमन्त इतस्ततः ।
युगान्तवातचलिताः शैला इव गजा बभुः ॥ ३० ॥

शस्त्रेति ॥ शस्त्रैश्छिन्ना गजारोहा येषामत एवेतस्ततो विभ्रमन्तो गजाः । युगान्तवातैः प्रलयप्रभञ्जनैश्चलिता उत्पातिताः शैला इव । बभुः शुशुभिरे ॥

मिलितेषु मिथो योद्धुं दन्तिषु प्रसभं भटाः ।
अगृह्णन्युध्यमानाश्च शस्त्रैः प्राणान्परस्परम् ॥ ३१ ॥

मिलितेष्विति ॥ योद्धुं मिलितेषु दन्तिषु । आरूढा इति शेषः । भटा मिथोऽन्योन्यं युध्यमानाः प्रसभं बलाच्छस्त्रैः कृत्वा परस्परं प्राणानगृह्णन् ॥

रुषा मिथो मिलद्दन्तिदन्तसंघर्षजोऽनलः ।
योधाञ्शस्त्रहृतप्राणानदहत्सहसारिभिः ॥ ३२ ॥

रुषेति ॥ रुषा क्रोधेन मिथोऽन्योन्यं मिलतां दन्तिनां ये दन्तास्तेषां संघर्षाज्जातोऽनलोऽग्निररिभिर्वैरिभिः शस्त्रैर्हृताः प्राणा येषां तान्योधान्सहसाकस्माददहत्पुप्लोष ॥

आक्षिप्ता अपि दन्तीन्द्रैः कोपनैः पत्तयः परम् ।
तदसूनहरन्खड्गघातैः स्वस्य पुरः प्रभोः ॥ ३३ ॥

आक्षिप्ता इति ॥ परमतिशयितं कोपनैः क्रुद्धैर्दन्तीन्द्रैराक्षिप्ता अपि । आक्षेप्तुं शुण्डेन गृहीता अपीत्यर्थः । पत्तयः पादचारिणः स्वस्य प्रभोः पुरः खड्गघातैस्तदसून्दन्तीन्द्रप्राणानहरञ्जगृहुः ॥

उत्क्षिप्य करिभिर्दूरान्मुक्तानां योधिनां दिवि ।
प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्मही ॥ ३४ ॥

उत्क्षिप्येति ॥ करिभिरुत्क्षिप्योत्थाप्य दिवि दूरान्मुक्तानां योधिनां जीवात्मभिर्जीवैः । प्राणैरिति यावत् । दिव्या स्वर्गीया गतिः प्रापि । विग्रहैर्देहैर्मही वा प्रापि प्राप्ता ॥ कर्मणि लुङ् ॥

खड्गैर्धवलधारालैर्निहत्य करिणां करान् ।
तैर्भुवापि समं विद्धान्संतोपं न भटा ययुः ॥ ३५ ॥

---

१ सहयुध्वानः. २ गजारूढान्. ३ सह सादिभिः. ४ उत्क्षिप्ताः. ५ हस्तीन्द्रैः. ६ करैः. ७ ते रिपूनहनन्; तद्रिपूनहरन्. ८ खड्गपातैः. ९ दूरम्. १० दिवः. ११ दिव्याङ्गनाकण्ठपरिग्रहः; दिव्याङ्गनैवा विग्रहैर्मही. १२ गैः. १३ वृद्धं यस्या तान्पत्तयोऽहरन्.

मेथ इति ॥ मिथोऽन्योन्यं प्रासेनाहतौ। अत एव वाजिभ्यां सकाशाच्च्युता-
पतितौ। अत एव भूमिं गतौ कौचिद्योधौ रुषा युतौ सन्तौ शङ्कया खड्गयुध्या
ादुर्युयुधाते। अथ च केशाकेशि केशेषु केशेषु गृहीत्वा प्रवृत्तं यद्युद्धम्, भुजा-
भुजाभ्यां प्रहृत्य प्रवृत्तं यद्युद्धं तदभूत् ॥ "तत्र तेनेदमिति सरूपे" इति
ण समासः ॥

रथिनो रथिभिर्बाणैर्हृतप्राणा दृढासनाः।
क्षतकार्मुकसंधानाः सप्राणा इव मेनिरे ॥ २६ ॥

रथिन इति ॥ रथिभी रथारोहैः ॥ कर्तृभिः ॥ बाणैः कृत्वा हृतप्राणास्तथा
सनाः क्षतं नष्टं कार्मुकसंधानं धनुःसज्जीकरणं येषामेवंभूता रथिनो रथारोहाः
ाणा इव जीवन्त इव मेनिरे मताः ॥ कर्मणि लिट् ॥ द्रष्टृभिरिति शेषः ॥

न रथी रथिनं भूयः प्राहरच्छस्त्रमूर्छितम्।
प्रत्याश्वसन्तमन्विच्छन्नातिष्ठद्युधि लोभतः ॥ २७ ॥

नेति ॥ रथी रथारोहः शस्त्रेण मूर्च्छितमचेतितं रथिनं भूयो न प्राहरत्। किंतु
रपि युधि लोभतो लोभेन ॥ तृतीयार्थे तसिः ॥ प्रत्याश्वसन्तं पुनरुज्जीवन्त-
न्विच्छन्नपेक्षमाणः समतिष्ठत् ॥

अन्योन्यं रथिनौ कौचिद्धतप्राणौ दिवं गतौ।
एकामप्सरसं प्राप्य युयुधाते वरायुधौ ॥ २८ ॥

अन्योन्यमिति ॥ वरायुधौ श्रेष्ठायुधौ कौचिद्रथिनावन्योन्यं परस्परेण कृ-
गतप्राणौ गमितासू अत एव दिवं गतावेकामप्सरसं प्राप्य युयुधाते। अहमे-
गृहीष्यामि, अहमेतां गृहीष्यामीति वदन्तौ कलहं चक्रतुरित्यर्थः ॥

मिथोऽर्धचन्द्रनिर्लूनमूर्धानौ रथिनौ रुचा।
खेचरौ भुवि नृत्यन्तौ स्वकबन्धाववश्यताम् ॥ २९ ॥

मिथ इति ॥ मिथोऽन्योन्यमर्धचन्द्रेण तदाकारबाणेन निर्लूनमूर्धानौ छि-
मस्तकावत एव खेचरावाकाशचारिणौ रुचा कान्त्या युतौ कौचिद्रथिनौ रथा-
रौ ॥ कर्तारौ ॥ भुवि नृत्यन्तौ गात्रं विक्षिपन्तौ स्वकबन्धौ निरोरहितदेहौ ॥
र्म ॥ अपश्यतां दृष्टवन्तौ ॥

---

१ इड. २ रोहैः. ३ मनेरन्. ४ [illegible]. ५ [illegible]; [illegible]. ६ [illegible].

करेणेति ॥ कोपिना क्रुद्धेन करिणा दन्तिना ॥ कर्त्रा ॥ करेण कृत्वा सुतरां गृहीतोऽपि वीरोऽसिना खड्गेन तस्यैव करिण एवासून्प्राणाञ्जहार हृतवान् । स्वयमक्षतोऽभूत् ॥

तुरंगी तुरगारूढं प्रासेनाहत्य वक्षसि ।
पततस्तस्य नाज्ञासीत्प्रासघातं स्वके हृदि ॥ ४१ ॥

तुरंगीति ॥ तुरंग्यश्वारोहः कश्चिद्योद्धा तुरगारूढमश्ववारं प्रासेन कुन्तेन वक्षस्याहत्य ताडयित्वा पततस्तस्याश्ववारस्य कर्तृकं स्वक आत्मीये हृदि प्रासघातं कुन्तक्षतं नाज्ञासीन्न विजज्ञे । तदीयपतनजानन्दस्योद्वेलत्वादिति भावः ॥

द्विपा प्रासहतप्राणो वाजिपृष्ठदृढासनः ।
हस्तोद्धृतमहाप्रासो भुवि जीवन्निवाभ्रमत् ॥ ४२ ॥

द्विपेति ॥ द्विपा शत्रुणा प्रासेन कृत्वा हृतप्राणो मारितः । तथा वाजिपृष्ठेऽश्वपृष्ठभागे दृढासनः । प्राग्दृढासनत्वान्मृतत्वे दृढत्वं युक्तम् । तथा हस्त उद्धृतो महाप्रासो येन तथाभूतः कश्चिज्जीवन्निव भुव्यभ्रमत् । अश्वभ्रमणवशाद्भ्रमन्सावोऽश्व इव लक्षित इति भावः ॥

तुरंगसादिनं शस्त्रहतप्राणं गतं भुवि ।
अंबद्धोऽपि महावाजी नं साश्रुनयनोऽत्यजत् ॥ ४३ ॥

तुरंगेति ॥ अबद्धोऽप्यनिरुद्धोऽपि महावाजी महानश्वः साश्रुणी सवाष्पे नयने यस्य तथाभूतः सन् । शस्त्रहतप्राणमत एव भुवि गतं तुरंगसादिनमश्ववारं नात्यजन्न जहौ । किं तु तज्जीवनमपेक्षमाणस्तत्रैव तस्थावित्यर्थः ॥

भल्लेन शितधारेण भिन्नोऽपि रिपुणाश्वगः ।
नामूर्च्छत्कोपतो हन्तुमियेष प्रपतन्नपि ॥ ४४ ॥

भल्लेनेति ॥ रिपुणा ॥ कर्त्रा ॥ शितधारेण तीक्ष्णधारेण भल्लेन भिन्नोऽपि विदारितोऽप्यश्वगस्तुरंगगामी कोपनः कोपवशान्नामूर्च्छन्न मुमोह स्म । किं तु प्रपतन्नश्वादधः संपतन्नपि रिपुं हन्तुमियेषैच्छत् ॥

रिपः प्रासाहतौ वाजिच्युतौ भूमिगतौ रुषा ।
अंन्योन्यं [illegible] भुजाभुजि ॥ ४५ ॥

1 तुरंगी- 2 [illegible] 3 [illegible] 4 [illegible] 5 [illegible] 6 [illegible]
7 [illegible] 8 [illegible] 9 [illegible] 10 [illegible] 11 [illegible]

रणाङ्गणे शोणितपङ्कपिच्छिले कथं कथंचिन्ननृतुर्धृतायुधाः ।
नदत्सु तुर्येषु परेतयोषितां गणेषु गायत्सु कबन्धराजयः ॥५०॥

रणेति ॥ तुर्येषु नदत्सु सत्सु, परेतयोषितां भूताङ्गनानां गणेषु गायत्सु सत्सु, धृतायुधाः कबन्धराजयः शिरोरहितदेहपङ्क्तयः शोणितपङ्कपिच्छिले रुधिरकर्दमलिप्ते । अनेन स्निग्धत्वमुक्तम् । रणाङ्गणे सङ्ग्रामचत्वरे कथं कथंचिन्महता कष्टेन ननृतुर्गात्रं विचिक्षिपुः । भूमेरतिस्निग्धतया पादयोः स्थैर्येण स्थापनासंभवान्नृत्ये प्रयत्नो योग्य इति भावः ॥ एषां श्लोकानां स्फुटार्थत्वाद्विस्तरेण विवृतिर्नोक्ता । प्रसङ्गाद्वक्तव्यनिर्धारणेन लाघवाचचारि । अतः क्षन्तव्यमित्यलम् ॥ उपजातिर्वृत्तम् ॥

इति सुररिपुर्वृत्ते युद्धे सुरासुरसैन्ययो
रुधिरसरितां मज्जद्दन्तिव्रजेषु तटेष्वलम् ।
अरुणनयनः क्रोधाद्भीमभ्रमद्भृकुटीमुखः
सपदि ककुभामीशानभ्यागमत्स युयुत्सया ॥ ५१ ॥

इतीति ॥ इति पूर्वोक्तप्रकारेण सुरासुरसैन्ययोर्देवदैत्यसैन्ययोर्युद्धे सङ्ग्रामे वृत्ते भूते सति । तथा रुधिरसरितां शोणितनदीनां तटेषु मज्जन्तो निमग्नीभवन्तो दन्तिव्रजा गजसमूहा येषु तथाभूतेषु सत्सु । अलमतिशयेन क्रोधाद्धेतोररुणनयनो रक्तलोचनः । तथा भीमे भयानके भ्रमती विवर्तमाने भृकुटीमुखे भृकुट्योरग्रे यस्य तथोक्तः स सुररिपुस्तारको युयुत्सया योद्धुमिच्छया सपदि तत्क्षणमेव ककुभां दिशामीशानिन्द्रादीनष्टदिक्पालानभ्यागमत्संमुखमाजगाम ॥ हरिणी वृत्तम्— "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणात् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये सुरासुरसैन्यसङ्ग्रामवर्णनं नाम षोडशः सर्गः ।

---

१ शोभित. २ क्रोधापीनभ्रमद्भृकुटीमुखः; क्रोधाद्धीनभ्रमद्भृकुटीमुखः.

सप्तदशः सर्गः ।

इदानीं तारकवधं चिकीर्षुस्तत्रभवान्कालिदासः सप्तदशतमं सर्गमारभते—

दृष्ट्वाभ्युपेतमथ दैत्यपतिं पुरस्ता-
दसङ्ग्रामकेलिकुतुकेन घनप्रमोदम् ।
योद्धुं मदेन मिमिलुः ककुभामधीशा
बाणान्धकारितदिगम्बरगर्भमेत्य ॥ १ ॥

समरानिन्द्रादिदेवान् । उद्दिश्येति शेषः । बाणावलीभिः शरपङ्क्तिभिः कृ-
वर्ष वृष्टिमकार्षीत् ॥

जम्भद्विपत्प्रभृतिदिक्पतिचापमुक्ता
बाणाः शिता दनुजनायकबाणसंघान् ।
अह्नाय तार्क्ष्यनिवहा इव नागपूगा-
न्सद्यो विचिच्छिदुरलं कणशो रणान्ते ॥ ३ ॥

म्भद्विपदिति ॥ दनुजानां दैत्यानां नायकस्य स्वामिनस्तारकस्य संव-
बाणसंघाञ्शरसमूहान् ॥ कर्मभूतान् ॥ जम्भद्विपत्प्रभृतयो महेन्द्रादयो ये
तयो दिगधिपास्तैः ॥ कर्तृभिः ॥ चापेभ्यो मुक्ता विसृष्टाः शितास्तीक्ष्णा
शराः । नागपूगान्सर्पव्रजान् ॥ "नागः पन्नगमातङ्गक्रूराचारिषु तोयदे"
"पूगस्तु क्रमुके वृन्दे" इति च विश्वः ॥ अह्नाय शीघ्रम् ॥ "द्रागञ्जसि-
साह्नाय" इत्यमरः ॥ तार्क्ष्यनिवहा गरुडसमूहा इव ॥ "तार्क्ष्यं रसाञ्जने
गरुडे गरुडाग्रजे" इति विश्वः ॥ रणान्ते सङ्ग्राममध्ये सद्यः सपद्यलमति-
कणशो विचिच्छिदुर्विभिदुः ॥ कणश इति "बह्वल्प-" इति शस् ॥

तान्प्रज्वलत्फलमुखैर्विषमैः सुरारि-
नामाङ्कितैः पिहितदिग्गगनान्तरालैः ।
आच्छादितस्तृणचयानिव हव्यवाह-
श्चिच्छेद सोऽपि सुरसैन्यशराञ्शरौघैः ॥ ४ ॥

निति ॥ सोऽपि तारकोऽपि प्रकर्षेण ज्वलन्ति दीप्यमानानि फलानां
नाम् । अयोनिर्मितपुरोभागानामिति यावत् ॥ "फलं हेतुकृते जातीफले
सस्ययोः" इति मेदिनी ॥ मुखान्यग्राणि येषाम् । अत एव विषमैर्दुःस-
तथा सुरारिनाम्ना तारक इति व्रणपाव्याङ्कितैर्युक्तैः । तथा पिहितमाच्छा-
दिशां गगनस्याम्बरस्य चान्तरालं मध्यं यैस्तथाभूतैः शरौघैर्बाणसंघैः कृत्वा
तीयान्सुरसैन्यस्य देवसैन्यस्य शरान् । आच्छादित उपर्याहितो हव्यवाहोऽग्नि-
यानिव घासराशीनिव । चिच्छेद । ज्वालयति स्मेत्यर्थः । हव्यवाहस्य तृण-
स्मीकरणे यावान्प्रयत्न उद्भवति तावानेव सुरशरभस्मसात्करणे । इततोऽसु-
नां सामर्थ्यातिशयो ध्वन्यत इत्यलंकारेण वस्तुध्वनिः ॥

हितान्. २ असुरनायकबाण. ३ वे; वेः. ४ विधिरैः सुरारि; समरेऽसुरारिः. ५ प्राच्छाद-
यैरिव. ६ हव्यवाहन.

तत्तस्मादेवंकार्यत्वात्सपदि सद्य एव स्यन्दनं रथं वाहय प्रापय । अवश्यकर्तव्ये विलम्बानौचित्यादिति भावः । इति सार्धैकपद्योक्तं सारथिमवोचत जगाद ॥ "नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः" इत्यमरः ॥

तत्स्यन्दनः सपदि सारथिसंप्रणुन्नः
प्रक्षुब्धवारिधरधीरगभीरघोषः ।
चण्डश्चचाल दलिताखिलशत्रुसैन्य-
मांसास्थिशोणितविपङ्कविलुप्तचक्रः ॥ १० ॥

तत्स्यन्दन इति ॥ प्रक्षुब्धः कोपाविष्टः । अनेन प्रलयकालीन इति व्यज्यते, प्रायस्तत्रैव तस्य क्रोधाविष्टत्वदर्शनात् । यो वारिधरो मेघस्तस्य घोष इव धीरो गभीरो घनश्च घोषो यस्य तथोक्तः । तथा दलितं चूर्णीकृतमखिलं समस्तं यच्छत्रुसैन्यं वैरिसैन्यं तस्य मांसमस्थीनि शोणितविपङ्को रुधिरकर्दमश्चेत्येतैर्विलुप्तानि चक्राणि चरणानि यस्य । अत एव चण्डः प्रचण्डस्तत्स्यन्दनस्तारकरथः सपदि स्वामिनोऽनुशासनक्षण एव । न तु मुहूर्तमात्रं स्थित्वेति भावः । सारथिना संप्रणुन्नश्चलितुं नोदितः सन् । चचाल ॥

दृष्ट्वा रथं प्रलयवातचलद्गिरीन्द्र-
कल्पं दलद्दलविरावविशेषरौद्रम् ।
अभ्यागतं सुररिपोः सुरराजसैन्यं
क्षोभं जगाम परमं भयवेपमानम् ॥ ११ ॥

दृष्ट्वेति ॥ प्रलयवातेन युगान्तकालप्रभञ्जनेन चलतोऽडीयमानेन गिरीन्द्रकल्पं गिरीन्द्रेण हिमालयेनेषन्न्यूनम् । हिमालयौपम्यं धवलवसनवेष्टितत्वात् ॥ "ईषदसमाप्तौ कल्पप्" इति कल्पप्प्रत्ययः ॥ तथा दलतामुपरि वेगपूर्वकपाताच्चूर्णीभवतां दलानां देवसैन्यानां यो विरावो हाहाहाहेति रुदितं तेन कृत्वा विशेषरौद्रमतिशयभयानकम् । आत्मीयघोरारवरौद्रत्वाश्रयीभूतत्वेऽप्यतिजवप्रपतनचूर्णीकृतसकलसुरसैन्यविहितमहाघोरविरावधारणाजनितरौद्रत्वधारणानुकूलव्यापाराश्रयीभूतमित्यर्थः । तथाभ्यागतं संमुखमागतं सुररिपोस्तार..य रथं दृष्ट्वा भयेन वेपमानं कम्पमानं सुरराजस्य महेन्द्रस्य सैन्यं सेनाजनसमूहः ॥ कर्तृ ॥ परममतुलं क्षोभं व्यथां जगाम प्राप । तदीयरथावलोकनादेव क्षोभप्राप्तिः, किं पुनस्तदीयाकृतिविलोकनादिति भावः ॥

दृष्टिरिति ॥ त इन्द्रादयो देवाः पुरारिसूनोस्त्रिपुरशत्रुपुत्रस्य दृष्टिर्नेत्रम् ॥ "स्त्रियां दृष्टिः स्त्रियां बुद्धौ लोचने दर्शनेऽपि च" इति विश्वः ॥ तस्य प्रपातः पतनं तस्य वशतो वशेन प्रभुत्वेन । प्रभावेणेति यावत् ॥ "वशं मिथ्याप्रभुलयोः" इति विश्वः ॥ नागपाशेन घनो दृढो बन्धो बन्धनमेव विपत्तिस्तेन य दुःखं ततस्तस्मान्मुमुचिरे मुक्ताः । अथ च महाजिगीषोरस्य कुमारस्य स्वयमात्मना न तु परोक्षेण निकटं सांनिध्यमेत्यागत्य सेवां सेवनम् । स्तुतिमिति फलितोऽर्थः । व्यधुश्चक्रुः ॥

अथ युग्मेनाह—

> उद्दीप्तकोपदहनोऽथ सुरेन्द्रशत्रु-
>
> रह्नाय सारथिमवोचत चण्डबाहुः ।
>
> बद्धा मया सुरपतिप्रमुखाः प्रसह्य
>
> बालस्य धूर्जटिसुतस्य निरीक्षणेन ॥ ८ ॥
>
> मुक्ता बभूवुरधुना तदिमान्विहाय
>
> कर्तास्म्यमुं समरभूमिपशूपहारम् ।
>
> तत्स्यन्दनं सपदि वाहय शंभुसूनुं
>
> द्रष्टास्मि दर्पितभुजाबलमाहवाय ॥ ९ ॥

उद्दीप्तेति । मुक्ता इति च ॥ अथ नागपाशविमोचनानन्तरम् । उद्दीप्तः प्रदीप्तः कोप एव दहनोऽग्निर्यस्य । तथा चण्डौ प्रचण्डौ बाहू यस्य । एवंभूतः सुरेन्द्रशत्रुस्तारकोऽह्नाय झटिति "भो सारथे, मया प्रसह्य बलाद्बद्धा नागपाशवशीकृताः सुरपतिप्रमुखा इन्द्रादयो देवा बालस्य शिशोः, न तु यूनः, धूर्जटिसुतस्य शिवपुत्रस्य निरीक्षणेन दर्शनमात्रेण, न तु मत्पक्षादिप्रयत्नेन, मुक्ता बभूवुः । अनेन शिशुनात्मनिरीक्षणेनैव स्वपक्षवर्तिनो देवा मोचिता अतो महाधन्योऽयमिति भावः । तत्तस्मान्मदीयशत्रूणां पक्षपातित्वेन कृतनागपाशमोचनरूपापराधादिमान्पुरोवर्तिन इन्द्रादिदेवान्विहाय परित्यज्य । आहवाय । मया सहाहवं कर्तुमित्यर्थः । दर्पितमभिमानमूलकं भुजाबलं बाहुवीर्यं यस्य, न तु तत्त्वतः, तथाभूतममुं पुरोवर्तिनं शंभुसूनुं द्रष्टास्मि द्रक्ष्यामि ॥ लुट् उत्तमैकवचनम् ॥ अथ च समरभूमौ सङ्ग्रामभुवि ये पशवो गृध्रप्रभृतयस्तेषामुपहारमुपदारूपं कर्तास्मि करिष्यामि । मार्गणैः कर्तितमेनममुं हत्वा सङ्ग्रामभूमिस्थेभ्यो गृध्रेभ्योऽहमेनं विभज्य दास्यामीत्यर्थः ।

---

१ प्रबलकोपदहनोऽथ सुरेन्द्रशत्रुः; उच्चण्डकोपदहनोऽसुरेन्द्रशत्रुः. २ भरम्.

प्रक्षुभ्यमाणमवलोक्य दिगीशसैन्यं
शंभोः सुतं कलहकेलिकुतूहलोत्कम् ।
उद्दामदोःकलितकार्मुकदण्डचण्डः
प्रोवाच वाचमुपगम्य स कार्तिकेयम् ॥ १२ ॥

प्रक्षुभ्यमाणमिति ॥ स तारको दिगीशसैन्यं देवसैन्यं प्रकर्षेण क्षुभ्यमाणं क्षोभं प्राप्नुवत् । बिभ्यदिति यावत् ॥ क्षुभ्यतेर्दिवादिकत्वं तदाकृतिगणत्वाद्बोध्यम् ॥ तथाभूतमवलोक्य दृप्तोद्दामयोरुद्धटयोर्दोष्णोर्बाह्वोः कलितेन निहितेन कार्मुकरूपदण्डेन चण्डः सन् । कलहः सङ्ग्रामरूपो विग्रहः स एव केलिः, न तु प्रयत्नसाध्यं कर्म, तत्र यत्कुतूहलं तत्रोत्कम् । तदभिलाषुकमित्यर्थः । तथा शंभोः शिवस्य सुतं पुत्रम् । अनेन तारकवीररसस्यानुभाव उक्तः । कार्तिकेयं कुमारमुपगम्य समीपं गत्वा वाचं प्रोवाचावोचत् ॥

इतः परम् " रे " इत्यादिभिस्त्रिभिः श्लोकैर्वाचमेव प्रपञ्चयति—

रे शंभुतापसशिशो बत मुञ्च मुञ्च
दोर्दर्पमत्र विरम त्रिदिवेन्द्रकार्यात् ।
शस्त्रैः किमत्र भवतोऽनुचितैरतीव
बालत्वकोमलभुजातुलभारभूतैः ॥ १३ ॥

तत्र रे इति ॥ रे इति नीचाभिसंबोधने । भोः शंभुतापसशिशो शंभुः शिवः स एव तापसस्तपस्वी । अनेन महाकृपणत्वं व्यज्यते । तस्य शिशो कौमाराव-स्थानुभवशालिन् । अत्र मयि विषये । विधीयमानमिति शेषः ॥ दोर्दर्पं भुजदण्डवीर्य-हेतुकमभिमानम् ॥ " दर्पोऽहंकारकस्तूर्योः " इति विश्वः ॥ मुञ्च मुञ्च ॥ सर्वथैव त्यजेत्यर्थः । अथ च [illegible] । [illegible] ॥ " [illegible] " इति [illegible] ॥ [illegible]

[illegible]

[illegible] ॥

[illegible]

दैत्येति ॥ भो दैत्यानामधिराज तारकसंज्ञक महाराज, भवता त्वया गर्वाद्धेतोर्यदवादि "रे शंभुतापस–" (१२.) इत्यादिना यदुक्तं तत्सर्वमपि तवोचितमेव योग्यमेव । अभिमानिनो महाराजस्य तव बालत्वाद्वराकीभूतमदवज्ञा योग्यैव ॥ ननु मदुक्तयौचित्यज्ञानवतस्तव कथमयं सङ्ग्रामकरणसमारम्भ इति चेत्तत्राह—किं त्विति ॥ किं तु वरिष्ठमतिशयश्रेष्ठं ते त्वत्संबन्धि भवरौ प्रकृष्टश्रेष्ठौ यौ बाहू भुजौ तयोर्बलं वीर्यमेव द्रष्टास्मि द्रक्ष्यामि । त्वदीयपराजयं कृत्वा मदीयो विजयः स्यादित्यभिलापे न मम तात्पर्यम्, किं तु लोकारोप्यमाणवीरताश्रयीभूतेन मया त्वदीयवीरतावलोकनमेव युद्धकरणे तात्पर्यम् । वस्तुतस्तु मयि वीरत्वासंभवात्त्वया सह युद्धकरणानौचित्येऽपि तत्र मत्प्रवृत्तिः केवलं बालत्वजनितबालिशत्वमेवोद्भावयति । अतोऽपि भवता क्षन्तव्यम् । "जनक इव शिशुत्वेऽसुप्रियस्यैकसूनोरविनयमपि सेहे पाण्डवस्य स्मरारिः" इत्यादिन्यायादिति भावः । अतो युद्धकरणपक्षे शस्त्रं कृपाणादिकं गृहाणादत्स्व । कार्मुकं धनुराततज्यं विस्तृतमौर्वीकं कुरु । युद्धार्थं शस्त्रसंधानेन सज्जो भवेति वाच्यार्थः ॥

> इत्युक्तवन्तमवदत्त्रिपुरारिपुत्रं
> दैत्यः क्रुधौष्ठमधरं किल निर्विभिद्य ।
> युद्धार्थमुद्भटभुजाबलदर्पितोऽसि
> बाणान्सहस्व मम सादितशत्रुपृष्ठान् ॥ १८ ॥

इतीति ॥ इत्युक्तवन्तं निगदितवन्तं त्रिपुरारिपुत्रं कुमारम् ॥ कर्म ॥ दैत्यस्तारकः क्रुधा निमित्तेनाधरं नीचैरोष्ठम् । अधरोष्ठमित्यर्थः । निर्विभिद्य दन्तैश्चर्वयित्वा । रे बाल, सादितं विभिन्नं शत्रुपृष्ठं यैर्न तु मुखम् । मदीयबाणानां तदुद्देशेनाभिगच्छतां प्रहृतिसहनासमर्थतया पलायमानत्वात् । एवंभूतान्मम बाणान्सहस्व । अपि तु त्वया न सहिष्यन्त इति ध्वन्यते ॥ ननु बालत्वात्कथमहं सहे इत्याह—यतस्त्वं युद्धार्थं युद्धकरणायोद्भटे विपरीतलक्षणयानुद्भटे ये भुजे बाहू तयोर्बलं वीर्यं तेन दर्पितोऽसि संजातगर्वोऽसि । विपरीतलक्षणापन्नभुजानुद्भटत्वमेव न सहिष्यन्त इति व्यङ्ग्ये हेतुः । अतो मया सह कथंचिदपि त्वया न योद्धव्यमिति फलितोऽर्थः ॥ "द्वौ परौ द्वयोः । भुजबाहू" इत्यमरः ॥

> दुःप्रेक्षणीयमरिभिर्धनुराततज्यं
> सद्यो विधाय विषमान्विशिखान्क्षिपन्

[illegible]

यत् । आशु सत्वरं जहिहि नाशय । साधु विचार्यैव मदीयहननेकृत्याश्रयो भ
"सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणुते हि विमृश्य का
र्य गुणलुब्धाः स्वयमेव संपदः" इति न्यायादिति भावः ॥ प्रस्तुतेऽवि
करणेन कैव विपत्तिरित्याशङ्क्याह— एष इति ॥ रे शिशो, एष जम्भद्विट्पु
दुःखेन कृच्छ्रेण विगाह्य उत्तार्ये पयसि नीरे । मदीयनाराचवर्षणरूप इत्यर्थः ।
पाषाणैरिव प्रस्तरतरिरिव स्वयं मज्जति मङ्क्ष्यति । त्वां च निमज्जयते । निमज्ज
य्यत इत्यर्थः ॥ "यावत्पुरा-" इति भविष्यदर्थे लट् ॥ यथा पाषाणघटितनौ
पयःपतिता मज्जति, आत्मोपर्यारूढांश्च निमज्जयति, तथायमिन्द्रोऽपि मदीयघोर
शरनिचयरूपजलेनाहतः मरिष्यति । स्वात्माश्रयीभूतं त्वामपि तत्र पात
त्वा मारयिष्यतीति वाच्यार्थः । अत आत्मजीवनाभिलाषुकत्वयात्र एतदाश्रयी
तत्वं विहाय वृद्धयोर्मातापित्रोः समीपमेव गन्तव्यम् । तेनेहामुत्र च महान्ति श्रे
सि भविष्यन्तीति व्यङ्ग्यार्थः । तेनात्रालंकारेण वस्तुध्वनिः ॥

इत्थं निशम्य वचनं युधि तारकस्य
कम्प्राधरो विकचकोकनदारुणाक्षः ।
क्षोभात्त्रिलोचनसुतो धनुरीक्षमाणः
प्रोवाच वाचमुचितां परिमृश्य शक्तिम् ॥ १६ ॥

इत्थमिति ॥ युधि सङ्ग्रामे स्थितस्य तारकस्य गर्वान्वीत्यर्थसंभृतं वचनं निशम्य
श्रुत्वा क्षोभात्कोपाद्धेतोः कम्प्रः कम्पनशीलोऽधरोऽधरोष्ठो यस्य । क्रोधवशादध
विस्फुरणं भीरूणामिदमेव । तथा विकचकोकनदवद्विकसद्रक्तोत्पलवदरुणे शोणे
अक्षिणी नेत्रे यस्य । क्रोधवशादरुणनेत्रत्वमपि सामर्थ्यमेव । एवंभूतस्त्रिलोचनसुतः
कुमारः [illegible] परिमृश्य [illegible] । मदीयधीपरिस्पन्दा [illegible]
दोर्दण्ड[illegible] परामृश्येत्यर्थः । धनुरीक्षमाण
[illegible] । अनेन त्वां सम्प्रति निहन्मि, सावधानो भव, [illegible]
[illegible] । तेन वस्तुना वस्तुध्वनिः । [illegible]
वचनं प्रोवाच वाचं ॥

दैत्याधिराज भवता यदवादि गर्वा-
[illegible] किं नु ।
[illegible]
[illegible] ॥ १७ ॥

बाणैरिति ॥ मुरारेस्तारकस्य धनुषः कार्मुकतसकाशात्प्रसृतैः । निःसृतैरिति फलितोऽर्थः । तथानन्तैरपारैः। असंख्यैरिति यावत् । लसद्दीप्यदंशुजालं किरणजालं येषाम् । अनेन सोल्का बाणा निःक्षिप्ता इति व्यज्यते । तथाभूतैर्बाणैः ॥ कर्तृभिः ॥ अन्धीकृतं सर्वत आच्छादितत्वात्प्रतिरुद्धविलोचनीकृतसकलजनम् । अखिलं सर्वं यत्सुरेश्वरसैन्यमिन्द्रसैन्यं तत्र मध्ये ॥ " यतश्च निर्धारणम् " इति सप्तमी ॥ निर्घोषेण निह्रादेन भीषिता भयं प्रापिता भटा योधास्तारकपक्षवर्तिनो येन । एवंभूत ईशसूनुः कुमारः कुतोऽपि कुत्रापि ॥ सप्तम्यर्थे तसिः॥ दृष्टिविषयं गोचरं न जगाम । तारकपरिक्षिप्ताशितशरगणैः सर्वत आच्छादितत्वात्कुत्रासौ कुमारो गत इति चिन्तयतां सैनिकानां दृगिन्द्रियग्रहणविषयतासंबन्धावच्छिन्नकोटिगणनाबहिर्भूतोऽभूदिति भावः ॥" विषयो गोचरे देशे " इति मेदिनी ॥

देवेन मन्मथरिपोस्तनयेन गाढ-
माकर्णकृष्टमभितो धनुराततज्यम् ।
बाणानसूत निशितान्युधि यान्सुजैत्रा-
स्तैः सायका बिभिदिरे सहसा मुरारेः ॥ २२ ॥

देवेनेति ॥ मन्मथरिपोः शिवस्य तनयेन पुत्ररूपेण देवेन कुमारेण गाढं दृढं यथा तथाकर्णकृष्टं कर्णं मर्यादीकृत्य कृष्टमाकृष्टम् । तथाततज्यं विस्तृतमौर्वीकं धनुः ॥ कर्तृ ॥ युध्यायोधनेऽभितः सर्वतः सुतरां जैत्राञ्जयनशीलान्निशितांस्तीक्ष्णान्यान्बाणानसूत । कुमाराकृष्टाद्धनुषः सकाशान्निशिता ये बाणा निःसृता इत्यर्थः । तैर्बाणैः ॥ कर्तृभिः ॥ मुरारेस्तारकस्य सायका बाणा बिभिदिरे भिन्नाः ॥ कर्मणि लिट् ॥ अनेन वाक्येन यथा यामिनीनाथमन्धतमसमम्बरमणिकिरणसमूहेन दूरीक्रियते, तथा कुमारनिक्षिप्तप्रज्वलद्धोरायमाणसायकनिकरेण तारकनिक्षिप्तसायकजनितमन्धतमसं निराकृतमित्युपमा व्यज्यते । अतोऽत्र वस्तुनालंकारध्वनिः ॥

रेजे सुरारिशरदुर्दिनके निरस्ते
सद्यस्तरां निखिलखेचरखेदहेतौ ।
देवः प्रभाप्रभुरिव स्मरशत्रुसूनुः
प्रद्योतनः सुघनदुर्धरधामधामा ॥ २३ ॥

---

१ विविधान्. २ विजैत्रैः; विजैत्रान्. ३ बिभिदिरे. ४ सद्यः स्वयम्. ५ निरस्तेहे. ६ देव-

स क्रोधभीमभुजगेन्द्रनिभं स्वचापं
चण्डं प्रपञ्चयति जैत्रशरैः कुमारे ॥ १९ ॥

दुरिति ॥ स तारकः कुमारे क्रोधेन भीमो यो भुजगेन्द्रस्तेन निभं सदृशम् । अतएव चण्डं प्रचण्डं स्वचापमात्मधनुर्जैत्रशरैर्जयसाधनबाणैः प्रपञ्चयति संदधति सति । अरिभिर्वैरिभिर्दुःप्रेक्षणीयं दुरवलोकनीयं धनुः सद्यः सपद्याततज्यं विस्तृतमत्यर्थं विधाय कृत्वा विषमानतितीक्ष्णान्विशिखान्बाणानुपधत्त निदधे । कुमारं सज्जमवलोक्य स्वयमपि तथाभूदिति भावः ॥

कर्णान्तमेत्य दितिजेन विकृष्यमाणं
कोदण्डमेतदभितः सुषुवे शरौघान् ।
व्योमाङ्गणे लिपिकरान्किरणप्ररोहैः
सान्द्रैरशेषककुभां पलितं करिष्णून् ॥ २० ॥

कर्णान्तमिति ॥ दितिजेन तारकेण कर्णान्तं श्रवणप्रान्तमेत्य प्रापय्य ॥ अन्तर्भावितणिजर्थः ॥ आकर्णान्तमित्यर्थः । विकृष्यमाणं विस्तार्यमाणमेतत्कोदण्डं धनुः सान्द्रैः सघनैः किरणप्ररोहैर्मयूखाङ्कुरैः कृत्वा व्योमाङ्गण आकाशचत्वरे लिपिकराँल्लेपनकर्तॄन् । तथा अशेषककुभां समस्तदिशां संबन्धि पलितं करिष्णूञ्जराजनितशौक्ल्यं कर्तुं शीलं येषाम् ॥ "अलंकृञ्–" इत्यादिना इष्णुच् ॥ एवंभूताञ्शरौघान्बाणसंघानभितः सर्वतः सुषुवे प्रासूत । कुमारोद्देशेन तारकनिःक्षिप्तविशिखसमूहैर्व्योम दिशश्च व्याप्ता बभूवुरित्यर्थः । अनेन चापार्थेन मदीयविशिखनिचयव्याप्यमानोऽयं बाल इति कर्तव्यताहीनः सन्नन्तरेव निरुद्धश्वासतया प्रयत्नमन्तरेव मरिष्यति किं पुनरायोधनप्रयत्नेनेति व्यङ्ग्यार्थस्य प्रतीयमानत्वाद्व्योमाशेषोत्पापितलक्षणालंकारेण वस्तुध्वनिः ॥

बाणैः सुरारिधनुषः प्रसृतैरनन्तै-
र्निर्वापभीपितभटो लसदंशुजालैः ।
अन्धीकृताखिलसुरेश्वरसैन्य ईश-
सूनुः कुतोऽपि विषयं न जगाम दृष्टेः ॥ २१ ॥

---

१ चण्डं [illegible] जैत्रशरैः कुमारे; [illegible] जैत्रशरैः कुमारः. २ कोदण्डमाप्य. ३ [illegible]. ४ [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible]. ८ [illegible]; [illegible] दृशोऽपि.

बाणैरिति ॥ मुरारेस्तारकस्य धनुषः कार्मुकसकाशात्प्रसृतैः । निःसृतैरिति फलितोऽर्थः । तथानन्तैरपारैः। असंख्यैरिति यावत्। लसद्दीप्यदंशुजालं किरणजालं येषाम् । अनेन सोल्का बाणा निःक्षिप्ता इति व्यज्यते । तथाभूतैर्बाणैः ॥ कर्तृभिः ॥ अन्धीकृतं सर्वत आच्छादितत्वात्प्रतिरुद्धविलोचनीकृतसकलजनम् । अखिलं सर्वं यत्सुरेश्वरसैन्यमिन्द्रसैन्यं तत्र मध्ये ॥ " यतश्च निर्धारणम् " इति सप्तमी ॥ निर्घोषेण निर्ह्रादेन भीषिता भयं प्रापिता भटा योधास्तारकपक्षवर्तिनो येन । एवंभूत ईशसूनुः कुमारः कुतोऽपि कुत्रापि ॥ सप्तम्यर्थे तसिः॥ दृष्टेर्विषयं गोचरं न जगाम । तारकपरिक्षिप्तशितशरगणैः सर्वत आच्छादितत्वात्कुत्रासौ कुमारो गत इति चिन्तयतां सैनिकानां दृगिन्द्रियग्रहणविषयतासंबन्धावच्छिन्नकोटिगणनाबहिर्भूतोऽभूदिति भावः ॥" विषयो गोचरे देशे " इति मेदिनी ॥

देवेन मन्मथरिपोस्तनयेन गाढ-
　माकर्णकृष्टमभितो धनुराततज्यम् ।
बाणानसूत निशितान्युधि यान्सुजैत्रा-
　स्तैः सायका विभिदिरे सहसा मुरारेः ॥ २२ ॥

देवेनेति ॥ मन्मथरिपोः शिवस्य तनयेन पुत्ररूपेण देवेन कुमारेण गाढं दृढं यथा तथाकर्णकृष्टं कर्णं मर्यादीकृत्य कृष्टमाकृष्टम् । तथाततज्यं विस्तृतमौर्वीकं धनुः ॥ कर्तृ ॥ युध्यायोधनेऽभितः सर्वतः सुतरां जैत्राञ्जयनशीलान्निशितांस्तीक्ष्णान्यान्बाणानसूत । कुमाराकृष्टाद्धनुषः सकाशान्निःसृता ये बाणा निःसृता इत्यर्थः । तैर्बाणैः ॥ कर्तृभिः ॥ मुरारेस्तारकस्य सायका बाणा विभिदिरे भिन्नाः ॥ कर्मणि लिट् ॥ अनेन वाक्येन यथा यामिनीनामन्धतमसमम्बरमणिकिरणसमूहेन दूरीक्रियते, तथा कुमारनिक्षिप्तप्रज्वलद्धोरायमाणसायकनिकरेण तारकनिक्षिप्तसायकजनितमन्धतमसं　　　व्यज्यते । अतोऽत्र वस्तुनालंकारध्वनिः ॥

रेज इति ॥ निखिलाः समस्ता ये खेचराः सूर्यादयस्तेषां खेदस्य शरीरसंबन्धजनितदहनहेतुकदुःखस्य हेतौ निदाने मुरारेस्तारकस्य ये शरास्तैर्यद्दुर्दिनकं मेघच्छन्नदिवसस्तस्मिन्सद्यस्तरामतिसत्वरं निरस्ते दूरीकृते सति। सुतरां घनं सान्द्रं दुर्धरं दुर्धर्षणीयम्। दुःसहमिति यावत्। तथाभूतं यद्धाम तेजस्तस्य धाम स्थानम्। अत एव प्रकर्षेण द्योतते शोभते ॥ कर्तरि ल्युट् ॥ अथवा नन्द्यादित्वाल्ल्युः ॥ तथाभूतः स्मरशत्रुसूनुः कुमारः। प्रभायाः कान्त्याः प्रभुर्देवः सूर्य इव। रेजे बभौ। यथा मेघजनितदुर्दिनोन्मुक्तोऽम्बरमणिः शोभते, तथा तारकविकीर्णसायकजनितदुर्दिनोन्मुच्यमानोऽसौ कुमारो रराजेत्यर्थः ॥

तत्राथ दुःसहतरं समरे तरस्वी
धामाधिकं दधति धीरतरं कुमारे।
मायामयं समरमाशु महासुरेन्द्रो
मायाप्रचारचतुरो रचयांचकार ॥ २४ ॥

तत्रेति ॥ अथानन्तरं तत्र कुमारे धीरतरं गम्भीरतातिशयशालि धाम तेजोऽधिकं दुःसहतरं दधति सति। "अयं बालोऽपि मदपेक्षयाधिकतरधामवान्, अतः शस्त्रयुद्धेन नैव धर्षणीयः" इति मनोविषयविचारकर्तृकता व्यज्यते। समरे युद्धे तरस्वी बलवान्महानसुराणामिन्द्रस्तारको मायामयं मायारूपं समरं युद्धमाशु सत्वरं रचयांचकार निर्ममे। शस्त्रैरधर्षणीयोऽयं मायाप्रधानैरस्त्रैः पराजयं प्राप्स्यतीति बुद्ध्वा मायारचनापरो बभूवेत्यर्थः। यतो मायाप्रचारे मायानिर्माणे चतुरः कुशलः ॥

अह्नाय कोपकलुषो विकटं विहस्य
व्यर्थी समर्थ्य वरशस्त्रयुधं कुमारे।
जिष्णुर्जगद्विजयदुर्ललितः सहेलं
वायव्यमस्त्रमसुरो धनुषि न्यधत्त ॥ २५ ॥

अह्नायेति ॥ जिष्णुर्जयनशीलः, अत एव जगतां विजयेन दुर्ललित उद्धटः। तथा कोपेन क्रोधेन निमित्तेन कलुषोऽनच्छः। आविल इति यावत् ॥ "कलुषोऽनच्छ आविलः" इत्यमरः ॥ असुरस्तारको विकटं करालं यथा स्यात्तथा विहस्य। इदानीं त्वां जेष्यामीति कुतो गमिष्यसीति विकटहासेन व्यज्यते।

१ तया. २ धामाधिकं दधति धीरतरे; धामादधावधिकधीरतरः. ३ मयम. ३ [illegible] ४ जिष्णौ.

ः विषये वरैः श्रेष्ठैः शस्त्रैः कृत्वा युधं युद्धम् ॥ "समुदायः स्त्रि-
मित्याजिसमियुधः" इत्यमरः ॥ व्यर्थां फलराहित्येन निरर्थकां समर्थ्य
त्वा । निश्चित्येति यावत् । सहेलं सानादरम् । अयं मायोचितो ना-
वात्र मायायुद्धमित्यवहेलनासहितं यथा स्यात्तथा । वायव्यं वायुदेव-
काय झटिति धनुषि न्यधत्त निदधे ॥

संधानमात्रमपि यस्य युगान्तकाल-
भूतभ्रमं परुषभीषणघोरघोषः ।
उद्धूतधूलिपटलैः पिहिताम्बराशः
प्रच्छन्नचण्डकिरणो व्यसरत्समीरः ॥ २६ ॥

नमिति ॥ यस्य वायव्यास्त्रस्य संधानमात्रमपि कोदण्डे प्रक्षेपणा-
मात्रमपि युगान्तकाल इव भूतानां प्राणिनां भ्रमो भ्रान्तिरोगो येन
। यस्य संधानमात्रेणैव भूतानां भ्रान्तिरोग उत्पद्यते, किं पुनस्तस्य प्र-
ाच्यम् । तस्य प्रक्षेपणेनेति शेषः । परुषः कठोरो भीषणो भयदायी घोरो
रूपेण भयदत्वं दीर्घत्वेन भयदत्वं चेत्युभयविधस्य भयदायित्वस्य विव-
पौनरुक्त्यम् । तथाविधो घोष आरवो यस्य । तथोद्धूतान्युपर्युत्पाति-
नि धूलिपटलानि रजोमण्डलानि तैः कृत्वा पिहिता आच्छादिता अ-
 दिशश्च येन । तथा प्रच्छन्नः पिहितश्चण्डकिरणो रविर्येन तथाभूतः ।
समीरो वायुर्व्यसरत्प्रससार । प्रचचालेति यावत् ॥

कुन्दोज्ज्वलानि सकलातपवारणानि
धूतानि तेन मरुता सुरसैनिकानाम् ।
उड्डीयमानकलहंसकुलोपमानि
मेघाभधूलिमलिने नभसि प्रसस्रुः ॥ २७ ॥

ज्ज्वलानीति ॥ कुन्दपुष्पवदुज्ज्वलानि निर्मलानि । श्वेतानीति फ-
। तथा तेन वायव्यास्त्रजनितेन मरुता धूतानि कम्पितानि । उपर्युत्क्षि-
यावत् । अत एवोड्डीयमाना उत्पतन्तो ये कलहंसा राजहंसास्तेषां कुलेन
उपमा सादृश्यं येषाम् । उत्पतत्कलहंससदृशानीत्यर्थः । सुरसैनिकानां

नमात्रमपि; संधानमात्रमपि. २ भूतभयः. ३ [illegible]; [illegible]
[illegible]; [illegible]. ४ [illegible]. ५ [illegible]. ६ [illegible];
[illegible].

देवरूपसेनालोकानां सकलातपवारणानि समस्तानि छत्राणि मेघाभाः वर्षाकलीनपयोदसदृशभासो या धूलयः सैन्योत्पतितरजांसि ताभिर्मलिने मेचके नभसि प्रसस्रुः । प्रभञ्जनवेगोड्डयितानि विशदघर्मवारणान्युत्पतत्कलहंसकुलानीव रेजुरित्यर्थः ॥

विध्वस्य तेन सुरसैन्यमहापताका
नीता नभःस्थलमलं नवमल्लिकाभाः ।
स्वर्गापगाजलमहौघसहस्रलीलां
व्यातेनिरे दिवि सिताम्बरकैतवेन ॥ २८ ॥

विध्वस्येति ॥ तेन प्रभञ्जनेन ॥ कर्त्रा ॥ विध्वस्य भञ्जयित्वा नभःस्थलमाकाशतलं नीताः प्रापिताः । तथा नवमल्लिकाभा नूतनविदलन्मल्लिकाकुसुमसदृशभासः सुरसैन्यस्य महान्त्यः पताकाः सिताम्बरकैतवेन श्वेतवस्त्रव्याजेन स्वर्गापगाया जलस्य महतामोघानां पूराणां सहस्रस्य लीलां शोभां व्यातेनिरे वितस्तिरे । उत्पतन्त्यो व्योमनि स्थिताः श्वेताः पताका अतिविदूरदोषेण । अलघवोऽपि लघव इव प्रतीयमाना नभोगतगगनवाहिनीनिर्झरा इव रेजुरिति भावः ॥ अत्र कैतवापह्नुतिनिदर्शनालंकारयोः संसृष्टिः ॥

धूतानि तेन सुरसैन्यमहागजानां
सद्यः शतानि विधुराणि दलत्कुथानि ।
पेतुः क्षितौ कुपितवासववज्रलून-
पक्षस्य भूधरकुलस्य तुलां वहन्ति ॥ २९ ॥

धूतानीति ॥ तेन वायुना धूतानि कम्पितानि । नभसि भ्रामितानीति यावत् । अत एव विधुराणि पीडितानि । तथा दलन्तः "चरट् चरट्" इति स्फुटन्तः कुथाः कम्बला येषाम् ॥ "कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि" इति मेदिनी ॥ अत एव कुपितस्य वासवस्य वज्रेण पविना लूनपक्षस्य छिन्नपक्षस्य भूधरकुलस्य पर्वतसमूहस्य तुलां साम्यं वहन्ति दधति सुरसैन्यमहागजानां देवसैन्यबृहद्दन्तिनां शतानि शतसंख्याककुलानि क्षितौ भुवि पेतुः पतितवन्ति ॥

तास्ताः खरेण मरुता रथराजयोऽपि
दोधूयमाननिपतिष्णुतुरंगमाश्च ।

१ नभस्तलम्. २ दिविधरां वितरिष्यमेण; दिविधरांवितरिष्यमेन. ३ कुमानि. ४ दि. ५ भटाः. ६ तुरंगमश्चे-

विस्रस्तसारथिकुलप्रवराः समन्ता-

द्व्यावृत्त्य पेतुरवनौ सुरवाहिनीनाम् ॥ ३० ॥

ता इति ॥ तास्ताः सुरवाहिनीनां देवसेनानां रथराजयोऽपि स्यन्दनपङ्क्तयोऽपि खरेण तीक्ष्णेन मरुता वायुना दोधूयमानाः पुनःपुनरतिशयेन वा कम्प्यमाना अत एव निपतिष्णवः पतनशीलास्तुरंगमा अश्वा यासाम् । तथा विस्रस्ता अधःपतिताः सारथय एव कुलप्रवराः कुलश्रेष्ठाः । कुलीना इति यावत् । यासाम् । तथाभूताः सत्यो नभसि समन्ताद्व्यावृत्त्य परिभ्रम्यावनौ पेतुः ॥

हित्वायुधानि सुरसैन्यतुरंगवाहा-

वातेन तेन विधुराः सुरसैन्यमध्ये ।

शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां

स्वीयेषु वाहनवरेषु पतत्सु सत्सु ॥ ३१ ॥

हित्वेति ॥ तेन वातेन विधुराः पीडिताः सुरसैन्यस्य देवसैन्यस्य तुरंगवाहा अश्ववाहाः । अश्वारोहा इति यावत् । सुरसैन्यमध्ये आयुधानि भल्लादीनि हित्वा परित्यज्य स्वीयेष्वात्मीयेषु वाहनवरेषु श्रेष्ठवाहनेषु पतत्सु सत्सु शस्त्राभिघातं शस्त्रप्रहारमनवाप्यापि न प्राप्याप्युर्व्यां भूमौ निपेतुः ॥

तेनाहतास्त्रिदशसैन्यपदातयोऽपि

स्रस्तायुधाः सुविधुराः परुषं रसन्तः ।

वात्याविवर्तदलवद्भ्रममेत्य दूरं

निःपेतुरम्बरतलाद्वसुधातलेऽस्मिन् ॥ ३२ ॥

तेनेति ॥ तेन प्रभञ्जनेनाहताः पीडिताः । अत एव स्रस्तान्यधःपतितान्यायुधानि शस्त्राणि येषाम् । अत एव सुतरां विधुरा दुःखिताः । करेभ्यः शस्त्रगलनं वीराणामतिदुःखावहं भवतीति भावः । तथा परुषं कठोरं यथा स्यात्तथा रसन्तः प्रोशन्तः । रुदन्त इति यावत् । त्रिदशसैन्यपदातयोऽपि देवसैन्यपादचारिणो योधा अपि । पूर्वोक्तानां गजादीनामपेक्षया समुच्चयार्थकोऽपिशब्दः ॥ "अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये" इति विश्वः ॥ वात्यया वातसमूहेन विवर्त

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible]

देवरूपसेनालोकानां सकलातपवारणानि समस्तानि छत्राणि मेघाभा वर्षाकालीनपयोदसदृशभासो या धूलयः सेनोत्पतितरजांसि ताभिर्मलिने मेचके नभसि प्रसस्रुः । प्रभञ्जनवेगोड्डयितानि विशदधर्मवारणान्युत्पतत्कलहंसकुलानीव रेजुरित्यर्थः ॥

विध्वस्य तेन सुरसैन्यमहापताका
नीता नभःस्थलमलं नवमल्लिकाभाः ।
स्वर्गापगाजलमहौघसहस्रलीलां
व्यातेनिरे दिवि सिताम्बरकैतवेन ॥ २८ ॥

विध्वस्येति ॥ तेन प्रभञ्जनेन ॥ कर्त्रा ॥ विध्वस्य भञ्जयित्वा नभःस्थलमाकाशतलं नीताः प्रापिताः । तथा नवमल्लिकाभा नूतनविदलन्मल्लिकाकुसुमसदृशभासः सुरसैन्यस्य महान्त्यः पताकाः सिताम्बरकैतवेन श्वेतवस्त्रव्याजेन स्वर्गापगाया जलस्य महतामोघानां पूराणां सहस्रस्य लीलां शोभां व्यातेनिरे वितस्तरिरे । उत्पतन्त्यो व्योमनि स्थिताः श्वेताः पताका अतिविदूरदोषेण । अलघवोऽपि लघव इव प्रतीयमाना नभोगतगगनवाहिनीनिर्झरा इव रेजुरिति भावः ॥ अत्र कैतवापह्नुतिनिदर्शनालंकारयोः संसृष्टिः ॥

धूतानि तेन सुरसैन्यमहागजानां
सद्यः शतानि विधुराणि दलत्कुथानि ।
पेतुः क्षितौ कुपितवासववज्रलून-
पक्षस्य भूधरकुलस्य तुलां वहन्ति ॥ २९ ॥

धूतानीति ॥ तेन वायुना धूतानि कम्पितानि । नभसि भ्रामितानीति यावत् । अत एव विधुराणि पीडितानि । तथा दलन्तः "चरट् चरट्" इति स्फुटन्तः कुथाः कम्बला येषाम् ॥ "कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि" इति मेदिनी ॥ अत एव कुपितस्य वासवस्य वज्रेण पविना लूनपक्षस्य छिन्नपत्रस्य भूधरकुलस्य पर्वतसमूहस्य तुलां साम्यं वहन्ति दधति सुरसैन्यमहागजानां देवसैन्यबृहद्दन्तिनां शतानि शतसंख्याककुलानि क्षितौ भुवि पेतुः पतितवन्ति ॥

तास्ताः खरेण मरुता रथराजयोऽपि
दोधूयमाननिपतिष्णुतुरंगमाश्च ।

१ नभस्तलम्. २ दिविचरी चिरनिभ्रमेण; दिविचरीविरविभ्रमेण. ३ कुलानि. ४ गलत्कथा-

विस्रस्तसारथिकुलप्रवराः समन्ता-

द्व्यावृत्य पेतुरवनौ सुरवाहिनीनाम् ॥ ३० ॥

ता इति ॥ तास्ताः सुरवाहिनीनां देवसेनानां रथराजयोऽपि स्यन्दनपङ्क्तयोऽपि खरेण तीक्ष्णेन मरुता वायुना दोधूयमानाः पुनःपुनरतिशयेन वा कम्प्यमाना अत एव निपतिष्णवः पतनशीलास्तुरंगमा अश्वा यासाम् । तथा विस्रस्ता अधःपतिताः सारथय एव कुलप्रवराः कुलश्रेष्ठाः । कुलीना इति यावत् । यासाम् । तथाभूताः सन्त्यो नभसि समन्ताद्व्यावृत्य परिभ्रम्यावनौ पेतुः ॥

हित्वायुधानि सुरसैन्यतुरंगवाहा-

वातेन तेन विधुराः सुरसैन्यमध्ये ।

शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां

स्वीयेषु वाहनवरेषु पतत्सु सत्सु ॥ ३१ ॥

हित्वेति ॥ तेन वातेन विधुराः पीडिताः सुरसैन्यस्य देवसैन्यस्य तुरंगवाहा अश्ववाहाः । अश्वारोहा इति यावत् । सुरसैन्यमध्य आयुधानि भल्लादीनि हित्वा परित्यज्य स्वीयेष्वात्मीयेषु वाहनवरेषु श्रेष्ठवाहनेषु पतत्सु सत्सु शस्त्राभिघातं शस्त्रप्रहारमनवाप्यापि न प्राप्याप्युर्व्यां भूमौ निपेतुः ॥

तेनाहतास्त्रिदशसैन्यपदातयोऽपि

स्रस्तायुधाः सुविधुराः परुषं रसन्तः ।

वात्याविवर्तदलवद्भ्रममेत्य दूरं

निःपेतुरम्बरतलाद्वसुधातलेऽस्मिन् ॥ ३२ ॥

तेनेति ॥ तेन प्रभञ्जनेनाहताः पीडिताः । अत एव स्रस्तान्यधःपतितान्यायुधानि शस्त्राणि येषाम् । अत एव सुतरां विधुरा दुःखिताः । करेभ्यः शस्त्रगलनं वीराणामतिदुःखावहं भवतीति भावः । तथा परुषं कठोरं यथा स्यात्तथा रसन्तः क्रोशन्तः । रुदन्त इति यावत् । त्रिदशसैन्यपदातयोऽपि देवसैन्यपादचारिणो योधा अपि । पूर्वोक्तानां गजादीनामपेक्षया समुच्चयार्थकोऽपिशब्दः ॥ " अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये " इति विश्वः ॥ वात्यया वातसमूहेन विवर्त

---

१ विस्रस्तसारथिरथवराः; [illegible]. २ [illegible]. ३ सुरसैन्य[illegible]; सुरसैन्य देवसैन्य. ४ विधुरा [illegible]. ५ [illegible]. ६ [illegible]. ७ [illegible]. ८ [illegible].

भ्रान्तं यद्दलं पत्रं तद्वद्दूरमतिशयेन भ्रमं भ्रान्तिमेत्य प्राप्याम्बरतलादाकाशमध्या-दस्मिन्वसुधातले भूतले निपेतुः । वातसमूहविवर्तितानि वृक्षशुष्कपत्राणि यथाधःपतन्ति, तथा देवसैन्यपत्त्रयोऽपि वायव्यास्त्रजनितप्रभञ्जनवशादम्बरमभित उड्डीयमानाः कियन्तमपि कालं तत्र रथचक्रवत्परिभ्रम्य प्रतिक्षीणभ्रमणजवाः सन्तोऽधः पेतुरिति वाच्यार्थः । यथा पतितमपि दलं न चूर्णीभवति, तथाधःपतन्तोऽपि सैनिका न चूर्णीभूता इत्यभिहितयोपमया व्यज्यते । सति पतनेऽपि चूर्णत्वाभावे देवत्वादिति गूढो हेतुः । अतोऽलंकारेण वस्तुध्वनिः ॥

इत्थं विलोक्य सुरसैन्यमथो अशेषं
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतु-
र्दिव्यं प्रभावमतनोदतनुः स देवः ॥ ३३ ॥

इत्थमिति ॥ अथो तारकप्रयोजितवायव्यास्त्रकृतसैन्यविप्लवानन्तरम् । अतनुर्महान् । महत्त्वं च विद्यया, विद्या चास्त्रशस्त्रनैपुण्यम् । स देवः षाण्मातुरः । अशेषं सकलं सुरसैन्यं देवसैन्यम् ॥ कर्म ॥ दैत्येश्वरेण तारकेणेत्थं पूर्वोक्तप्रकारेणास्त्रयोगाद्वायव्यास्त्रप्रयोगान्निमित्ताद्विधुरीकृतं पीडितं विलोक्य दिव्यं लोकोत्तरं प्रभावं सामर्थ्यमतनोत् । अनेन वायव्यप्रतिरोधकं पवनाशनास्त्रमक्षिपदिति व्यज्यते । यतः स्वर्लोकनाथस्येन्द्रस्य कमलाया लक्ष्म्याः कुशले श्रेयस्येक एव हेतुर्निदानम् ॥

तेनोज्झितं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधि प्रवृत्तम् ।
दृष्ट्वास्त्रजदहनदैवतमस्त्रमिद्ध-
मुद्दीप्तकोपदहनः सहसा सुरारिः ॥ ३४ ॥

तेनेति ॥ तेन कुमारप्रभावेण सकलमेव, न तु त्यक्तभागम् । उज्झितं वायव्यास्त्रनिर्मुक्तं सुरेन्द्रसैन्यमिन्द्रसैन्यम् ॥ कर्म ॥ स्वास्थ्यमविकलत्वं प्रपद्य प्राप्य पुनर्युद्धेन, न त्वन्यकार्ये पलायनरूपे । एवंविधास्त्रप्रयोक्तारमपि दुर्जेय इति पृष्ठप्रपलायनधर्मा [illegible] । प्रवृत्तं व्यापाराभिमुखीभूतं दृष्ट्वा । उद्दीप्तोऽनुभावसांनिध्यात्संदीप्तः कोप एव दहनोऽग्निर्यस्यैवंभूतः सुरारिस्तारकः सहसा

१ अशेषतः. २ [illegible] ३ अमुतः. ४ प्रवृत्तः;
५ युधे. ६ उच्चैः [illegible]

झटिति, न तु विलम्बेन । इद्धं सिद्धम्, न तु तत्कालसाधनीयम् । प्रदीप्तमिति वा । दहनदैवतमग्निदेवताकमस्त्रमग्न्यस्त्रमसृजत् ॥ "सृज विसर्गे" इत्यस्मात्तौदादिकाल्लङ् ॥ वायव्यास्त्रपरिहारानन्तरं वह्न्यस्त्रमक्षिपदित्यर्थः ॥

वर्षातिकालजलदद्युतयो नभोऽन्ते
गाढान्धकारितदिशो घनधूमसंघाः ।
सद्यः प्रसस्रुरसितोत्पलदामभासो
दृग्गोचरत्वमखिलं न हि सन्नयन्तः ॥ ३५ ॥

वर्षेति ॥ वर्षास्वतिकाला मेचकतरा ये जलदा मेघास्तेषां द्युतिः कान्तिरिव कान्तिर्येषाम् । वर्षाकालीनमेघसदृशमेचकितभास इत्यर्थः । श्यामत्वे द्वितीयविशेषणेनोपमिमीते—असितानां नीलानामुत्पलानां कमलानां दाम्नः स्रजो भा इव भा रुग्येषामत एव गाढं नितरामन्धकारिता विसंजातान्धकारीकृता दिशो यैरेवंभूता घनधूमसंघा निबिडधूमसमूहा अखिलं घटादिवस्तु दृग्गोचरत्वं दृष्टिविषयत्वं न हि नैव ॥ "हि पादपूरणे हेतौ विशेष्येऽप्यवधारणे" इति विश्वः ॥ नयन्तः प्रापयन्तः सन्तः । घनधूमसंघव्याप्त्या तमोव्याप्त्येव न हि किंचिदपि वस्तु लक्षणीयं बभूवेति भावः । सद्यः सपदि प्रसस्रुः । प्रज्वलिप्यद्दहनप्राग्भावित्वेन धूमप्रसरणस्यौचितत्वाद्धूमप्रसरणमुक्तम् ॥ प्रपूर्वात् "सृ गतौ" इत्यतो लिट् ॥

दिक्चक्रवालगिलनैर्मलिनैस्तमोभि-
र्लिप्तं नभःस्थलमलं घनवृन्दसान्द्रैः ।
धूमैर्विलोक्य मुदिताः खलु राजहंसा
गन्तुं सरः सपदि मानसमीषुरुच्चैः ॥ ३६ ॥

दिगिति ॥ दिशां चक्रवालस्य मण्डलस्य गिलनैराच्छादकैः ॥ "गॄ निगरणे" इत्यतः कर्तरि ल्युट् । "अचि विभाषा" इति रेफस्य लत्वम् ॥ तथा मलिनैर्मेचकैः, अत एव घनवृन्दमिव मेघमण्डलमिव सान्द्रैः सघनैर्धूमैर्धूमरूपैस्तमोभिर्लिप्तं व्याप्तं नभःस्थलं विलोक्य दृष्ट्वा मुदिताः प्रसन्ना राजहंसाः सपदि सद्य उच्चैर्महन्मानसं सरः पल्वलं गन्तुमीषुरैच्छन् । दहनास्त्रप्राग्भूतधूमावलीव्याप्तनभोदर्शनजनितमेघागमभ्रान्तिमतां कलहंसानां मानससरोजिगमिषोचितैवेति भावः ॥

जज्वाल वह्निरतुलः सुरसैनिकेषु
कल्पान्तकालदहनप्रतिमः समन्तात् ।

१ चक्रवालशाइवलद. २ वन. ३ मुदिता हसन्तः. ४ निलिवै:. ५ मनसस्तम्. ६ निरिवाः.

भ्रान्तं यद्दलं पत्रं तद्वद्दूरमतिशयेन भ्रमं भ्रान्तिमेत्य प्राप्याम्बरतलादाकाशमध्या-दस्मिन्वसुधातले भूतले निपेतुः । वातसमूहविवर्तितानि वृक्षशुष्कपत्राणि यथा-धःपतन्ति, तथा देवसैन्यपत्त्रयोऽपि वायव्यास्त्रजनितप्रभञ्जनवशादम्बरमभित उ-ड्डीयमानाः कियन्तमपि कालं तत्र रथचक्रवत्परिभ्रम्य प्रतिक्षीणभ्रमणजवाः स-न्तोऽधः पेतुरिति वाच्यार्थः । यथा पतितमपि दलं न चूर्णीभवति, तथाधःप-तन्तोऽपि सैनिका न चूर्णीभूता इत्यभिहितयोपमया व्यज्यते । सति पतनेऽपि चूर्णत्वाभावे देवत्वादिति गूढो हेतुः । अतोऽलंकारेण वस्तुध्वनिः ॥

इत्थं विलोक्य सुरसैन्यमथो अशेषं
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतु-
र्दिव्यं प्रभावमतनोदतनुः स देवः ॥ ३३ ॥

इत्थमिति ॥ अथो तारकप्रयोजितवायव्यास्त्रकृतसैन्यविप्लवानन्तरम् । अत-नुर्महान् । महत्त्वं च विद्यया, विद्या चास्त्रशास्त्रनैपुण्यम् । स देवः षाण्मातुरः । अशेषं सकलं सुरसैन्यं देवसैन्यम् ॥ कर्म ॥ दैत्येश्वरेण तारकेणेत्थं पूर्वोक्तप्रकारे-णास्त्रयोगाद्वायव्यास्त्रप्रयोगाभिमित्ताद्विधुरीकृतं पीडितं विलोक्य दिव्यं लोकोत्त-रं प्रभावं सामर्थ्यमतनोत् । अनेन वायव्यप्रतिरोधकं पवनाशनास्त्रमक्षिपदिति व्यज्यते । यतः स्वर्लोकनाथस्येन्द्रस्य कमलाया लक्ष्म्याः कुशले क्षेमस्यैक एव हेतुर्निदानम् ॥

तेनोज्झितं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधि प्रवृत्तम् ।
दृष्ट्वास्त्रजदहनदग्धतमस्त्रमिद्ध-
मुद्दीप्तकोपदहनः सहसा सुरारिः ॥ ३४ ॥

तेनेति ॥ तेन कुमारप्रभावेण सकलमेव, न तु स्वल्पमात्रम् । उज्झितं वाय-व्यास्त्रेण मुक्तं सुरेन्द्रसैन्यं देवेन्द्रसैन्यम् ॥ कर्म ॥ स्वास्थ्यमारोग्यं प्रपद्य प्राप्य पुनर्युध्येव, न त्वन्यत्रापि प्रवृत्तं [illegible] । [illegible] इति युद्धा-[illegible] । [illegible] दृष्ट्वा । [illegible]-[illegible] गुणाधिकाः [illegible]

झटिति, न तु विलम्बेन । इद्धं सिद्धम्, न तु तत्कालसाधनीयम् । प्रदीप्तमिति वा । दहनदैवतमग्निदेवताकमस्त्रमसृजद्व्यसृजत् ॥ "सृज विसर्गे" इत्यस्माद्दादिकाल्लङ् ॥ वायव्यास्त्रपरिहारानन्तरं वह्न्यस्त्रमक्षिपदित्यर्थः ॥

वर्षातिकालजलदद्युतयो नभोऽन्ते
गाढान्धकारितदिशो घनधूमसंघाः ।
सद्यः प्रसस्रुरसितोत्पलदामभासो
दृग्गोचरत्वमखिलं न हि सन्नयन्तः ॥ ३५ ॥

वर्षेति ॥ वर्षास्वतिकाला मेचकतरा ये जलदा मेघास्तेषां द्युतिः कान्तिरिव कान्तिर्येषाम् । वर्षाकालीनमेघसदृशमेचकितभास इत्यर्थः । श्यामत्वे द्वितीयविशेषणेनोपमिमीते—असितानां नीलानामुत्पलानां कमलानां दाम्नः स्रजो भा इव भा रुग्येषामत एव गाढं नितरामन्धकारिता विसंजातान्धकारीकृता दिशो यैरेवंभूता घनधूमसंघा निबिडधूमसमूहा अखिलं घटादिवस्तु दृग्गोचरत्वं दृष्टिविषयत्वं न हि नैव ॥ "हि पादपूरणे हेतौ विशेषेऽप्यवधारणे" इति विश्वः ॥ नयन्तः प्रापयन्तः सन्तः । घनधूमसंघव्याप्त्या तमोव्याप्त्येव न हि किंचिदपि वस्तु लक्षणीयं बभूवेति भावः । सद्यः सपदि प्रसस्रुः । प्रज्वलिष्यद्दहनप्राग्भावित्वेन धूमप्रसरणस्योचितत्वाद्धूमप्रसरणमुक्तम् ॥ प्रपूर्वात् "सृ गतौ" इत्यतो लिट् ॥

दिक्चक्रवालगिलनैर्मलिनैस्तमोभि-
र्लिप्तं नभःस्थलमलं घनवृन्दसान्द्रैः ।
धूमैर्विलोक्य मुदिताः खलु राजहंसा
गन्तुं सरः सपदि मानसमीपुरुच्चैः ॥ ३६ ॥

दिगिति ॥ दिशां चक्रवालस्य मण्डलस्य गिलनैराच्छादकैः ॥ "गॄ निगरणे" इत्यतः कर्तरि ल्युट् । "अचि विभाषा" इति रेफस्य लत्वम् ॥ तथा मलिनैर्मेचकैः, अत एव घनवृन्दमिव मेघमण्डलमिव सान्द्रैः सघनैर्धूमैर्धूमरूपैस्तमोभिर्लिप्तं व्याप्तं नभःस्थलं विलोक्य दृष्ट्वा मुदिताः प्रसन्ना राजहंसाः सपदि सद्य उच्चैर्महन्मानसं सरः पल्वलं गन्तुमीपुरैच्छन् । दहनास्त्रप्राग्भूतधूमावलीव्याप्तनभोदर्शनजनितमेघागमभ्रान्तिमतां कलहंसानां मानससरोजिगमिषोचितैवेति भावः ॥

जज्वाल वह्निरतुलः सुरसैनिकेषु
कल्पान्तकालदहनप्रतिमः समन्तात् ।

१ तत्कालजातसद्द. २ तत्र. ३ युसदा हरन्तः. ४ मिलितैः. ५ नभस्तलम्. ६ गदिताः.

भ्रान्तं यद्दलं पत्रं तद्वद्दूरमतिशयेन भ्रमं भ्रान्तिमेत्य प्राप्याम्बरतलादाकाशमध्या-दस्मिन्वसुधातले भूतले निपेतुः । वातसमूहविवर्तितानि वृक्षशुष्कपत्राणि यथा-धःपतन्ति, तथा देवसैन्यपत्तयोऽपि वायव्यास्त्रजनितप्रभञ्जनवशादम्बरमभित उ-ड्डीयमानाः कियन्तमपि कालं तत्र रथचक्रवत्परिभ्रम्य प्रतिक्षीणभ्रमणजवाः स-न्तोऽधः पेतुरिति वाच्यार्थः । यथा पतितमपि दलं न चूर्णीभवति, तथाधःप-तन्तोऽपि सैनिका न चूर्णीभूता इत्यभिहितयोपमया व्यज्यते । सति पतनेऽपि चूर्णत्वाभावे देवत्वादिति गूढो हेतुः । अतोऽलंकारेण वस्तुध्वनिः ॥

इत्थं विलोक्य सुरसैन्यमथो अशेषं
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतु-
र्दिव्यं प्रभावमतनोद्दतनुः स देवः ॥ ३३ ॥

इत्थमिति ॥ अथो तारकप्रयोजितवायव्यास्त्रकृतसैन्यविक्षेपानन्तरम् । अत-नुर्महान् । महत्त्वं च विद्यया, विद्या चास्त्रशस्त्रनैपुण्यम् । स देवः षाण्मातुरः । अशेषं सकलं सुरसैन्यं देवसैन्यम् ॥ कर्म ॥ दैत्येश्वरेण तारकेणेत्थं पूर्वोक्तप्रकारे-णास्त्रयोगाद्वायव्यास्त्रप्रयोगाभिमिचाद्विधुरीकृतं पीडितं विलोक्य दिव्यं लोकोत्त-रं प्रभावं सामर्थ्यमतनोत् । अनेन वायव्यप्रतिरोधकं पवनाशनास्त्रमक्षिपदिति व्यज्यते । यतः स्वर्लोकनाथस्येन्द्रस्य कमलाया लक्ष्म्याः कुशले क्षेमस्यैक एव हेतुर्निदानम् ॥

तेनोज्झितं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधि प्रवृत्तम् ।
दृष्ट्वानुजं दहनदैवतमस्त्रमिद्ध-
मुद्दीप्तकोपदहनः सहसा सुरारिः ॥ ३४ ॥

तेनेति ॥ तेन कुमारसमीरेण गरुत्मता, न तु स्वयं पावनम् । उज्झितं वाय-व्यास्त्रनिर्मुक्तं सुरेन्द्रसैन्यं देवसैन्यम् ॥ कर्म ॥ स्वास्थ्यं स्वास्थ्यं प्रपद्य प्राप्य पुनरेव युद्धे, न तन्मात्रं स्वापदसक्तं । ... दृष्ट्वा ... ॥

दन्दह्यमानं पुनः पुनरतिशयेन वा दह्यते भस्मीक्रियते तथाभूतमत एवात्याकुलमतिपीडितमखिलं समस्तं सुरराजसैन्यम् ॥ कर्तृ ॥ शिवसुतस्य कुमारस्य समीपं संनिधिमाप। अतो नः पाहीति निवेदयितुं जगामेति व्यज्यते। तेन वस्तुना वस्तुध्वनिः ॥

इत्यग्निना घनतरेण ततोऽभिभूतं
तद्देवसैन्यमखिलं विकलं विलोक्य।
सस्मेरवक्त्रकमलोऽन्धकशत्रुसूनु-
र्बाणासनेन समधत्त स वारुणास्त्रम् ॥ ४० ॥

इतीति ॥ ततः सैन्यागमनानन्तरम्। सोऽन्धकशत्रुसूनुः कुमारः। इति पूर्वोक्तप्रकारेण घनतरेणातिसान्द्रेणाग्निनाभिभूतं पराभूतमखिलं समस्तं तद्देवसैन्यं विकलं विधुरं विलोक्य सस्मेरं समन्दहासं वक्त्रकमलं यस्य। किंचिद्विहस्येत्यर्थः। अनेनात्मोत्कर्षव्यञ्जक उपहासो व्यज्यते। बाणासनेन धनुषा वारुणास्त्रमग्न्यस्त्रप्रतिरोधकं वरुणदेवताकमस्त्रं समधत्त। संदध इत्यर्थः ॥

घोरान्धकारनिकरप्रतिमो युगान्त-
कालानलप्रबलधूमनिभो नभोऽन्ते।
गर्जारवैर्विघटयन्नवनीधराणां
शृङ्गाणि मेघनिवहो घनमुज्जगाम ॥ ४१ ॥

घोरेति ॥ घोराणि भयानकानि यान्यन्धकाराणि तमांसि तेषां निकरस्य समूहस्य प्रतिमेव प्रतिमा स्वरूपं यस्य। गाढान्धकारसदृशकान्तिरित्यर्थः। तथा युगान्तकालस्य योऽनलोऽग्निस्तस्य प्रबलोऽधिको यो धूमस्तेन सदृशः। तथा गर्जारवैर्गर्जनाघोषैः कृत्वावनीधराणां पर्वतानां शृङ्गाणि सानूनि विघटयन्स्फोटयन्मेघनिवहः पयोधरसमुदायो नभोऽन्ते व्योममध्ये घनं सान्द्रम्, न तु विरलतया। उज्जगामोदियाय ॥

विद्युल्लता वियति वारिदवृन्दमध्ये
गम्भीरभीषणरवैः कपिशीकृताशा।
घोरा युगान्तचलितस्य भयंकराथ
कालस्य लोलरसनेव चमत्कार ॥ ४२ ॥

---

१ वत. २ बाणासनेऽथ. ३ विघटद्. ४ वृन्दवर्त; वृन्दवर्ते. ५ रवै. ६ भयदस्य.

आशामुखानि विमलान्यखिलानि कीला-
जालैरलं कपिलयन्सकलं नभोऽपि ॥ ३७ ॥

जज्वालेति ॥ कल्पान्तकालस्य प्रलयकालस्य दहनोऽग्निस्तस्य प्रतिमेव प्रतिमा स्वरूपं यस्य । तथातुलो बहुलो वह्निः कीलाजालैर्ज्वालासमूहैः ॥ "व-ह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः ॥ अखिलानि समस्तानि विमलानि शुद्धान्याशामुखानि दिगग्राणि । तथा सकलं नभोऽपि व्योम च क-पिलयन्पिशङ्गीकुर्वन्सुरसैनिकेषु मध्ये ॥ "यतश्च निर्धारणम्" इति सप्तमी ॥ स-मन्तात्परितो जज्वाल दिदीपे ॥

उज्जागरस्य दहनस्य निरर्गलस्य
ज्वालावलीभिरतुलाभिरनारताभिः ।
कीर्णं पयोदनिवहैरिव धूमसंघै-
र्व्योमाभ्यलक्ष्यत कुलैस्तडितामिवोच्चैः ॥ ३८ ॥

उज्जागरस्येति ॥ उज्जागरस्योद्दीप्तस्य ॥ जागर्तेः "ऋदोरप्" इति भावेऽप् ॥ निरर्गलस्य निर्गतप्रतिबन्धस्य दहनस्य वह्नेरतुलाभिर्बहुलाभिरनारताभिरक्षणिका-भिर्ज्वालावलीभिः कीलपङ्क्तिभिः । तथा पयोदनिवहैरिव मेघसमूहैरिव धूमसंघैः । व्याप्तमिति शेषः । तथाभूतं व्योम नभः ॥ कर्तृ ॥ उच्चैर्महद्भिस्तडितां विद्युतां कु-लैर्गणैः कीर्णं वृतमिवाभ्यलक्ष्यत दर्शनीयं बभूव । मेघमण्डलान्तरे चमत्कारकारि-णीभिः क्षणदाभिर्नभो यथा राजति, तथा मेघमण्डलसदृशधूमसंघमण्डलान्तर्गतक्ष-णदासदृशज्वालावलीभिरपि बभाविसर्थः । भानक्रियाकर्तोभयत्राप्येक एव, अतो ज्वालावलीषु क्षणदात्वेनोत्प्रेक्षितम् ॥

गाढाद्भयाद्वियति विद्रुतखेचरेण
दीप्तेन तेन दहनेन सुदुःसहेन ।
दन्दह्यमानमखिलं सुरराजसैन्य-
मत्याकुलं शिवसुतस्य समीपमाप ॥ ३९ ॥

गाढादिति ॥ गाढाद्भयाद्धेतोर्वियति नभसि विद्रुता विद्राविताः । पलायिता इति यावत् । खेचरा रव्यादयो येन । रव्यादयो ग्रहा अपि यद्भयाद्दुद्रुवुरित्यर्थः । तथा दीप्तेन प्रदीप्तेन । तथा सुतरां दुःसहेन सोढुमशक्येन तेन दहनेन ॥ कर्त्रा ॥

१ अविदधन्निखिलानि. २ कपिशयन्. ३ वह्नीवितः; तत्मान्ततः. ४ चाद्भुतसंचरेण. ५ दीप्तेन.
६ अनिशम्. ७ आपात; आगात.

दन्दह्यमानं पुनः पुनरतिशयेन वा दह्यते भस्मीक्रियते तथाभूतमत एवात्याकुलमति-पीडितमखिलं समस्तं सुरराजसैन्यम् ॥ कर्तृ ॥ शिवसुतस्य कुमारस्य समीपं संनिधिमाप । अतो नः पाहीति निवेदयितुं जगामेति व्यज्यते । तेन वस्तुना वस्तुध्वनिः ॥

इत्यग्निना घनतरेण ततोऽभिभूतं
तद्देवसैन्यमखिलं विकलं विलोक्य ।
सस्मेरवक्त्रकमलोऽन्धकशत्रुसूनु-
र्बाणासनेन समधत्त स वारुणास्त्रम् ॥ ४० ॥

इतीति ॥ ततः सैन्यागमनानन्तरम् । सोऽन्धकशत्रुसूनुः कुमारः । इति पूर्वोक्तप्रकारेण घनतरेणातिसान्द्रेणाग्निनाभिभूतं पराभूतमखिलं समस्तं तद्देवसैन्यं विकलं विधुरं विलोक्य सस्मेरं समन्दहासं वक्त्रकमलं यस्य । किंचिद्विहस्येत्यर्थः । अनेनात्मोत्कर्षव्यञ्जक उपहासो व्यज्यते । बाणासनेन धनुषा वारुणास्त्रमग्न्यस्त्रप्रतिरोधकं वरुणदेवताकमस्त्रं समधत्त । संदध इत्यर्थः ॥

घोरान्धकारनिकरप्रतिमो युगान्त-
कालानलप्रबलधूमनिभो नभोऽन्ते ।
गर्जारवैर्विघटयन्नवनीधराणां
शृङ्गाणि मेघनिवहो घनमुज्जगाम ॥ ४१ ॥

घोरेति ॥ घोराणि भयानकानि यान्यन्धकाराणि तमांसि तेषां निकरस्य समूहस्य प्रतिमेव प्रतिमा स्वरूपं यस्य । गाढान्धकारसदृशकान्तिरित्यर्थः । तथा युगान्तकालस्य योऽनलोऽग्निस्तस्य प्रबलोऽधिको यो धूमस्तेन सदृशः । तथा गर्जारवैर्गर्जनाघोषैः कृत्वावनीधराणां पर्वतानां शृङ्गाणि सानूनि विघटयन्स्फोटयन्मेघनिवहः पयोधरसमुदायो नभोऽन्ते व्योममध्ये घनं सान्द्रम्, न तु विरलतया । उज्जगामोदियाय ॥

विद्युल्लता वियति वारिदवृन्दमध्ये
गम्भीरभीषणरवैः कपिशीकृताशा ।
घोरा युगान्तचलितस्य भयंकराथ
कालस्य लोलरसनेव चमच्चकार ॥ ४२ ॥

१ तदा. २ बाणासनेऽथ. ३ विघटयन्. ४ वृन्दवर्ग; वृन्दवर्गे. ५ रवे. ६ भयंकरस्य.

तद्भीतिविद्रुतसमस्तसुरेन्द्रसैन्यो

गाढं जघान मकरध्वजशत्रुसूनुम् ॥ ४६ ॥

त्य इति ॥ रोषेण क्रोधेन कलुष आविलः ॥ " कलुषं त्वाविले पापे "
मेदिनी ॥ स दैत्योऽपि निशितैः खरैः । अत एव भीमैर्भयदैः । तथाकर्ण-
वर्णं कृष्टाद्धनुषः सकाशादुत्पतितैर्निःसृतैः क्षुरप्रैः शरविशेषैः कृत्वा । तेभ्यः
भ्रेभ्यो भीत्या निमिषेन विद्रुतं विद्रावितं समस्तं सुरेन्द्रसैन्यं पुरंदरबलं येन ॥
सैन्यं क्लीबं बले सेनासमवेते तु वाच्यवत् " इति मेदिनी ॥ तथाभूतः सन् ।
ढं दृढं यथा स्यात्तथा मकरध्वजस्य कामस्य शत्रोः शंभोः सूनुं पुत्रं जघान ।
ाणापहरणकरणाभिप्रायेण हिनस्ति स्मेत्यर्थः ॥ " पुनस्तत्रैवावलम्बितो वेता-
लः " इति न्यायेन मायया सुखेन जेय एवेति मन्यमानेन तारकेण बाणसमरं
हित्वा मायासमरं कुर्वाणेन तत्र सत्यपि दुर्जयताबुद्ध्या पुनर्बाणयुद्धमकार्षीदित्य-
र्थः । अनेन वाच्यार्थेन " अप्रतिहतप्रचारा मदीया मायाप्यनेन वीरेण प्रतिहता "
इति शोचग्रस्तेन दैत्येन यथा पराजितेनापि विदुषायुक्तया विवाधते तथा युध्य-
ते, न तु वीररसानुगतत्वेनेति ध्वन्यते ॥

देवोऽपि दैत्यविशिखप्रकरं सचापं

बाणैश्चकर्त कणशो रणकेलिकारी ।

योगीव योगविधिशुष्कमना यमाद्यैः

सांसारिकं विषयसंघममोघवीर्यम् ॥ ४७ ॥

देवोऽपीति ॥ रण एव केलिः क्रीडा तां करोति । सङ्ग्रामरूपक्रीडाविधायी-
त्यर्थः । देवोऽपि कुमारोऽपि बाणैः शरैः सचापं सकोदण्डं दैत्यस्य तारकस्य
विशिखानां शराणां प्रकरं समूहं योगविधिना योगाभ्यासविधानेन शुष्कमना
नीरसमनाः । निःस्पृहचेता इति तात्पर्यार्थः । योगी यमाद्यैर्यमनियमप्रभृतिभिर्यो-
गसाधनैः कृत्वामोघवीर्यं योगिनामपि मनः संभ्रान्तिकरणे सफलप्रभावं सांसा-
रिकं संसारः प्रयोजनमस्येति तथोक्तम् ॥ प्रयोजने ठक् ॥ विषयसंघं चक्षुरादि-
करणोपभोग्यसमाहारमिव कणशश्चकर्त विभेद । यथा योगाभ्यासनिरतो यम-
नियमपूर्वैश्चक्षुरादिकरणभोग्यं दर्शनीयादिकरणवस्तु कृन्तति, तथा कुमारोऽ-
यमनियमवर्तीत्रिवर्णार्विषयसंघमिव सफललक्ष्यभेदनक्रियोचितत्वमपि शरनिक-
मभनगिति भावः ॥

१ सैन्यः. २ प्रवरम्. ३ रणकेलिकारः. ४ विनिपक्कमनाः. ५ विषयवर्गम्. ६ अमोधवीर्यैः.

भ्रूभङ्गभीषणमुखोऽसुरचक्रवर्ती
संदीप्तकोपदहनोऽथ रथं विहाय।
क्रीडत्करालकरवालकरोऽसुरेन्द्र-
स्तं प्रत्यधावदभितस्त्रिपुरारिसूनुम् ॥ ४८ ॥

भ्रूभङ्गेति ॥ अथ शस्त्रास्त्रयुद्धानन्तरं सम्यगधिकं यथा तथा दीप्तः कोप एव दहनोऽग्निर्यस्य। अत एव भ्रुवोर्भ्रुकुट्योर्भङ्गेन वक्रत्वेन भीषणं विलोकयितॄणां भयदं मुखं वदनं यस्य तथोक्तोऽसुराणां दैत्यानां चक्रवर्ती सम्राट्। सार्वभौम इत्यर्थः ॥ "राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः। चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः" इत्यमरः ॥ असुरेन्द्रस्तारको रथं स्यन्दनं विहाय परित्यज्य क्रीडन्नूर्ध्वदिशि कम्पमानस्तथा करालो भीषणः करवालः खड्गः स करे पाणौ यस्य। धारितविकटकृपाणः सन्नित्यर्थः। तं त्रिपुरारिसूनुं शिवपुत्रमभितः संमुखं प्रत्यधावत्। कुण्ठितसर्वशस्त्रास्त्रत्वात्करवालेन शिरोनालजिहीर्षया प्रतिदुद्रावेत्यर्थः ॥ "धावु गतौ" इत्यस्मात्कर्तरि लङ् ॥

अभ्यापतन्तमसुराधिपमीशपुत्रो
दुर्वारबाहुविभवं सुरसैनिकैस्तम्।
दृष्ट्वा युगान्तदहनप्रतिमां मुमोच
शक्तिं प्रमोदविकसद्वदनारविन्दः ॥ ४९ ॥

अभ्यापतन्तमिति ॥ सुरसैनिकैर्देवसेनाजनैर्दुर्वारो दुःसहो बाहुविभवो भुजवीर्यं यस्य। सुरसैनिकैर्दुर्जेयमित्यर्थः। तमसुराधिपं दैत्यराजमभ्यापतन्तं संमुखमागच्छन्तं दृष्ट्वा विलोक्येशपुत्रो महेशतनयः कुमारः प्रमोदेन तदीयवधागतत्वजनितानन्देन विकसद्विदलद्वदनारविन्दं मुखकमलं यस्य। किंचिद्विहस्येत्यर्थः। युगान्तदहनस्य प्रलयकालीनानलस्य प्रतिमेव प्रतिमा प्रतियातना यस्याः। प्रज्वलद्दहनकीलाजालपरिवृतामित्यर्थः। शक्तिमायुधविशेषं मुमोच ॥ "शक्तिः प्रहरणान्तरे" इति विश्वः ॥

उद्द्योतिताम्बरदिगन्तरमंशुजालैः
शक्तिः पपात हृदि तस्य महासुरस्य।

१ दहनवर्णं स्फुरद. २ दृष्ट्वा. ३ असुरेश्वरम्. ४ दैः.

इति विषमशरारेः सूनुना जिष्णुनाजौ
त्रिभुवनवरशल्ये प्रोद्धृते दानवेन्द्रे ।
वलरिपुरथ नाकस्याधिपत्यं प्रपद्य
व्यजयत सुरचूडारत्नघृष्टाग्रपादः ॥ ५५ ॥

इतीति ॥ जिष्णुना जयशीलेन विषमशरारेः पञ्चशरशत्रोर्हरस्य सूनुना कुमारेण त्रिभुवनस्य भुवनत्रयस्य वरे श्रेष्ठे शल्ये शत्रौ ॥ "शल्यश्च कथितः शत्रौ मदनद्रुमयोरपि" इति विश्वः ॥ दानवेन्द्रे तारक इत्येवंप्रकारेण प्रोद्धृत उत्खनिते । मारिते सतीत्यर्थः । अथ तारकवधानन्तरं वलरिपुः पुरंदरो नाकस्य स्वर्गस्याधिपत्यं राज्यं प्रपद्य प्राप्य सुराणां चूडारत्नैर्मुकुटमणिभिर्घृष्टावग्रपादौ पादाग्रे यस्य ॥ षष्ठीसमासे राजदन्तादित्वादग्रस्य पूर्वनिपातः ॥ तथाभूतः सन् । व्यजयत । सर्वोत्कर्षेण वृत्त इत्यर्थः । स्वस्वर्गराज्यं प्राप्य निष्कण्टकतयाभुवलगिति भावः ॥ व्यजयतेति "विपराभ्यां जेः" इत्यात्मनेपदम् ॥ मालिनीवृत्तम् । लक्षणं तूक्तप्रायम् ॥

यं मासूत सुतं पुरा च जननी नाम्ना सुहीरेति सा
ख्यातो यस्य बुधेन्द्रमस्तकमणिः श्रीलक्ष्मणाख्यः पिता ।
यत्नाद्वृत्तियं महद्भिजयते विद्वत्तया मण्डितं
तेनासौ रचिता कुमारविवृतिः संजीविनी जीवदा ॥
संवत्सरेऽङ्काद्रिपुराण(१८७०)तुल्ये नभस्यमासे बहुले दले च ।
तिथावनङ्गस्य सजीववारे टीका कुमारस्य समापदेषा ॥
शुद्धं त्वशुद्धं च विवेचनीयं सर्वत्र विद्यार्णवपारगेण ।
मयोक्तमेतद्विदुषा परेण पक्षेऽपरस्मिन्ननुकम्पनीयः ॥
टीकासंयुतकाव्यपञ्चकमथ स्तोत्राणि दिक्संख्यका-
न्येकश्छन्दसि चैक एव गणिते साहित्यशास्त्रे त्रयः ।
प्राकाव्यद्वयटिप्पणीद्वयमिति ग्रन्थावली संगता
सीतारामकवेः कृतिः कृतिगले नक्षत्रमालायताम् ॥

इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसंभवश्रीसीतारामकविविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये तारकासुरवधो नाम सप्तदशः सर्गः ।

---

१ खलशरये. २ भेदिते; पातिते. ३ अपि.

अथ कुमारसंभवस्य

अष्टमः सर्गः ।

मल्लिनाथकृतया संजीविन्या समेतः ।

अथ शृङ्गारमुभयोः * * * * * * * * ।

कुमारसंभवफले सर्गेऽस्मिन्नाह संमति ॥

सोऽपि संक्षिप्तसंपन्नसंयुक्तश्च समृद्धिमान् ।

इति भेदाश्चतुर्धोक्ताश्चतुर्णां च वियोगिनाम् ॥

तत्रावस्थाप्रभेदेन शृङ्गारे नायिका त्रिधा ।

मुग्धा मध्या प्रगल्भा च तत्र ह्रीसाध्वसाविलाम् ॥

मुग्धावस्थां समाश्रित्य देव्या आद्यसमागमे ।

आदावेकादश श्लोकाः ख्यातपूर्वानुरागिणोः ॥

प्रथमं नाम शृङ्गारं शिवयोः कथितं कविः (?)।

चुम्बनेष्वधरेत्यत्र लक्षणं त्वस्य वक्ष्यते ॥

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।

भावसाध्वसपरिग्रहादभूत्कामदोहदसुखं मनोहरम् ॥ १ ॥

पाणीति ॥ पाणिपीडनविधेरनन्तरं पाणिग्रहणानन्तरम् ॥ विधेरिति पञ्चमी षष्ठी च । उभयथाप्यनुशासनसंभवादित्युक्तं प्राक् ॥ शैलराजदुहितुः पार्वत्याः कर्त्र्याः ॥ तं हरं प्रति भावसाध्वसपरिग्रहान्मनोहरं चित्ताकर्षकं कामदोहदम् । कामसंवर्धकमित्यर्थः ॥ "तरुगुल्मलतादीनामकाले कुशलैः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्" इति शब्दार्णवे ॥ तच्च तत्सुखं कामदोहदसुखमभूत् । हरस्येति शेषः ॥ नायिकानायकयोरन्योन्यानुभवदर्शनात्सुखमाविर्भवति । तच्च मदनोद्दीपकमिति रसविदां स्थितिः । तथा च हरस्य गौर्या नवोढायाः स्वगोचरभावयुक्तसाध्वसदर्शनात्सुखमाविर्भवति । तच्च मदनाकारं प्रादुर्बभूवेत्यर्थः । रसाभावस्यापि च कार्यमनुभावः । तदुक्तम्— "रसा गच्छन्ति संस्थानं उपलक्ष्यते । सोऽनुभावः * * * * * * संस्थानसूचकः" इति ॥

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥ ६ ॥

अपीति ॥ कथाप्रवृत्तये संलापप्रवर्तनायावस्तुन्यप्रस्तुतार्थेऽपि प्रश्नतत्परम् । यत्किंचित्पृच्छन्तमित्यर्थः । अनङ्गशासनमीश्वरं पार्वती वीक्षितेन । न तु वाचेत्यर्थः । परिगृह्याङ्गीकृत्य मूर्धकम्पमयं शिरःकम्पस्वरूपम् ॥ स्वार्थे मयट् ॥ उत्तरं ददौ । न तु वाङ्मयं साध्वसादिति भावः ॥ विहृतनामा लज्जानुभाव उक्तः । तदुक्तं रतिरहस्ये—"ईर्ष्यामानातिलज्जाभ्यां न दत्तं योग्यमुत्तरम् । क्रियया व्यज्यते यत्र विहृतं तदुदीरितम्" इति ॥

पुनस्तमेवाह—

शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ॥ ७ ॥

शूलिन इति ॥ सा पार्वती रहसि हृतांशुका प्रियेणाकृष्टवस्त्रा सती करतलद्वयेन । स्वकीयेनेत्यर्थः । शूलिनो हरस्य नयने नेत्रद्वयं संनिरुध्य संच्छाद्य तस्य शूलिनो ललाटलोचने तृतीयेऽक्ष्णि पश्यति सति मोघयत्नाखिलप्रयासात एव विधुराभूत् । तृतीयकराभावादिति भावः ॥ एतेन किंचिद्धाष्टर्यादयो व्यज्यन्ते ॥

चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ॥ ८ ॥

चुम्बनेष्विति ॥ चुम्बनेष्वधरदानवर्जितमोष्ठार्पणरहितमदयोपगूहने निर्दयालिङ्गने सन्नौ स्रस्तौ हस्तौ करौ यस्मिंस्तत्तथोक्तम् । तथा दुर्लभप्रतिकृतम् । प्रगल्भरवाश्लिष्टदन्तताडनाद्यकृतप्रयत्नमित्यर्थः । अत एव क्लिष्टमन्मथं लज्जयोपरुद्धमदनमपि वध्वा नवोढाया रतं वधूरतं प्रभोरीश्वरस्य प्रियम् । अभूदिति शेषः ॥ "वधूः स्नुषानवोढास्त्रीभार्यास्पृष्टाङ्गनासु च" इति विश्वः ॥ अयं लज्जासाध्वसाभ्यां संकुचितोपचारत्वात्संक्लिष्टसंभोगः ॥ तदुक्तं भूपालेन—"युवानौ यत्र संक्षिप्तसाध्वसव्रीडयादिभिः । उपचारान्निषेवन्ते स संक्लिष्ट इतीरितः" इति ॥

यन्मुखग्रहणमक्षताधरं दत्तमव्रणपदं नखं च यत् ।
यद्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत् ॥ ९ ॥

यदिति ॥ पार्वती प्रियस्य संबन्ध्यक्षतोऽखण्डितोऽधरो यस्मिंस्तत्तथोक्तं यन्मुखग्रहणं मुखचुम्बनम् । अव्रणपदं लक्ष्मरहितम् ॥ "पदं व्यवसितत्राणस्थान-

मत्स्याद्विरतम्" इत्यमरः॥ दर्शं पश्य नर्म नमस्यम् । तस्यान्तं तृ कन्दर्पं सितं
गहने स्म । नेत्रद्वितीयम् । पवनन्दर्पनि गात्रम् । मनुष्यत्वं नयं गुरुं वा न गतेम
नवोढानाम् दृष्टि दृश्यम् । मदुक्तं रतिरहस्ये—"नानाजनानुयोगेन न शान्तं
योगतः । तिर्यक् गच्छति वा नम्यान्तरेण गायतीति । नवोढाम्" इति ॥

रात्रिवृत्तमनुयोक्तुमुद्यतं सा विभातसमये सखीजनम् ।
नाकरोदपकुतूहलं ह्रिया शंसितुं च हृदयेन तत्वरे ॥ १० ॥

रात्रीति ॥ सा पार्वती विभातसमये प्रभातकाले रात्रिवृत्तम् । सुरतवृत्तान्तमित्यर्थः । अनुयोक्तुं प्रष्टुम् ॥ "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः ॥ उद्यतं प्रवृत्तं सखीजनं ह्रिया लज्जयापकुतूहलं निराकाङ्क्षं नाकरोत् । न किंचिदाचष्ट इत्यर्थः । हृदयेन हृदा च शंसितुं तत्वरे त्वरिताभूत् । औत्सुक्यादिति भावः । त्वरा संभ्रमादीनामनुभावत्वादिति ॥

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमनु बिम्बमात्मनः कानि कानि न चकार लज्जया ११

दर्पण इति ॥ किंचेति चार्थः । दर्पणे मुकुरे परिभोगो नखक्षतादिसंभोगचिह्नं दर्शति पश्यतीति परिभोगदर्शिनी सा पार्वती पृष्ठतः पश्चाद्भागे निषेदुषः स्थितवतः॥ सदेः क्वसुः ॥ प्रणयिनः प्रियस्य हरस्य बिम्बं प्रतिबिम्बम् । दर्पणे संक्रान्तमित्यर्थः । आत्मनः स्वस्य बिम्बमनु । प्रतिबिम्बस्य पृष्ठत इत्यर्थः ॥ "अनुर्लक्षणे" इति कर्मप्रवचनीयत्वाद्द्वितीया ॥ प्रेक्ष्य लज्जया । स्वचापलमाकण्ठकृतयेत्यर्थः । कानि कानि यानि यानि भेदवाच्यानि । अङ्गसंवरणादिचेष्टितानीत्यर्थः ॥ उक्तं च—"लज्जानुभावेन साचीकृता वर्णवैवर्ण्याधोमुखादिकृत" इति ॥ न चकार ॥

नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसीत् ।
भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ॥ १२ ॥

नीलकण्ठेति ॥ नीलकण्ठेन परिभुक्तं यौवनं यस्याः सा तां तथोक्ताम् । प्रियेण भुक्तयौवनामित्यर्थः । तां पार्वतीं विलोक्य जननी मेना समाश्वसीत् । संतुतोषेत्यर्थः ॥ श्वसिधातोर्लङ् । "अड्गार्ग्यगालवयोः" इति विकल्पादडागमः ॥ तथाहि । वधूजनो भर्तृवल्लभतया पतिवात्सल्येन मातुर्मानसीं मनोभवां शुचं शोकमस्यति निरस्यति हि ॥ "विपर्ययाद्विपर्ययश्च" इत्यर्थान्तरमेयं सामान्यैकविशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥

संप्रति देव्या मुग्धावस्थातो मध्यमावस्थामाप्तिमाह—

वासराणि कतिचित्कथंचन स्थाणुना पदमकार्यत प्रिया ।
ज्ञातमन्मथरसा शनैःशनैः सा मुमोच रतिदुःखशीलताम् ॥ १३ ॥

वासराणीति ॥ स्थाणुना शंभुना ॥ कर्त्रा ॥ प्रिया पार्वती ॥ कर्मभूता ॥ कतिचिद्वासराणि । कैश्चिदहोभिरित्यर्थः ॥ अत्यन्तसंयोगे द्वितीया ॥ कथंचन कृच्छ्रेण पदं पदप्रक्षेपमकार्यत कारिता । सुरतकर्मणीति शेषः ॥ करोतेर्ण्यन्तात्कर्मणि लुङ् ॥ "हृक्रोरन्यतरस्याम्" इत्यणि कर्तुः कर्मत्वे "ण्यन्ते कर्तुश्च कर्मणा" इत्यभिहितत्वं च ॥ सा कृतपदा पार्वती ज्ञातमन्मथरसानुभूतसुरतसुखास्वादा सती ॥ "आस्वादे विरसमाहुः" इति शब्दानुशासने ॥ शनैःशनैः क्रमेण रतौ रते दुःखशीलतां प्रतिकूलस्वभावतां मुमोच ॥ "शीलं स्वभावे सद्वृत्ते" इत्यमरः ॥ मध्यमावस्थां प्राप्तेत्यर्थः ॥

तुल्यलज्जास्मरत्वमेवाह—

सस्वजे प्रियमुरोनिपीडिता प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ॥ १४ ॥

सस्वज इति ॥ सा पार्वत्युरोनिपीडितोरसि गाढमाश्लिष्टा सती प्रियं सस्वजे । न तु निष्पन्दमास्तेत्यर्थः । अनेन स्मरातिशयः सूचितः । अनेन प्रियेण प्रार्थितं चुम्बनार्थं याचितम् ॥ "याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः" इति केशवः ॥ मुखं नाहरत् । मेखलायां प्रणयः परिचयः ॥ प्रणयः स्यात्परिचये याच्ञायां सुहृदेऽपि च" इति यादवः ॥ तत्र लोलतां चञ्चलतां गतमस्य प्रियस्य हस्तं शिथिलं रुरोध न्यवारयत् । न तु निर्भरमिति भावः ॥ अत्र मदनप्रतीकाराभ्यां तुल्यलज्जास्मरत्वं व्यज्यते ॥

अथ देव्याः प्रगल्भावस्थां दर्शयितुं तयोः समानरागित्वं तावदाह—

भावसूचितमदृष्टविप्रियं चाटुमत्क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तदा तयोः प्रेम रूढमितरेतराश्रयम् ॥ १५ ॥

भावेति ॥ तयोः शिवयोः कैश्चित्कतिभिश्चिदेव दिवसैः । भावसूचितं भावैश्चेष्टाभिः कटाक्षविक्षेपादिभिः संजातमदृष्टं विप्रियमप्रियाचरणं यत्र तत्तथोक्तं चाटूनि प्रियोक्तयो यस्मिन्सन्ति तच्चाटुमत् ॥ भूमार्थे मतुप् ॥ क्षणवियोगात्क्षणमात्रविरहादपि कातरं भीरु इतरेतराश्रयमन्योन्यविषयं प्रेम । प्रेमस्थाभिरत्याद्वृगवस्था भवतीत्यर्थः । रूढमभूत् । प्रेम्णानुगमदशाभिरूढं नानाविधमित्यर्थः ॥ तदेव-

त्सर्वं स्फुटीकृतं भूपालेन— " अङ्कुरपल्लवकलिकाप्रसूनफलभागियम्-" इत्यादि- ना। एका रतिरेव स्थायीभूता रसीभवति तस्याश्चाङ्कुरावस्थाभेदोपपत्तौ स प्रे- मादिपदैरभिलप्यत इत्यर्थः। " सम्रेमभेदरहितं यूनोर्यद्भावबन्धनं भावो रती ग ग एव स्वसंवेद्यदशाप्राप्त्यावदाश्रयवृत्तिश्चेदनुरागः " इति मानादिलक्षणं विस्त रभयान्न लिख्यत इत्याकर एव द्रष्टव्यम्॥

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम्।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकनिर्वृतिः॥१६॥

तमिति॥ वधूरात्मसदृशं स्वानुरूपं तं वरं वोढारं प्रति यथान्वरज्यतानुर- क्ताभूत्॥ रञ्जेर्दैवादिकात्कर्तरि लकारः। स्वरितत्वादात्मनेपदम्॥ तथैव वरो- ऽपि नवोढाप्यात्मनः सदृक्तामात्मसदृशाम्॥ " त्यदादिषु दृशोरनालोचने कञ्च" इति चकारात्क्विप्प्रत्ययः॥ तां वधूं प्रत्यन्वरज्यत। वध्वामनुरक्तोऽभूदित्यर्थः॥ " गत्यर्थाकर्मक-" इत्यादिना सकर्मकत्वम्॥ दृष्टान्तमाह—जाह्नवी गङ्गा साग- राच्चापगच्छतीत्यनपगानपेता हि। सोऽपि सागरस्तस्या जाह्नव्या मुखरसेनाग्रस- लिलेन वक्त्रास्वादेनैका मुख्या निर्वृतिरानन्दो यस्य स तथोक्तः॥ अत्र दृष्टान्ता- लंकारः। लक्षणं तूक्तम्। इत्थं समानानुरागकथनाद्रसाभासत्वं निरस्तम्। तदु- क्तम्— " योषितो बहुसक्तिश्चेद्रसाभासः स उच्यते "। कविनाप्युक्तं मालवि- कायाम्— " अनातुरोत्कं प्रति विप्रसिध्यता समीपगेनापि रतिर्न मां प्रति। प- रस्परप्राप्तिनिराशयोर्वा शरीरनाशोऽपि समानरागयोः " इति॥

अथ देव्याः प्रगल्भावस्थामाश्रित्य संभोगमाह—

शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया।
शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम्॥ १७॥

शिष्यतामिति॥ रहस्येकान्ते निधुवनमुपदिशतीति निधुवनोपदेशिनः सु- रतविद्यागुरोः॥ "व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम्" इत्यमरः॥ शंकरस्य शिष्यतां प्रपन्नया प्राप्तया तया पार्वत्या यद्युवतिनैपुणं युवतिजनोचितं नैपुणम्। सु- रतकौशलमित्यर्थः। शिक्षितमभ्यस्तम्। आचरितमित्यर्थः। तदेव गुरुदक्षिणीकृत- म्। यथोपदेशकरणाद्दक्षिणासममभूदित्यर्थः॥ अनेन कृतप्रतिकृतं सूच्यते॥

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा।
शीतलेन निरवापयत्क्षणं मौलिचन्द्रशकलेन शूलिनः॥

दष्टमिति॥ अम्बिका पार्वती दष्टश्चासौ मुक्तश्च तं दष्टमुक्तम्॥ "

इत्यादिना समासः ॥ अधरोष्ठे वेदनया विधुतौ कम्पितौ हस्तपल्लवौ पाणिपल्लवौ यस्याः सा तथोक्ता सती शीतलेन शूलिनो मौलिचन्द्रशकलेन क्षणं निरवापयत् । शीतलोपचारेण निर्व्यथमकरोदिति विश्रम्भोक्तिः ॥ निवातेर्धातोर्ण्यन्तात् "अर्तिह्री—" इत्यादिना पुगागमः ॥ अत्राधरपीडनात्सुखेऽपि दुःखवदुपचारात्कुट्टमितनामानुभाव उक्तः । तदुक्तम्—"केशाधरादिसंग्रहणे मोदमानापि मानसे दुःखितेव बहिः कुप्येत्तत्कुट्टमितम्" इति ॥

चुम्बनादलकचूर्णदूषितं शंकरोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥ १९ ॥

चुम्बनादिति ॥ अथ शंकरोऽपि चुम्बनाच्चुम्बनार्थितोऽलकचूर्णेन दूषितमुपहतं ललाटजं नयनमुच्छ्वसत्कमलगन्धये विकचारविन्दगन्धधारिणे ॥ "उपमानाच्च" इतीकारः ॥ पार्वत्या वदनगन्धवाहिने । फूत्कारमारुतायेत्यर्थः । ददौ । रजोनिःसारणार्थं तदाभिमुख्येन स्थापितवानित्यर्थः ॥ एतेन देव्याः प्रियवशंवदत्वमुक्तम् । अत्र हरचक्षुष्यलकचूर्णकथनाद्देव्या उपरिभावः सूचितः ॥

एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमात्रमवसद्वृषध्वजः ॥ २० ॥

एवमिति ॥ वृषध्वजो हर एवमुक्तरीत्येन्द्रियाणां सुखस्यानुकूलस्य वर्त्मनो मार्गस्य । स्त्रीसमागमस्येत्यर्थः । सेवनात्परिभोगादनुगृहीतमन्मथः पुनरुज्जीवितमदनः सन् । उमया सह शैलराजभवने हिमवद्गेहे मासमात्रमवसत् ॥ अत्यन्तसंयोगे द्वितीया ॥ मासमात्रमिति वधूवशीकरणकालकॢप्तिः प्रदर्शिता ॥

सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखपीडितम् ।
तत्र तत्र विजहार संचरन्नप्रमेयगतिना ककुद्मता ॥ २१ ॥

स इति ॥ स आत्मभूः शिव आत्मजाया दुहितुर्विरहदुःखेन पीडितं हिमवन्तमनुमान्यानुमतं कृत्वाप्रमेयगतिनापरिच्छेद्यगतिना ककुद्मता वृषेण संचरन्संचरमाणस्तत्र तत्र नानादेशेषु विजहार ॥

मेरुमेत्य मरुदाशुवाहनः पार्वतीस्तनपुरस्कृतः कृती ।
हेमपल्लवविभङ्गसंस्तरामन्वभूत्सुरततत्परः क्षपाम् ॥ २२ ॥

मेरुमिति ॥ मरुदाशुवाहनः पवनजवनवाहनः पार्वतीस्तनाभ्यां पुरस्कृतः । पार्वतीपुरोभागसमाश्लिष्ट इत्यर्थः । अन्वर्थोऽयमनेनान्वयः । कृती कृतार्थो हरो मेरुमे-

स्य हेमपल्लवानां विभङ्गाः खण्डास्त एव संस्तरस्तल्पं यस्यां तां तथोक्तां सर्वां रात्रिं सुरततत्परः सुरतासक्तः सन् । अन्वभूत् ॥

पद्मनाभवलयाङ्कितांश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः।
मन्दरस्य कटकेषु चावसत्पार्वतीवदनपद्मषट्पदः ॥ २३ ॥

पद्मनाभेति ॥ पार्वतीवदनपद्मे षट्पदः । प्रियामुखरसास्वादलोल इत्यर्थः। हरः । पद्मं नाभिर्यस्य स पद्मनाभो विष्णुः ॥ "अच्प्रत्यन्ववपूर्वात्सामलोम्नः" इत्यत्राजिति योगविभागात्समासान्तः ॥ तस्य वलयैरङ्किता अश्मानो येषां तेषु। अमृतमथनसमय इति भावः । तथा नवाः प्रत्यग्रा अमृतविप्रुषः सुधाविन्दून्प्राप्तवत्सु मन्दरस्य मन्थाचलस्य कटकेषु नितम्बेषु चावसत् ॥ एतेन मन्दरस्यानेकाद्भुताधारत्वान्मनोविनोदकत्वमुक्तम् ॥

रावणध्वनितभीतया तयाकण्ठसक्तमृदुबाहुबन्धनः ।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ॥ २४ ॥

रावणेति ॥ जगद्गुरुः । विश्रवसोऽपत्यं रावणो दशकण्ठः ॥ "तस्यापत्यम्" इत्यण्प्रत्ययः । वृत्तिविषये विश्रवसूशब्दस्य रवणादेशः ॥ रावणस्य ध्वनितात्कैलासोत्पाटनसमयक्ष्वेडिताद्भीतया तया पार्वत्या कण्ठसक्ताभ्यां मृदुबाहुभ्यां बन्धनं यस्य स तथाभूतः । एकनेत्रत्वादेकपिङ्गलः कुबेरस्तस्य गिरौ कैलासे विशदा निर्मलाः शशिप्रभाश्चन्द्रिका निर्विवेश बुभुजे ॥ "निर्वेशो भृतिभोगयोः" इत्यमरः ॥

तस्य जातु मलयस्थलीरतेर्धूतचन्दनलतः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ॥ २५ ॥

तस्येति ॥ जातु कदाचिद्धूतचन्दनलतः कम्पितपटीरशाखः ॥ "समे शाखालते" इत्यमरः ॥ सह लवङ्गस्य केसरैः सलवङ्गकेसरः ॥ "लवङ्गं देवकुसुमम्" इत्यमरः ॥ विशेषणाभ्यां शैत्यसौरभ्ये दर्शिते । दक्षिणानिलो मलयमारुतः। चाटुकारश्चाटुप्रयोगः। प्रियवाद इति यावत्॥ भावे घञ्॥स इव मलयस्थलीषु मलयाचलप्रदेशेषु रतिः सुरतं यस्य तथोक्तस्य । तत्र रममाणस्येत्यर्थः ॥ तस्य शिवस्य प्रियाक्लमं प्रियायाः सुरतश्रममाचचाम जहार । यथा लोके महानपि श्रम एकेन प्रियवादेनापैति तद्वद्दक्षिणमारुतेनाप्यस्य सकलोऽपि सुरतक्लमो हृत इत्यर्थः ॥

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ॥
खे व्यगाहत तरंगिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥

हेमेति ॥ उमा गौरी हेमतामरसेन कनककमलेन ताडितः प्रियो

तेनोत्थितस्य भियस्य कराम्बुना कराक्षिप्ताम्भसा विनिमीलितेक्षणा मुकुलिताक्षी। मीनपङ्क्त्या पुनरुक्ता द्विगुणिता मेखला यस्याः सा तथाभूता सती खे तरंगिणीं व्यगाहत। तत्र तत्र जलक्रीडामकरोदित्यर्थः ॥

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन्।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥ २७ ॥

तामिति ॥ अयुग्मानि लोचनानि यस्य सोऽयुग्मलोचनस्त्र्यम्बकः ॥ युग्मशब्दो विशेष्यनिघ्नोऽप्यास्ते। "तस्मिन्युग्मासु संविशेत्" "युग्मान्दैवे यथाशक्ति पित्र्ये युग्मांस्तथैव च" इत्यादिप्रयोगदर्शनात् ॥ नन्दने नन्दनोद्याने पुलोमतनया शची ॥ "पुलोमजा शची सुता" इति हरिवंशे ॥ तस्या अलकानामुचितैः पारिजातकुसुमैस्तां प्रसाधयन्नलंकुर्वंश्चिरं सुरवधूभिः सस्पृहमीक्षितः। केन वा पुण्येनायं लभ्यत इति साभिलाषदृष्ट इत्यर्थः ॥ अत्र देवस्यानुकूलनायकत्वं देव्याः स्वाधीनपतिकात्वं चावसेयम् ॥

इत्यभौममनुभूय शंकरः पार्थिवं च वनितासखः सुखम्।
लोहितायति कदाचिदातपे गन्धमादनगिरिं व्यगाहत ॥ २८ ॥

इतीति ॥ इतीत्थं शंकरो वनितासखः सन्। भूमौ भवं भौमम्। न भौममभौमं दिव्यं पृथिव्यां भवं पार्थिवं च सुखमनुभूय कदाचिदातपे लोहितायति लोहितवर्णे भवति। अस्तंगते सवितरीत्यर्थः ॥ "लोहितादिडाज्भ्यः क्यष्" इति क्यष्प्रत्ययः ॥ गन्धमादनगिरिं व्यगाहत। पर्वतमुद्दिश्य निवृत्त इत्यर्थः ॥ उद्देशक्रियायां सति गिरेः कर्मत्वम्। यथाह भाष्यकारः— * * * * * * * * * * * * * ॥

तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम्।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम् ॥ २९ ॥

तत्रेति ॥ तत्र गन्धमादने काञ्चनविकारः काञ्चनं सौवर्णं तच्च तच्छिलातलं तदाश्रयो यस्य स भगवान्नेत्रगम्यं सायंतनम्। अर्थाद्दर्शनयोग्यम्। भास्करं सूर्यम् ॥ "दिवाविभा-" इत्यादिना टप्रत्ययः ॥ अवलोक्य दक्षिणेतरभुजः सव्यबाहुर्व्यपाश्रयो यस्यास्ताम्। निजवामभुजस्पृष्टपार्श्वविष्टामित्यर्थः। सह धर्मं चरतीति सहधर्मचारिणीं पत्नीं व्याजहार जगाद ॥

पद्मकान्तिमरुणत्रिभागयोः संक्रमय्य तव नेत्रयोरिव।
संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥ ३० ॥

पद्मकान्तिमिति ॥ असावहर्पतिः सूर्यः ॥ अरुणादीनाम् "पद्मा-

दिपूपसंख्यानम्" इति रेफादेशः ॥ पद्मकान्ति पद्मशोभाम् । तृतीयो भागो गः ॥ वृत्तिविषये पूरणार्थत्वं संख्याया इत्युक्तम् ॥ अरुणत्रिभागौ ययोस्त अरुणोपान्तयोरिति भाग्यलक्षणोक्तिः । तव नेत्रयोः संक्रमय्येव । तदानीं नामविकासान्नेत्रयोस्तु विकासाच्चेयमुत्प्रेक्षा । संक्षये प्रलयकाले प्रजेश्वरः तिर्जगदिवाहर्दिवसं संहरति । अस्तं गच्छतीत्यर्थः ॥

सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ॥ ३१ ॥

सीकरेति ॥ विवस्तेजोऽस्यास्तीति विवस्वांस्तस्मिन्विवस्वति सूर्ये मरीचिभिः॥ सहार्थविवक्षायां तृतीयातएव विनापि सहशब्देन तृतीया ॥ सीकरव्यतिकरं पयःकिरणसंपर्कं दूरयति दूरीकुर्वति सति । हे अवनते पार्वति । अमी तव पितुर्भवत्पितुर्हिमवतो निर्झराः प्रवाहाः ॥ "प्रवाहो निर्झरो झरः" इत्यमरः ॥ इन्द्रचापं नानावर्णप्रभासमूहस्तस्य परिवेषेण परिवेष्टनेन शून्यतां व्रजन्ति । अर्ककिरणसंपर्कहेतुत्वादिन्द्रचापस्य तन्निवृत्त्या निवृत्तिरित्यर्थः ॥

दष्टतामरसकेसरत्यजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥ ३२ ॥

दष्टेति ॥ दष्टमर्धजग्धं तामरसकेसरं पद्मकिञ्जल्कम् । मुखद्वयेनैकमिति भावः । तत्त्यजत इति तथोक्तयोः क्रन्दतोः कूजतोर्विपरिवृत्तकण्ठयोः । परस्परालोकनार्थं वक्रीकृतग्रीवयोरित्यर्थः । निघ्नयोर्दैवाधनियोः ॥ "अधीनो निघ्न आयत्ते" इत्यमरः ॥ चक्रवाकी च चक्रवाकश्च तयोः ॥ "पुमान्स्त्रिया" इत्येकशेषः ॥ सरस्यल्पमन्तरं व्यवधानमनल्पतामाधिक्यं गतम् । सरसि वियुज्यमानयोर्महद्व्यवधानमभूदित्यर्थः ॥

स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ॥ ३३ ॥

स्थानमिति ॥ दन्तिनो गजाः । अह्नि भवमाह्निकम् ॥ "कालाट्ठञ्" ॥ स्थानमपास्य विहाय सल्लकी गजप्रिया काचिल्लता ॥ "सल्लकी स्याद्गजप्रिया" इति हलायुधः॥ तस्या विटपभङ्गैः पल्लवखण्डैर्वासितं सुरभितं वारिरुहेषु बद्धाः संगताः षट्पदा यस्मिंस्तद्वारि जलमाविभातं प्रभातमारभ्य यच्चरणं तस्मै । तत्पर्याप्तं गृह्णत उपाददते । गजा हि भुक्तिपर्याप्तजलं सकृदेव सायं पिबन्तीति

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता ।
दीर्घया प्रतिमया सरोम्भसां तापनीयमिव सेतुबन्धनम् ॥३४॥

पश्येति ॥ हे मितकथे हे मितभाषिणि । एतेन स्वस्य तत्संलापने लौल्यं सूचयति । पश्चिमदिगन्तलम्बिना विवस्वता ॥ कर्त्रा ॥ दीर्घया दिगन्तलम्बित्वादायतया प्रतिमया निजप्रतिबिम्बेन ॥ "प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्" इत्यमरः ॥ सरोम्भसां तपनीयविकारस्तापनीयं हिरण्मयम् ॥ "तपनीयं शातकुम्भम्" इत्यमरः ॥ सेतुबन्धनं निर्मितम् ॥ इवेत्युत्प्रेक्षा ॥ अस्तमयसमये सरःपारावारिणामरुणमायतमर्कप्रतिबिम्बं हिरण्मयसेतुरिव दृश्यत इत्यर्थः । पश्येति वाक्यार्थः कर्म ॥

उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः ।
दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव ॥ ३५ ॥

उत्तरन्तीति ॥ दंष्ट्रिणो दंष्ट्रावन्तः ॥ व्रीह्यादित्वादिनिः ॥ अतएव दष्टा भङ्गुराः कुटिला बिसाङ्कुरा मृणालाङ्कुरा यैस्ते त इव स्थिता वनवराहाणां यूथपाः ॥ "यूथनाथस्तु यूथपः" इत्यमरः ॥ गाढपङ्कमतिपङ्किलं पल्वलमल्पसरः ॥ "वेशन्तः पल्वलं चाल्पसरः" इत्यमरः ॥ विनिकीर्य विक्षिप्यातिवाहितातपा उत्तरन्ति पल्वलान्निर्गच्छन्ति ॥

एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः ।
हीयमानमहरत्ययातपं पीवरोरु पिबतीव बर्हिणः ॥ ३६ ॥

एष इति ॥ हे पीवरोरु । एष वृक्षशिखरे वृक्षाग्रे कृतास्पदः कृतस्थितिर्जातरूपरसगौरमण्डलः आतपरूपणात्काञ्चनद्रववद्गौरवर्हमण्डलः ॥ "चामीकरं जातरूपं महारजतकाञ्चने" इत्यमरः ॥ बर्हमस्यास्तीति बर्हिणो मयूरः ॥ "फलबर्हाभ्यामिनज्वक्तव्यः" ॥ हीयमानं क्षीयमाणमहरत्ययातपं दिनान्तातपं पिबतीव । कथमन्यथा क्षीयमाणत्वमिति भावः ॥

पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता भाति किंचिदिव शेषवत्सरः ॥३७॥

पूर्वभागेति ॥ पूर्वभागे प्राचीमुखे तिमिरप्रवृत्तिभिर्ध्वान्तप्रसरैरेकतो व्यक्तपङ्कमिव जातं तथा विवस्वता हृतातप एव जलं यस्य तथोक्तं समाकाशं [illegible] शेषवत्तुच्छं सर इव भाति ॥

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥३८॥

आविशद्भिरिति ॥ उटजाङ्गणं पर्णशालाङ्गणमाविशद्भिः । प्रविशद्भिरित्यर्थः ॥ "पर्णशालोटजोऽस्त्रियाम्" इत्यमरः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ मृगैः । तथा मूलानां सेकेन सेचनेन सरसैः सद्रवैर्वृक्षकैश्चोपलक्षिताः ॥ अल्पार्थे कप्रत्ययः ॥ प्रविशन्त्यो वनादागच्छन्त्योऽग्निधेनवोऽग्निहोत्रार्था धेनव उदीरिताग्नयश्चाश्रमाः श्रियं बिभ्रति ॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥३९॥

बद्धकोशमिति ॥ बद्धकोशमपि । मुकुलितमपीत्यर्थः । कुशेशयम् ॥ कर्तृ ॥ "शतपत्रं कुशेशयम्" इत्यमरः ॥ वसतिं ग्रहीष्यते । स्थितिं करिष्यत इत्यर्थः ॥ "लृटः सद्वा" इति शतृप्रत्ययः ॥ षट्पदाय प्रीतिपूर्वमन्तरमवकाशं दातुमिव क्षणं सावशेषविवरं तिष्ठति ॥

दूरलग्नपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥ ४० ॥

दूरलग्नेति ॥ वारुणी दिक्प्रतीची दूरं लग्ना अतएव परिमेया अल्पावशिष्टा रश्मयो यस्य तेन तथोक्तेनारुणेन लोहितवर्णेन भानुना केसरवता किञ्जल्कवता बन्धुजीवं बन्धुजीवककुसुमम् ॥ "बन्धूको बन्धुजीवकः" इत्यमरः ॥ तदेव तिलकं तेन मण्डितालंकृता कन्यकेव भाति ॥

सामभिः सहचराः सहस्रशो स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥४१॥

सामभिरिति ॥ किरणोष्मपायिनः किरणोष्माणं पिबन्तीति तथोक्ताः । तथाहारा इत्यर्थः । चरन्तीति चराः ॥ पचाद्यच् ॥ सहभूताश्चराः सहचरा वालखिल्यप्रभृतयो महर्षयोऽग्नौ परिकीर्णं तेजो यस्य तत्तथोक्तम् ॥ "अग्निर्वादित्यः सायं प्रसवति" इति श्रुतेः ॥ भानुम् ॥ हृदयं गच्छन्तीति हृदयंगमा मनोरमाः ॥ गमेः सुपीति वक्तव्यात्खच् ॥ स्यन्दनाश्वानां हृदयंगमाः स्वना येषां तैः सामभिः सामवेदैः सहस्रशः संस्तुवन्ति ॥ "सामवेदेनास्तमये गीयते" इति श्रुतेः ॥

सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ॥ ४२ ॥

स इति ॥ सोऽयं भानुर्दिवसं महोदधौ संनिधाय । निधायेत्यर्थः । दिवसस्यादर्शनादियमुत्प्रेक्षा । आनतशिरोधरैर्गगनावतरणान्नम्रकन्धरैरतएव कर्णचामरविघट्टितेक्षणैर्युगभुग्नकेसरैः कुटिलितस्कन्धरोमभिर्हयैरस्तमोति ॥ “ अस्तस्तु चरमक्ष्माभृत् ” इत्यमरः ॥

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत्प्रकाशयति यावदुत्थितं मीलनाय खलु तावता च्युतम् ॥ ४३ ॥

खमिति ॥ रवौ संस्थितेऽस्तमिते सति खं व्योम प्रसुप्तमिव निःप्रकाशत्वान्निद्रितमिव । स्थितमित्यर्थः । युज्यते चैतदित्याह—महतस्तेजस ईदृशी वक्ष्यमाणप्रकारा गतिः । स्वभाव इत्यर्थः ॥ तां गतिमेवाह—तदिति ॥ तन्महत्तेज उत्थितं सद्यावत् । स्थानमिति शेषः । प्रकाशयति । तावताथ च्युतं सत् । तत्स्थानादिति शेषः । मीलनाय संकोचाय खलु भवति । यत्र स्थाने तेजस्तिष्ठति तत्प्रकाशत इति स्थितिः । यतो गच्छति न तत्प्रकाशते । अतः सूर्यापाये खं प्रसुप्तमिवेति युक्तोत्प्रेक्षेति भावः । अस्यार्थस्य तेजोमात्रसाधारण्येऽपि महति स्फुटमिति महद्ग्रहणं कृतम् ॥

संध्ययाप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।
प्रात्कयेयमुदये पुरस्कृता नानुयास्यति कथं तमापदि ॥ ४४ ॥

संध्ययेति ॥ संध्ययाप्यस्तशिखरेऽस्ताद्रिशृङ्गे समर्पितं निहितं वन्द्यं रवेर्वपुरनुगतमन्वगामि । अनंयुतं रविमन्वगादिति भावः । युक्तं चैतदित्याह—प्रावपूर्वमुदये तथा तेन प्रकारेण पुरस्कृताग्रतः कृता । पूजिता चेति गम्यते । प्रातः सूर्योदयात्प्रागेव संध्यागम इति हि प्रसिद्धम् । इयं संध्या तं रविमापद्यस्तसमये कथं नानुयास्यति । अनुयास्यत्येवेत्यर्थः ॥ संपदसंपदोस्तुल्यरूपमेव साधूनामिति भावः ॥

रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति सांध्यवेलया वर्तिकाभिरिव साधुवर्तिताः ॥ ४५ ॥

रक्तेति ॥ हे कुटिलकेशि ॥ “ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ” इति ङीष् ॥ अमूः पुरोगता रक्ताः पीताः कपिशाश्च रक्तपीतकपिशाः । नानावर्णा इत्यर्थः ॥ चार्थे द्वन्द्वः । न तु “ वर्णो वर्णेन ” इति तत्पुरुषः सामानाधिकरण्याभावात् ॥ पयोमुचां कोटयोऽग्रभागाः ॥ “ स्यात्कोटिरश्रौ चापाग्रे संख्याभेदप्रकर्षयोः ” इति विश्वः ॥ त्वं द्रक्ष्यसीति हेतोरनया सांध्यवेलया । संध्ययेत्यर्थः ॥ “ सांध्यवेलया ” इति क्वचित्पाठः ॥ वर्तिकाभिश्चित्रलेखनसाधनैः साधुवर्तिता उल्लासिताश्च भान्ति ॥

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥३८॥

आविशद्भिरिति ॥ उटजाङ्गणं पर्णशालाङ्गणमाविशद्भिः । प्रविशद्भिरित्यर्थः ॥ " पर्णशालोटजोऽस्त्रियाम् " इत्यमरः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ मृगैः । तथा मूलानां सेकेन सेचनेन सरसैः सद्रवैर्वृक्षकैश्चोपलक्षिताः ॥ अल्पार्थे कप्रत्ययः ॥ प्रविशन्त्यो वनादागच्छन्त्योऽग्निधेनवोऽग्निहोत्रार्था धेनव उदीरिताग्नयश्चाश्रमाः श्रिय बिभ्रति ॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥३९॥

बद्धकोशमिति ॥ बद्धकोशमपि । मुकुलितमपीत्यर्थः । कुशेशयम् ॥ कर्तृ ॥ " शतपत्रं कुशेशयम् " इत्यमरः ॥ वसतिं ग्रहीष्यते । स्थितिं करिष्यत इत्यर्थः ॥ " लृटः सद्वा " इति शतृप्रत्ययः ॥ षट्पदाय प्रीतिपूर्वमन्तरमवकाशं दातुमिव क्षणं सावशेषविवरं तिष्ठति ॥

दूरलग्नपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥ ४० ॥

दूरलग्नेति ॥ वारुणी दिक्प्रतीची दूरं लग्ना अतएव परिमेया अल्पावशिष्टा रश्मयो यस्य तेन तथोक्तेनारुणेन लोहितवर्णेन भानुना केसरवता किञ्जल्कवता बन्धुजीवं बन्धुजीवककुसुमम् ॥ " बन्धूको बन्धुजीवकः " इत्यमरः ॥ तदेव तिलकं तेन मण्डितालंकृता कन्यकेव भाति ॥

सामभिः सहचराः सहस्रशो स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥४१॥

सामभिरिति ॥ किरणोष्मपायिनः किरणोष्माणं पिबन्तीति तथोक्ताः । तथाहारा इत्यर्थः । चरन्तीति चराः ॥ पचाद्यच् ॥ सहभूताश्चराः सहचरा वालखिल्यप्रभृतयो महर्षयोऽग्नौ परिकीर्णं तेजो यस्य तत्तथोक्तम् ॥ " अग्निर्वादित्यः सायं प्रसवति " इति श्रुतेः ॥ भानुम् ॥ हृदयं गच्छन्तीति हृदयंगमा मनोरमाः ॥ गमेः सुपीति वक्तव्यात्खच् ॥ स्यन्दनाश्वानां हृदयंगमाः स्वना येषां तैः सामभिः सामवेदैः सहस्रशः संस्तुवन्ति ॥ " सामवेदेनास्तमये गीयते " इति श्रुतेः ॥

सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ॥ ४२ ॥

स इति ॥ सोऽयं भानुर्दिवसं महोदधौ संनिधाय। निधायेत्यर्थः। दिवसस्यादर्शनादियमुत्प्रेक्षा। आनतशिरोधरैर्गगनावतरणान्नम्रकन्धरैरतएव कर्णचामरविघट्टितेक्षणैर्युगभुग्नकेसरैः कुटिलितस्कन्धरोमभिर्हयैरस्तमेति॥ "अस्तस्तु चरमक्ष्माभृत्" इत्यमरः॥

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः।
तत्प्रकाशयति यावदुत्थितं मीलनाय खलु तावता च्युतम्॥१३॥

खमिति॥ रवौ संस्थितेऽस्तमिते सति खं व्योम प्रसुप्तमिव निःप्रकाशत्वान्निद्रितमिव। स्थितमित्यर्थः। युज्यते चैतदित्याह—महतस्तेजस ईदृशी वक्ष्यमाणप्रकारा गतिः। स्वभाव इत्यर्थः॥ तां गतिमेवाह—तदिति॥ तन्महत्तेज उत्थितं सद्यावत्। स्थानमिति शेषः। प्रकाशयति। तावताथश्च्युतं सत्। तत्स्थानादिति शेषः। मीलनाय संकोचाय खलु भवति। यत्र स्थाने तेजस्तिष्ठति तत्प्रकाशत इति स्थितिः। यतो गच्छति न तत्प्रकाशते। अतः सूर्यापाये खं प्रसुप्तमिवेति युक्तोत्प्रेक्षेति भावः। अस्यार्थस्य तेजोमात्रसाधारण्येऽपि महति स्फुर्तामिति महद्ग्रहणं कृतम्॥

संध्ययाप्यनुगतं रवेर्वपुर्वन्द्यमस्तशिखरे समर्पितम्।
प्राक्तथेयमुदये पुरस्कृता नानुयास्यति कथं तमापदि॥१४॥

संध्ययेति॥ संध्ययाप्यस्तशिखरेऽस्ताद्रिशृङ्गे समर्पितं निहितं वन्द्यं रवेर्वपुरनुगतमन्वगामि। असंधृतं रविमन्वगादिति भावः। युक्तं चैतदित्याह—प्राक्पूर्वमुदये तथा तेन प्रकारेण पुरस्कृताग्रतः कृता। पूजिता चेति गम्यते। प्रातः सूर्योदयात्प्रागेव संध्यागम इति हि प्रसिद्धम्। इयं संध्या तं रविमापद्यस्तसमये कथं नानुयास्यति। अनुयास्यत्येवेत्यर्थः॥ संपदसंपदोस्तुल्यरूपमेव साधूनामिति भावः॥

रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः।
द्रक्ष्यसि त्वमिति सांध्यवेलया वर्तिकाभिरिव साधुवर्तिताः॥१५॥

रक्तेति॥ हे कुटिलकेशि॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप्॥ अमूः पुरोगता रक्ताः पीताः कपिशाश्च रक्तपीतकपिशाः। नानावर्णा इत्यर्थः॥ चार्थे द्वन्द्वः। न तु "वर्णो वर्णेन" इति तत्पुरुषः सामानाधिकरण्याभावात्॥ पयोमुचां कोटयोऽग्रयः॥ "स्यात्कोटिरश्री चापाग्रे संख्याभेदप्रकर्षयोः" इति विश्वः॥ त्वं द्रक्ष्यसीति हेतोरनया सांध्यवेलया। संध्ययेत्यर्थः॥ "संधिवेलया" इति क्वचित्पाठः॥ वर्तिकाभिश्चित्रशलाकाभिः साधुवर्तिता उत्पादिताश्च भान्ति॥

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥३८॥

आविशद्भिरिति ॥ उटजाङ्गणं पर्णशालाङ्गणमाविशद्भिः । प्रविशद्भिरित्यर्थः ॥ "पर्णशालोटजोऽस्त्रियाम्" इत्यमरः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ मृगैः । तथा मूलानां सेकेन सेचनेन सरसैः सद्रवैर्वृक्षकैश्चोपलक्षिताः ॥ अल्पार्थे कप्रत्ययः ॥ प्रविशन्त्यो वनादागच्छन्त्योऽग्निधेनवोऽग्निहोत्रार्था धेनव उदीरिताग्नयश्चाश्रमाः श्रियं बिभ्रति ॥

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥३९॥

बद्धकोशमिति ॥ बद्धकोशमपि । मुकुलितमपीत्यर्थः । कुशेशयम् ॥ कर्तृ ॥ "शतपत्रं कुशेशयम्" इत्यमरः ॥ वसतिं ग्रहीष्यते । स्थितिं करिष्यत इत्यर्थः ॥ "लृटः सद्वा" इति शतृप्रत्ययः ॥ षट्पदाय प्रीतिपूर्वमन्तरमवकाशं दातुमिव क्षणं सावशेषविवरं तिष्ठति ॥

दूरलग्नपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥४०॥

दूरलग्नेति ॥ वारुणी दिक्प्रतीची दूरं लग्ना अतएव परिमेया अल्पावशिष्टा रश्मयो यस्य तेन तथोक्तेनारुणेन लोहितवर्णेन भानुना केसरवता किञ्जल्कवता बन्धुजीवं बन्धुजीवककुसुमम् ॥ "बन्धूको बन्धुजीवकः" इत्यमरः ॥ तदेव तिलकं तेन मण्डितालंकृता कन्यकेव भाति ॥

सामभिः सहचराः सहस्रशो स्यन्दनाश्वहृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥४१॥

सामभिरिति ॥ किरणोष्मपायिनः किरणोष्माणं पिबन्तीति तथोक्ताः । तदाहारा इत्यर्थः । चरन्तीति चराः ॥ पचाद्यच् ॥ सहभूताश्चराः सहचरा वालखिल्यप्रभृतयो महर्षयोऽग्नौ परिकीर्णं तेजो यस्य तमथोक्तम् ॥ "अग्निर्वादित्यः सायं प्रसवति" इति श्रुतेः ॥ भानुम् ॥ हृदयं गच्छन्तीति हृदयंगमा मनोरमाः ॥ ...मेः सुप्रीति वक्तव्यात्खच् ॥ स्यन्दनाश्वानां हृदयंगमाः स्वना येषां तैः सामभिः सामवेदैः सहस्रशः संस्तुवन्ति ॥ "सामवेदेनास्तमये गीयते" इति श्रुतेः ॥

सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ॥ ४२ ॥

स इति ॥ सोऽयं भानुर्दिवसं महोदधौ संनिधाय । निधायेत्यर्थः । दिवसस्यादर्शनादियमुत्प्रेक्षा । आनतशिरोधरैर्गगनावतरणान्नम्रकन्धरैरतएव कर्णचामरविघट्टितेक्षणैर्युगभुग्नकेसरैः कुटिलितस्कन्धरोमभिर्हयैरस्तमीते ॥ " अस्तस्तु चरमक्ष्माभृत् " इत्यमरः ॥

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।
तत्प्रकाशयति यावदुत्थितं मीलनाय खलु तावता च्युतम् ॥ ४३ ॥

खमिति ॥ रवौ संस्थितेऽस्तमिते सति खं व्योम प्रसुप्तमिव निःप्रकाशत्वाद्रितमिव । स्थितमित्यर्थः । युज्यते चैतदित्याह—महतस्तेजस ईदृशी वक्ष्यमाणप्रकारा गतिः । स्वभाव इत्यर्थः ॥ तां गतिमेवाह—तदिति ॥ तन्महत्तेज उत्थितं सद्यावत् । स्थानमिति शेषः । प्रकाशयति । तावताधश्च्युतं सत् । तत्स्थानादिति शेषः । मीलनाय संकोचाय खलु भवति । यत्र स्थाने तेजांस्तिष्ठति तत्प्रकाशत इति स्थितिः । यतो गच्छति न तत्प्रकाशते । अतः सूर्यापाये खं प्रसुप्तमिवेति युक्तोऽयमिति भावः । अस्यार्थस्य तेजोमात्रसाधारण्येऽपि महति स्फुटमिति महद्ग्रहणं द्रष्टव्यम् ।

सिंहकेसरसटासु भूभृता पल्लवप्रसविषु द्रुमेषु च।
पश्य धातुशिखरेषु चात्मना संविभक्तमिव सांध्यमातपम्॥४६

सिंहेति ॥ सिंहानां केसराणि स्कन्धरोमाणि तान्येव सटा जटास्तासु॥"सटा जटा केसरयोः" इति विश्वः ॥ अथवा सटाशब्देन समूहो लक्ष्यतेऽन्यथा पौनरुक्त्यात् ॥ पल्लवप्रसविषु पल्लवमत्सु द्रुमेषु च तथा धातुशिखरेषु च भूभृतास्ताद्रिणात्मना स्वयमेव संविभक्तमिव स्थितं संध्यायां भवं सांध्यमातपं यस्य तथा पश्य । आरुण्यमरुणद्रव्येषु भूयिष्ठमुपलभ्यत इति भावः ॥

पार्ष्णिमुक्तवसुधास्तपस्विनः पावनाम्बुरचिताञ्जलिक्रियाः।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥४७॥

पार्ष्णीति ॥ पार्ष्णयो गुल्फाधोभागास्तैर्मुक्तवसुधास्त्यक्तभूतलाः। पादाग्रस्थिता इत्यर्थः ॥ "गोशृङ्गमात्रमुद्धृत्य मुक्तपार्ष्णिः क्षिपेज्जलम्" इति स्मरणात् ॥ पावनैरम्बुभी रचिताञ्जलिक्रियाः । विहितार्घ्यप्रक्षेपा इत्यर्थः । विधिविदः। शास्त्रज्ञा इत्यर्थः । अमी तपस्विन आदृता आदरवन्तः । श्रद्दधाना इत्यर्थः ॥ कर्तरि क्तः ॥ अभिसंध्यं संध्यामभि ॥ "लक्षणेनाभिप्रती आभिमुख्ये" इत्यव्ययीभावः ॥ शुद्धये शुद्ध्यर्थं ब्रह्म गायत्रीं गूढमुपांशु गृणन्ति जपन्ति । "प्रत्यगा तारकोदयात्" इति स्मरणात् ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति॥४८

तदिति ॥ तत्तस्मात्कारणान्मामपि प्रस्तुताय नियमाय प्रकृतसंध्याविधये मुहूर्तमनुमन्तुमर्हसि । हे वल्गुवादिनि मञ्जुभाषिणि। विनोदनिपुणः कालाक्षेपचतुरः सखीजनस्त्वां विनोदयिष्यति ॥ विनोदशब्दात्तत्करोतीति णिच् ॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥ ४९ ॥

निर्विभुज्येति ॥ ततो भर्तुर्वाचि वचनेऽवधीरणापरावज्ञापरा शैलराजतन पार्वती । छाद्यतेऽनेनेति छदः ॥ "पुंसि संज्ञायां घः प्रायेण" इति दशनच्छदं निर्विभुज्य कुटिलीकृत्य समीपगां विजयां निर्निमित्तमाललाप । न तु रोषाद्भर्तुरुत्तरं ददावित्यर्थः ॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम्।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥

ईश्वर इति ॥ ईश्वरोऽपि दिवसात्ययोचितं सायंकालोचितं विधिं संध्यावन्दनकृत्यं मन्त्रपूर्वमनुतस्थिवाननुष्ठितवान् ॥ तिष्ठतेः क्वसुप्रत्ययः ॥ असूयया संध्यावन्दनजनितासूययावचनामभाषमाणां पार्वतीं पुनः प्रत्युपेत्य सस्मितमाह ॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यथा।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥५१॥

मुञ्चेति ॥ हे अनिमित्तकोपनेऽकारणकोपिनि ॥ नन्द्यादित्वात्कर्तरि ल्युः ॥ कोपं मानं मुञ्च। संध्यया प्रणमितोऽस्मि प्रणामं कारितोऽस्मि। अन्यथा प्रकारान्तरं न। धर्माभिसंधायिनं मां कामाभिसंधायिनं मा मन्यस्वेत्यर्थः। आत्मनस्तव सह धर्मं चरतीति सहधर्मचारिणं मां चक्रवाकेन समवृत्तिं तुल्यव्यवहारं न वेत्सि किम्। अनन्यसङ्गिनं वेत्स्येवेत्यर्थः ॥

प्रणामकारणमाह—

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता।
सेयमस्तमुदयं च सेव्यते तेन मानिनि ममात्र गौरवम् ॥५२॥

निर्मितेष्विति ॥ हे सुतनु सुगात्रि। पूर्वं स्वयं भवतीति स्वयंभूश्चतुराननः ॥ "भुवः संज्ञान्तरयोः" इति क्विप्। मयूरव्यंसकादित्वात्समासः ॥ तेन पितृष्वग्निष्वात्तादिषु निर्मितेषु सत्सु या तनुरुज्झिता सेयं तनुरस्तमस्तमयकाल उदयमुदयकाले ॥ अव्ययमेतत् ॥ सेव्यते पूज्यते च। संध्यारूपेणेति शेषः। हे मानिनि। अविमृश्यकारिणीति भावः। तेन ब्रह्मतनुत्वेन हेतुना ममात्र संध्यायां गौरवमादरः। तदेतदुक्तं भविष्यपुराणे— "पितामहः पितॄन्सृष्ट्वा मूर्तिं तामुत्ससर्ज ह। प्रातः सायं समागम्य संध्यारूपेण पूज्यते ॥ एतां संध्यां यतात्मानो ये तु दीर्घामुपासते। दीर्घायुषो भविष्यन्ति नीरुजः पाण्डुनन्दन" इति ॥

इत्थं देव्याः कोपमपनीय धातुसंध्यादिवर्णनं करोति—

तामिमां तिमिरवृत्तिपीडितां भूमिलग्नमिव संप्रति स्थिताम्।
[illegible]कतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ॥ ५३ ॥

[illegible]" संप्रति तिमिरवृत्तिपीडितां तमोवृत्त्युपरुद्धामत एव भूमौ लग्नमिव [illegible]गमेकेन एकत्र तटतमालमालिनीं तीरतमालतरुपङ्क्तिमतीम् ॥ धातुरसनिम्नगां धातुद्रवनदीमिव पश्य ॥

सिंहकेसरसटासु भूभृता पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु चात्मना संविभक्तमिव सांध्यमातपम्॥४६

सिंहेति ॥ सिंहानां केसराणि स्कन्धरोमाणि तान्येव सटा जटास्तासु ॥ "सटा जटा केसरयोः" इति विश्वः ॥ अथवा सटाशब्देन समूहो लक्ष्यतेऽन्यथा पौनरुक्त्यात् ॥ पल्लवप्रसविषु पल्लववत्सु द्रुमेषु च तथा धातुशिखरेषु च भूभृतास्तादिणात्मना स्वयमेव संविभक्तमिव स्थितं संध्यायां भवं सांध्यमातपं पश्य तथा पश्य । आरुण्यमरुणद्रव्येषु भूयिष्ठमुपलभ्यत इति भावः ॥

पार्ष्णिमुक्तवसुधास्तपस्विनः पावनाम्बुरचिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥४७॥

पार्ष्णीति ॥ पार्ष्णयो गुल्फाधोभागास्तैर्मुक्तवसुधास्त्यक्तभूतलाः । पादाग्रस्थिता इत्यर्थः ॥ "गोशृङ्गमात्रमुद्धृत्य मुक्तपार्ष्णिः क्षिपेज्जलम्" इति स्मरणात् ॥ पावनैरम्बुभी रचिताञ्जलिक्रियाः । विहितार्घ्यप्रक्षेपा इत्यर्थः । विधिविदः । शास्त्रज्ञा इत्यर्थः । अमी तपस्विन आदृता आदरवन्तः । श्रद्दधाना इत्यर्थः ॥ कर्तरि क्तः ॥ अभिसंध्यं संध्यामभि ॥ "लक्षणेनाभिप्रती आभिमुख्ये" इत्यव्ययीभावः ॥ शुद्धये शुद्ध्यर्थं ब्रह्म गायत्रीं गूढमुपांशु गृणन्ति जपन्ति । "प्रत्यगा तारकोदयात्" इति स्मरणात् ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति॥४८

तदिति ॥ तत्तस्मात्कारणान्मामपि प्रस्तुताय नियमाय प्रकृतसंध्याविधये मुहूर्तमनुमन्तुमर्हसि । हे वल्गुवादिनि मञ्जुभाषिणि । विनोदनिपुणः कालक्षेपचतुरः सखीजनस्त्वां विनोदयिष्यति ॥ विनोदशब्दात्तत्करोतीति णिच् ॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥ ४९ ॥

निर्विभुज्येति ॥ ततो भर्तुर्वाचि वचनेऽवधीरणापरावज्ञापरा शैलराजतनया पार्वती । छाद्यतेऽनेनेति छदः ॥ "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः ॥ दशनच्छदं निर्विभुज्य कुटिलीकृत्य समीपगां विजयां विजयां निर्निमित्तमाललाप । न तु रोषाद्भर्तुरुत्तरं ददावित्यर्थः ॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥

ईश्वर इति ॥ ईश्वरोऽपि दिवसात्ययोचितं सायंकालोचितं विधिं संध्यावन्दनकृत्यं मन्त्रपूर्वमनुतस्थिवाननुष्ठितवान् ॥ तिष्ठतेः क्वसुप्रत्ययः ॥ असूयया संध्यावन्दनजनितासूययावचनामभाषमाणां पार्वतीं पुनः प्रत्युपेत्य सस्मितमाह ॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यथा ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥५१॥

मुञ्चेति ॥ हे अनिमित्तकोपनेऽकारणकोपिनि ॥ नन्द्यादित्वात्कर्तरि ल्युः ॥ कोपं मानं मुञ्च । संध्यया प्रणमितोऽस्मि प्रणामं कारितोऽस्मि । अन्यथा प्रकारान्तरं न । धर्माभिसंधायिनं मां कामाभिसंधायिनं मा मन्यस्वेत्यर्थः । आत्मनस्तव सह धर्मं चरतीति सहधर्मचारिणं मां चक्रवाकेन समवृत्तिं तुल्यव्यवहारं न वेत्सि किम् । अनन्यसक्तिनं वेत्स्येवेत्यर्थः ॥

प्रणामकारणमाह—

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेव्यते तेन मानिनि ममात्र गौरवम् ॥५२॥

निर्मितेष्विति ॥ हे सुतनु सुगात्रि । पूर्वं स्वयं भवतीति स्वयंभूश्चतुराननः ॥ "भुवः संज्ञान्तरयोः" इति क्विप् । मयूरव्यंसकादित्वात्समासः ॥ तेन पितृष्वग्निष्वात्तादिषु निर्मितेषु सत्सु या तनुरुज्झिता सेयं तनुरस्तमस्तमयकाल उदयमुदयकाले ॥ अव्ययमेतत् ॥ सेव्यते पूज्यते च । संध्यारूपेणेति शेषः । हे मानिनि । अविमृश्यकारिणीति भावः । तेन प्रह्वतनुत्वेन हेतुना ममात्र संध्यायां गौरवमादरः । तदेतदुक्तं भविष्यपुराणे— "पितामहः पितॄन्सृष्ट्वा मूर्तिं तामुत्ससर्ज ह । प्रातः सायं समागत्य संध्यारूपेण पूज्यते ॥ एतां संध्यां यतात्मानो ये तु दीर्घामुपासते । दीर्घायुषो भविष्यन्ति नीरुजः पाण्डुनन्दन" इति ॥

इत्थं देव्याः कोपमपनीय धातुसंध्यादिवर्णनं करोति—

तामिमां तिमिरवृत्तिपीडितां भूमिलग्नमिव संप्रति स्थिताम् ।
[illegible] पश्य धातुरसनिम्नगामिव ॥ ५३ ॥

[illegible] ॥ संप्रति तिमिरवृत्तिपीडितां [illegible] भूमौ [illegible]
[illegible] एकत्र [illegible] [illegible]म् ॥
[illegible] धातुद्रवनदीमिव पश्य ॥

सिंहकेसरसटासु भूभृता पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु चात्मना संविभक्तमिव सांध्यमातपम् ॥४६

सिंहेति ॥ सिंहानां केसराणि स्कन्धरोमाणि तान्येव सटा जटास्तासु ॥ "सटा जटा केसरयोः" इति विश्वः ॥ अथवा सटाशब्देन समूहो लक्ष्यतेऽन्यथा पौनरुक्त्यात् ॥ पल्लवप्रसविषु पल्लवमत्सु द्रुमेषु च तथा धातुशिखरेषु च भूभृतास्तादिणात्मना स्वयमेव संविभक्तमिव स्थितं संध्यायां भवं सांध्यमातपं यस्य तथा पश्य । आरुण्यमरुणद्रव्येषु भूयिष्ठमुपलभ्यत इति भावः ॥

पार्ष्णिमुक्तवसुधास्तपस्विनः पावनाम्बुरचिताञ्जलिक्रियाः ।
ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥४७॥

पार्ष्णीति ॥ पार्ष्णयो गुल्फाधोभागास्तैर्मुक्तवसुधास्त्यक्तभूतलाः । पादाग्रस्थिता इत्यर्थः ॥ "गोशृङ्गमात्रमुद्धृत्य मुक्तपार्ष्णिः क्षिपेज्जलम्" इति स्मरणात् ॥ पावनैरम्बुभी रचिताञ्जलिक्रियाः । विहितार्घ्यप्रक्षेपा इत्यर्थः । विधिविदः । शास्त्रज्ञा इत्यर्थः । अमी तपस्विन आदृता आदरवन्तः । श्रद्धाना इत्यर्थः ॥ कर्तरि क्तः ॥ अभिसंध्यं संध्यामभि ॥ "लक्षणेनाभिमती आभिमुख्ये" इत्यव्ययीभावः ॥ शुद्धये शुद्ध्यर्थं ब्रह्म गायत्रीं गूढमुपांशु गृणन्ति जपन्ति । "प्रत्यगा तारकोदयात्" इति स्मरणात् ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ॥४८

तदिति ॥ तत्तस्मात्कारणान्मामपि प्रस्तुताय नियमाय प्रकृतसंध्याविधये मुहूर्तमनुमन्तुमर्हसि । हे वल्गुवादिनि मञ्जुभाषिणि । विनोदनिपुणः कालक्षेपचतुरः सखीजनस्त्वां विनोदयिष्यति ॥ विनोदशब्दात्तत्करोतीति णिच् ॥

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥ ४९ ॥

निर्विभुज्येति ॥ ततो भर्तुर्वाचि वचनेऽवधीरणापरावज्ञापरा शैलराजतनया पार्वती । छाद्यतेऽनेनेति छदः ॥ "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः ॥ दशनच्छदं निर्विभुज्य कुटिलीकृत्य समीपगां विजयां विजयाख्यां सखीमहेतुकं निर्निमित्तमाललाप । न तु रोषाद्भर्तुरुत्तरं ददावित्यर्थः ॥

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम् ।
पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥

ईश्वर इति ॥ ईश्वरोऽपि दिवसात्ययोचितं सायंकालोचितं विधिं संध्यावन्दनकृत्यं मन्त्रपूर्वमनुतस्थिवाननुष्ठितवान् ॥ तिष्ठतेः क्वसुप्रत्ययः ॥ असूयया संध्यावन्दनजनितासूययावचनामभाषमाणां पार्वतीं पुनः प्रत्युपेत्य सस्मितमाह ॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यथा ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥५१॥

मुञ्चेति ॥ हे अनिमित्तकोपनेऽकारणकोपिनि ॥ नन्द्यादित्वात्कर्तरि ल्युः ॥ कोपं मानं मुञ्च । संध्यया प्रणमितोऽस्मि प्रणामं कारितोऽस्मि । अन्यथा प्रकारान्तरं न । धर्माभिसंधायिनं मां कामाभिसंधायिनं मा मन्यस्वेत्यर्थः । आत्मनस्तव सह धर्मं चरतीति सहधर्मचारिणं मां चक्रवाकेन समवृत्तिं तुल्यव्यवहारं न वेत्सि किम् । अनन्यसक्तिनं वेत्स्येवेत्यर्थः ॥

प्रणामकारणमाह—

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेव्यते तेन मानिनि ममात्र गौरवम् ॥५२॥

निर्मितेष्विति ॥ हे सुतनु सुगात्रि । पूर्वं स्वयं भवतीति स्वयंभूश्चतुराननः ॥ "भुवः संज्ञान्तरयोः" इति क्विप् । मयूरव्यंसकादित्वात्समासः ॥ तेन पितृष्वग्निष्वात्तादिषु निर्मितेषु सत्सु या तनुरुज्झिता सेयं तनुरस्तमस्तमयकाल उदयमुदयकाले ॥ अव्ययमेतत् ॥ सेव्यते पूज्यते च । संध्यारूपेणेति शेषः । हे मानिनि । अविमृश्यकारिणीति भावः । तेन ब्रह्मतनुत्वेन हेतुना ममात्र संध्यायां गौरवमादरः । तदेतदुक्तं भविष्यपुराणे— "पितामहः पितॄन्सृष्ट्वा मूर्तिं तामुत्ससर्ज ह । प्रातः सायं समागत्य संध्यारूपेण पूज्यते ॥ एतां संध्यां यतात्मानो ये तु दीर्घामुपासते । दीर्घायुषो भविष्यन्ति नीरुजः पाण्डुनन्दन" इति ॥

इत्थं देव्याः कोपमपनीय धातुसंध्यादिवर्णनं करोति—

तामिमां तिमिरवृत्तिपीडितां भूमिलग्नमिव संप्रति स्थिताम् ।
[illegible] पश्य धातुरसनिम्नगामिव ॥ ५३ ॥

[illegible]ति ॥ संप्रति तिमिरवृत्तिपीडितां तमोवृत्त्युपरुद्धामतएव भूमौ लग्नमिव [illegible]गमेकेन एकत्र ततमालमालिनीं वीरतमालतरुपङ्क्तिमतीम् ॥ [illegible] धातुद्रवनदीमिव पश्य ॥

सांध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।
संपरायवसुधा सशोणितं मण्डलाग्रमिव तिर्यगुत्थितम् ॥ ५४ ॥

सांध्यमिति ॥ अपरा दिक्प्रतीची ॥ अस्तमिति मकारान्तमव्ययम् । तदं तशब्देन समासः ॥ अस्तमितशेषमस्तंगतावशिष्टमातपं रक्ता रेखाकान्तिर्यस्य तं संध्यायां भवं सांध्यमातपं संपरायवसुधा युद्धभूमिः ॥ "समरे संपरायः स्यात्" इति विश्वः ॥ तिर्यगुत्थितं तिर्यक्फलितं सशोणितं मण्डलाग्रं कृपाणमिव बिभर्ति ॥ "कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्" इत्यमरः ॥

यामिनीदिवससंधिसंभवे तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरर्गलं दिक्षु दीर्घनयने विजृम्भते ॥ ५५ ॥

यामिनीति ॥ यामिनीदिवसयोः संधिः संध्या तत्र संभवे तेजसि संध्यारागे सुमेरुणा व्यवहिते सति हे दीर्घनयने एतदन्धतमसम् ॥ "अवसमन्धेभ्यस्तमसः" इति समासान्तः ॥ दिक्षु निरर्गलं विजृम्भते ॥

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरोल्बवेष्टितो गर्भवास इव वर्तते निशि ॥ ५६ ॥

नेति ॥ ऊर्ध्वमुपरीक्षणगतिर्दृष्टिप्रसारो नास्ति । अधोऽपि च न । अभितः पार्श्वयोश्च न । पुरतोऽग्रे च न । पृष्ठतः पश्चादपि न । ईक्षणगतिरिति सर्वत्र संबध्यते । तथाप्येष लोको निशि तिमिरमेवोल्बं जरायुः "गर्भाशयो जरायुः स्यात्" इत्यमरः ॥ तेन वेष्टितः आवृत्तः सन् । गर्भ एव वासो वसतिस्तत्र गर्भवासे वर्तते । इवेत्युत्प्रेक्षा ॥

शुद्धमाविलमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं धिङ्महत्त्वमसतां हतान्तरम् ॥ ५७ ॥

शुद्धमिति ॥ शुद्धं स्वच्छमाविलं मलिनमवस्थितं स्थावरं चलं जंगमं वक्रं कुटिलमृजोर्भाव आर्जवं तदेव गुणस्तेनान्वितं च यद्वस्तुजातम् । तदिति यत्तदोर्नित्यसंबन्धाल्लभ्यते । तत्सर्वमेव तमसा समीकृतं दुर्लक्ष्यविशेषं कृतम् । तथाहि । हतमन्तरं विशेषो येन तद्धतान्तरमसतामसाधूनां महत्त्वं वृद्धिं धिक् ॥ धिक्शब्दयोगाद्द्वितीया ॥ समत्वेन परगतिविशेषतिरस्करणमसतां स्वभाव इति । तमसोऽपि तथा महत्त्वं धिगित्यर्थः ॥

नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो
पुण्डरीकमुखि पूर्वदिङ्मुखं कैतकैरिव रज

नूनमिति ॥ यज्वानो विधिनेष्टवन्तः ॥ "यज्वा तु विधिनेष्टवान्" इत्यमरः॥ "सुयजोर्ङ्वनिप्" इति ङ्वनिप्प्रत्ययः ॥ तेषां पतिः प्रियः । दर्शपूर्णमासादियागप्रवृत्तिहेतुत्वादिति भावः । शार्वरस्य शर्वर्यां भवस्य तमसो निषिद्धये निरासाय नूनमुन्नमत्युदेति । कुतः । हे पुण्डरीकमुखि। पूर्वस्या दिशो मुखं पुरोभागः पूर्वदिङ्मुखं केतक्या इमानि कैतकानि तै रजोभिः परागैरावृतमिव । दृश्यत इति शेषः । अतो नूनमुदेति चन्द्र इति संबन्धः ॥

मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः॥५९॥

मन्दरेति ॥ सतारका निशा मन्दरान्तरितमूर्तिना मन्दराद्रिव्यवहितमण्डलेन शशभृता चन्द्रेण पृष्ठतः पश्चाद्भागे वचनानि श्रोष्यता । श्रोतुं स्थितेनेत्यर्थः । मया प्रियसखीसमागता प्रियसखीभिरावृता त्वमिव लक्ष्यते ॥

रुद्धनिर्गमनमा दिनक्षयात्पूर्वदृष्टतनुचन्द्रिकास्मितम् ।
एतदुद्गिरति रात्रिचोदिता दिग्रहस्यमिव चन्द्रमण्डलम् ॥६०॥

रुद्धेति ॥ दिक्पूर्वदिक् । नायिका ध्वन्यते । आ दिनक्षयादा सायं रुद्धं निर्गमनं निःसरणं यस्य तत्तथोक्तम् । अन्यत्र बहिरप्रकाशितमित्यर्थः । तनुचन्द्रिकास्मितमिव तनुचन्द्रिकास्मितं पूर्वदृष्टं यस्मात्तत्तथोक्तम् । एतच्चन्द्रमण्डलं नर्म रहस्यं गोप्यार्थमिव रात्रिचोदिता । राज्या सख्येव प्रेरिता सतीत्यर्थः । उद्गिरति प्रकाशयति । यथा काचिदा सायं मनस्विनी गूहितमभिलाषं प्रदोषे सख्या मां मूहीति निर्बन्धात्पृष्टा सती प्रकटयति तद्वदित्यर्थः ॥

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।
विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ॥ ६१ ॥

पश्येति ॥ पक्वफलिनीफलत्विषोदयरागाद्बिम्बाभ्यां प्रतिबिम्बाभ्यां लाञ्छिते चिह्निते वियत्सरोम्भश्च येन तथोक्तेन हिमांशुना विप्रकृष्टं विरमन्तरालं यस्य तत्तथोक्तम् । अतिदूरस्थमित्यर्थः । चक्रवाकमिथुनं विडम्ब्यतेऽनुक्रियते पश्य । रात्रौ वियति सरोजले चेन्द्रोर्बिम्बप्रतिबिम्बौ विरहादूरवर्तिनौ चक्रवाकाविव दृश्येते इत्यर्थः ॥

तव ।

॥ ६२ ॥

शक्यमिति ॥ नवोदयाः सद्य उत्पादिता अप्रगल्भयवसूचिकोमला अकठोरयवाङ्कुरसुकुमारा ओषधिपतेरिन्दोः करास्तव कर्णपूररचनाकृते कर्णावतंसनिर्माणक्रियार्थे ॥ संपदादित्वाद्भावे क्विप् ॥ अग्रनखसंपुटेनखाग्रसंभेदेश्छेत्तुं शक्यम् । शक्या इत्यर्थः ॥ "शकिसहोश्च" इति कर्मणि यत्प्रत्ययः ॥ शक्यमिति विपरीतलिङ्गवचनस्यापि सामान्योपक्रमात्कर्माभिधायकत्वम् । पश्चात्कर्मविशेषाकाङ्क्षायां करा इति निर्देशो न विरुध्यते । यथाह वामनः—"शक्यमिति रूपं लिङ्गवचनस्यापि सामान्योपक्रमत्वादिति । अत्र प्रमाणम्—शक्यं श्वमांसेनापि क्षुत्प्रतिहन्तुमिति भाष्यकारप्रयोगः" इति ॥

अङ्गुलिभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ ६३ ॥

अङ्गुलीभिरिति ॥ शशी चन्द्रमाः । नायकस्तु प्रतीयते । अङ्गुलीभिः केशसंचयमिव मरीचिभिस्तिमिरं संनिगृह्य गृहीत्वा ॥ सरोजे लोचने इवेत्युपमितसमासोऽङ्गुलीभिरिवेत्युपमायास्तत्साधकत्वात् ॥ कुड्मलीकृते सरोजलोचने यस्य तत्तथोक्तं रजन्या मुखं प्रारम्भः । वदनं चेति गम्यते । चुम्बतीव । अत्रार्थापत्त्यतिशयोक्तिरलंकार उत्प्रेक्षासंकरश्चेति ॥

पश्य पार्वति नवेन्दुरश्मिभिः सामिभिन्नतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितं संप्रसीददिव मानसं सरः ॥ ६४ ॥

पश्येति ॥ हे पार्वति । नवेन्दुरश्मिभिः सामिभिन्नतिमिरमर्धनिरस्तध्वान्तं नभस्तलं द्विरदभोगदूषितं गजक्रीडाकलुषितं संप्रसीदत्प्रसादं गच्छन्मानसं मानसाख्यं सर इव लक्ष्यते पश्य ॥

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ॥६५॥

रक्तभावमिति ॥ एष चन्द्रमा रक्तभावं रक्तत्वमुदयरागमपहाय परिशुद्धमण्डलः शुभ्रबिम्बो निष्कण्टको जातः । तथाहि । निर्मलप्रकृतिषु स्वच्छभावेषु शुद्धसचिवसंपन्नेषु च कालदोषेण जाता कालदोषजा विक्रिया विकारः स्थिरोदया स्थायिनी न भवति खलु । चन्द्रोऽपि स्वभावनिर्मल इति । यथा कश्चिद्राजा कुतश्चिन्निमित्तादिरक्तमण्डलः पश्चात्प्रतिकृतशुद्धया स्वस्वमण्डलो भवति तद्वदिति भावः ॥ तत्र प्रथमार्थे समासोक्तिरलंकारस्तस्यार्थान्तरन्यासेनाङ्गाङ्गिभावेन संकरः ॥

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निश

नूनमात्मसदृशी प्रकल्पिता वेधसैव गुणदोषयोर्गा

उन्नतेष्वियति ॥ शशिनः प्रभा चन्द्रिकोन्नतेष्वद्रिशृङ्गादिषु
तमस्तु निम्नसंश्रयपरं गर्तादिनीचस्थानभवणम् । तथाहि । वेधसा
त्मसदृशी स्वभावानुरूपा गतिः प्रवृत्तिः प्रकल्पितेव ननु । तेजां
मलिनास्तु नीचन्तीति भावः ॥

चन्द्रपादजनितप्रवृत्तिभिश्चन्द्रकान्तजलबिन्दुभिर्गि

मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डि

चन्द्रपादेति ॥ गिरिर्हिमाद्रिश्चन्द्रपादैरिन्दुकिरणैर्जनितप्रवृ
श्चन्द्रकान्तमणीनां जलबिन्दुभिः ॥ करणैः ॥ मेखलातरुषु निद्रि
न् ॥ तारकादित्वादितच् ॥ असमये शिखण्डिनो मयूरानसमयेऽक
इन्दुकिरणसंपर्कादुपरिचन्द्रकान्तस्यन्दप्रबोधसेगपाः शिखण्डिनो
त्यर्थः । शिखण्डिप्रहर्णापनरजाकन्तानां कल्लोलनिलपत्राक्रिति

नवोदयाः सद्य उत्पादिता अप्रगल्भयवसूचिकोमला अकठोर-
ओषधिपतेरिन्दोः करास्तव कर्णपूररचनाकृते कर्णावतंसनिर्माण-
आदित्वाद्भावे क्विप् ॥ अग्रनखसंपुटैर्नखाग्रसंभेदैश्छेत्तुं शक्यम् ।
॥ "शकिसहोश्च" इति कर्मणि यत्प्रत्ययः ॥ शक्यमिति विपरी-
अपि सामान्योपक्रमात्कर्माभिधायकत्वम् । पश्चात्कर्मविशेषाकाङ्क्षायां
र्देशो न विरुध्यते। यथाह वामनः—"शक्यमिति रूपं लिङ्गवचनस्या-
उपक्रमत्वादिति। अत्र प्रमाणम्—शक्यं श्वमांसेनापि क्षुत्प्रतिहन्तुम्-
कारप्रयोगः" इति ॥

ङ्गुलिभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ ६३ ॥

नङ्गुलीभिरिति ॥ शशी चन्द्रमाः । नायकस्तु प्रतीयते । अङ्गुलीभिः केश-
चयमिव मरीचिभिस्तिमिरं संनिगृह्य गृहीत्वा ॥ सरोजे लोचने इवेत्युपमितसमा-
ऽङ्गुलीभिरिवेत्युपमायास्तत्साधकत्वात् ॥ कुड्मलीकृते सरोजलोचने यस्य तत्त-
थोक्तं रजन्या मुखं प्रारम्भः । वदनं चेति गम्यते । चुम्बतीव । अत्रार्थापत्त्यति-
शयोक्तिरलंकार उत्प्रेक्षासंकरश्चेति ॥

पश्य पार्वति नवेन्दुरश्मिभिः सामिभिन्नतिमिरं नभस्तलम् ।
लक्ष्यते द्विरदभोगदूषितं संप्रसीददिव मानसं सरः ॥ ६४ ॥

पश्येति ॥ हे पार्वति। नवेन्दुरश्मिभिः सामिभिन्नतिमिरमर्धनिरस्तध्वान्तं न-
भस्तलं द्विरदभोगदूषितं गजक्रीडाकलुषितं संप्रसीदत्प्रसादं गच्छन्मानसं मानसा-
ख्यं सर इव लक्ष्यते पश्य ॥

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ॥६५॥

रक्तभावमिति ॥ एष चन्द्रमा रक्तभावं रक्तत्वमुदयरागमपहाय परिशुद्ध-
मण्डलः शुभ्रबिम्बो निष्कण्टको जातः। तथाहि। निर्मलप्रकृतिषु स्वच्छभावेषु शुद्धस्
चिवसंपन्नेषु च कालदोषेण जाता कालदोषजा विक्रिया विकारः स्थिरोदया स्थायि
भवति खलु । चन्द्रोऽपि स्वभावनिर्मल इति । यथा कश्चिद्राजा कुतश्चि
पश्चात्प्रतिकृतशुद्ध्या स्वच्छमण्डलो भवति तद्वदिति भावः ।
तत्सार्थान्तरन्यासेनाङ्गाङ्गिभावेन संकरः ॥

पाकेति ॥ हे चन्द्रबिम्बनिहिताक्षि चन्द्रबिम्बनिहितेक्षणे । पाकभिन्नः 'पाकविकसितो यः शरकाण्डस्तद्वद्गौरयोः सितयोः ॥ " अवदातः सितो गौरः " इत्यमरः ॥ उल्लसन्त्या प्रतिकृत्या चन्द्रिकाप्रतिबिम्बेन प्रदीप्तयोः प्रोज्ज्वलयोस्तव गण्डलेखयोश्चन्द्रिका रोहतीव । गण्डस्थलप्रतिबिम्बसंक्रमणमूर्छिता चन्द्रिका तयोरेव प्ररूढेति प्रतीयत इत्यर्थः ॥

अत्रान्तरे कांचिदवलोक्याह—

लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनाधिदेवता ॥७५॥

लोहितेति ॥ लोहितेऽरुणेऽर्कमणिभाजने सूर्यकान्तपात्रेऽर्पितं कल्पवृक्षमधुकल्पतरुप्रसूतं मद्यं स्वयं बिभ्रती गन्धमादनवनाधिदेवता स्थितिमतीमवस्थानवतीम् । इह स्ववने तिष्ठन्तीमित्यर्थः । त्वामियं प्रत्यक्षोपस्थिता प्राप्ता । स्वगृहागतां त्वां संभावयितुमागतेत्यर्थः ॥

आर्द्रकेसरसुगन्धि ते मुखं रक्तमेव नयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मधुः करिष्यति॥७६॥

आर्द्रेति ॥ हे पार्वति । इदं ते स्वभावत आर्द्रकेसरसुगन्धि सरसकेसरसुगन्धि॥ "गन्धस्येत्–" इत्यादिनेकारः॥ मुखम् । रक्तमेव नयनम् । हे विलासिनि विलसनशीले। अत्र त्वन्मुखे लब्धवसतिर्लब्धानुप्रवेशो मधुर्मद्यं किं गुणान्तरं गुणविशेषं करिष्यति । न किंचिदित्यर्थः । केसरसौगन्ध्यादिगुणानां त्वन्मुखे स्वभावसिद्धत्वान्मधुनः फलं न पश्यामीत्यर्थः ॥ " अर्धर्चाः पुंसि च " इति पुंलिङ्गत्वम् । यदाहुः— " मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः । अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधुः " इति ॥

मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपकम् ।
इत्युदारमभिधाय शंकरस्तामपाययत पानमम्बिकाम् ॥ ७७॥

मान्यभक्तिरिति ॥ अथवा सखीजनो मान्या भक्तिर्यस्य स तथोक्तः । सखीजनः स्वीकार्य इत्यर्थः । ततोऽनङ्गदीपकमिदं वक्ष्यमाणं पानं सेव्यतामित्युदारं [illegible]भिधाय शंकरस्तामम्बिकां पिबेति पानं मद्यमपाययत पाययामास ॥ [illegible] नङ् ॥ पिबतेः प्रत्यवसानार्थादिणि कर्तुः कर्मत्वम् । पिबतेर्णिग[illegible] " न पादम्य– " इति परस्मैपदनिषेधः ॥ ननु मान्यभक्तिरित्य[illegible] । " अभयादिषु " इति निषेधाद्भक्तिशब्दस्य स्त्रियादिषाठाद्वं[illegible]

एतदिति ॥ एतत्कुमुदं कैरवम् ॥ कर्तृ ॥ उच्छ्वसितेन पीतमुच्छ्वसितपीतम् । अतितृष्णयोच्छ्वस्योच्छ्वस्य पीतमित्यर्थः । इन्दोरिदमैन्दवं प्रभा चन्द्रिका सैव रसो द्रवस्तं सोढुमक्षममिवाञ्जसा मुक्तषट्पदविरावं प्रवर्तितभृङ्गनादं यथा तथा निबन्धनाद्वा वृन्ताद्भिद्यते विकसति ॥ कर्मकर्तरि लट् ॥ यथा लोके कस्यचिदतिपानान्निःसहात्मन उच्चैः क्रोशत उदरं भिद्यते तथैतदिति भावः ॥

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।
मारुते चलति चण्डि केवलं व्यज्यते विपरिवृत्तमंशुकम् ॥७१॥

पश्येति ॥ शुद्धया ज्योत्स्नया जनिता रूपसंशया अंशुकं ज्योत्स्ना वेति स्वरूपसंदेहो यस्य तत्तथोक्तं कल्पतरुलम्ब्यंशुकं हे चण्डि अत्यन्तकोपने ॥ गौरादित्वान्ङीप् ॥ केवलं मारुते चलति सति विपरिवृत्तं चलं सद्व्यज्यते पश्य । ज्योत्स्नासच्छायत्वान्न रूपतो विविच्यते परंतु क्रिययेत्यर्थः ॥

शक्यमङ्गुलिभिरुद्धृतैरधः शाखिनां पतितपुष्पपेशलैः ।
पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ॥ ७२ ॥

शक्यमिति ॥ अङ्गुलिभिरुद्धृतैरुच्चितैः शाखिनामधः पतितपुष्पवत्पेशलैः कोमलैः । तथा भ्रमकरैरित्यर्थः । एभिः पत्रैर्जर्जरा शकलिता शशिप्रभा चन्द्रिका तस्या लवैः खण्डैः । तरुतलेषु पत्रान्तराललक्ष्यज्योत्स्नामण्डलैरित्यर्थः । तवालकानुत्कचयितुं बद्धुम् ॥ "कच दीप्तिबन्धनयोः" इति धातोस्तुमुन्प्रत्ययः ॥ शक्यम् । शक्या इत्यर्थः । शक्यमिति लिङ्गवचनस्य सामान्योपक्रमादित्याद्यनुपदमेवोक्तम् ॥

एष चारुमुखि योगतारया युज्यते तरलबिम्बया शशी ।
साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ॥ ७३ ॥

एष इति ॥ हे चारुमुखि हे उज्ज्वलानने ॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप् ॥ एष शशी तरलबिम्बया स्फुरन्मण्डलया योगतारया । मत्स्यहं यया युज्यते सा योगतारा । तिष्यनक्षत्रेणेत्यर्थः । साध्वसात्संगमभयादुपगतप्रकम्पया वेपथुमत्या नवदीक्षया नवोढारूपया कन्यया वरो वोढेव युज्यते संगच्छते ॥ युजेर्दैवादिकत्वात्कर्तरि लट् ॥

पाकभिन्नशरकाण्डगौरयोरुल्लसत्प्रतिकृतिप्रदीप्तयोः ।
रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षि चन्द्रिका ॥७४॥

पाकेति ॥ हे चन्द्रबिम्बनिहिताक्षि चन्द्रबिम्बनिहितेक्षणे । पाकभिन्नः पाकविवर्कसितो यः शरकाण्डस्तद्वद्गौरयोः सितयोः ॥ " अवदातः सितो गौरः " इत्यमरः ॥ उल्लसन्त्या प्रतिकृत्या चन्द्रिकाप्रतिबिम्बेन प्रदीप्तयोः प्रोज्ज्वलयोस्तव गण्डस्थलयोश्चन्द्रिका रोहतीव । गण्डस्थलप्रतिबिम्बसंक्रमणमूर्छिता चन्द्रिका तयोरेव प्ररूढेति प्रतीयत इत्यर्थः ॥

अत्रान्तरे कांचिदवलोक्याह—

लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनाधिदेवता ॥७५॥

लोहितेति ॥ लोहितेऽरुणेऽर्कमणिभाजने सूर्यकान्तपात्रेऽर्पितं कल्पवृक्षमधु कल्पतरुप्रसूतं मद्यं स्वयं बिभ्रती गन्धमादनवनाधिदेवता स्थितिमतीमवस्थानवतीम् । इह स्ववने तिष्ठन्तीमित्यर्थः । त्वामियं प्रत्यक्षोपस्थिता प्राप्ता । स्वगृहागतां त्वां संभावयितुमागतेत्यर्थः ॥

आर्द्रकेसरसुगन्धि ते मुखं रक्तमेव नयनं स्वभावतः ।
अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मधुः करिष्यति॥७६॥

आर्द्रेति ॥ हे पार्वति । इदं ते स्वभावत आर्द्रकेसरसुगन्धि सरसकेसरसुगन्धि॥ "गन्धस्येत्–" इत्यादिनेकारः॥ मुखम् । रक्तमेव नयनम् । हे विलासिनि विलसनशीले । अत्र त्वन्मुखे लब्धवसतिर्लब्धानुप्रवेशो मधुर्मद्यं किं गुणान्तरं गुणविशेषं करिष्यति । न कंचिदित्यर्थः । केसरसौगन्ध्यादिगुणानां त्वन्मुखे स्वभावसिद्धत्वान्मधुनः फलं न पश्यामीत्यर्थः ॥ " अर्धर्चाः पुंसि च " इति पुंलिङ्गत्वम् । यदाहुः— " मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः । अर्धर्चादिगणे पाठात्पुंन- [illegible] " इति ॥

प दोषो नपुंसकपूर्वपदत्वात् । यथाह वृत्तिकारः— "दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वारिसद्धम्" इति । भोजराजस्तु— "भज्यत इति कर्मसाधनस्यैव प्रियादिपाठतया दृढभक्तिरिति न तु भजनं भक्तिरिति भावसाधनस्य । अतोऽत्र स्त्रीपूर्वपदत्वेऽपि न दोष" इत्याह ॥

पार्वती तदुपयोगसंभवां विक्रियामपि सतीं मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मिता नम्रतेव सहकारतां ययौ ॥ ७८ ॥

पार्वतीति ॥ [अस्य श्लोकस्य व्याख्या नोपलब्धा] ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ॥७९॥

तदिति ॥ सुवदना पार्वती तत्क्षणं तथैव विपरिवर्तितह्रियोर्निवर्तितलज्जयोः शयनं तल्पं नेष्यतोः प्रापयिष्यतोरित्थं मद्धो रागोऽनुराग आरुण्यं च ययोरिद्धरागयोः शूलिनः प्रियतमस्य मदस्य चेति द्वयोर्वशे वर्तत इति वशवर्तिन्यधीना बभूव ॥

मदपारवश्यं तावदाह—

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥

घूर्णमानेति ॥ ईश्वरो घूर्णमाननयनं भ्राम्यन्नेत्रं स्खलत्कथं स्खलद्वचनं स्वेदबिन्दुमत्स्वेदयुक्तमकारणस्मितमाकस्मिकहासयुक्तमुमामुखं तावत् । आ तृष्णापगममित्यर्थः । आननेन मुखेन न पपौ । न चुचुम्बेत्यर्थः । किंतु चिरं चक्षुषा पपौ । तृष्णयाद्राक्षीदित्यर्थः । तस्या मदपारवश्यं दृष्ट्वा मुदं तावदन्वभूदित्यर्थः ॥

संप्रति प्रियवशंवदत्वमाह—

तत्रेति ॥ तत्र मणिभवने हंसवद्धवल उत्तरच्छदः प्रच्छदपटो यस्य तत्तथोक्तं दीपुलिनमिव चारुदर्शनं शयनं शय्यां रोहिणीपतिश्चन्द्रः शरदि भवं शार- भ्रं मेघमिव । शरद्ग्रहणं धावल्यार्थम् । प्रियासखः सन् । प्रियया सहेत्यर्थः । यशेत शयितवान् ॥ " अधिशीङ्स्थासां कर्म " इति कर्मत्वम् ॥ रोहिणीग्रह- सामर्थ्यादिन्दोरप्यभ्रारोहणे रोहिणीसाहित्यमनुसंधेयम् ॥

क्लिष्टचन्द्रमदयैः कचग्रहैरुत्पथार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभूदतृप्तये ॥ ८३ ॥

क्लिष्टेति ॥ अदयैर्निर्दयैः कचग्रहैः केशाकर्षणैः क्लिष्टचन्द्रं पीडितहरचन्द्रमुत्पथमु- र्यादमर्पिता नखा यस्मिंस्तत्समत्सरमन्योन्यविजिगीषापूर्वकं छिदुराः स्वयमेव द्यमाना मेखलागुणा यस्मिंस्तत्तथोक्तम् ॥ " विदिभिदिच्छिदः कुरच् " इति रच्प्रत्ययः । " कर्मकर्तरि " इति काशिका ॥ पार्वतीरतं तस्येश्वरस्यातृप्तयेऽभूत् । ये नाभूदिति भावः ॥

केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तल्परिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥ ८४ ॥

केवलमिति ॥ प्रियतमादयालुना केवलम् । प्रियतमायां दययैव तस्येश्वरस्य कुमारोत्पादनपरत्वं सुरताग्रहिष्णुत्वात् । न तु स्वयं तृप्त्येत्यर्थः । तल्परिगृहीतवक्षसा सा पार्वत्याश्लिष्टवक्षसा तेनेश्वरेण ज्योतिषां नक्षत्राणां पङ्क्तिष्ववनतासु गतीषु । धिमायामित्यर्थः । नेत्रमीलनकुतूहलं कृतम् । निद्रा स्वीकृतेत्यर्थः ॥

स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः किंनरैरुषसि गीतमङ्गलः ॥ ८५ ॥

स इति ॥ बुधस्तवोचितो विद्वत्स्तोत्रार्हः स हर उषसि प्रभाते । स्वरग्रामाणामा- रोहक्रमो मूर्च्छना ॥ " सप्तस्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः " इति भरतः ॥ तया मूर्च्छनया परिगृहीतकैशिकैः स्वीकृतकैशिकरागैः किंनरैर्गीतमङ्गलः सन् । शातकुम्भकमलाकरैः समं कनककमलाकरैः सह ॥ " तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् " इत्यमरः ॥ व्यबुध्यत विबुद्धवान् ॥ बुध्यतेर्दैवादिकात्कर्तरि लङ् ॥ अत्र बु- धेर्जागरविकासयोः श्लेषाभेदाध्यवसायमूला सहोक्त्यलंकारः ॥

तौ क्षणं शिथिलितोपगूहनौ दंपती चलितमानसोर्मयः ।
पद्मभेदनिपुणाः सिषेविरे गन्धमादनवनान्तमारुताः ॥ ८६ ॥

न दोषो नपुंसकपूर्वपदत्वात् । यथाह वृत्तिकारः— "दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धम्" इति । भोजराजस्तु— "भज्यत इति कर्मसाधनस्यैव क्तिन्प्रत्ययात्तथा दृढभक्तिरिति न तु भजनं भक्तिरिति भावसाधनस्य । अतोऽत्र स्त्रीपूर्वपदत्वेऽपि न दोष" इत्याह ॥

पार्वती तदुपयोगसंभवां विक्रियामपि सतीं मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मिता नम्रतेव सहकारतां ययौ ॥ ७८ ॥

पार्वतीति ॥ [अस्य श्लोकस्य व्याख्या नोपलब्धा] ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ॥७९॥

तदिति ॥ सुवदना पार्वती तत्क्षणं तथैव विपरिवर्तितह्रियोर्निवर्तितलज्जयोः शयनं तल्पं नेष्यतोः प्रापयिष्यतोरित्थं मद्धो रागोऽनुराग आरुण्यं च ययोरिद्धरागयोः शूलिनः प्रियतमस्य मदस्य चेति द्वयोर्वशे वर्तत इति वशवर्तिन्यधीना बभूव ॥

मदपारवश्यं तावदाह—

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥

घूर्णमानेति ॥ ईश्वरो घूर्णमाननयनं भ्राम्यन्नेत्रं स्खलत्कथं स्खलद्वचनं स्वेदबिन्दुमत्स्वेदयुक्तमकारणस्मितमाकस्मिकहासयुक्तमुमामुखं तावत् । आ तृष्णापगममित्यर्थः । आननेन मुखेन न पपौ । न चुचुम्बेत्यर्थः । किंतु चिरं चक्षुषा पपौ । तृष्णयाद्राक्षीदित्यर्थः । तस्या मदपारवश्यं दृष्ट्वा मुदं तावदन्वभूदित्यर्थः ॥

संप्रति प्रियवशंवदत्वमाह—

तां विलम्बितपनीयमेखलामुद्वहञ्जघनभारदुर्वहाम् ।
ध्यानसंभृतिविभूतिसंभृतं प्राविशन्मणिशिलागृहं हरः ॥ ८१ ॥

तामिति ॥ हरो विलम्बितपनीयमेखलां विस्रंसिहेमरसनां जघनभारेण दुर्वहां तां पार्वतीमुद्वहन्ध्यानसंभृतया संकल्पमात्रसिद्धया विभूत्या भोगसाधनेन संभृतं संपूर्णं मणिशिलागृहं प्राविशत् । रिरंसुरिति भावः ॥

तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ॥८२॥

तत्रेति ॥ तत्र मणिभवने हंसवद्धवल उत्तरच्छदः प्रच्छदपटो यस्य तत्तथोक्तं जाह्नवीपुलिनमिव चारुदर्शनं शयनं शय्यां रोहिणीपतिश्चन्द्रः शरदि भवं शारदमभ्रं मेघमिव । शरद्ग्रहणं धावल्यार्थम् । प्रियासखः सन् । प्रियया सहेत्यर्थः । अध्यशेत शयितवान् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् ॥ रोहिणीग्रहणसामर्थ्यादिन्दोरप्यभ्रारोहणे रोहिणीसाहित्यमनुसंधेयम् ॥

क्लिष्टचन्द्रमदयैः कचग्रहैरुत्पथार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभूदतृप्तये ॥ ८३ ॥

क्लिष्टेति ॥ अदयैर्निर्दयैः कचग्रहैः केशाकर्षणैः क्लिष्टचन्द्रं पीडितहरचन्द्रमुत्पथमुन्मर्यादमर्पिता नखा यस्मिंस्तत्समत्सरमन्योन्यविजिगीषापूर्वकं छिदुराः स्वयमेव छिद्यमाना मेखलागुणा यस्मिंस्तत्तथोक्तम् ॥ "विदिभिदिच्छिदेः कुरच्" इति कुरच्प्रत्ययः । "कर्मकर्तरि" इति काशिका ॥ पार्वतीरतं तस्येश्वरस्यातृप्तयेऽभूत् । तृप्तये नाभूदिति भावः ॥

केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्परिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥ ८४ ॥

केवलमिति ॥ प्रियतमादयालुना केवलम् । प्रियतमायां दययैव तस्येश्वरस्य सौकुमार्यादनवरतं सुरतासहिष्णुत्वात् । न तु स्वयं तृप्तेत्यर्थः । तत्परिगृहीतवक्षसा तया पार्वत्याश्लिष्टवक्षसा तेनेश्वरेण ज्योतिषां नक्षत्राणां पङ्क्तिष्ववनतासु गतीषु । पश्चिमायामित्यर्थः । नेत्रमीलनकुतूहलं कृतम् । निद्रा स्वीकृतेत्यर्थः ॥

स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।
मूर्छनापरिगृहीतकैशिकैः किंनरैरुषसि गीतमङ्गलैः ॥ ८५ ॥

स इति ॥ बुधस्तवोचितो विबुधस्तोत्रार्हः स हर उषसि प्रभाते । स्वराणामारोहक्रमो मूर्छना ॥ "क्रमयुक्ताः स्वराः सप्त मूर्छनेत्यभिसंज्ञिता" इति भरतः ॥ तया मूर्छनया परिगृहीतः कैशिकः कैशिकाख्यो ग्रामरागो यैस्तैः किंनरैर्गीतमङ्गलैः सन् । शातकुम्भकमलाकरैः समं कनककमलाकरैः सह ॥ "तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम्" इत्यमरः ॥ व्यबुध्यत विबुद्धवान् ॥ बुध्यतेर्दैवादिकात्कर्तरि लङ् ॥ अत्र बुध्यतेर्जागरविकासयोर्धर्मयोः श्लेषनिबन्धनाभेदाध्यवसायमूला सहोक्तिरलंकारः ॥

तौ क्षणं शिथिलितोपगूहनौ दंपती चलितमानसोर्मयः ।
पद्मभेदनिपुणाः सिषेविरे गन्धमादनवनान्तमारुताः ॥ ८६ ॥

प दोषो नपुंसकपूर्वपदत्वात् । यथाह वृत्तिकारः— "दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात्सिद्धम्" इति । भोजराजस्तु— "भज्यत इति कर्मसाधनस्यैव प्रियादिपाठतया दृढभक्तिरिति न तु भजनं भक्तिरिति भावसाधनस्य । अतोऽत्र स्त्रीपूर्वपदत्वेऽपि न दोष" इत्याह ॥

पार्वती तदुपयोगसंभवां विक्रियामपि सतीं मनोहराम् ।
अप्रतर्क्यविधियोगनिर्मिता नम्रतेव सहकारतां ययौ ॥ ७८ ॥

पार्वतीति ॥ [अस्य श्लोकस्य व्याख्या नोपलब्धा] ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ॥७९॥

तदिति ॥ सुवदना पार्वती तत्क्षणं तथैव विपरिवर्तितह्रियोर्निवर्तितलज्जयोः शयनं तल्पं नेष्यतोः प्रापयिष्यतोरित्थं मद्धो रागोऽनुराग आरुण्यं च ययोरिद्धरागयोः शूलिनः प्रियतमस्य मदस्य चेति द्वयोर्वशे वर्तत इति वशवर्तिन्यधीना बभूव ॥

मदपारवश्यं तावदाह—

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥

घूर्णमानेति ॥ ईश्वरो घूर्णमाननयनं भ्राम्यन्नेत्रं स्खलत्कथं स्खलद्वचनं स्वेदबिन्दुमत्स्वेदयुक्तमकारणस्मितमाकस्मिकहासयुक्तमुमामुखं तावत् । आ तृष्णापगममित्यर्थः । आननेन मुखेन न पपौ । न चुचुम्बेत्यर्थः । किंतु चिरं चक्षुषा पपौ । तृष्णयाद्राक्षीदित्यर्थः । तस्या मदपारवश्यं दृष्ट्वा मुदं तावदन्वभूदित्यर्थः ॥

संप्रति प्रियवशंवदत्वमाह—

तां विलम्बितपनीयमेखलामुद्वहञ्जघनभारदुर्वहाम् ।
ध्यानसंभृतिविभूतिसंभृतं प्राविशन्मणिशिलागृहं हरः ॥ ८१ ॥

तामिति ॥ हरो विलम्बितपनीयमेखलां विस्रंसिहेमरसनां जघनभारेण तां पार्वतीमुद्वहन्ध्यानसंभृतया संकल्पमात्रसिद्धया विभूत्या भोगसाधनेन संपूर्णं मणिशिलागृहं प्राविशत् । रिरंसुरिति भावः ॥

तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ॥८

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां सार्धमेका निशेव।
न स सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समेति ॥ निशीथोऽत्र निशामात्रलक्षकः । समदिवसनिशीथं तुल्याहर्निशं यथा तथा तत्र तस्यां पार्वत्यां सङ्गिन आसक्तस्य । रात्रिंदिवं रममाणस्येत्यर्थः । शंभोः शिवस्य सार्धमर्धेन सहितमृतूनां शतं पञ्चाशदुत्तरं मानुषमानेन पञ्चविंशतिवर्षाण्यगमत् । स शंभुः समुद्रान्तर्गतः समुद्रस्यान्तर्वर्तिज्ज्वलनो वडवाग्निरिव तज्जलौघैस्तस्य समुद्रस्य प्रवाहैरिव सुरतसुखेभ्यश्छिन्नतृष्णो निवृत्ताभिलाषो न बभूव । किंतु चिरमवर्धतेत्यर्थः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये उमासुरतवर्णनं नामाष्टमः सर्गः ।

ताविति ॥ शिथिलितोपगूहनौ शिथिलितालिङ्गनौ । जाया च पतिश्च दं
ती ॥ जायाशब्दस्य दंभावो निपातितः ॥ तौ शिवौ रचितमानसोर्मयः । मानसे
ररि रचिततरंगा इत्यर्थः । पद्मभेदनिपुणाः पद्मभेदपिशुना इति यावत् । विकास
चका इत्यर्थः । गन्धमादनवनान्तमारुताः क्षणं सिषेविरे ॥

ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७

ऊर्वेति ॥ तत्क्षणं मारुतवीजनसमय ऊरुमूले नखमार्गराजिभिर्नखपदपङ्क्तिभिः
मरुता प्रसारितवस्त्रतया प्रकाशिताभिरित्यर्थः । हृतविलोचन आकृष्टदृष्टिर्हरः प्रशि
थिलस्य वाससः संयमं बन्धनं कुर्वतीं प्रियतमामवारयत् ॥

स प्रजागरकषायलोचनं गाढदन्तपदताडिताधरम् ।
आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥८८॥

स इति ॥ रागवान्रागी स हरः प्रजागरेण कषायलोचनं रक्तनेत्रं गाढैर्दन्त
पदैर्दन्तक्षतैस्ताडिताधरमाकुलालकं भिन्नतिलकं प्रियामुखं प्रेक्ष्यारंस्तान्वरज्यत
तादृङ्मुखदर्शनमेव तस्योद्दीपकमित्यर्थः ॥

तेन भङ्गिविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ८९

तेनेति ॥ तेन हरेण भङ्गिभिर्भङ्गैर्विषमो निम्नोन्नत उत्तरच्छदः प्रच्छदपटो
यस्मिंस्तत् । मध्ये पिण्डिता पुञ्जीकृता विसूत्रमेखला छिन्नरशना यस्मिंस्तत्तथोक्तं
चरणयो रागेण लाक्षारागेण लाञ्छितं चिह्नितं शयनं निशात्यये प्रभाते निर्मले-
ऽपि । सूर्योदये सत्यपीत्यर्थः । नोज्झितं न त्यक्तम् । अत्र देव्याः सकलसुरतोपचा-
रसंपन्नत्वं पुरुषायितं सूच्यते ॥

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदितः ॥ ९० ॥

स इति ॥ स हरो हर्षवृद्धिजननं सुखातिशयकारणं प्रियामुखरसं मदिरामृ-
तं दिवा च निशि च दिवानिशम् ॥ द्वन्द्वैकवद्भावः ॥ सिषेविषुः सेवितुमिच्छुः
सन् । विजयानाम्नी काचिद्देव्याः सखी तया निवेदितः । एतदर्थमागते
पितोऽपीत्यर्थः । दर्शनप्रणयिनामदृश्यतामाजगाम । दर्शनं न ददावि

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां सार्धमेका निशेव ।
न स सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समेति ॥ निशीथोऽत्र निशामात्रलक्षकः । समदिवसनिशीथं तुल्याहर्निशं यथा तथा तत्र तस्यां पार्वत्यां सङ्गिन आसक्तस्य । रात्रिंदिवं रममाणस्येत्यर्थः । शंभोः शिवस्य सार्धमर्धेन सहितमृतूनां शतं पञ्चाशदुत्तरं मानुषमानेन पञ्चविंशतिवर्षाण्यगमत् । स शंभुः समुद्रान्तर्गतः समुद्रस्यान्तर्वर्ती ज्वलनो वडवाग्निरिव तज्जलौघैस्तस्य समुद्रस्य सर्वाहरिव सुरतसुखेभ्यश्छिन्नतृष्णो निवृत्ताभिलाषो न बभूव । किंतु चिरमवर्धतेत्यर्थः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये उमासुरतवर्णनं नामाष्टमः सर्गः ।

ताविति ॥ शिथिलितोपगूहनौ शिथिलितालिङ्गनौ । जाया च पतिश्च दंपती ॥ जायाशब्दस्य दंभावो निपातितः ॥ तौ शिवौ रचितमानसोर्मयः । मानसे सरसि रचिततरंगा इत्यर्थः । पद्मभेदनिपुणाः पद्मभेदपिशुना इति यावत् । विकाससूचका इत्यर्थः । गन्धमादनवनान्तमारुताः क्षणं सिषेविरे ॥

ऊरुमूलनखमार्गराजिभिस्तत्क्षण हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७॥

ऊर्विति ॥ तत्क्षणं मारुतवीजनसमय ऊरुमूले नखमार्गराजिभिर्नखपदपङ्क्तिभिः । मरुता प्रसारितवस्त्रतया प्रकाशिताभिरित्यर्थः । हृतविलोचन आकृष्टदृष्टिर्हरः प्रशिथिलस्य वाससः संयमं बन्धनं कुर्वतीं प्रियतमामवारयत् ॥

स प्रजागरकषायलोचनं गाढदन्तपदताडिताधरम् ।
आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥८८॥

स इति ॥ रागवान्रागी स हरः प्रजागरेण कषायलोचनं रक्तनेत्रं गाढैर्दन्तपदैर्दन्तक्षतैस्ताडिताधरमाकुलालकं भिन्नतिलकं प्रियामुखं प्रेक्ष्यारंस्तान्वरज्यत । तादृङ्मुखदर्शनमेव तस्योद्दीपकमित्यर्थः ॥

तेन भङ्गिविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ८९

तेनेति ॥ तेन हरेण भङ्गिभिर्भङ्गैर्विषमो निम्नोन्नत उत्तरच्छदः प्रच्छदपटो यस्मिंस्तत् । मध्ये पिण्डिता पुञ्जीकृता विसूत्रमेखला छिन्नरशना यस्मिंस्तत्तथोक्तं चरणयो रागेण लाक्षारागेण लाञ्छनं चिह्नितं शयनं निशात्यये प्रभाते निर्मलेऽपि । सूर्योदये सत्यपीत्यर्थः । नोज्झितं न त्यक्तम् । अत्र देव्याः पुरुषायितं सूच्यते ॥

— निशाप्रवरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां सार्धमेका निशेव ।
न स सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समेति ॥ निशीथोऽत्र निशामात्रलक्षकः । समदिवसनिशीथं तुल्याहर्निशं यथा तथा तत्र तस्यां पार्वत्यां सङ्गिन आसक्तस्य । रात्रिंदिवं रममाणस्येत्यर्थः । शंभोः शिवस्य सार्धमर्धेन सहितमृतूनां शतं पञ्चाशदुत्तरं मानुषमानेन पञ्चविंशतिवर्षाण्यगमत् । स शंभुः समुद्रान्तर्गतः समुद्रस्यान्तर्वर्ती ज्वलनो वडवाग्निरिव तज्जलौघैस्तस्य समुद्रस्य प्रवाहैरिव सुरतसुखेभ्यश्छिन्नतृष्णो निवृत्ताभिलाषो न बभूव । किंतु चिरमवर्धतेत्यर्थः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये उमासुरतवर्णनं नामाष्टमः सर्गः ।

तामिति ॥ शिथिलितोपगूहनां शिथिलितालिङ्गनां । जाया च पतिश्च दंप-
ती ॥ जायाशब्दस्य दंभावो निपातितः ॥ तां शिवां रतिनमानसोमेयः । मानसे स-
रसि रचिततरंगा इत्यर्थः । पद्मभेदनिपुणाः पद्मभेदपिशुना इति यावत् । विकाससू-
चका इत्यर्थः । गन्धमादनवनान्तमारुताः क्षणं सिषेविरे ॥

उरुमूलनखमार्गराजिभिस्तत्क्षण हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥८७॥

ऊर्विति ॥ तत्क्षणं [illegible] भिः ।
मरुता प्रसारितवस्त्रतया [illegible] शि-
थिलस्य वाससः संयमं बन्धनं कुर्वतीं प्रियतमामवारयत् ॥

स प्रजागरकषायलोचनं गाढदन्तपदताडिताधरम् ।
आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥८८॥

स इति ॥ रागवान्रागी स हरः प्रजागरेण कषायलोचनं रक्तनेत्रं गाढैर्दन्त-
पदैर्दन्तक्षतैस्ताडिताधरमाकुलालकं भिन्नतिलकं प्रियामुखं प्रेक्ष्यारंस्तान्वरज्यत ।
तादृङ्मुखदर्शनमेव तस्योद्दीपकमित्यर्थः ॥

तेन भङ्गिविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ८९

तेनेति ॥ तेन हरेण भङ्गिभिर्भङ्गैर्विषमो निम्नोन्नत उत्तरच्छदः प्रच्छदपटो
यस्मिंस्तत् । मध्ये पिण्डिता पुञ्जीकृता विसूत्रमेखला छिन्नरसना यस्मिंस्तत्तथोक्तं
चरणयो रागेण लाक्षारागेण लाञ्छितं चिह्नितं शयनं निशात्यये प्रभाते निर्मले-
ऽपि । सूर्योदये सत्यपीत्यर्थः । नोज्झितं न त्यक्तम् । अत्र देव्याः सकलसुरतोपचा-
रसंपन्नत्वं पुरुषायितं सूच्यते ॥

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदितः ॥ ९० ॥

स इति ॥ स हरो हर्षवृद्धिजननं सुखातिशयकारणं प्रियामुखरसं मदिरामृ-
तं दिवा च निशि च दिवानिशम् ॥ द्वन्द्वैकवद्भावः ॥ सिसेविषुः सेवितुमिच्छुः
सन् । विजयानाम्नी काचिद्देव्याः सखी तया निवेदितः । एतदर्थमागतो
पितोऽपीत्यर्थः । दर्शनप्रणयिनामदृश्यतामाजगाम । दर्शनं न ददावित्यर्थः

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां सार्धमेका निशेव ।
न स सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

समेति ॥ निशीथोऽत्र निशामात्रलक्षकः । समदिवसनिशीथं तुल्याहर्निशं यथा तथा तत्र तस्यां पार्वत्यां सङ्गिन आसक्तस्य । रात्रिंदिवं रममाणस्येत्यर्थः । शंभोः शिवस्य सार्धमर्धेन सहितमृतूनां शतं पञ्चाशदुत्तरं मानुषमानेन पञ्चविंशतिवर्षाण्यगमत् । स शंभुः समुद्रान्तर्गतः समुद्रस्यान्तर्वर्तिज्वलनो वडवाग्निरिव तज्जलौघैस्तस्य समुद्रस्य प्रवाहैरिव सुरतसुखेभ्यश्छिन्नतृष्णो निवृत्ताभिलाषो न बभूव । किंतु चिरमवर्धतेत्यर्थः ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसंभवे
महाकाव्ये उमासुरतवर्णनं नामाष्टमः सर्गः ।